The Śatapatha Brāhmana

in

The Kānvīya Recension

EDITED

FOR THE FIRST TIME

BY

Professor Dr. W. CALAND

Late of the university of Utrecht (Holland)

REVISED BY

Prof. RAGHU VIRA, M. A., Ph. D., D. Litt. et Phil.,

Director International Academy of Indian Culture, Lahore.

Vol. II, Part 2.

Published by

MOTI LAL BANARSI DASS

The Punjab Sanskrit Book Depot, Lahore.

June, 1939.

Published by
SUNDAR LAL JAIN
Proprietor
The Punjab Sanskrit Book Depot, Lahore.

(All Rights Reserved)


June, 1939.

Printed by
Mr. SADHU RAM, M. A.
at the Arya Bharati Printing Works,
The International Academy of Indian Culture, Lahore.

THE

PUNJAB ORIENTAL SERIES

No. X



THE

PUNJAB ORIENTAL SERIES

OR

A COLLECTION OF RARE AND UNPUBLISHED BOOKS RELATING TO

ANCIENT INDIA

Edited by

WELL-KNOWN AND EMINENT SCHOLARS

OF

INDIA, EUROPE AND AMERICA

NO. 10

LAHORE (India)

THE PUNJAB SANSKRIT BOOK DEPOT


June, 1939.

It gives me unbounded satisfaction that this unique Vedic text, that has been awaiting publication since 1912, has today been completed and is presented to the scholarly world for the first time.

During the course of these years there have been a few losses in the press-copy, viz., the manuscript variants for pages 173, 174, 224–237, 457–465. In January last I had hoped that it would be possible to re-collect the MSS. and re-construct the variants. But actual experience has been rather bitter.

My thanks are particularly due to the Publishers, who after all realised the danger of delay, and cooperated with me in getting the work through at one stretch. The Academy's Printing Press had also to stand extraordinary stress during the printing of this book and had to stop every other work all the while.

20th June, 1939 **Raghu Vira**



V. V. S. College Library, Hyderabad

K. III. 1. 11 M. II. 3. 3

स वा अनुपहतपाप्मानं परीत्य जघनेन वा गार्हपत्यमन्तरेणेत्वोपविशति स 13
यदन्तरेणेत्वोपविशति न ह वै देवा मनुष्यं विदुरयमस्माकमस्य वयꣳ स्म इति तꣳ
ह्वैवमन्तरेण यन्तं विदुरयमस्माकमस्य वयꣳ स्म इति तस्मै ह तं कामꣳ समर्धयति
यस्मै कामायान्तरेणोपविशति[1] ॥१॥

अथ यद्वेवान्तरेणोपविशत्यपहतपाप्मानो[2] वै देवा अनपहतपाप्मानो मनुष्या-
स्तस्य ह्वैवमन्तरेण यतो[3] ऽग्नी पाप्मानमपहतस्तं पाप्मा नाभ्यत्येति सो ऽपहतपाप्मा
भवति ॥२॥

अथ यद्वेवान्तरेणोपविशत्येषा वै नौः[4] स्वर्ग्या यदग्निहोत्रं तस्या एतस्या नावः[5] 15.16a
स्वर्ग्यायाः क्षीरहोतैव नावाजस्तामतः[6] प्राचीमभ्यजति तस्या अतो ऽधिरोहणं तामतो
ऽधिरोहति ॥३॥

स यद्ध दक्षिणत उपासीत यथा पारार्थे[7] नौर्ह्यादेवꣳ ह तदथ यद्धुते 16b.14
पुनरैति तत्स्वर्गं लोकं प्रतितिष्ठत्येतद्वै स्वर्गस्य लोकस्य द्वारꣳ स यदन्तरेणेत्वोपविशति
तत्स्वर्गं लोकं प्रपद्यते ॥४॥

अथ यद्ध दक्षिणत उपासीत यथा द्वारेण प्रपिपत्सेतैवꣳ[8] ह तदथ यद्धुते
पुनरैति तत्स्वर्गे लोके प्रतितिष्ठति ॥५॥

एष वाव प्रजापतिर्यज्ञो यदग्निहोत्रं तस्यैतस्य प्रजापतेर्यज्ञस्य यजमान एव
प्राणो यावद्ध्येव[9] यजमानः प्राणेन प्राणिति तावदेव जुहोत्यथ यदा प्राणो ऽपक्रामत्यथ[10]
व्यवच्छिद्यते स यदन्तरेणेत्वोपविशति प्राण एव तद्भूत्वा प्रविशत्यथ यद्धुते पुनरैत्युदान
एव तद्भूत्वा पुनरैति स वा अयं पुरुषो ऽसै प्राणायानार्तिं कामयत एवꣳ ह्यस्या एता
देवता अनार्तिं[11] कामयन्ते स ह[12] नच्छ्रत्यक्षीयꣳ[13] ह जयति य एवमेतद्वेद स यदास्मा-
ल्लोकात्प्रैत्यथास्यैत एवाग्नयः प्राणा भवन्त्यक्षीयं[13] वा अमृतमेते प्राणास्तस्य ह्याक्षीयꣳ[13]
सुकृतं भवत्यक्षीयꣳ[13] ह जयति य एवमेतद्वेद[14] ॥६॥ एकादशं ब्राह्मणम् ॥

1 विशति B. 2 °पाप्मानो B. 3 यतो B.
4 नौ B N My. 5 नावः C N. 6 नावाज° B.
7 Thus B C N, पाराद्धं My, पारार्ध्यं T, हरार्तं M.
8 प्रपिपत्सेतैवꣳ C, प्रपिपत्येतैवꣳ M, प्रतिपत्सेतैवꣳ B N
My. 9 यावद्ध्येव B N. 10 पक्रामत्यथ B N.
11 अनार्तिं B N. 12 ह्यानर्छत्यं B N, ह्यानर्छत्यꣳ C My,

हानर्चत्य° M; °क्षय्य° instead of °क्षीय° again M.
13 अक्षय्य instead of अक्षीय each time M.
14 °वेद MSS.

M. XI. 1. 6 K. III. 1. 12

1 आपो ह वा इदमग्र आसुः सलिलमेव ता अकामयन्त कथं नु प्रजायेमहीति ता अश्राम्य°स्तास्तपो ऽतप्यन्त तास्वन्तर्हिरण्मयमाण्ड° संबभूव तद्जातो ह तर्हि संवत्सर आसीद्यावती तु संवत्सरस्य वेला तावदिद° हिरण्मयमाण्डमास्वेवाप्सु परिपुप्लुवे ॥१॥

2 तदन्तः पुरुषः संबभूव स प्रजापतिर्यत्स[1] पुरुषः संबभूव स इदं द्विधाण्डं[2] व्यरुजत् ॥२॥

तद्वै सो ऽजायत तस्मात्संवत्सर एव स्त्री वा गौर्वा बलवा वा विजायते संवत्सरे हि प्रजापतिरजायत तद्जातो ह तर्हि संवत्सर आसीद्यावती तु संवत्सरस्य वेला तावदयमिमे बुकले बिभ्रदास्वेवाप्सु[3] परिपुप्लुवे ॥३॥

3 स संवत्सरे व्याजिहीर्षत्स भूरिति व्याहरत्तदिमं लोकमजनयत भुव इति द्वितीयं तदिममन्तरिक्षलोक° स्वरिति तृतीयं तदमुं देवलोकमेवमिमांल्लोकानजनयत तान्जनयित्वानूदतिष्ठत्तस्मात्संवत्सर[4] एव जातः कुमार उत्तिष्ठासति संवत्सर उत्तिष्ठति संवत्सरे व्याजिहीर्षति[5] संवत्सरे व्याहरत्येव° हि प्रजापतिरकरोत् ॥४॥

4 स वा एतत्प्रजापतिः प्रथमं वदन्नेकाक्षरद्व्यक्षरमवदत्तस्मादयं[6] जातः कुमारः प्रथमं वदन्नेकाक्षरद्व्यक्षरं वदति ॥५॥

5.6 तानि वा एतानि पञ्चाक्षराणि तानृतूनकुरुत तस्मात्पञ्चर्तव इत्याहुरेतानृतूनकुरुतेति स ह सहस्रायुषे[7] जज्ञे स यथा नद्याः पारं परापइयेदेव° ह स्वस्यायुषः पारं पराचख्यौ ॥६॥

7.8 सो ऽर्चञ्छाम्यन्प्रजाकामश्चचार स आत्मन्येव प्रजातिमधत्त सो ऽसिसृक्षत स आस्येनैव[8] देवान्जनयां चक्रे ते देवा दिवमेवाभिपद्याजायन्त तस्माद्देवा नाम यद्दिवमभिपद्याजायन्त तस्मा उ वै प्रजापतये देवान्त्ससृजानाय दिवेवाभवत्तस्माद्धैव[9] देवा नाम यदस्मै देवान्त्ससृजानाय दिवेवाभवद्वाचा प्राणेनासुरा°स्ते ऽसुरा इमामेव पृथिवीमभिपद्याजायन्त ॥७॥

स होवाचास्विव बत मे ऽराधीति[10] तस्मादसुरा नाम तस्मा उ वै प्रजाप-

तये ऽसुरान्त्ससृजानाय तम[१२] इवाभवत् ॥८॥

स हेक्षां चक्रे प्रजापतिः पाप्मानं वा असृक्षि य इमानसृक्षीति ताꣳस्तत 9
एव पाप्मनाविध्यत्तान्पराभावयत्तस्मादाहुर्नैतदस्ति[१३] यद्दैवासुरमिति जनयित्वा ह्येव तान्प्रजापतिः पिता पराभावयदिति ॥९॥

तस्मादप्येतदृषिणाभ्यनूक्तं यदचरस्तन्वा वावृधानो बलानीन्द्र[१४] प्रब्रुवाणो 10
जनेषु । मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं[१५] ननु[१६] पुरा विवित्स[१७] इति जनयित्वा ह्येव तान्प्रजापतिः पिता पराभावयदित्यथ[१८] प्रजननेनैवेमाः प्रजाः ससृजे या इमाः प्रजाः[१९] प्रजननेन प्रजायन्ते तस्माद्विमाः प्रजाः प्रजननेनैव प्रजायन्ते ॥१०॥

स होवाच मन इव वत मे ऽमोषिषुरिति तस्मान्मनुष्या नामैवं प्रजापति- 11
रिमाः प्रजा असृजत स यदस्मै देवान्त्ससृजानाय दिवेवाभवत्तद्दहरकुरुताथ यदस्मा असुरान्त्ससृजानाय तम इवाभवत्ताꣳ रात्रिमकुरुतैवमुभे अहोरात्रे असृजत ॥११॥

स हेक्षां चक्रे प्रजापतिः सर्वं वा इदमत्सारिषं य इमा देवता असृक्षीति 12
तस्मात्सर्वत्सरो नाम सर्वत्सरो ह वै नामैतद्यत्संवत्सर इत्याहुः स यो हैनं पाप्मा[२०] मायया त्सरति स हैव पराभवत्यथ[२१] यꣳ स त्सरति यं तुस्तूर्षत्यभि[२२] हैवैनं भवति य एताꣳ संवत्सरस्य सर्वत्सरतां वेद ॥१२॥

स हेक्षां चक्रे प्रजापतिरिमां वा आत्मनः प्रतिमामसृक्षि यत्संवत्सरमिति 13
तस्मात्संवत्सरः प्रजापतिरित्याख्यायते चतुरक्षरो[२३] हि संवत्सरश्चतुरक्षरः[२४] प्रजापति- स्तेनो एवास्य प्रतिमा ॥१३॥

ता वा एता देवता असृज्यन्ताग्निरिन्द्रः सोमः परमेष्ठी प्राजापत्यस्ते ह 14.15
सहस्रायुषे जज्ञिरे ते यथा नद्याः पारं परापइयेयुरेवꣳ ह स्वस्यायुषः पारं पराचख्युः ॥१४॥

ते हार्चन्तः श्राम्यन्तश्चेरुस्ततो हैतं परमेष्ठी प्राजापत्यो यज्ञं ददर्श यद्- 16
र्शपूर्णमासौ ताभ्यामीजे ताभ्यामिष्ट्वाकामयताहमेवेदꣳ सर्वꣳ स्यामिति स आपो ऽभवत्तस्मादाहुराप एवेदꣳ सर्वꣳ[२५] सर्वꣳ हि सो ऽभवदित्यथ यत्परमेष्ठीत्याख्यायते[२६] यो वा इह खनेत्परम[२७] एवैनाः स्थाने विन्देत्परमाद्धै तत्स्थानाद्वर्षति तस्मात्परमेष्ठीत्या- ख्यायते ॥१५॥

स होवाच प्रजापतिं कामप्रं वा इमं यज्ञमदर्शं तेन त्वा याजयानीति तथेति 17
तेन हैनं याजयां चकार स एतेनेष्ट्वाकामयत प्रजापतिरहमेवेदꣳ सर्वꣳ स्यामिति

स प्राणो ऽभवत्तस्मादाहुः प्राणः प्रजापतिरिति तस्मादाहुः प्राण एवेदꣳ सर्वꣳ सर्वꣳ हि सो ऽभवदित्यथं वाव प्राणो यो ऽयं पवते तस्य हैतस्य दृष्टिर्यदेवैनं वेदेतो वातीति तदु तत्परोक्षमिव यद्वाव किं च प्राणिति स प्राणः स यो हैतां प्रजापतेर्दृष्टिं वेदाविरिव हैव भवति ॥१६॥

18 स होवाचेन्द्रं येन मामयं परमेष्ठी यज्ञेनायीयजत्तेन त्वा याजयानीति तथेति तेन हैनं याजयां चकार स एतेनेष्ट्वाकामयतेन्द्रो ऽहमेवेदꣳ सर्वꣳ स्यामिति स वागभवत्तस्मादाहुरिन्द्रो वागिति तस्मादाहुर्वागेवेदꣳ सर्वꣳ सर्वꣳ हि सो ऽभवदिति ॥१७॥

19 स होवाचाग्नीषोमौ येन मामयं प्रजापतिर्यज्ञेनायीयजत्तेन वां याजयानीति तथेति तेन हैनौ याजयां चकार तावेतेनेष्ट्वाकामयेतामग्नीषोमावावमेवेदꣳ[२७] सर्वꣳ स्यावेति तयोरन्नमेवान्यतरो ऽभवदन्नादो ऽन्यतरो ऽन्नमेव सोमो[२८] ऽभवदन्नादो[२९] ऽग्निरेतावद्वा[३०] इदमन्नं चैवान्नादश्च ॥१८॥

20 स एष[३१] कामप्रो यज्ञस्तद्यत्कामा वा एतेन यज्ञेनैता देवता अयजन्त स आभ्यः कामः समार्ध्यत स यत्कामो हैतेन यज्ञेन यजते सो ऽस्मै कामः समृध्यते ॥१९॥

21 तेभ्यो देवेभ्य ईजानेभ्य इयं प्राची दिक् प्रारोचत तां प्राचीमकुर्वत तस्मादेषा प्राची दिगित्याख्यायत उपैनामितः कुर्वीमहीति तामूर्जमकुर्वत[३२] प्राचीꣳ हि वै दिशमूर्जमकुर्वत तस्माद्विमाः प्रजा[३३] प्राच्य[३४] एव सर्पन्तीमामूर्जं[३५] पश्येमेति ते ऽमुं देवलोकमकुर्वत[३६] तस्मादमुतो ऽर्वाचीमूर्जमुपजीवन्ति ॥२०॥

22 अथैभ्य[३७] इयं दक्षिणा दिक् प्रारोचत तां दक्षिणामकुर्वत तस्माद्दक्षिणतो[३८] दक्षिणा उपकल्पा[३९] उपतिष्ठन्ते[४०] दक्षिणतो ऽभ्यवयन्त्येतां हि दक्षिणामकुर्वतोपैनामितः कुर्वीमहीति तं लोकमकुर्वतेमं लोकं पश्येमेति त इममन्तरिक्षलोकमकुर्वत तद्यदाहुः[४१] परोक्षमिवासौ लोक इति यदस्माल्लोकादेतं लोकमनारम्भणमिवायतमिव[४२] मन्यन्ते यथाविरिव[४३] यथा प्रतिष्ठेवास्मिंल्लोके[४४] ऽयं लोक एवमाविरिव वा एवं प्रतिष्ठेवामुष्मिंल्लोक[४५] एष[४६] लोकः ॥२१॥

23 अथैभ्य[४७] इयं प्रतीची दिक् प्रारोचत तामाशामकुर्वतैताꣳ हि वै दिशमाशामकुर्वत तस्माद्यो ऽपीहाग्रेण लभत एतामेव दिशं धावयत्युपैनामितः[४८] कुर्वीमहीति ताꣳ श्रियमकुर्वतेमाꣳ श्रियं पश्येमेति त इमां पृथिवीमकुर्वतेमाꣳ हि वै श्रियमकुर्वत तस्माद्यो ऽस्या भूयिष्ठं भजते स श्रैष्ठ्यं गच्छति ॥२२॥

अथैभ्य[४५] इयमुदीची दिक् प्रारोचत तामपो[४७] ऽकुर्वतोपैनामितः कुर्वमहीति तं धर्ममकुर्वतापो[४८] हि वै धर्ममकुर्वत तस्माद्यदहाप आगच्छन्त्यथ यथाधर्म[४९] भवत्यथ यदापो[५०] नागच्छन्ति बलीयानबलीयस आदत्ते न हि धर्म आगच्छति ॥२३॥ 24

ता वा एता एकादश देवता असृज्यन्तैकादशो[५१] वा एता आहुतयः पञ्च प्रयाजा द्वावाज्यभागौ त्रयो ऽनुयाजाः स्विष्टकृत्त एताभिरेकादशभिराहुतिभिर्देवा एता दिश एतांल्लोकानजय[५२]न्तथो वा एष एताभिरेकादशभिराहुतिभिरेता दिश एतांल्लोकान् जयति ॥२४॥ 25.26

अथेलान्नाद्यमेवैतया देवा अजय[५३]न्तथो वा एष एतयान्नाद्यमेव जयति ॥२५॥ 28

अथ चत्वारः पत्नीसंयाजाश्चतस्रो वा अवान्तरदिशो ऽवान्तरदिशो वा एतैर्देवा अजय[५४]न्तथो वा एष एतैरवान्तरदिश[५५] एव जयतीति[५६] न्वधिदेवतम् ॥२६॥ 27

अथाध्यात्मं पञ्च प्रयाजास्त इमे पञ्च शिरस्याः[५७] प्राणा द्वावाज्यभागौ ते चक्षुषी त्रयो ऽनुयाजास्तानि शिश्नानि य[५८] एष वर्षिष्ठो ऽनुयाजस्तदेतद्वर्षिष्ठ[५९] शिश्नं तस्मात्तमनवानं यजेदित्याहुस्तथास्यामृद्ध[६०]ं शिश्नं भवतीति तद्वावान्यादेव[६१] सकृद्यद्धानवानं यजेत्प्रतृण्णं[६२] वा हैव तिष्ठेत्पन्नं[६३] वा स यत्सकृदेवावानित्येकं[६४] वा एतस्य पर्व तदेवास्मिन्नेतद्दधाति तस्मादेतदुच्च तिष्ठति पच्यते च ॥२७॥ 29.31-32

अथ[६५] यो ऽयमवाङ् प्राण एष स्विष्टकृत्स[६६] यदवत्तस्यावत्तस्य[६७] स्विष्टकृते ऽवद्यति तस्माद्यत्किं चेमान्प्राणानापद्यत एतमेव प्राणं गच्छत्यथ यदभ्यर्ध इतराभ्य आहुतिभ्य एतामाहुतिं जुहोति तस्माद्इमे प्राणा एतस्मात्प्राणाद्बीभत्सन्ते ऽथेला सो ऽयमनिरुक्तः प्राणः स यदेतामाहुतिꣳ सतीं नाग्नौ जुह्वत्येष्वेव प्राणेषु हूयते तस्मादयं प्राणः सन्ननपविद्धः ॥२८॥ 30

अथ चत्वारः पत्नीसंयाजास्ता इमाः प्रतिष्ठा बाहू द्वा ऊरू द्वावस्थीनि ह वाव याज्यानुवाक्या मा[६८]ꣳसमेव हविस्तानि वा एतानि मितानि छन्दा[६९]ꣳसि यद्याज्यानुवाक्या अथामितमेव हविरुताल्पं भवत्युत[७०] बहु तस्मान्मा[७१]ꣳसान्येव कृद्यतः[७२] कृद्यन्ति[७३] मा[७४]ꣳसानि मेद्यतो मेद्यन्ति[७५] स यावन्मात्राण्येवास्थीन्य[७६]ꣳसलस्य च भवतः[७७] कृशस्य[७८] च स एतेन यज्ञेन यां देवतां कामयते तां यजति स नात एकतमां चनाहुतिमुद्धरति[७९] यद्धात एकतमां चिदाहुतिमुद्धरेद्यथाङ्गं वा प्रश्रृणीयात्प्राणं[८०] वा निर्हण्यादेव[८१]ꣳ ह तद्भविरेवा[८२] वा[८३] हरत्यप वोद्धरति षोडशकलो वै पुरुषः पुरुषो 33-36

वै यज्ञस्तस्मादेता[३१] अच्युताः[३२] षोलशाहुतयो भवन्ति पुरुषो हि यज्ञः ॥२९॥ द्वादशं ब्राह्मणम् ॥ प्रथमो ऽध्यायः ॥

1 Thus B N C My, °पतिर्यस्तु T, °पतिर्यस्य M Read प्रजापतिर्यः स ? 2 द्विधा° MSS. 3 Thus MSS. 4 °मंतरिक्षलोकꣳ B N. 5 °त्वानूदतिष्ठतस्मा° B. 6 °हीर्षति B. 7 वदंस्त्रेकाक्षरमवद° B. 8 सहस्रायुषे C, सहस्रायुषे B N, सहस्रायुषी M (cp. K. 14). 9 आस्येनैव B N. 10 °त्तस्माद्वेव C My, °त्तस्मादेव B N, °त्तस्माद्देव M. 11 रायीति C B N, रायाति M My. 12 तम B N. 13 °त्तान्पराभवय° B. 14 बलानींद्र B N My. 15 शत्रुर्ननु B N My. 16 See RV X. 54. 2. 17 पराभव° B. 18 Om. MSS. except T. 19 प्राप्या B N My. 20 पराभावयत्यथ B N My. 21 तुस्तूर्षत्यभि B N, तुस्तुरिषत्यभि C, तुस्तुरिषत्यभि T. 22 Without accent the MSS. 23 संवत्सरश्चतुरक्षरः MSS. 24 Om. B T, सर्वꣳ once in N My. 25 °यते B N. 26 °त्परम B N. 27 °षोमावावामेवेदꣳ B N. 28 Thus accented the MSS. Read सोमो ऽभवद° ? 29 म्रिरेता° B N. 30 एव B N. 31 तामूर्जमकुर्वत MSS. 32 प्रजाः प्राच्य B N. 33 °मूर्ज B N. 34 °लोकमकुर्वत B. 35 अर्थेभ्य MSS. 36 °दक्षिणतो B N. 37 उप° B N. 38 उपतिष्ठते B N C (originally), उपति° C (sec. m.). 39 तद्यदाहुः B N. 40 °कमना-रोहणमि° T. 41 यथाविरिवैव N My (in B this word is wanting). 42 प्रतिष्ठेवा° C N, प्रतिष्ठेवा° B; °लोके B N. 43 प्रतिष्ठेवा° MSS. 44 एषु B My.

45 अथैभ्य MSS. 46 धावयत्युपनामितः MSS. 47 तामपो B N. 48 °र्वंतापो C. 49 Emended; यथाधर्मो B, यथाधर्मो C M My. 50 यदापो MSS. 51 Without accent the MSS. 52 °दिश B. 53 °ति B. 54 शिरस्याः C, शिरस्याः B. 55 स B C My. 56 °थास्यमस्थ्यं B. 57 Thus conjecturally; तद्धवान्यादेव B C My, तद्यवान्यादेव M. 58 यजेत्प्रतृण्णं C, यजेत्यतृणं B. 59 तिष्ठेत्यङ्गं B My. 60 Thus M only; °देवावागित्येकं B, °देवागित्येकं C My. 61 अथ B. 62 स्विष्टकृत्स-यदवत्तस्यावत्तस्य C, स्विष्टकृत्ययदवत्तस्यवतस्य B. 63 Read भवत्युत ? 64 Thus emended; कृष्यतः and कृष्यंति the MSS. 65 मेद्यंति MSS. 66 भवतः B C (orig.). 67 कृशस्य MSS. 68 °मुद्धरति C (orig.) corrected into °मुद्धरति. 69 Conjecturally; प्यश्रुणी° C M My, प्यश्रुणी° B. 70 °वावा B. 71 °देता अच्युताः B.

K. III. 2. 1 M. XI. 1. 2

1-3 म्नन्ति ह वा एतद्यज्ञं यदेनं तन्वते यद्राजानमभिषुण्वन्ति तत्तं म्नन्त्यथ यत्पशुꣳ संज्ञपयन्ति यद्विशासति तत्तं म्नन्त्युलूखलमुसलेन दषदुपलेन हविर्यज्ञं म्नन्ति तमेवꣳ हत्वाग्नौ योनौ रेतो भूतꣳ सिञ्चत्यग्निर्वै यज्ञस्य योनिः स ततः प्रजायते ॥१॥

स दश ता आहुतीः संपादयेद्याभ्यो वषट्क्रियते ऽयं वाव यज्ञो यो ऽयं पवते स वा अयमेक इवैव पवते सो ऽयं पुरुषे ऽन्तः प्रविष्टो दशधाविहितः स एवं प्राणैः कृत्स्नैरन्नैर्योनेरधि जायते दशाक्षरो वै विराट् सैषा संपदेव यज्ञ एव ॥२॥

4 अथो नव स्युर्न्यूनामेवैतद्विराजं करोति प्रजननाय न्यूनाद्धीमाः प्रजाः प्रजायन्ते सैषा संपदेव यज्ञ एव ॥३॥

5 अथो एकातिरिक्ता स्यात्प्रजापतिमेव साभ्यतिरिच्यते सैषा संपदेव यज्ञ एव ॥४॥

6 अथो द्वे अतिरिक्ते स्यातां द्वन्द्वं[1] मिथुनं प्रजननꣳ सैषा संपदेव[2] यज्ञ एव ॥५॥

7 अथो तिस्रो ऽतिरिक्ताः स्युर्द्वन्द्वं मिथुनं प्रजनन यज्ञायते तत्तृतीयꣳ[3] सैषा संपदेव[4] यज्ञ एव ॥६॥

8-9 अथो चतस्रो ऽतिरिक्ताः स्युर्यथैकैवं[5] चतस्रस्त्रय इमे लोकाः प्रजापतिमेवाति चतुर्थी[6] प्रजापतिमेव साभ्यतिरिच्यते सैषा संपदेव[7] यज्ञ एव तद्धोनं यद्द्वाभ्यामूनं तदु ह्यतिरिक्तं यत्पञ्चभिः स ह्ययज्ञस्तदेतदेवार्धि दशस्वा विꣳशतेरा सहस्रादेषा न्वाहुतिसंपत् ॥७॥

10-13 आजिꣳ ह वा एते धावन्ति ये दर्शपूर्णमासाभ्यां यजन्ते स पञ्चदश वर्षाणि यजेत पञ्चदशानां वै वर्षाणां त्रीणि च शतानि षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च वै शतानि षष्टिश्च संवत्सरस्य रात्रयस्तद्रात्रीराप्नोत्यथापराणि पञ्चदश वर्षाणि यजेत पञ्चदशानां वै वर्षाणां त्रीणि च शतानि षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि चो एव शतानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नोति स यदा त्रिꣳ शतं वर्षाणि यजते ऽथ संवत्सरमाप्नोति यदा ह वै देवाः संवत्सरमाप्नुवन्नथामृता[8] आसुर्मर्त्या[9] ह्वैव ततः पुरा बभूवुः सर्वं वै संवत्सरो ऽक्षीयं[10] वै सर्वं तेन हास्याक्षीय[11][12] सुकृतं भवति य एवं विद्वा[13]स्त्रिꣳशतं वर्षाणि यजते पञ्चदशो एव वर्षाणि यजते[14] दाक्षायणयज्ञी[15] सो एषात्रैव संपद् द्वे हि पौर्णमास्यौ यजते द्वे अमावास्ये ॥८॥ प्रथमं ब्राह्मणम् ॥

1 वषट्क्रियते B. 2 °क्षरा C (sec. hand).
3 °व B. 4 स्युन्यूनामेवै° B. 5 द्वंद्वं B.
6 स्युर्यथैकैवं B. 7 Thus (and cp. V: 8. 1. 5)
B C My, चतुर्थि M, चतुर्थं T. 8 ह्ययज्ञ B.
9 यजते MSS. 10 संवत्सरमाप्नं° MSS. 11 मर्त्या
B. 12 अक्षय्य instead of अक्षीय again M.
13 यजेत B. 14 दाक्षायणयज्ञी B.

M. XI. 1. 3 K. III. 2. 2

1 पौर्णमासेनेष्ट्वेन्द्राय विमृधे ऽनुनिर्वपति तेन यथेष्ट्यैवं चरन्त्यामावास्येनेष्ट्वादित्ये चरुमनुनिर्वपति तेन यथेष्ट्यैवं चरन्ति ॥१॥

2 स यन्नु[1] पौर्णमासेनेष्ट्वेन्द्राय विमृधे ऽनुनिर्वपतीन्द्रो वै यज्ञस्य देवता-

ग्नीषोमीयमु वा इदं पौर्णमास्यं हविर्भवति नात्रेन्द्रायेति किं चन क्रियते तथास्यैतत्सेन्द्रꣳ हविर्भवति[2] सेन्द्रो यज्ञो ऽथ यद्विमृधे पौर्णमासेन वा इन्द्रो मृधो हन्ति तस्माद्विमृधे ॥२॥

अथ यदामावास्येनेष्ट्वादितये[3] चरुमनुनिर्वपत्येष वै सोमो राजा देवानामन्नं 3
यच्चन्द्रमाः स एताꣳ रात्रिं नं[4] पुरस्तान्न पश्चादद्दृशे तदस्यानद्धेव हविर्भवत्यप्रतिष्ठितमिवेयमु वा अदितिः साद्धा सा प्रतिष्ठितैतेनास्यैतदद्धा हविर्भवत्येतेन प्रतिष्ठितं तस्मादामावास्येनेष्ट्वादितये चरुमनुनिर्वपत्येतन्नु यस्मादनुनिर्वपेदथ यस्मान्नानुनिर्वपेत् ॥३॥

इदं नु यत्पौर्णमासेनेष्ट्वेन्द्राय विमृधे ऽनुनिर्वपति सेन्द्रं मे हविरसदिति 4
यो वै कꣳश्च यज्ञस्तायत इन्द्रस्यैव स सेन्द्र एव स तस्मान्नाद्रियेत ॥४॥

अथ यदामावास्येनेष्ट्वादितये चरुमनुनिर्वपत्यामावास्यं[5] वा अनुनिर्वाप्यं 5
पौर्णमासेन वा इन्द्रो वृत्रमहꣳस्तस्मा एतदाप्यायनमनुनिरवपꣳस्तत्किमनुनिर्वाप्ये ऽनुनिर्वपेत्तस्मान्नाद्रियेत ॥५॥

स यो ह पौर्णमासेनेष्ट्वान्यद्धविरनुनिर्वपत्यामावास्येनेष्ट्वान्यद्धविरनु- 6
निर्वपति[6] द्विषन्तꣳ हैव स भ्रातृव्यं प्रत्युच्छ्रयति प्रत्युद्यामिनं करोति ॥६॥

अथ यो ह पौर्णमासेनैव पौर्णमासीं यजत आमावास्येनामावास्यां क्षिप्रꣳ 7
हैव पाप्मानमपहते क्षिप्रं प्रजायते पौर्णमासेन ह वै देवाः पौर्णमासीं यजमाना आमावास्येनामावास्यां क्षिप्रं पाप्मानमपाघ्नत क्षिप्रं प्राजायन्त स य एवं विद्वान्पौर्णमासेनैव पौर्णमासीं यजत आमावास्येनामावास्यां क्षिप्रꣳ हैव पाप्मानमपहते क्षिप्रं प्रजायत एतदु यस्मान्नानुनिर्वपेद्यद्युवनुनिर्वपेद्यादृक्षिणां[8] दर्शपूर्णमासयोर्वा[9] एषा दक्षिणा यदन्वाहार्यो[9] नादक्षिणꣳ स्याद्धविरित्यु वा आहुस्तस्मादु दद्यादृक्षिणां यद्यनुनिर्वपेत् ॥७॥ द्वितीयं ब्राह्मणम् ॥

1 यन्न B. 2 हविर्भवति B. 3 यथामा° B.
4 Om. B. 5 °त्यामावास्यं B. 6 °निर्वपति C.
7 °पेद्यद्युमनुनिर्वपे° M, °पेद्यद्यवनुनिर्वपे° C, °पेद्यद्यनुनिर्वपे° B My. 8 दर्श° B. 9 यदन्वाहार्यो B C.

M. XI. 1. 4 K. III. 2. 3

1-3 दृष्ट्वा वैक उपवसन्ति श्वो नोदेतेति वाभ्रस्य वा हेतोर्[1] निर्जानन्त्यथाभ्युदेति[2] तद्यद्यगृहीतꣳ हविरभ्युदियात्प्रज्ञातं[3] न्वेव[4] सैव व्रतचर्या समवर्जेयुर्वत्सानपराल्ल[5] पर्णशाखया वत्सानपाकुर्युरथ यदिदं पूर्वेद्युर्दुग्धं[6] दधि हविरातञ्चनं[7] तत्सर्वमेव[8] स्यात्तत्प्रज्ञातमेव यदि तु व्रतचर्यां वा[9] नाशꣳसेत हविर्वा गृहीतमभ्युदियादथेतरथा कुर्यात् ॥१॥

द्वेधा तण्डुलान्व्यूहेद्य ऽणिष्ठास्तान्त्साधं ये स्थविष्ठास्तान्त्साधं तद्ये[10] ऽणिष्ठास्तानग्नये दात्रे ऽष्टाकपालं पुरोलाशꣳ श्रपयेयुरथ यदिदं पूर्वेद्युर्दुग्धं[11] दधि तदिन्द्राय प्रदात्रे स्यादथ य इमे स्थविष्ठास्तण्डुलास्तान्विष्णवे शिपिविष्टाय श्रृते चरुꣳ श्रपयेयुः सर्वो हि स चरुर्यत्र क्व च तण्डुलानावपन्ति ॥२॥

4 स यदेवमेतेन यजत एष वै सोमो राजा देवानामन्नं यच्चन्द्रमास्तमेतदुपैप्सीत्तमपारात्सीत्तमस्मा अग्निरेव दाता ददातीन्द्रः प्रदाता[12] प्रयच्छति सो ऽस्यैष इन्द्राग्निभ्यां यज्ञो दत्तो भवत्यथ यद्विष्णवे शिपिविष्टाय यज्ञो वै विष्णुः शिपिविष्टः स यदुपैप्सीत्तदपारात्सीत्तच्छिपितमिव भवति तस्माच्छिपिविष्टायेति भवति[13] तेन यथेष्ट्यैवं चरन्ति तत्र यच्छक्नुयात्तद्दद्यादथातो[14] दृष्ट्वैव संप्रत्येवोपवसेत् ॥३॥ तृतीयं ब्राह्मणम् ॥

1 Thus accented the MSS. 2 Thus accented the MSS. 3 °प्रज्ञातन्वेव B M My. 4 सभवजेयुं B. 5 पूर्वेद्युर्दुग्धं C, पूर्वेद्युर्दुग्धं B. 6 हविरातंचनं B, हविरातंचनं C. 7 °र्वमेव C. 8 वा MSS. Read वा? 9 तद्ये B. 10 °र्दुग्धं B C. 11 प्रदाता B. 12 भवति MSS. 13 °द्यादथातो MSS.

M. XI. 2. 1 K. III. 2. 4

2.3 ता वा एता एकादश सामिधेनीरन्वाहैकादशो वा अयं पुरुषो दश प्राणा आत्मैकादशो जनयत्येवैनं तदथ य एष ऊर्ध्वो निगदः प्रतिष्ठैवास्य सा प्रतिष्ठापयत्येवैनं तेनाथाग्निर्होता वेत्यग्नेर्होत्रमिति ता नव व्याहृतयो नव वै पुरुषे प्राणा जनयत्येवैनं तत्तस्याश्रावणप्रत्याश्रावणे[1] एव प्रतिष्ठे अथ यथादः सृष्टौ तद्वेनं तज्जनयत्येव तस्य पत्नीसंयाजाः प्रतिष्ठा ॥१॥

त्रिरु वा अयं पुरुषो जायत इदं नु यन्मातुश्च पितुश्च जायते तदस्यैकं[2] 1
जन्म तस्यायमेव लोकः प्रतिष्ठाथ यद्यज्ञाज्जायते[3] तदु तज्जायत एव तस्यान्तरिक्ष-
लोक एव प्रतिष्ठाथ यत्रैनमदो ऽज्ञावभ्यादधति तदन्नयोनेर्जायते तस्य स्वर्ग एव
लोकः प्रतिष्ठा सर्वाणि हैतानि जन्मानि जायते य एवमेतद्वेद य उ वै परमतां
गच्छति स एतानि सर्वाणि जन्मानि जायते ॥२॥

तदाहुरनुवाक्या एताः सामिधेन्या३ याज्या३ इति स[4] ह[4] ब्रूयादनुवाक्या 5.6
इति तासां काहुतिः का याज्येति द्वावाधारौ पञ्च प्रयाजास्त्रयो ऽनुयाजा इला प्रस्तरो
ऽथ यत्रादः परिधीनप्रहृत्य स्रुचौ संप्रगृह्णात्यथ यत्रादः पत्नीसंयाजान्त्संयाज्य
स्रुवं च स्रुचं च संप्रगृह्णाति समिष्टयजुरेतासा[5] हाहुतीनामेता अनुवाक्याः सा वा
आहुतिः समृद्धा यानुवाक्यवती सो अनुवाक्या समृद्धा[5] या[5] याज्यवत्येवमस्यैता[5]
अनुवाक्या याज्यवत्यो भवन्त्येवं याज्या अनुवाक्यवत्य एवमस्यैता उभय्यः समृद्धा
भवन्ति ॥३॥ चतुर्थं ब्राह्मणम् ॥

1 °प्रत्याश्रावणे B, °प्रत्याश्रावणे C. 2 तदस्यैकं
MSS. 3 यद्यज्ञाज्जायते B C (orig.). 4 सह
MSS. 5 समृद्धायायाज्यवत्यै° C, समृद्धयायाज्यवत्यै° B.

K. III. 2. 5 M. XI. 2. 3

ब्रह्म ह वा इदमग्र आस तदकामयत कथं नु प्रजायेयेति तदश्राम्यत्तत्तपो 1.2
ऽतप्यत तद्देवता असृजत ता देवताः सृष्ट्वा यथालोकं व्यारोहयां चकाराग्निमेवा-
स्मिंल्लोके यो ऽयं पवते तमन्तरिक्षे दिव्येव सूर्यं तत ऊर्ध्वा य इतरे लोकास्तेष्वितरा
देवतास्तद्यथा ह वा एषु लोकेष्विमा देवता एव[2] ह तेषु लोकेषु ता देवतास्तद्ध ब्रह्म
परार्धमेव परीयाय तस्माद्यश्चैतद्वेद यश्च न ब्रह्मोत्तरमित्येवाचक्षते ॥१॥

तद्धेक्षां चक्रे ब्रह्म कथं न्विमांल्लोकान्प्रत्यवेयां केन[3] न्विमांल्लोकान्त्संतनुया- 3
मिति तदेताभ्यां द्वाभ्यां प्रत्यवेयाय नाम्ना च रूपेण चैतावद्वा इदं नाम चैव रूपं च
स यस्याह नामास्ति तन्नाम यस्यो नु[4] नामास्ति तद्रूपं तयोरन्यतरज्ज्यायो रूपमेव
यस्य च हि नामास्ति[4] यस्य च रूपमुभे एव रूपे ज्यायान्ह वै तस्माद्भवति यस्मा-
ज्ज्यायान्बुभूषति य एवमेतद्वेद ॥२॥

ते हैते ब्रह्मणी[5] महती अभ्वे स यो हैते ब्रह्मणी[5] महती अभ्वे वेद मह- 4.6
द्धैवाभ्वं[6] गच्छति ते हैते ब्रह्मणी[5] महती यक्षे स यो हैते ब्रह्मणी[5] महती यक्षे वेद

महद्धैव यक्षं गच्छति यदो वै परमतां गच्छत्यथाहुर्महद्देवाभ्वं[5] प्राप्तो महद्यक्षमिति यदो वै देवा एते ब्रह्मणी[6] आप्नुवन्नथामृता[7] आसुर्मर्त्या हैव ततः पुरा बभूवुर्मनो वै रूपं मनसा हि रूपं वेदेदमिद[8]ं रूपमिति मनसे वै पूर्वमाधारमाधारयति[9] तेन रूपमाप्नोति वाग्वै नाम वाचा हि नामाभिव्याहरति वाचे[10] वा उत्तरमाधारमाधारयति[11] तेन नामाप्नोति ते देवा एते ब्रह्मणी[12] आप्त्वामृतत्वमजयन्ब्रह्मणः[13] सलोकतामजयन्त्स य एवमेते ब्रह्मणी[14] आप्नोति सर्वमु हैवास्मिंल्लोक आयुरेत्यक्षीयममुष्मिंल्लोके[15] ऽमृतत्वं जयति देवानां ब्रह्मणः सलोकतां जयति ॥३॥ पञ्चमं ब्राह्मणम् ॥

1 केन B C. 2 नु all. 3 नास्ति B C. 4 °णी My, °णि B C M. 5 °णि M. 6 Thus C, महद्धैवाभ्वं B My, महदेवाभ्यं M. 7 Uncertain reading; °र्महद्वतास्यं C My, °र्महद्वतास्य M, °र्महद्वातास्यं B. 8 Thus C My, ब्रह्मणि आप्नु° B, ब्रह्मणि आप्न° M. 9 वेदेदमिद° B. 10 Thus accented MSS., cp. III. 2. 9. 4. 11 वाचे B, C (orig.). 12 Thus accented C (cp. note 10), उत्तरमाधारयति B. 13 ब्रह्मणि आ° B M. 14 ब्रह्मणि M. 15 अक्षय्य instead of अक्षीय M.

M. XI. 2. 2 K. III. 2. 6

1-4 गायत्रीं त्रिपदीमनुवाक्यामन्वाह त्रयो वा इमे लोका इमानेवैतल्लोकान्प्रतिष्ठापयति त्रिष्टुप् चतुष्पदी भवति याज्या चतुष्पदा[1] वै पशव एष्वेवैतल्लोकेषु प्रतिष्ठितेषु पशून्प्रतिष्ठापयति[2] द्व्यक्षरो[3] वषट्कारो भवति द्विपाद्यजमानः पशुष्वेवैतत्प्रतिष्ठितेषु यजमानं प्रतिष्ठापयति प्रति ह्यस्मा इमे लोकास्तिष्ठन्ते प्रति पशवः प्रत्यात्मना य एवमेतद्वेद ॥१॥

असौ वा अनुवाक्येयं याज्यायैष एव वषट्कारो य एष तपत्येष उ वाव मृत्युस्तस्माद्या अतो ऽर्वाच्यः प्रजास्ता मर्त्या अथ याः पराच्यस्ता अमृता आहुतिमयमु वा एत[4]ं सुकृतमयं यजमानस्यात्मान[5]ं स[6]ंस्कुर्वन्ति यमेतद्यज्ञ[7]ं स[8]ंस्कुर्वन्ति स यद्वषट्कृते जुहोति तदस्यैतमाहुतिमय[9]ं सुकृतमयं यजमानस्यात्मानमेतस्मिन्वषट्कारे[10] प्रतिष्ठापयति ॥२॥

तमेष आदायोदयते सपरेणास्यैतमात्मानꣳ सꣳस्करोति स यदामुं लोकमेत्यथैनमेष आदायोदयते तमेष आहुतिमयः सुकृतमय आत्माह्वयत्येह्ययं त आत्मेति स यदाह्वयति तस्मादाहूतयो[1] नामाहूतयो[2] ह वै नामैतद्यदाहुतय इत्याहुरत उ वा अर्वाची अहोरात्रे अहोरात्रे वै परिवर्तमाने पुरुषस्य सुकृतं क्षिणुतः[3] स यथा रथेन धावयन्नथचक्रे[4] परिवर्तमाने प्रत्यवेक्षेतैवꣳ हाहोरात्रे परिवर्तमाने प्रत्यवेक्षते[5] तस्य ह नाहोरात्रे सुकृतं क्षिणुतो[6] ऽक्षीयꣳ[7] ह जयति य एवमेतद्वेद ॥३॥ षष्ठं ब्राह्मणम् ॥

1 °पादा M. 2 °तिह्यक्षरो B. 3 °न्वषट्कारे MSS. 4 ? Thus MSS. (cp. III. 1. 9. 3). 5. तस्मादाहुतयो नामाहुतयो B M and C (orig.). 6 क्षुणुं M. 7 धावयन्नथचक्रे B My. 8 Thus C (orig.), प्रत्यवेक्षते B C (sec. m.). 9 क्षय्यꣳ M.

K. III. 2. 7 M. XI. 1. 8

देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त त एतस्मिन्नेव यज्ञे 1
प्रजापतावस्पर्धन्तास्माकमयꣳ स्यादस्माकमयꣳ स्यादिति ततो ह्यासुरा अतिमानेन कस्मिन्नु[1] वयं जुहुयामेति स्वेष्वेवास्येषु[2] जुह्वतश्चेरुस्ते ह तथा जुह्वतः पराबभूवुस्तस्माद्ध नातिमानी स्यादित्याहुः पराभूतेरेतन्मुखं यो ऽतिमान इति[3] ॥१॥

अथ ह देवा अनतिमानिन इवासुस्ते ऽन्योऽन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्य- 2. 3
स्तथा[4] जुह्वद्भ्यः प्रजापतिरात्मानं प्रददौ यज्ञो वै प्रजापतिः स एषामन्नमभवद्यज्ञो हि देवानामन्नम् ॥२॥

स ह्ययं प्रजापतिर्यावानात्मनास[5] यावत्यस्य मात्रा तावन्तं यज्ञꣳ संभृत्य तं देवेभ्यः प्रददौ तेनात्मानं निश्चिक्रिये[6] स हविषैवात्मानं निरक्रीणीत हविरनुवाक्यया यानुवाक्यां याज्यया याज्यां वषट्कारेण वषट्कारमाहुत्या सास्याहुतिरेवानिष्क्रीतासाथान्यत्सर्वं निष्क्रीतं तदस्य यथा वृक्षस्य वाग्रं[7] प्रशीर्णं[8] वꣳशस्य[9] वैवमस्य तदास तदन्वाहार्येणान्वाहरत्स यदन्वाहरत्तस्मादन्वाहार्यो नाम स[10] कृत्स्नः[11] सर्वतनूरभवत्[12] ॥३॥

तथो वा एष एताꣳ रात्रिमुपवसथ्याꣳ हविर्भूत्वात्मानं देवेभ्यः प्रयच्छति 4-6
तस्मादेनमेताꣳ रात्रिꣳ सुगुप्तं गोपायेयुर्यथा हविर्गोपायेयुरेवꣳ स हविषैवात्मानं निष्क्रीणीते हविरनुवाक्ययानुवाक्यां याज्यया याज्यां वषट्कारेण वषट्कारमाहुत्या

सास्याहुतिरेवानिष्क्रीता भवत्यथान्यत्सर्वं[1] निष्क्रीतं तदस्य यथा वृक्षस्य वाग्रं[2] प्रशीर्णं[3] वꣳशस्य[4] वैवमस्य तद्भवति तदन्वाहार्येणान्वाहरति स यदन्वाहरति तस्मादन्वाहार्यो नाम स कृत्स्नः सर्वतनूर्भवति[5] स य एवमेतद्वेद सर्वमु ह्येवास्मिंल्लोक आयुरेति कृत्स्नो ऽमुष्मिंल्लोके सर्वतनूः संभवति प्रजापतेः सायुज्यꣳ सलोकतां जयति ॥४॥ सप्तमं ब्राह्मणम् ॥

1 कस्मै नु all, but cp. VI. 1. 1. 1. 2 °वास्येषु B. 3 इति MSS. 4 जुह्वतश्चेरुं° B. 5 °र्यावानात्मनास MSS. 6 मृत्योर्निश्चिक्रिये M. 7 Thus accented MSS. Read perhaps वाग्रप्रशीर्णं वꣳशस्य. 8 सकृत्स्नः B. 9 सर्वतनूं B. 10 भवत्यं° B, C (orig.). 11 °भैवति B.

M. XI. 2. 3 K. III. 2. 8

देवा वै यज्ञेनेमां जितिं जित्वा येयमेषां जितिस्ते होचुर्हन्तेदं तथा करवामहा इति यथा न इदमनभ्यारुह्यं मनुष्यैरसदिति ते यज्ञस्य रसं निर्धीय यथा मधुकृतो निर्धयेयुरेवं विदुह्य यज्ञं यूपेन योपयित्वा तिरो बभूवुस्तद्यदेनेनायोपयꣳस्तस्माद्यूपो नाम ॥१॥

तद् वृषीणामनुश्रुतमास देवा वै यज्ञेनैतां जितिं जित्वा येयमेषां जितिरिति विदुह्य यज्ञं यूपेन योपयित्वा तिरो[1] ऽभूवꣳस्तमन्विच्छामेति[2] ते ह्यर्चन्तः श्राम्यन्तश्चेरुः श्रमेण ह स्म वै तदेवा जयन्ते यदेषां जय्यमासर्षयश्च ॥२॥

7 तान्ह[3] ऋषीन्यज्ञं[4] तन्वानानेते गन्धर्वा उपनिषेदुः शूर्पं यवमद्धानो[5] ऽन्तर्वान्कृषिः[6] सोल्वाला[7] ते[8] ह स्म यदतिरेचयन्ति[9] तद्ध स्म निदधत्येतदतिरिक्तमिति यद्ध स्म न्यूनं भवति तद्ध स्म निदधत्येतन्न्यूनमिति[10] यो ऽसंपत्सा संपत् ॥३॥

8 ते होचुः सꣳस्थिते यज्ञ ऊनातिरिक्तं वै यज्ञमतध्वमिति[1] ते होचुस्तद्वै नो दर्शयतेति तद्वैनान्दर्शयां चक्रुः स यदतिरिक्तमास यथा गिरयो[2] यथा मरव[3] एवꣳ ह तदास यन्न्यूनमास यथा श्वभ्रः[4] प्रदराः[5] कर्तो[6] एवꣳ ह तदास ॥४॥

9 ते होचुरिदं चेन्नो[1] ऽदीदशतेति ब्रूतैव नो ऽस्य प्रायश्चित्तमिति तेभ्यो हैता व्याहृतीरूचुः स सꣳस्थिते यज्ञे पूर्णपात्रे प्रत्यन्तर्वेद्यञ्जलिं करोति यज्ञ[2] शं च त उप चेति स यदतिरिक्तं तच्छंकारेण[3] शमयत्युप च त इति यन्न्यूनं तत्संद-

धाति शिवे मे संतिष्ठस्वेति तदेन[१२]ꣳ शिवꣳ शग्मं[१४] कुरुते ऽरिष्टे मे संतिष्ठस्वेति तदेनमरिष्टं कुरुते[१५] स्विष्टे मे संतिष्ठस्वेति तदेनꣳ स्विष्टं कुरुत एवमस्यैष यज्ञो ऽन्यूनातिरिक्तः सर्वः समृद्धो भवति ॥५॥

तदाहुर्न वै यज्ञस्य व्यृद्धमस्तीति सर्व एव यज्ञः समृद्ध इति यद्वै न्यूनं यज्ञस्य प्र तस्माज्जायते यो[१६] ऽसंपद्देवलोकं[१६] तया जयत्यथ यदतिरिक्तमन्नमेवास्य तदभ्यतिरिच्यते[१७] ऽन्नाद्यमेवास्य[१८] तदभ्यतिरिच्यत[१९] एवम्वस्यैष[२०] यज्ञो ऽन्यूनातिरिक्तः सर्वः समृद्धो भवति ॥६॥ अष्टमं ब्राह्मणम् ॥

1 तिरोभवꣳस्तं B. 2 तान्ह ऋषी° MSS. 3 यवमद्धानोत्तवान्नृषिः सोल्वाला C, यवमद्धानो त्तवान्कृषिः सोल्वाला B. 4 तहस्मयदतिरेचयंति C M, तहयस्माति यदतिरेचयंति B. 5 Thus C, °मिति B. 6 यज्ञमतद्ध इति B C My, यज्ञमदध्वमिति M. 7 गिरयो MSS. 8 Thus accented MSS. 9 प्रदारः कर्त My. 10 चेन्नो C, °दं चेन्नो B. 11 यज्ञ MSS. 12 °छंकरेण B, C (orig.). 13 तथैनꣳ M. 14 शग्मं B. 15 कुरुते B. 16 Thus C (sec. m.) and My, योसंयद्देवलोकं C (orig.) B; M corrupt. Read perhaps यो असंप°, cp. तया. 17 तदभ्यतिरिच्यते B, तदभ्यतिरिच्यते C. 18 न्नाद्यमेवास्य MSS. 19 Without accents B. 20 एवभ्यस्यैष B M.

K. III. 2. 9 M. XI. 2. 4

सूर्यो ह वाव दर्श एष ह्ययमहरहरेव दद्दशे[१] चन्द्रमा एव पूर्णमा एतस्य हि पूरणमनु पौर्णमासीत्याख्यायते[२] ऽथो इतरथाहुः सूर्य एव पूर्णमा इत्येष ह्ययमहरहरेव पूर्ण इति चन्द्रमा एव दर्श इत्येतस्य हि दर्शो भवतीत्यतो[३] ऽन्यतरथाहरेव दर्शो ऽहरु[४] हीदं दद्दश इव रात्रिरेव पूर्णमा रात्र्या हीदꣳ सर्वं पूर्णमसावेव द्यौर्दर्श एषा हीयं दद्दश इवेयमेव पूर्णमा अनया हीदꣳ सर्वं पूर्णमिति न्वधिदेवतम् ॥१॥ 1-4

अथाध्यात्मं प्राण एव दर्शः प्राणो ह्ययं दद्दश इवोदान एव पूर्णमा उदानेन हीदꣳ सर्वं पूर्ण[५] ते हैते देवते अन्नादश्चान्नप्रदश्च प्राण एवान्नादः प्राणेन ह्यन्नमद्यत 5.6

उदानो ऽन्नप्रद[1] उदानेन ह्यन्नं प्रदीयते स यो हैते देवते वेदान्नाद्यं चान्नप्रदं चान्नादो ह भवति प्रास्या अन्नं दीयते ॥२॥

7 स यमदः पूर्वेद्युर्व्रतोपायनीयमश्नाति[2] यावेवास्याध्यात्मं दर्शपूर्णमासौ तावेवैतत्प्रीणाति चक्षुरेव दर्शश्चक्षुर्ह्येवं[3] ददृश इव श्रोत्रमेव पूर्णमाः श्रोत्रेण ह्येवं[4] सर्वं पूर्णं वागेव दर्शो वाग्ह्येवं[5] ददृश इव मन एव पूर्णमा मनसा ह्येवं[6] सर्वं पूर्णम् ॥३॥

8 तदाहुर्यद्दर्शपूर्णमासौ यजत इत्याहुरिति न[7] पौर्णमास्यामाहुः[8] पूर्णमासायानुब्रूहि पूर्णमासं यजेति नामावास्यायामाहुर्दर्शायानुब्रूहि दर्शं यजेति कथमस्य दर्शपूर्णमासाविष्टौ[9] प्रीतौ भवत इति तद्यथास्येष्टौ भवतो मनो वै पूर्णमा मनसा ह्येवं[10] सर्वं पूर्णं मनसे वै पूर्वमाघारमाघारयति[11] तेन पूर्णमासं प्रीणाति[12] वाग्वै दर्शो[13] वाग्ह्येवं[14] ददृश इव वाचे वा उत्तरमाघारमाघारयति[15] तेन दर्शं प्रीणात्येवमस्य दर्शपूर्णमासाविष्टौ प्रीतौ भवतः ॥४॥

9 तद्धैके हविषी एवैते निर्वपन्ति पौर्णमास्यामह[16] सरस्वते ऽमावास्यायै सरस्वत्यै मनः सरस्वान्वाक्सरस्वत्येतदेनौ प्रत्यक्षं हविषा प्रीणीम इति वदन्तस्तदु तथा न कुर्याद्यद्वा एतावाज्यभागौ[17] भवतस्तदेवैनौ प्रत्यक्षं हविषा प्रीणाति तस्मादाज्यभागावेव स्याताम् ॥५॥

10 आगूर्तं ह वा एषो ऽमुं लोकमेति यो दर्शपूर्णमासाभ्यां यजते पौर्णमासेन[18] ह्येवामावास्येन यक्ष्यमाणो भवत्यामावास्येनेज्वा[19] पौर्णमासेन यक्ष्यमाणो भवति[20] तद्यथानागूर्तं भवत्युभावेवैतत्रोभावितरत्र[21] सं स्थापयत्यागूर्तं ह स्याद्यदेते हविषी निर्वपेत्तस्मादाज्यभागावेव स्याताम् ॥६॥ नवमं ब्राह्मणम् ॥

1 दृदृशे B. 2 पौर्णमासीत्या° B. 3 Thus M My, भवत्यतो B C. 4 हरू C My. 5 पूर्णं B, C (orig.). 6 न्नप्रदा B. 7 °द्युर्व्रतोपा° B. 8 दर्शश्चक्षुर्ह्यवं B. 9 °यं B. 10 नु MSS. 11 °माहुः B, C (orig.). 12 दर्शं° B. 13 Thus accented MSS., cp. III. 2. 5. 3. 14 प्रीणाति C. 15 From दर्शो on accents in this section are omitted in B. 16 Thus accented C. 17 पौर्णमास्यमहः B.

18 एना° MSS. except My. 19 °सेन MSS.
20 भवत्य° B. 21 भवति B. 22 Accents ?
°भावेवेतरत्रोभावितरत्र B, °भावेवेतरत्रोभावितरत्र C.

K. III. 2. 10 M. XI, 2. 6

शिरो वा एतद्यज्ञस्य यत्प्रणीताः स यत्प्रणीताः प्रणयति शिर एवैतद्यज्ञस्य 1
सꣳस्करोति स विद्याच्छिर एव म एतत्सꣳस्क्रियत इति ॥१॥

प्राण एवास्येध्मः प्राणेन हीदꣳ सर्वमिद्धं यत्प्राणभृन्निमिषति यदेजति स 2
विद्यादहमेवैष इध्म[1] इति ॥२॥

अनूकमेवास्य सामिधेन्यस्तस्मात्ता ब्रूयात्संतन्वन्निव मे ऽनुब्रूहीति संततमिव 3
हीदमनूकं मनश्च ह्येवास्य वाक्चाधारौ सरस्वाꣳश्च सरस्वती च स विद्यान्मनश्चैव मे
वाक्चाधारौ सरस्वाꣳश्च सरस्वती चेति ॥३॥

पञ्च प्रयाजा इम एवास्यैते शिरस्याः पञ्च प्राणा मुखमेवास्य प्रथमः प्रयाजो 4
दक्षिणा नासिका द्वितीयः सव्या नासिका तृतीयो दक्षिणः कर्णश्चतुर्थः सव्यः कर्णः
पञ्चमः स यच्चतुर्थे प्रयाजे समानयते तस्माद्विदमन्तरतः[2] श्रोत्रꣳ संतृण्णं चक्षुषी
ह्येवास्याज्यभागौ स विद्याच्चक्षुषी एव म एते[3] इति[3] ॥४॥

अथ य आग्नेयः पुरोळाशो ऽयमेवास्य स दक्षिणो[4] ऽर्धो[4] ऽथ यो ऽग्नी- 5. 6
षोमीय उपाꣳशुयाजो[5] हृदयमेवास्य स स यत्तेनोपाꣳशु चरन्ति तस्माद्विदं गुहा
हृदयमथ यदृचमनूच्य जुषाणेन यजति तस्माद्विदमस्थिन्यनस्थिकꣳ हृदयमथ यो
ऽग्नीषोमीयः पुरोळाशो ऽयमेवास्य स[6] सव्यो[6] ऽर्धः[6] ऐन्द्रं वा सांनाय्यमन्तराꣳसमे-
वास्य स्विष्टकृद्विषमेवास्य[7] प्राशित्रम्[7] ॥५॥

स यत्प्राशित्रमवद्यति यथैवादः प्रजापतेराविद्धं निरकृन्तन्नेवमेवैतस्यैत- 7
द्यज्ञेष्टितं यद्ग्रथितं यद्वरुण्यं तन्निष्कृन्तन्ति स विद्याद्यथैवादः प्रजापतेराविद्धं निरकृ-
न्तन्नित्येवमेव म इदं यदिह वेष्टितं यद्ग्रथितं यद्वरुण्य तन्निष्कृन्तन्तीति ॥६॥

उदरमेवास्येळा स यथैवाद इळायाꣳ समवद्यन्त्येवमेवेदं विश्वरूपमन्नमुदरे 8
समवधीयते ॥७॥

त्रयो ऽनुयाजा इम एवास्यैते ऽवाञ्चस्त्रयः प्राणा[8] बाहू एवास्य सूक्तवाकश्च 9
शंयुवाकश्च ॥८॥

चत्वारः पत्नीसंयाजाश्चतस्रो वै प्रतिष्ठा ऊरू द्वावष्ठीवन्तौ द्वौ पादावेवास्य

समिष्टयजुः ॥९॥

10-12 ता वा एता एकविꣳशतिराहुतयो द्वावाधारौ पञ्च प्रयाजा द्वावाज्यभागावाग्नेयः पुरोळाशस्तद्दशाग्नीषोमीय उपाꣳशुयाजोऽग्नीषोमीयः पुरोळाशः स्विष्टकृत्त्रयोऽनुयाजाश्चत्वारः पत्नीसंयाजाः समिष्टयजुर्द्वादश वै मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एतेन[1] ह[2] स्म[3] वै[4] तदारुणिराहार्धमासशो[5] वा अहमनुनादित्येन सलोको भवामि तामहं दर्शपूर्णमासयोः संपदं वेदेति ॥१०॥

13,14 तदाहुरात्मयाजी३ श्रेयान्देवयाजी३[11] इत्यात्मयाजीति ह ब्रूयात्स ह वा आत्मयाजी यो वेदेदं मे ऽनेनाङ्गꣳ सꣳस्क्रियत इदं मे ऽनेनाङ्गमुपधीयत इति स यथाहिस्त्वचो निर्मुच्यतैवमस्मान्मर्त्याच्छरीरात्पाप्मनो निर्मुच्यते स ऋङ्मयो यजुर्मय आहुतिमयो वेदमयः संभवति[12] स ह तैतासां देवतानामेको भवत्यथ ह स देवयाजी यो वेद देवानेवाहमिदं यजे देवानेवाहमिदꣳ सपर्यामीति स यथा पापीयाञ्ज्यैयसे बलिꣳ हरेद्वैश्यो वा राज्ञे बलिꣳ हरेदेवꣳ हैव स बलिꣳ हरति स ह न तावन्तं लोकं जयति यावन्तमितरः ॥११॥ दशमं ब्राह्मणम् ॥ द्वितीयोऽध्यायः ॥ उद्धारीकाण्डं समाप्तम् ॥

1 इद्ध MSS. except B. 2 °मंतरतः B. 3 एते इति B, एते इति N. 4 दक्षिणोर्धो MSS. 5 °याजो B N. 6 सप्तव्योर्ध C. 7 °षमेवास्य प्रा° B N. 8 एवा ins. B N. 9 एतेनहस्मावै B N. 10 °र्द्धमाससे B N. 11 °याजी३ B. 12 संभवतीति M.

M. III. 1. 1 K. IV. 1. 1

1 तद्वै देवयजनमीक्षन्ते तद्यदेव वर्षिष्ठं भूमेस्तदेव देवयजनꣳ स्याद्यत्रान्यद्भूमेर्नाभिशयीततो वै देवा उत्क्रान्ता देवानेव तदुपोत्क्रामति स सदेवे देवयजने यजते ऽथ यो ह तत्र यजते यत्रान्यद्भूमेरभिशेते ऽधस्तरामिव[1] हैव तस्मिन्प्रिष्ठा भवति तस्माद्यत्रैव वर्षिष्ठं भूमेस्तदेव देवयजनꣳ स्यात्तद्वर्षिष्ठꣳ सत्समꣳ स्यात्तद्धि प्रतिष्ठितमविभ्रꣳशि यत्समꣳ समꣳ सत् ॥१॥

2 प्रागिव[1] प्रवणꣳ स्यात्प्राची हि देवानां दिगथो उदक्प्रवणमुदीची हि मनुष्याणां दिग्दक्षिणतः प्रत्युच्छ्रितमिव स्यादेषा वै पितॄणां दिग्यद्ध दक्षिणाप्रवणꣳ स्यात्क्षिप्रꣳ ह्यमुं लोकं यजमान इयात्तथा[2] ज्योग्यजमानो जीवति तन्न देवयजनमात्रं[3]

प्राग्यूपादतिरिक्तꣳ स्याद्द्विषन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्येत कामं दक्षिणतः काममुत्तरतस्तद्ध त्वै समृद्धं देवयजनं यत्र पश्चादेवयजनमात्रमतिरिक्तं भवत्युप हैनमुत्तरा देवयज्या नमति ॥२॥

तदु होवाच याज्ञवल्क्यो वाष्र्णो ऽयक्ष्यतेति तस्मै देवयजनमीक्षितुम- 3.4
यमेति सो ऽब्रवीत्सात्ययज्ञिरिति सर्वा वा इयं पृथिवी देवी देवयजनं यत्र वा अस्याः क च यजुषा परिगृह्य यजेतेत्येतदु ह स मेन ऋत्विजस्तु ह वाव देवयजनं यत्रैवानुष्ठ्या विद्वाꣳसो याजयन्ति सैवाह्वलैतन्नु देवयजनस्य रूपम् ॥३॥

अथैताꣳ शालां प्राग्वꣳशां कुर्वन्ति प्राची हि देवानां दिक् पुरस्ताद्वै देवाः 5-7
प्रत्यञ्चो मनुष्यास्तस्मादेभ्यः प्राङ् तिष्ठन्जुहोति तस्मादु न प्रत्यङ् शयीत नेदेवानभिप्रसार्य शया इत्यथ येयं दक्षिणा सा पितृणामथ येयं प्रतीची सर्पाणां वैषा दिग्यत्र वा देवाः प्राञ्च उदक्रामꣳस्तद्वैषाहीयत हीना वोदीची मनुष्याणां तस्माद्यावन्मानुषे शाला वा विमितं वा भवत्युदग्वꣳशमेव भवत्युदीची हि मनुष्याणां दिक्तस्माद्यदैव दीक्षिष्यमाणो भवत्यथ प्राग्वꣳशां कुरुते देवान्वा एष उपावर्तते यो दीक्षते स देवतानामेवैको भवति तस्मादीक्षिष्यमाण एव प्राग्वꣳशां कुरुते ॥४॥

तां परिध्नन्ति नेत्सꣳस्थायादिति हेमनि नेत्प्रोक्षादिति वर्षासु नेदघृणिरसदिति ग्रीष्मे देवान्ह्येष उपावर्तते यो दीक्षते स देवतानामेवैको भवति तिर इव वै देवा मनुष्येभ्यस्तिर इवैतद्भवति ॥५॥ 8

तन्न सर्व इवाभिप्रपद्येत न हि देवाः सर्वेणेव संगच्छन्त आर्य एव ब्राह्मणो वा क्षत्रियो वा वैश्यो वैते हि यज्ञिया नो एव सर्वेणेव संवदेत न हि देवाः सर्वेणेव संवदन्त आर्येणेव ब्राह्मणेन वा क्षत्रियेण वा वैश्येन वैते हि यज्ञिया यद्येनꣳ शूद्रेण संवादो विन्देदित्थमेनं विचक्ष्वेत्यन्यं ब्रूयादेष दीक्षितस्योपचारः ॥६॥ 9.10

अथाध्यवस्यति सा यासौ वर्षिष्ठा पूर्वार्धे शालास्थूणा भवति तामभिपद्य जपत्येदमगन्म देवयजनं पृथिव्या इत्या ह्येनद्गच्छति यत्र देवासो अजुषन्त विश्व इति तद्विश्वैश्च देवैर्जुष्टे देवयजने यजते य उ चेमे मनुष्यदेवा ब्राह्मणाः शुश्रुवाꣳसो ऽनूचाना यदहैनत्ते ऽक्षिभ्यां जोषयन्ते तदु ह तैर्जुष्टं भवति यद्वाह यत्र देवासो अजुषन्त विश्व इति तद्विश्वैर्देवैर्जुष्टं भवति तदुभयैर्देवैर्जुष्टे देवयजने यजत ऋक्सामाभ्याꣳ संतरन्तो यजुर्भिरित्यृचा वै साम्ना यजुषा यज्ञस्योद्दृचं गच्छन्ति तस्मादाह 11.12

ऋक्सामाभ्याꣳ सꣳतरन्तो यजुर्भिरिति रायस्पोषेण समिषा मदेमेति भूमा[1] वै रायस्पोषो भूमो वै श्रीराशिषमेवैतदाशास्ते श्रियं गच्छेयमिति समिषा मदेमेतीषं मदन्तीति वै तमाहुर्यः श्रियं गच्छति तस्मादाह समिषा मदेमेति ॥७॥ प्रथमं ब्राह्मणम् ॥

1 धस्तरामिव MSS. except C (sec. m.). 2 प्रागेव M. 3 ईया° MSS. except M. 4 देवयजनमात्रं MSS. (C the second time; originally without accent). 5 वार्ष्णो यक्ष्यतेति MSS. exc. M, which has वार्ष इयक्षतेति. 6 Thus (without accent) M only; °तंन or °तन्न the other MSS. 7 शया MSS. 8 °हीयत O P C[2] C (orig.). 9 हीना MSS.; M reads °हीयतवानादीची. 10 Thus my conjecture; नेच्छꣳस्यायादिति M, नेछꣳशायादिति the other MSS. 11 उपावर्तते O C; C[1] P without accent. 12 तंन some of the MSS. 13 संग° MSS. 14 °णैव My. 15 °णैव MSS. exc. M. 16 संवदंत MSS. 17 आर्येणैव MSS. 18 विंदे-दित्थ° MSS. exc. C[1] (pr. m.). 19 °चारः B. 20 i. e. जपति । आ । इदम् । अगन्म । 21 तदह M. 22 भवति O P C C[2] 23 Thus accents B O C C[1] and Mādhy.; गछंति P. 24 भूमो B W My.

M. III. 1. 2 K. IV. 1. 2

1 स वा अपराह्णे दीक्षते स पुरैव केशश्मश्रुणो वप्तोः[1] पुरा नखेभ्यो निकर्तितोरथ यत्कामयेत तदश्नीयाद्यद्वा लभेत यद्यु न[2] जिघत्सेदपि[3] नाश्नीयान्न ह्यस्य ततो ऽन्यद्व्रतादशनमवकल्पते व्रतꣳ ह्येवास्य ततो ऽशनं भवति तस्मादश्नीयाद्यदि जिघत्सेत्तदिति[4] ॥१॥

2.3 उत्तरेण शालां परिश्रितं भवति तत्केशश्मश्रु च वपते नखाꣳश्च निकृन्तते स यत्केशश्मश्रु च वपते नखाꣳश्च निकृन्तते[5] यत्र वै पुरुषस्यापो नोपतिष्ठन्ते ऽमेध्यꣳ ह्यस्य तन्नो वा अत्राप उपतिष्ठन्ते यत्केशश्मश्रूणि च नखेषु च मेध्यो भूत्वा दीक्षा

इति तस्माद्रूपि सर्व एव वपेत तदु केशश्मश्रु चैव वपते नखा॑श्च निकृन्तते तन्न॑[5] नखेषु यजुरस्ति ॥२॥

स दक्षिणानेवाग्रे निकृन्तेताथ सव्यान्त्सव्यान्वा अग्रे मानुषे निकृन्तते ऽथैवं 4
देवत्राङ्गुष्ठयोरग्रे निकृन्तेताथ कनिष्ठिकयोः[6] कनिष्ठिकयोर्वा अग्रे मानुषे निकृन्तते ऽथैवं देवत्रा ॥३॥

स प्राङासीनः श्मश्रूण्यभ्युन्त्त॑[7] इमा आपः शमु मे सन्तु देवीरिति वज्रो 6.5
वा आपो वज्रो हि वा आपस्तस्माद्येन यन्ति निम्नं॑[8] तद्भवति यत्रोपतिष्ठन्ते निर्दहन्ति तत्तथैनमेष वज्रो न हिनस्ति स दक्षिणामेवाग्रे॑[9] वपते ऽथ सव्या॑ सव्यां वा अग्रे मानुषे वपते ऽथैवं देवत्रा ॥४॥

स कुशतरुणकमभिनिदधात्योषधे॑[10] त्रायस्वेति वज्रो वा एष यत्क्षुरस्तदेन- 7.8
मेतदोषधिभिरेवान्तर्दधाति तथैनमेष वज्रो न हिनस्ति स्वधिते मैन॑ हि॑सीरिति प्रच्छिनत्ति वज्रो वा एष यत्क्षुरस्तथैनमेष वज्रो न हिनस्ति तदुदपात्रे ऽवदधाति स एतेन वैव यजुषा तूष्णीं वोत्तरां प्रच्छिनत्ति तदुदपात्रे ऽवदधाति ॥५॥

अथ नापिताय प्रयच्छति स यदा वपते ऽथ स्नाति स यत्स्नात्यमेध्यो वै 9.10
पुरुषस्तेन ह पुरुषो ऽमेध्यो यदनृतं वदति तेनेदमन्तरतः शुक्तः पूतिर्वाति मेध उ वा आपो मेध्यो भूत्वा दीक्षा इति पवित्रमापः पवित्रपूतो दीक्षा इति[11] ॥६॥

सो ऽभिषिञ्चत आपो अस्मान्मातरः शुन्धयन्त्वित्येतद्वा एन॑ शोधयन्ति 11.12
यत्स्नाति घृतेन नो घृतप्वः पुनन्त्विति तद्वै सुपूतं यद्घृतेन पूयते विश्व॑ हि रिप्रं प्रवहन्ति देवीरिति सर्वं वै विश्वं यदु वा अमेध्यं तद्रिप्र॑ सर्व॑ ह्यस्यैतदमेध्यं प्रवहन्ति स्नात्वोत्क्रामत्युदिदाभ्यः शुचिरा पूत एमीत्युद्धयाभ्य एतच्छुचिः[12] पूत एति ॥७॥

अथ दीक्षितवसनं परिधत्ते सर्वत्वाय वै दीक्षितवसनं परिधत्ते कृत्स्नतायै 13
पुरुषे ह वा इयमग्रे त्वगास॒ येयं गवि ॥८॥

ते ह देवा ऊचुरियं वा इद॑ सर्वं बिभर्ति यद्यौरिति हन्त येयं पुरुषे त्वक्ता- 14-17
मवच्छाय गवि दधाम[13] तयेयं घृणिं तितिक्षिष्यते[14] तया वर्षन्तं तया हिममिति तथेति तामवच्छाय गव्यदधुस्तयैषा घृणिं तितिक्षते[15] तया वर्षन्तं तया हिममथायमवच्छितः पुरुषो ऽवच्छितो हि वै पुरुषस्तस्माद्यत्र क्व चास्यापि कुशो विकृन्तति तत एव लोहितमुत्पतति तस्मिन्नेतां त्वचमदधुर्यद्वासः पुरुषस्य हि वा एषा त्वक्तस्मादेतां

नान्यः पशुर्बिभर्ति तस्मादु सुवासा एव बुभूषेत्तद्धि त्वया त्वचा समृद्धो भवति तस्मादप्यश्लीलꣳ सुवाससं दिदक्षन्त एव त्वया हि त्वचा समृद्धो भवति तस्माद्वोरन्ते न[1] नग्नः स्याद्वेद ह गौरहमस्य त्वचं बिभर्मीति सा हास्मादीश्वरस्त्रसितोर्यन्मे ऽयं त्वचं[2] नादधीतेति[3] तस्मात्सुवाससमुपैव निश्रयन्ते पशवः ॥९॥

18.19 तस्य[4] वाससो ऽग्नेरेव पर्यासो वायोरनुच्छादः पितॄणां नीविः सर्पाणां प्रघातो विश्वेषां देवानां तन्तवो नक्षत्राणामारोका एवꣳ ह्येतत्सर्वा देवता अन्वायत्तास्तस्मादेतद्दीक्षणीयं तदहतꣳ स्यादित्याहुस्तदुभयं[5] निष्पेष्टवै ब्रूमो यदेवास्यामेध्या कृणत्ति वा वयति वा तदेवास्यैतद्भिर्मेध्यं कुर्वन्त्यथो यत्स्नातवास्यमपल्पूलनपल्पूलितं[6] तत्स्यात् ॥१०॥

20 तत्परिधत्ते दीक्षातपसोस्तनूरसीति मानुषी वा अस्यैषाग्रे त्वग्भवत्यथैषा दीक्षातपसोर्यद्दीक्षितस्य तस्मादाह दीक्षातपसोस्तनूरसीति तां त्वा शिवाꣳ शग्मां परिदध इति तां त्वा साध्वीं परिदध इत्येवैतदाह भद्रं वर्ण पुष्यन्निति पाप इव वा एतदग्रे भवत्यवच्छित इवाथैतद्भद्रं वर्ण पुष्यति यत्त्वां त्वचं तस्मादाह भद्रं वर्ण पुष्यन्निति ॥११॥

21 तदाहुर्धेनोश्चानलुहश्च नाश्नीयादिति धेनुश्च ह वा अनड्वाꣳश्चेदꣳ सर्वं बिभृतस्ते ह देवा ऊचुरिमौ वा इदꣳ सर्वं बिभृत इति यद्धेनुश्चानड्वाꣳश्च हन्त यदन्येषां वयसां वीर्यं यदन्येषां पशूनां तदनयोर्दधाम तेनेमाविदꣳ सर्वं भरिष्यत इति तद्यदन्येषां वयसां वीर्यमासीद्यदन्येषां पशूनां तदेतयोरदधुस्तेनैताविदꣳ[7] सर्वं बिभृतस्तस्मादेतयोर्नाश्नीयात्सर्वाश्यमिव ह तदन्तगतिरिव सा तꣳ ह्येश्वरो ऽद्भुतमभिजनितोर्जायाया वा गर्भं निरवधीद्यद्धेति तदु होवाच याज्ञवल्क्यो ऽश्नीयामेवाहमित्यꣳसलं चेत्स्यादिति ॥१२॥ द्वितीयं ब्राह्मणम् ॥

1 वस्रोः MSS. 2 Thus accented MSS. Read न जिघ° ? 3 जिघत्सेत्तदिति MSS. Read जिघ° ? 4 निकृंतते MSS. 5 तंन B O P C[1] C (orig.). 6 °ष्टकयो M My. 7 °भ्युत O P C C[3], °भ्युंतक B, °भ्युंत्क W. 8 निघ्नं MSS. 9 Note the femin., cp. उत्तराम् in section 5. 10 °कमधिनिदधा° M (cp. IV .8. 2. 9). 11 इति B. 12 एतच्छुचिः O P.

13 दधाम O P C C². 14 °ष्यते MSS. 15 Thus accented O P C C². 16 न MSS. 17 Thus MSS. Read त्वचं नादद्दीतेति ? 18 तस्यह M. 19 Thus MSS. Read perhaps : °स्तदु वयं. 20 Thus, without accents, M only; °मपल्पूलीनपल्पूलितं B W O (sec. m.) C (pr. m.) C² (sec. m.), °मपल्पुलीनपल्पूलितं O (sec. m.) P C² (pr. m.), °मपल्पूलिन° C (sec. m.). 21 तदेतयोरदधु° MSS.

K. IV. 1. 3 M. III. 1. 3

स वा एतमाग्नावैष्णवमेकादशकपालं पुरोळाशं निर्वपति दीक्षणीयं तद्यदेत- 1
दाग्नावैष्णवं दीक्षणीयꣳ हविर्भवत्यग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वत्यग्निरु वा अवरार्धो यज्ञस्य विष्णुः परार्धस्तत्सर्वाश्च देवता इति सर्वं च यज्ञं परिगृह्य दीक्षा इति तस्मादाग्नावैष्णवो भवति ॥१॥

तदाहुरादित्येभ्यो ऽपि चरुं निर्वपेदिति तदप्येतदष्टौ पुत्रासो अदितेर्ये 2.3
जातास्तन्वस्परि देवाꣳ उप प्रैत्सप्तभिः परा मार्ताण्डमास्यदित्यष्ट[1] ह पुत्रासो[2] ऽदितेस्ततस्ते[3] सप्त ये देवा ये देवत्राथ हाष्टमं[4] जनयां चकार मार्ताण्डमित्यविकृतमिवैव संदेघमिवैव स ह पुरुषमात्र एवोर्ध्व आस पुरुषमात्रस्तिर्यङ् ॥२॥

ते हेम आदित्या ऊचुर्मायमसुया[5] भूदिति हन्तेमꣳ संकृन्ताम यथायं पुरुष 4
एवं विकरवामैनमिति तꣳ ह संचकृतुस्तꣳ[6] ह विचकृर्यथायं पुरुष एवं तस्य यत्संकर्तनमास[7] तत्सार्धꣳ संन्यासुः स ह स्त्यभवत्तस्माद्धस्ती दुष्प्रतिग्रह[8] इत्याहुः पुरुषः प्रतिगृह्यमिव तद्यो हस्तिनं प्रतिगृह्णादिति तद्यं तꣳ समकृन्तन्यं[9] तं व्यकुर्वन्त्स विवस्वानादित्यस्तस्येमाः प्रजा वैवस्वत्यो[10] यदिदं किं च ॥३॥

स होवाच यन्मे प्रजायां यज्ञ उपनमादिति राध्नवदेव स य आदित्येभ्यश्चरुं 5
निर्वपादिति राध्नोति हैव स य एवं विद्वानादित्येभ्यश्चरुं निर्वपतीतरं[11] त्वेव प्रज्ञातं यदेतदाग्नावैष्णवं दीक्षणीयꣳ हविर्भवति ॥४॥

तस्यावृद्यैवेयं[12] दार्शपौर्णमासिका तेन यथेष्ट्यैवं चरन्ति सप्तदश सामिधे- 6
नीरन्वाह सर्वत्वायोपाꣳशु देवतां यजति[13] संयाजयन्ति पत्नीः सामिष्टयजुरेव न जुह्वति

नेदिदं दीक्षितवसनं परिधायेति यमिमं यज्ञमनसि तस्य पुरा सꣳस्थाया अन्तं गच्छानीत्यन्तो ह्येव यज्ञस्य यत्समिष्टयजुः ॥५॥

7 अथैनं पूर्वार्धे शालाया वा विमितस्य वा तिष्ठन्तं तदेनमभ्यनक्ति स यदेनमभ्यनक्त्यरुर्वै[13] पुरुषस्तेन ह पुरुषो ऽरुर्यद्वच्छितो ऽनरुरेवैनं तत्करोत्यथो गवि वा अस्य त्वचमदधुर्गोरु वा एतद्भवति स्वयैवैनमेतत्स्वया[14] त्वचा समर्धयति कृत्स्नं करोति तस्मादेनमभ्यनक्ति ॥६॥

8 तन्नवनीतं भवति घृतं वै देवानामाज्यं निष्पाण्टं[15] मनुष्याणामथैतन्नवनीतमयातयाम वै नवनीतं यदि[16] ह[16] कामयते घृतमेनत्कुरुते यदि कामयते ऽभ्यञ्जनमयातयान्नैवैनमेतद्यातयामानं करोति तस्मादेनमभ्यनक्ति ॥७॥

9 सो ऽभ्यनक्ति महीनां पयो ऽसीति मह्यो वा एता एकेन नाम्ना यद्वावस्तासामेतत्पयस्तस्मादाह महीनां पयो ऽसीति वर्चोदा[17] असि वर्चो मे देहीति नात्र तिरोहितमिवास्ति तꣳ शिरस्तो ऽग्रे ऽनुलोमाभ्यनक्ति शिरस्तो ह्यग्रे जायमानो जायते[18] ॥८॥

10.11 अथास्याक्षिणी आनक्त्यरुर्वा अक्षिणी प्रशान्ममेति[19] होवाच याज्ञवल्क्यो दुरक्ष इव ह्यास तस्य या दूषीका यथा पूय[20] एवं तदनरुरेवैने तत्करोत्यथो यत्र वै देवा असुररक्षसानि जघ्नुस्तद्ध शुष्णो[21] दानवः प्रजानां चक्षूꣳषि प्रविवेश स एष कुमारक इव कनीनकायां तस्मा एवैतद्यज्ञमुपप्रयन्नश्मपुरां[22] करोत्यश्मा ह्याञ्जनम् ॥९॥

12 तत्त्रैककुदꣳ स्याद्यत्र वा इन्द्रो वृत्रमहꣳस्तस्य ह या कनीनकास यच्चक्षुस्तमेतं गिरिं चकार त्रिककुदꣳ[23] स यत्त्रैककुदं भवति चक्षुष्येवैतच्चक्षुर्दधाति यदि त्रैककुदं न विन्देदपि यदेव किं च स्यात् ॥१०॥

13 तच्छरेषीकयानक्ति[24] वज्रो वै शरो विरक्षस्तायै सतूलयाप्रतिशीर्णाग्रया[25] तथा ह रक्षाꣳस्यपबाधते यथा ह्ययं पुरुषो ऽमूल उभयतः परिच्छिन्नो ऽन्तरिक्षमनु चरत्येवꣳ[26] हि रक्षाꣳस्यमूलान्युभयतः परिच्छिन्नान्यन्तरिक्षमनु[29] चरन्ति तस्मात्सतूलयानक्ति ॥११॥

14.17 स दक्षिणमेवाग्र आनक्त्यथ सव्यꣳ सव्यं वा अग्रे मानुष आनक्त्यथैवं देवत्रा द्विर्दक्षिणमानक्ति त्रिरुत्तरमुत्तरामेवैतदुत्तरं[28] करोति तद्वेव पञ्च कृत्वः संपद्यते पाङ्क्तो वै यज्ञः पाङ्क्ताः पशवः पञ्चर्तवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्व आनक्ति ॥१२॥

स आनक्ति वृत्रस्य कनीनकासीति[३०] वृत्रस्य वा एषा कनीनका यदाञ्जनं 15.16
तस्मादाह वृत्रस्य कनीनकासीति चक्षुर्दा असि[३१] चक्षुर्मे देहीति नात्र तिरोहितमि-
वास्ति स सकृदेव यजुषा दक्षिणमानक्ति तूष्णीं द्वितीयꣳ सकृद्वेव यजुषोत्तरमानक्ति
तूष्णीं द्विः ॥१३॥

अथैनं कुशतरुणकैः पवयति पवित्रं वै मेधः कुशाः पवित्रपूतो मेध्यो दीक्षा 18-21
इति तदेकमेव[३२] स्यादयं वाव पवित्रं यो ऽयं पवते स वा अयमेक इवैव पवते सो
ऽयं पुरुषे ऽन्तः प्रविष्टः प्राङ्च प्रत्यङ्च तौ प्राणोदानौ तदेतस्यैवानु मात्रां तस्मादेकमेव[३३]
स्यादथो त्रीणि स्युरित्याहुस्त्रेधाविहितो ह्ययं पुरुषे प्रविष्टः प्राण इति तदेतस्यैवानु मा-
त्रां तस्मात्त्रीणि स्युस्तदु खलु सप्तैव भवन्ति सप्त हीमे शिरसि प्राणास्तदु त्रिरेव सप्त
भवन्ति ॥१४॥

स पवयति चित्पतिर्मा पुनातु वाक्पतिर्मा पुनात्विति प्रजापतिर्वै चित्पतिः 22.23
स हि चित्तानामीष्टे तदेनं प्रजापतिः पुनाति[३४] वाक्पतिर्मा पुनात्वित्ययं वाव वाक्प-
तिर्यो ऽयं पवते तदेनमेष पुनाति[३५] देवो मा सविता पुनात्विति सविता वै देवानां
प्रसविता तदेनं देव एव सविता पुनात्यच्छिद्रेण[३६] पवित्रेणेत्यच्छिद्रं वा अयं पवित्रं
यो ऽयं पवते तस्मादाहाच्छिद्रेण पवित्रेणेति सूर्यस्य रश्मिभिरित्येते वा अपिपवि-
तारो[३७] यत्सूर्यस्य रश्मयस्तस्मादाह सूर्यस्य रश्मिभिरिति तस्य ते पवित्रपते पवित्र-
पूतस्येति पवित्रपतिर्ह्येष भवति यो दीक्षते पवित्रपूतस्येति पवित्रपूतो हि भवति यत्कामः
पुने तच्छकेयमिति यज्ञस्योदृचमशीयेत्येवैतदाह यज्ञस्योदृचमशीयेति हि स कामयते
यो दीक्षते तस्मादाह यत्कामः पुने तच्छकेयमिति स एतेनैव त्रिः पवयति तन्नव कृत्वो
नव वै प्राणाः प्राणा उ वै पवित्रं तस्मान्नव कृत्वः पवयति ॥१५॥

अथैनमाशिषामारम्भं वाचयत्या वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो 24
देवास आशिषो यज्ञियासो हवामह इत्याशिषामेवैष आरम्भ आशिष एवैतदारभते ता
अस्मा आरब्धाः स्वाः सतीर्ऋत्विज एता आशिष आशासते ता अस्मै समृध्यन्ते ॥१६॥

अथाङ्गुलीर्न्यंचति स्वाहा यज्ञं मनस इति द्वे स्वाहोरोरन्तरिक्षादिति द्वे 25
स्वाहा द्यावापृथिवीभ्यामिति द्वे स्वाहा वातादारभ इति द्वे ॥१७॥

स यदेवमङ्गुलीर्न्यंचति न वा इत्थं यज्ञ आरभे[३८] यथेदं वासो वा दण्डो 26.27
वा यद्वेदमन्यन्मानुषे देवा हि यज्ञः परोक्षमिव हि देवा यज्ञमेवैतत्परोक्षमारभते स्वाहा
यज्ञं मनस इति तदेनं मनस आरभते स्वाहोरोरन्तरिक्षादिति तदेनमस्मादुरुणो

ऽन्तरिक्षादारभते स्वाहा द्यावापृथिवीभ्यामिति तदेनमाभ्यां द्यावापृथिवीभ्यामारभते ययोरिदꣳ सर्वमधि स्वाहा वातादारभ इत्ययं वाव यज्ञो यो ऽयं पवते तदेनं प्रत्यक्षमारभते स यत्स्वाहा स्वाहेत्याह स्वीकुरुत एवैनमेतदात्मन्येवैनमेतत्कुरुत आत्मनि यज्ञं कृत्वा दीक्षा इत्यथ वाचं यच्छति वाग्वै यज्ञ आत्मनि यज्ञं कृत्वा दीक्षा इति[15] ॥१८॥

28 अथैनं प्रपादयति तस्यान्तरेणाहवनीयं च गार्हपत्यं च संचरो भवति स यदस्यैष संचरो भवत्यग्निर्वै यज्ञस्य योनिरेष उ वा अत्र यज्ञो भवति यो दीक्षत एष ह्येनं तनुत[16] एष ह्येनं जनयते ऽन्तरेण वै योनिं गर्भः संचरति स[17] यत्स[18] तत्रैजति त्वत्परि त्वदावर्तते[19] तस्माद्विमे गर्भा एजन्ति त्वत्परि त्वदावर्तन्ते ॥१९॥ तृतीयं ब्राह्मणम् ॥

1 °त्यष्ट thus MSS. 2 पुत्रासो अदिते° B W M; पुत्रासो C (sec. m.). 3 त्वाष्टमं B. 4 Thus MSS. Read ऊचुर्मा°? 5 MSS. except C (sec. m.) संचक्रतु°. 6 Read यत्संकर्तनमास? 7 दुःप्र° MSS. except M. 8 समकृंतन्यं MSS. 9 Read वैवस्वत्यो (i. e. vaivasvatyò)? 10 निर्वपतीतरं MSS. 11 तस्यावृद्वैवेयं MSS. 12 यजति O P. 13 °नमभ्यनक्त्यरुर्वै O P C C¹, °मभ्यनक्त्यरुर्वै B W. 14 तयैवैन° M. The second स्वया is superfluous; cp., e. g., IV. 9. 4. 2. 15 निष्पा° M changed into निष्फा°; cp. Vait. Sūtra 28. 11. 16 यदिह B O W. 17 वचोंदा B W O P C C¹ (the last four MSS. omitting the following असि); My om. असि. 18 जायते MSS. 19 Thus C (sec. m.) only; प्रशांममेति (प्रशान्नमेति M) the other MSS. 20 Thus accented MSS. 21 शिश्नो MSS. except M. 22 °प्रयन्नश्नमपुरां B W O P. 23 Thus accented MSS. 24 तछरेषी° MSS. 25 °र्णाम्रया O P C C¹. 26 चरत्येव° O P C C¹. 27 परिछिद्यान्य° MSS. 28 चरंति O P C C¹.

29 Thus (°मुत्तरामेवैत°) MSS. 30 कनीनिका instead of कनीनका M throughout. 31 All MSS. exc. M om. असि, reading चक्षुर्दाश्चक्षुर्मे. 32 तदेकमेव O P C C^1, तदेकमेव B W. 33 °देकमेव B W, °देकमेव O P C C^1. 34 पुनातु MSS. 35 पुनातु M. 36 पुनात्व° MSS. 37 Cp. II. 1. 3. 3. 38 Thus accented MSS. Read आरभे (Inf. dative). 39 इति MSS. 40 Thus accented MSS. 41 सयत्स O P C C^1 (sec. m.). 42 त्वदावर्तते MSS. (also Mādhy.) except C (sec. m.).

K. IV. 1. 4 M. III. 1. 4

सर्वाणि ह वाव दीक्षाया यजूꣳष्यौद्ग्रभणान्युद्गृह्णीते ह वा एषो ऽस्मान्मनुष्यलोकादेवलोकमभ्यात्मानं यो दीक्षते स वा एतैरेव तद्यजुर्भिरुद्गृह्णीते यैर्दीक्षते तस्मात्सर्वाण्येव दीक्षाया यजूꣳष्यौद्ग्रभणान्यथ यदेतान्यवान्तरामौद्ग्रभणानीत्याख्यायन्त आहुतयो ह्येता आहुतिर्ह्येव[1] यज्ञः परोक्षमिव हि तद्यद्यजुर्जपत्येतेन हि तद्यज्ञेनोद्गृह्णीते[2] ॥१॥ 1

तद्यानि त्रीणि स्रुवेण जुहोत्याधीतयजूꣳषीति[3] तान्याख्यायन्ते संपदः कामाय चतुर्थꣳ हूयते ऽथ यामेवादः स्रुचानुष्टुभा जुहोति सैव प्रत्यक्षमौद्ग्रभणमनुष्टुभा हि तां जुहोति वाग्घ्यनुष्टुब् वाग्घि यज्ञस्तेन ह सा प्रत्यक्षमौद्ग्रभणमथ यत्सर्वाणि जुहोति ॥२॥ 2

देवा वै यज्ञेनेमां जितिं जित्वा येयमेषां जितिस्ते होचुर्हन्तेदं तथा करवामहा इति यथा न इदमनभ्यारुह्यं मनुष्यैरसदिति ते यज्ञस्य रसं निर्धीय यथा मधुकृतो निर्धयेयुरेवं विदुह्य यज्ञं यूपेन योपयित्वा तिरो बभूवुस्तद्यदेनेनायोपयꣳस्तस्माद्यूपो नाम ॥३॥ 3

तद्वृषीणामनुश्रुतमास तं यथा यथर्षयो यज्ञꣳ समभरꣳस्तथायं यज्ञः संभृतो यथो वै तद्दृषयो यज्ञꣳ समभरन्नेवमु वा एष एतद्यज्ञꣳ संभरति यो दीक्षते ॥४॥ 4

एष उ वै स यज्ञो यदेता आहुतयस्तस्मात्पञ्च जुहोति संवत्सरसंमितो यज्ञः पञ्चर्तवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च जुहोति ॥५॥ 5

6 स जुहोत्याकूत्यै प्रयुजे ऽग्नये स्वाहेत्याकुवते वै यजेयेति स यदेनं तनुते तदेनं प्रयुङ्क्ते तद्यदेवैतद्यज्ञस्य रूपं तदेवैतेन संभरति तदात्मनि कुरुते ॥६॥

7.8 मेधायै मनसे ऽग्नये स्वाहेति मेधया वै मनसाभिगच्छति यजेयेति तद्यदेवैतद्यज्ञस्य रूपं तदेवैतेन संभरति तदात्मनि कुरुते दीक्षायै तपसे ऽग्नये स्वाहेत्यन्वाहुरेवैतन्न तु जुह्वति ॥७॥

9.10 सरस्वत्यै पूष्णे ऽग्नये स्वाहेति वाग्वै सरस्वती वाचा वा अभिव्याहरति यक्ष्य इति पशवो वै पूषा पुष्टिर्हि पूषा पुष्टिर्हि पशवो यदा वै पशून्पुष्यत्यथ यज्ञं प्राप्नोति तद्यदेवैतद्यज्ञस्य रूपं तदेवैतेन संभरति तदात्मनि कुरुते स यत्सर्वेष्वग्नये स्वाहेति जुहोत्यनद्धेव वा एता आहुतयो हूयन्ते ऽप्रतिष्ठिता इव न हि कस्यै चन देवतायै हूयन्ते ॥८॥

11 आकूत्यै प्रयुज इति तन्नाग्निर्नेन्द्रो न सोमो मेधायै मनस इति नातो ऽन्यतरच्चनैवमेव सर्वेष्वग्निरु वा अद्धाग्निः प्रतिष्ठित एतेनास्यैतद्धाहुतयो हुता भवन्त्येतेन प्रतिष्ठितास्तस्मात्सर्वेष्वग्नये स्वाहेति जुहोत्यथ यदाधीतयजूंषीत्याख्यायन्त आत्मनि ह्यस्यैता देवता आधीता आत्मनि प्रतिष्ठिताः ॥९॥

12 आकूत्यै प्रयुजे ऽग्नये स्वाहेत्यात्मना वा आकुवते यजेयेति स यदेनं तनुते तदेनमात्मन एव प्रयुङ्क्ते ते अस्मिन्नेते उभे देवते आत्मन्याधीते ॥१०॥

13 मेधायै मनसे ऽग्नये स्वाहेति मेधया वै मनसाभिगच्छति यजेयेति तदस्येदमुभयमात्मन्येव यन्मेधा च मनश्च ते अस्मिन्नेते उभे देवते आत्मन्याधीते ॥११॥

14 सरस्वत्यै पूष्णे ऽग्नये स्वाहेति वाग्वै सरस्वती वाचा वा अभिव्याहरति यक्ष्य इति सेयमस्यात्मन्येव पशवो वै पूषा पुष्टिर्हि पूषा पुष्टिर्हि पशवो यदा वै पशून्पुष्यत्यथ यज्ञं प्राप्नोति त उ अस्येम आत्मन्येव ते अस्मिन्नेते उभे देवते आत्मन्याधीत एव ह्यस्यैता देवता आत्मन्याधीता आत्मनि प्रतिष्ठितास्तस्मादाधीतयजूंषीत्याख्यायन्ते ॥१२॥

15.16 अथ जुहोत्यापो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वन्तरिक्ष। बृहस्पतये हविषा विधेम स्वाहेत्येषा हि नेदिष्ठा यज्ञस्यापा ह्यत्र कीर्तयत्यापो हि यज्ञो द्यावापृथिवी उर्वन्तरिक्षेति तदेषां त्रयाणां लोकानां कीर्तयति तदेभ्यस्त्रिभ्यो लोकेभ्यः संभरति बृहस्पतये हविषा विधेम स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्म यज्ञ एतेन हैषा नेदिष्ठा

यज्ञस्याथ यामेवादः स्रुचानुष्टुभा जुहोति स एव प्रत्यक्षं यज्ञो ऽनुष्टुभा हि तां जुहोति वाग्ध्यनुष्टुब् वाग्घि यज्ञस्तेन ह सा प्रत्यक्षं यज्ञः ॥१३॥

तद्यद्ध्रुवायामाज्यं भवति तत्सर्वमेव जुह्वामानयत्यथ द्विः स्रुवेण स्थाल्या 17.18
गृहीत्वाभ्येव स्रुवं यत्स्थाल्यां परिशिष्टं भवति तदानयति तज्जुहोति विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहेति ॥१४॥

तदाहुरेतामेवाप्येकां[12] जुहुयादिति यदाहुः संवत्सरसंमितो यज्ञः पञ्चर्तवः 19-23
संवत्सरस्येत्येतयैव तदाप्नोतीति विश्वो देवस्येति तदस्या वैश्वदेवं नेतुरिति तत्सावित्रं मर्त इति तन्मैत्रं विश्वो द्युम्नमिति तद्बार्हस्पत्यं द्युम्नꣳ हि बृहस्पतिः पुष्यस इति तत्पौष्णꣳ सैषा देवताभिः पङ्क्तिस्तद्वेव तदाप्नोति यत्संवत्सरसंमितो यज्ञः पञ्चर्तवः संवत्सरस्येत्यनुष्टुभो वै जुहोति वाग्वा अनुष्टुब् वाग्वै यज्ञस्तद्वेव यज्ञꣳ संभरति स यद्येतामेवैकां जुहुयात्पूर्णा तर्हि जुहुयात्सर्वꣳ ह्येषा तर्हि भवति सर्वꣳ हि पूर्णꣳ सैषा मीमाꣳसैव सर्वास्त्वेव जुह्वति सैषानुष्टुप्सत्येकत्रिꣳशदक्षरैकत्रिꣳशो वा अयं पुरुषो दशेमाः[13] पाण्या अङ्गुलयो दशामूः पाद्या दशेमे प्राणा आत्मैकत्रिꣳशः पुरुषो वै यज्ञस्तस्मादनुष्टुभैकत्रिꣳशदक्षरया जुहोति पुरुषो हि यज्ञः ॥१५॥ चतुर्थं ब्राह्मणम् ॥ प्रथमो ऽध्यायः ॥

1 आहुतीर्ह्येव B W O P C C[2]. 2 °गृह्णीते MSS. 3 °धीतयजूꣳषीति MSS., but cp. section 9. 4 Thus accented MSS. 5 स्वाहेत्य° MSS.; °वैतेन MSS. except M. 6 तंनाग्निं B W O P C. 7 न्यत-रच्चनैवमेव MSS. 8 Read हुता भव° ? 9 यदाधी° MSS. 10 Thus accented MSS. again. 11 Thus, without accent, M only; प्रतिष्ठितास्तस्मात्सर्वेष्वग्नये स्वा-हेति जुहोत्यथ यदाधीतयजूꣳषीत्याख्यायंते the other MSS. 12 °रेतामेवाप्येकां MSS. 13 Thus accented MSS. Read दशेमाः, पाण्य being = pāṇyà ?

K. IV. 2. 1 M. III. 2. 1

ते वा एते कृष्णाजिने प्राग्ग्रीवे उपस्तृणाति तयोरेनमधि दीक्षयति ते यदि 1.2
द्वे भवतो ऽनयोरेवैनं तल्लोकयोरधि दीक्षयति ते संबद्धान्ते स्याताꣳ संबद्धान्ताविव

हीमौ लोकौ तर्ह्यसमृते पश्चात्स्यातामिमावेवैतल्लोकौ[1] मिथुनीकृत्य तयोरेनमधि दीक्षयति तस्मात्तर्ह्यसमृते पश्चात्स्याताम् ॥१॥

3.4 यद्युवेकं भवत्येषामेव तल्लोकानाꣳ रूपं यानि शुक्लानि तान्यस्या यानि कृष्णानि तानि दिवो यदि वेतरथा यानि कृष्णानि तान्यस्या यानि शुक्लानि तानि दिवो ऽथ यान्येव मध्ये बभ्रूणि वा हरीणि वा तान्यन्तरिक्षस्य तद्वनं तदेष्वेव लोकेष्वधि दीक्षयति तत्पश्चादन्तं प्रत्यस्यति तदिमौ लोकौ मिथुनीकृत्य तयोरेनमधि दीक्षयति तस्मात्पश्चादन्तं प्रत्यस्यति ॥२॥

5-7 अथ पश्चाज्जान्वक्ण[2] उपविशति स शुक्लानां च कृष्णानां च लोम्नाꣳ संधिमभिमृश्य जपत्यृक्सामयोः शिल्पे स्थ इति यद्वै प्रतिरूपं तच्छिल्पमृचां च साम्नां च प्रतिरूपे स्थ इत्येवैतदाह ते वामारभे ते मा पातामिति ते वां प्रविशामीत्येवैतदाह यदाह ते वामारभ इति ते मा पातमिति ते मा गोपायतमित्येवैतदाहास्य[3] यज्ञस्योदृचꣳ इत्यास्य यज्ञस्य सꣳस्थाया इत्येवैतदाह गर्भो वा एष भूतश्छन्दाꣳसि प्रविशति यो दीक्षते तस्मात्समक्णाङ्गुलिरिव[4] भवति समक्णाङ्गुलिरिव[5] ह्ययं गर्भः[6] ॥३॥

8 अथोरुणाधिसर्पति शर्मासि शर्म मे यच्छ नमस्ते अस्तु मा मा हिꣳसीरिति कृष्णस्य[7] वा एतच्चर्म तदस्यैतन्मानुषं नाम शर्म देवत्रा स यदेव देवत्रा तत्करोति तस्मादाह शर्मासि शर्म मे यच्छेति नमस्ते अस्तु मा मा हिꣳसीरिति श्रेयाꣳसं वा एष उपाधिरोहति यो मनुष्यः सन्यज्ञमुपाधिरोहति यज्ञो हि कृष्णाजिनं तस्मा एवैतच्चमस्करोति तस्मै निह्नुते तथैनमेष यज्ञो न हिनस्ति तस्मादाह नमस्ते अस्तु मा मा हिꣳसीरिति ॥४॥

9 स निरन्त इवैवाग्र आसीत यद्ध प्रथमेनैव मध्यं प्रविशेद्यो हैनं तत्रानुव्याहरेद्दप्स्यति वा मरिष्यति वा प्र वा पतिष्यतीतीश्वरो ह तथैव स्यात्तस्मान्निरन्त इवैवाग्र आसीत ॥५॥

10 अथ मेखलां परिहरते स यन्मेखलां परिहरते यत्र ह वा अङ्गिरसो दीक्षिता अबल्यं निजग्मुस्तद्धोपाजिज्ञासन्त[8] कथं नु समाप्नुयामेति ते नाद्दान्यद्व्रतादृशनमुपाजानꣳस्त[9] एतामेवोर्जमपश्यन्नेतां मेखलां तां मध्यतो ऽदधत समाप्तये तया समाप्नुवꣳस्तथो वा एष एतामूर्जं मध्यतो धत्ते समाप्तये तया समाप्नोति तस्मान्मेखलां परिहरते ॥६॥

11 सा शाणी भवति मृद्ध्यसदिति तस्मान्वेव[10] शाणी यत्र ह वै तत्प्रजापतिः

प्रथमं गर्भो भूतो ऽजायत तस्य ह यन्नेदिष्ठमुल्बमास ते शणास्तस्माच्छणा दुर्गन्धयो[१७] वान्त्यथ यद्बाह्यं जरायु तद्दीक्षितवसनं यतो वै तत्प्रजापतिरतः प्रथमं गर्भो भूतो ऽजायतैवमु वा एष एतदतः प्रथमं गर्भो भूतो जायते तस्माच्छाणी मेखलान्तरा दीक्षितवसनाद्भवत्यन्तरꣳ ह्युल्बं जरायुणो भवति तस्माच्छाणी भवति ॥७॥

सा त्रिवृद्भवति त्रिवृद्धयन्नं पशवो ह्यन्नं पिता माता यज्जायते तत्तृतीयं 12
तस्मात्त्रिवृद्भवति ॥८॥

तस्यां मुञ्जबल्बजो ऽन्वस्तो भवति वज्रो वै शरो विरक्षस्तायै सा स्तुकासर्गꣳ 13
सृष्टा भवति यद्धेत्थꣳ[१९] सृष्टा[२०] स्याद्यथेयꣳ रज्जुर्मानुषी ह स्याद्यदु ह्यपसलवि[२१]
सृष्टा स्यात्पितृदेवत्या स्यादथैवं देवत्रा तस्मात्स्तुकासर्गꣳ सृष्टा भवति ॥९॥

तां परिहरत ऊर्गस्याङ्गिरसीत्यङ्गिरसो ह्येतामूर्जमपश्यꣳस्तस्मादाहाङ्गिरसी- 14
त्यूर्णम्रदा इत्यूर्णमृद्वीत्येवैतदाहोर्जे मे यच्छेत्यूर्जे मे यच्छेत्येवैतदाह ॥१०॥

अथ नीविं कुरुते सोमस्य नीविरसीति मानुषी वा अस्यैषाग्रे नीविर्भव- 15
त्यथैषा सोमस्य नीविर्यद्दीक्षितस्य तस्मादाह सोमस्य नीविरसीति ॥११॥

अथैनं प्राणौति गर्भो वा एष भवति यो दीक्षते प्रावृत इव वै गर्भ उल्बेनेव 16
त्वज्जरायुणेव त्वद्गर्भरूपमेवैनं तत्करोति ॥१२॥

स प्रोणौति विष्णोः शर्मासि शर्म यजमानस्येत्युभयं वा एष एतद्भवति 17
विष्णुश्च यजमानश्च यो दीक्षते तस्मादाह विष्णोः शर्मासि शर्म यजमानस्येत्य-
थोत्तरसिक्थे कृष्णविषाणां बध्नाति ॥१३॥

देवाश्च ह वा असुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्यन्नमेव देवा 18.19
वाचमसुरा मनो वै तद्देवा उपायन्वाचमसुरा अमूं वै तद्देवा दिवमुपायन्निमामसुराः
स ह्ायं यज्ञो देवैर्वोक्तः स्वयं वा दध्रे हन्तेमां वाचमुपमन्त्रया इति देवा वैनमूचुर्योषा
वा इयमित्युपमन्त्रयस्व भगवो[२२] ह्वयिष्यते[२३] वै त्वेति ॥१४॥

ताꣳ होपमन्त्रयां चक्रे सा हास्मै दूरमिवैवाग्रे ऽसूयां चकार तस्मादु स्त्री
प्रथममुपमन्त्रिता दूरमिवैवाग्रे ऽसूयति स होवाच दूरमिव वै म आसूयदिति[२४] ते
होचुरुपैव भगवो मन्त्रयस्व ह्वयिष्यते वाव त्वेति ॥१५॥

ताꣳ ह द्वितीयमुपमन्त्रयां चक्रे सा हास्मै निपलाशतरमिवोवाद तस्मादु 20
स्त्री द्वितीयमुपमन्त्रिता निपलाशतरमिवैव वदति स होवाच निपलाशतरमिव वै मे
ऽवादीदिति ते होचुरुपैव भगवो मन्त्रयस्व ह्वयिष्यते वाव त्वेति ॥१६॥

21-23 तां ह तृतीयमुपमन्त्रयां चक्रे सा हैनं जुहुवे तस्मादु स्त्र्युपमन्त्र्यमाणꣳ[15] ह्वयत एवान्ततः स होवाचाह्वत वै मेति त उ ह देवा बिभयां चक्रुर्योषा वा इयमिति यद्वा एनं न युवीतेति ते होचुरिहैव माभ्येहीति भगवो ब्रूहीति तां न आगतां प्रब्रवसीति स होवाचेहैव माभ्येहीति तस्मादु स्त्र्येव पुमाꣳसꣳ सꣳस्कृते ऽभ्यैति तांꣳ हागतां प्रोवाचेयं वा आगन्निति तां देवा असुरेभ्यो ऽन्तरायꣳस्तामेषामवृञ्जतान्नौ सर्वहुतमजुहवुर्हुतꣳ हि देवानाꣳ सैषा वाङ् निदानेन यामद् औद्ग्रभणेष्वनुष्टुभा जुहोत्येषा सा वाङ् निदानेन ॥१७॥

24 ते हात्तवाचो ऽसुरा हैलो हैल इत्येताꣳ ह वाचं वदन्तः पराबभूवुस्तत्राप्युपजिज्ञासेन्यां वाचमुपाजिज्ञासन्त स म्लेच्छꣳस्तस्माद्ब्राह्मणेन न म्लेच्छितव्यमसुर्या ह्येषा वागेवꣳ ह वाव द्विषतः सपत्नस्य वाचमादत्त आत्तवाचो[16] हास्य सपत्नाः पराभवन्ति य एवमेतद्वेद ॥१८॥

25 तदुभयं देवेष्वासीद्वाकच यज्ञश्च स हायं यज्ञ इमां वाचमभिदध्यौ मिथुन्येनाꣳ स्यामिति ताꣳ संबभूव तस्याꣳ रेतः प्रसिषेच तस्मादु हेन्द्रो बिभयां चकार महद्वा इदं देवेषु मिथुनꣳ समागादिति यद्यज्ञस्य च वाचश्च यदितो जायेत यद्वै मा तन्न प्रतिप्रति[17]ꣳ स्याद्धन्ताहमेवेदं[18] गर्भो भूत्वा प्रविशानीति तद्ध गर्भो भूत्वा प्रविवेश स यच्च ततो जनिष्यमाणमासीत्तस्मान्मिथुनादिन्द्रश्च तदुभयमेवेन्द्रो ऽजायत तस्मादाहुरिन्द्र एव देवानां वीर्यवत्तम इत्येतस्माद्धि स मिथुनादजायतेति ॥१९॥

27.28 स ह संवत्सरे जायमान ईक्षां चक्रे महावीर्या वा इयं योनिर्या मामदीधरदिति यद्वै मा किं चिदद्भुतमस्या नानुप्रजायेतेति[19] तामनुपरामृश्य निवेष्ट्याच्छिच्छेद तस्मान्निवेष्टितेव[20] भवति निवेष्टिर्ह्येनामाच्छिनत्तां[21] यज्ञस्य शिरसि प्रतिदधौ सा कृष्णविषाणा तदेषो ऽह स यज्ञो यत्कृष्णाजिनमेषो सा योनिर्यत्कृष्णविषाणा यथो वै तदिन्द्र एतन्मिथुनं गर्भो भूत्वा प्राविशत्स एतस्मान्मिथुनादजायतैवमु वा एष एतन्मिथुनं गर्भो भूत्वा प्रविशति स एतस्मान्मिथुनाज्जायते[22] तस्मादाहुर्य एव यजते स स्वानां वीर्यवत्तम इत्येतस्माद्धि स मिथुनाज्जायत इति तस्मादेतामुत्तानामिव बभ्रीयादुत्तानेव हि योनिर्गर्भं बिभर्ति ॥२०॥

29.30 स शिरस्त उपस्पृशतीन्द्रस्य योनिरसीतीन्द्रस्य ह्येषा योनिरेतस्या उ हीन्द्रो ऽजायत तस्मादाहेन्द्रस्य योनिरसीति स यच्छिरस्त उपस्पृशत्यतो वा

एनामेतदग्रे प्रविशन्प्रविशत्यतो वा[२१] अग्रे[२२] जायमानो जायते तस्माच्छिरस्त उपस्पृशति सुसस्याः कृषीस्कृधीति भूमेरुल्लिखति यज्ञमेवैतज्जनयति[२३] यदा हि सुपक्त्योषधयः[२४] पच्यन्ते ऽथ हि यजन्ते न ह्यात्मने[२५] चन दुःषमे[२६] ऽलं भवन्ति तस्मादाह सुसस्याः कृषीस्कृधीति ॥२१॥

स दीक्षितो न नखेन न काष्ठेन कण्डूयेत गर्भो वा एष भवति यो दीक्षते यत्र 31
वै गर्भस्य नखेन वा काष्ठेन वा कण्डूयेदपमृत्येदस्य[२७] तत्स ह्येश्वरो दीक्षितः पामनो भवितोरेतमु वा अनु रेताꣳसि ते ह्येश्वरो गर्भाः पामना जनितोस्तस्मादेतयैव कण्डूयेत न हि स्वा योनिर्गर्भꣳ हिनस्ति ॥२२॥

अथास्मा औदुम्बरं प्रयच्छन्ति[२८] प्रतिलम्बायैवौदुम्बर[२९] इति होवाच याज्ञ- 32-34
वल्क्यो नेदौपसदो[३०] ऽतिवर्ता इत्यथो वज्रो वै दण्डो विरक्षस्ताया औदुम्बरो भवत्यन्नं वा ऊर्गुदुम्बरस्तस्मादौदुम्बरो भवति मुखसंमितो भवति मुखसंमितꣳहीदं वीर्यम् ॥२३॥

स प्रयच्छत्युच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यꣳहसः । आस्य यज्ञस्योदृच 35
इत्यूर्ध्वो मा गोपायास्य यज्ञस्य सꣳस्थाया इत्येवैतदाह ॥२४॥

अत्र हैके ऽङ्गुलीर्न्यंचयन्त्यत्र[३१] वाचं यमयन्ति न ह्यतो यजुर्जपिष्यन्भवतीति[३२] 36-38
नान्यां वाचमपव्याहरिष्यन्नेतदन्ततो[३३] यज्ञस्य यज्ञमारभत इति[३४] ॥२५॥

अथ यममुत्राङ्गुलीर्न्यंचयन्त्यमुत्र[३५] वाचं यमयन्तीत्युतास्य[३६] यजुर्वा जपतो ऽन्यां वा वाचमपव्याहरतो यज्ञः प्रस्रꣳसत इति वदन्तस्तदु तथा न कुर्याद्यथा यं जिघृक्षेत्तमतिसृज्यानुलिप्समानो नानुलभेत नान्वाप्नुयादेवꣳ ह स यज्ञं नान्वाप्नोति तस्मादमुत्रैवाङ्गुलीर्न्यंचयेदमुत्र[३७] वाचं यमयेत्स यथा यं जिघृक्षेत्तमायन्तमुपोत्थायाभिपद्येतैवꣳ ह स यज्ञमारभते स यत्तत्र यजुर्वा जपत्याहुतिं वा जुहुति[३८] यज्ञो वै यजुर्वाहुतिर्वाभिस्थिरमभिस्थिरमेव[३९] तद्यज्ञमारभते यद्यु पुरा मानुषीं कां चिद्वाचमपव्याहरेद्वैष्णवं यजुर्वाचं वा जपेद्यज्ञो वै विष्णुस्तत्पुनर्यज्ञमारभते ॥२६॥

अथैनं प्राहुरदीक्षिष्टायं ब्राह्मण इति निवेदितमेवैनमेतत्सन्तं देवेभ्यो भूयो 39.40
निवेदयत्ययं यौष्माक[४०] इतीमं गोपायतेमं वित्तेति देवान्ह्येष उपावर्तते यो दीक्षते स देवतानामेवैको भवत्यथ यदाह ब्राह्मण इत्येतर्हि वा एष ब्रह्मणो जायते[४१] यो यज्ञाच्छन्दोभ्यः श्लेष्मणो वा ह्यग्रे जायते यस्माद्वा को हि तद्वेद यद्यपि[४२] स्त्रियꣳ रक्षाꣳस्यभिसचन्ते ऽथैतर्हि ब्रह्मणो जायते[४३] यो यज्ञाच्छन्दोभ्यस्तस्माद्यद्यप्यब्राह्मणो[४४] दीक्षते राजन्यो वा वैश्यो वा ब्राह्मण इत्येवैनमाहुरेतर्हि हि ब्रह्मणो जायते तस्मादाहुर्न

सवनकृद्धन्तव्य[1] इत्येनस्व्येव सवनकृतातो हि स जायत इति ॥२७॥ प्रथमं ब्राह्मणम् ॥

1 °वैतंलोकौ P C C[1], °वैतंलोकौ B O W. 2 °न्वक्र C (sec. m.) M. 3 °तदाहास्य B W O (sec. m.) P C C[1], °तदाहास्य O (orig.) : एतत् । आह । आ । अस्य. 4 तस्मात्समक्णा° B W O P C (pr. m.) My, °त्समक्णा° C[2] (second time, pr. m.); °त्समक्षा° C (sec. m.) M. 5 गर्भः C C[1] (pr. m.), गर्भं B W O P C[2] (sec. m.). 6 कृष्णस्य MSS., but cp. II. 1. 3. 8. 7 निजग्मतुस्तद्धोपाजि° MSS. 8 Thus emended; °दशनमूपाजा° M, °दशनमपाजा° the other MSS. 9 तस्मान्वेव B O P C (pr. m.) C[2] 10 Without accents B O P. 11 यद्धेत्थꣳ सृष्टा O P C C[1], यद्धेच्छꣳ सृष्टा B W. 12 हापसलवि B W O P C C[2] (sec. m.). 13 भगवो वैह्वयि° B W C C[1], भगवो हैष्य° M, भगवो वैष्य° O My. 14 आसूयदिति MSS. except M, which has आसूयादिति. Read आसूयीदिति ? 15 °मंत्रयमाणꣳ MSS. 16 आत्तवाचो MSS. 17 i. e. प्रतिप्रति । स्यात् । हन्त etc. 18 नानुप्रजा° MSS. 19 तस्मान्निवेष्टितेव MSS. 20 ? निवेष्टिह्येनामाछिनत्तां B W C C[1] M, निवेष्टिह्येनामाछिनत्तां O P My. Read निवेष्ट्य ह्येना° ? 21 °थुनाजायते MSS. 22 Thus MSS. Read वाग्रे (वा । अग्रे) ? 23 °जनयति O P. 24 Thus MSS. except M (सुपक्त्वौषं). 25 ह्यात्मने MSS. 26 दुःखमे B W O P C (pr. m.) C[2], दुखमे My. 27 °दपंमृत्येदस्य B W C, °दयंमृत्येदस्य O P, °दपमृत्येदस्य C[1] M (without accent), °दपंमृत्ये° My. 28 °यछति B. 29 प्रतिलंभायै° C (sec.

m.) My, प्रतीलंभायै° B W O P C (pr. m.) C¹, प्रतिलम्बायै° M. 30 नेदउपस° M. 31 Thus accented MSS. Read ङुलीर्न्यंचय° ? 32 यजुर्जपिष्य° MSS. 33 °ष्याहरिष्य° MSS. 34 इति W O P C (sec. m.), इति B. 35 °लीर्न्यंचय° O P. 36 यमयंती° MSS. 37 °यंतमुपोत्थाया° MSS. 38 जुह्वति MSS. 39 °स्थिरमभिस्थिर° MSS. 40 यौष्माक MSS. 41 जायते W B C C². 42 यद्यपि MSS. 43 जायते MSS. 44 °स्तस्माद्य-द्यप्यत्रा° MSS. 45 Without accents MSS.

K. IV. 2. 2 M. III. 2. 2

स वै वाचंयमो भवत्यास्तमेतोरादित्यात्स यदास्तमेतोरादित्याद्वाचंयमो भवति ॥१॥ 1

देवा वै यज्ञेनेमां जितिं जित्वा येयमेषां जितिस्ते ह्येचुर्हन्तेदं तथा करवामहा इति यथा न इदमनभ्यारुह्यं मनुष्यैरसदिति ते यज्ञस्य रसं निर्धाय यथा मधुकृतो निर्धयेयुरेवं विदुह्य यज्ञं यूपेन योपयित्वा तिरो बभूवुस्तद्यदेनेनायोपयꣳस्तस्माद्यूपो नाम ॥२॥ 2

तद्वृषीणामनुश्रुतमास तं यथा यथर्षयो¹ यज्ञꣳ समभरꣳस्तथायं यज्ञः संभृतो यथो वै तदृषयो यज्ञꣳ समभरन्नेवमु वा एष एतद्यज्ञꣳ संभरति यो दीक्षते ॥३॥ 3

स वै वागेव यज्ञस्तꣳ संभृत्यात्मनि कृत्वा संयत² आस्त आस्तमेतोरादित्यात्सो ऽस्तमित आदित्ये वाचं विसृजते स यदस्तमित आदित्ये वाचं विसृजते संवत्सरो वै यज्ञः प्रजापतिर्हि³ संवत्सरः प्रजापतिर्हि यज्ञो ऽहोरात्रे उ वै संवत्सर एते हि परिप्लवमाने संवत्सरं कुरुतः स वा इदमहन्यदीक्षिष्ट⁴ स रात्रिं प्रापत्तत्सर्वं यज्ञमाप्त्वाथ वाचं विसृजते ॥४॥ 4

तद्धैके नक्षत्राणि दर्शयित्वाथ विसर्जयन्त्येतर्ह्यनुष्ठ्यास्तमित इति वदन्तस्तदु तथा न कुर्यात्क⁵ ते स्युर्यदभ्रः स्यात्तस्माद्यदैव कदा चास्तमितं मन्येताथैव वाचं विसर्जयेत् ॥५॥ 5

सो ऽग्निमीक्षमाणो विसृजते व्रतं कृणुत व्रतं कृणुत व्रतं कृणुतेत्येतद्वा 6-8

एतस्य ह्विरेष यज्ञो यद्व्रतं यथास्य पुराग्निहोत्रं तदेतं यज्ञꣳ संभृत्यैतस्मिन्यज्ञे प्रतिष्ठापयति यज्ञेन यज्ञꣳ संतनोति सो ऽस्यैष संततो यज्ञो भवत्या सुत्यायाः संतत꣡ꣳ ह्यस्यैतद्व्रतं भवति ॥६॥

तदु हैके भूर्भुवः स्वरिति वा विसर्जयन्त्यन्येन[1] वा न ह ते यज्ञꣳ संदधति स वै त्रिराह त्रिवृद्धि यज्ञः ॥७॥

9 अथाहाग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञिय इति तत्सत्यमेवैतत्प्रथमं वाचाभिव्याहरत्यग्निर्हि ब्रह्माग्निर्हि यज्ञो वनस्पतयो हि यज्ञिया न हि मनुष्या यजेरन्यद्वनस्पतयो न स्युस्तस्मादाह वनस्पतिर्यज्ञिय इति[2] ॥८॥

10 अथ कामं वावद्यते तदेतद्वा एतस्य ह्विरेष यज्ञो यद्व्रतं यथास्य पुराग्निहोत्रं तस्मादेतच्छ्रपयन्ति श्रुतꣳ हि देवानां तदेष एव व्रतयति नाग्नौ जुह्वति स यदेष एवैतद्व्रतयति[3] नाग्नौ[4] जुह्वति[5] ॥९॥

11 देवा वै यज्ञेनेमां जितिं जित्वा येयमेषां जितिस्ते होचुर्हन्तेदं तथा करवामहा इति यथा न इदमनभ्यारुह्यं मनुष्यैरसदिति ते यज्ञस्य रसं निर्धाय यथा मधुकृतो निर्धयेयुरेवं विदुह्य यज्ञं यूपेन योपयित्वा तिरो बभूवुस्तद्यदेनेनायोपयꣳस्तस्माद्यूपो नाम ॥१०॥

12 तद्वृषीणामनुश्रुतमास तं यथा यथर्षयो यज्ञꣳ समभरꣳस्तथायं यज्ञः संभृतः स वा एष एव यज्ञो यो दीक्षत एष ह्येनं तनुत[6] एष ह्येनं जनयते स यदेव तत्र यज्ञस्य देवैर्निर्धीतं यद्दिदुग्धं तदेवैतेन ह्विषैतेन रसेनाप्याययति न ह्याप्याययेद्यद्ध्यग्नौ जुहुयात्तस्मादेष एव व्रतयति[7] नाग्नौ जुह्वति ॥११॥

13 तदु जुह्वदेव मन्येतेमे वै प्राणा मनोजाता मनोयुजो दक्षक्रतवो ऽग्निरेव वाङ्मित्रावरुणौ प्राणोदानौ सूर्यश्चक्षुर्विश्वे देवाः श्रोत्रं तदस्यैतासु देवतासु यथा[8] हुतमेवं भवति तस्माज्जुह्वदेव मन्येत ॥१२॥

14 तद्धैके प्रथमे व्रत[9] उभौ व्रीहियवावावपन्त्युभाभ्यां चैताभ्याꣳ रसाभ्यां यद्यज्ञस्य निर्धीतं यद्दिदुग्धं तदाप्याययिष्याम इत्यथो उत गौरवभिनत्तीति स यतरस्यातः कामयेतेति तस्य व्रतꣳ श्रपयेयुस्तस्य[10] यवागूं कुर्युरिति तदस्य यथा ह्विरारब्धमित्येवमस्य तद्भवतीति तदु तथा न कुर्याद्ध्विर्वा एतद्यद्व्रीहियवौ ह्विः पयो यद्वा एतौ ह्विस्तेनैवास्यैतावारब्धौ तस्मादप्यन्यतरमेवावपेद्यदु कामयेतापि पयोव्रत[11] एव स्यात् ॥१३॥

तद्धैके प्रथमे व्रते सर्वौषधꣳ सर्वसुरभ्यावपन्त्युत दीक्षितमार्तिर्विन्दतीति 15,16
ततो येनागदं भविष्यन्तं मन्यन्ते तेन भिषज्यन्तीति स यथा हविषारब्धेन भिषज्ये-
दित्येवमेतदिति तदु तथा न कुर्यान्मानुषꣳ ह कुर्याद्यत्तथा कुर्याद्यद्धं वै तद्यज्ञस्य
यन्मानुषं तस्मात्तथा न कुर्यात्स्वयं वाव येनागदं भविष्यन्तं मन्यन्ते तेन[14] भिषज्य-
न्त्यार्तिश्चेद्विन्दति[15] समाप्तिर्ह्येव पुण्या[16] सो ऽतिनीयेव तं कालं प्रयच्छन्ति यत्र
मनुष्या अश्नन्त्यपरमिवानुरात्रेरपराह्णे[17] प्रातर्दुग्धममानुषेणैवैनं तद्दैवेनैवोपचरति ॥१४॥

स यत्रास्मै व्रतं प्रदास्यन्भवति तदवनेजयति सो ऽवनेनिक्ते दैवीं धियं 17
मनामहे सुमृळीकामभिष्टये । वर्चोधां[18] विश्वधायसꣳ सुतीर्था नो असद्वश इति
मानुषाय वा इदं पुरावनेनिक्ते ऽथैतद्दैव्यै धिये यद्दीक्षितस्तस्मादाह दैवीं धियं
मनामह इति ॥१५॥

अथास्मै व्रतं प्रयच्छन्ति तदाचामति ये देवा मनोजाता मनोयुजो दक्षक्रतवः । 18
ते नो ऽवन्तु ते नः पान्तु तेभ्यः स्वाहेतीमे वै प्राणा मनोजाता मनोयुजो दक्षक्रत-
वस्तदस्यैषु प्राणेषु यथा हुतꣳ स्वाहाकृतꣳ स्यादेवं भवति ॥१६॥

व्रतयित्वाप उपस्पृश्योदरमभिमृशते श्वात्राः पीता भवत यूयमापो अस्मा- 19
कमन्तरुदरे सुशेवाः । ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता
ऋतावृध इति ॥१७॥

उत वै तीव्रं व्रतं भवति तत्क्षुद्रतरमसदिति वोपोत्सिञ्चत्यल्पं[19] वा भवति
तद्भूयस्काम्योपोत्सिञ्चति[21] देवान्वा एष उपावर्तते यो दीक्षते स देवतानामेवैको
भवत्यनुत्सिक्तमु वै देवानाꣳ हविस्तत्तन्मिथ्याकरोति व्रतं प्रमिनाति यदुपोत्सिञ्चति[22]
तथास्य तन्न मिथ्याकृतं भवति तथा व्रतं न प्रमिनात्येषो अत्र प्रायश्चित्तिस्तदभि-
मृश्यमेव[23] को हि तद्वेद यदि व्रतप्रद[24] उप वोत्सिञ्चति[25] यथा वा ॥१८॥

अथ यत्र प्रस्रावयिष्यमाणो भवति तत्कृष्णविषाणयोपहन्ति पाꣳसून्वा 20
परिपदं वा लोकं वेयं ते यज्ञिया तनूरिति[26] सर्वा वा इयं पृथिवी देवी[27] देवयजनꣳ
सेयं दीक्षितेन नाभिमिह्या तस्या एतद्यज्ञियं तदुद्गृह्णात्यथास्या अयज्ञियमेव
शरीरमभिमेहत्यपो मुञ्चामि न प्रजामिति प्रस्रावयते ऽतो वै रेत एति तदात्मन्येव
प्रजां कुरुते ऽप एव मुञ्चति तस्मादाहापो मुञ्चामि न प्रजामित्यꣳहोमुचः स्वाहाकृताः
पृथिवीमाविशतेत्यꣳहस इव वा एता मुञ्चन्ति यदिह किं चिदुपवेष्टितं वा भवति

यद्वा तस्मादाहाꣳहोमुच इति स्वाहाकृताः पृथिवीमाविशतेत्याहुतिमेवैनामेतत्कृत्वा शमयित्वा पृथिवीं प्रापयति तस्मादाह पृथिवीमाविशतेति ॥१९॥

21 प्रस्राव्य पुनर्न्यस्यति[17] पृथिव्या संभवेति तद्यदेवास्या यज्ञियं तदेतदुद्गृह्यायज्ञियꣳ शरीरमभिमिह्य तदस्यामेव पुनर्यज्ञियं दधाति तस्मादाह पृथिव्या संभवेति[18] ॥२०॥

22 अथ यत्र स्वप्स्यन्भवति[19] तदग्नये परिदाय स्वपिति देवान्वा एष उपावर्तते यो दीक्षते स देवतानामेवैको भवति न वै देवाः स्वपन्त्यनवरुद्ध उ वा एतस्या स्वग्नो[20] ऽग्निरु वै देवानां व्रतपतिस्तद्य एव देवानां व्रतपतिस्तस्मा एवैतत्परिदाय स्वपिति ॥२१॥

स आहाग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहीति त्वं जागृहि वयꣳ स्वप्स्याम इत्येवैतदाह रक्षा णो अप्रयुच्छन्निति गोपाय नो ऽप्रमत्त इत्येवैतदाह प्रबुधे नः पुनस्कृधीति यथा प्रबुध्यामहै तथा नः पुनः कुर्वित्येवैतदाह प्रबुध्य यतः पुनर्न स्वप्स्यन्भवति[21] ॥२२॥

23 तज्जपति पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनः श्रोत्रं म आगात्पुनः प्राणः पुनरात्मा म आगादिति सर्वा वा अस्मादेता देवता अपक्रान्ताः स्वपतो भवन्ति प्राण एवास्मादनपक्रान्तो भवत्येता ह्येनमेतद्देवताः पुनरा विशन्ति तस्माद्वेवं जपति वैश्वानरो अदब्धस्तनूपा अग्निर्मा पातु दुरितादवद्यादिति स यदिह[22] मिथ्याकर्म यदस्वाप्स्मेत्यग्निरेव[23] नस्तस्मात्पात्वित्येवैतदाह तथास्य तन्न मिथ्याकृतं भवति तथा व्रतं न प्रमिनात्येषो अत्र प्रायश्चित्तिः ॥२३॥

24 अथ यद्यव्रत्यां कां चिद्वाचमपव्याहरेत्क्रुद्धो वा प्रमत्तो वा तदु जपेत्त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्य इत्यग्निर्वै देवानां व्रतपतिस्तमेवैतदुपधावति तथास्य तन्नाव्रत्यं कृतं भवति तथा व्रतं न प्रमिनात्येषो अत्र प्रायश्चित्तिः ॥२४॥

25 अथ यद्यस्मै दीक्षितायाहरेयुर्वासो वा गां वा तदभिमन्त्रयेत रास्वेयत्सोमा भूयो भरेति सोमो ह वा अस्मा एतद्युते यदस्मै सोमेन यक्ष्यमाणायाहरन्ति तस्मादाह रास्वेयत्सोमेत्या भूयो भरेत्या नो भूयो भरेत्येवैतदाह देवो नः सविता वसोर्दाता वस्वदादिति सविता वै देवानां प्रसविता तथो हास्मा एतत्सवितृप्रसूतमेव दानाय भवति ॥२५॥

तं पुरास्तमेतोराह दीक्षित वाचं यच्छेति पुरोदेतोराह दीक्षित वाचं 26-29
यच्छेति संतत्य एवाह्नैवैतद्रात्रिꣳ संतनोति राज्यो[34] पुनरहस्तं नान्यत्र चरन्तम-
भ्यस्तमियाद्रात्रेर्ह्नैनं[35] तदन्तरियान्नो[35] एव स्वपन्तमभ्युदियाद्ह्न[35] उ ह्नैनं तदन्त-
रियात्तत्प्रतिगुप्यमेवात्र[35] नात्र प्रायश्चित्तिरिवास्ति स न पुरावभृथादपो[36] वाभ्यवेया-
दभि वैनं वर्षेत्स्वकामिनं[37] न हि तदवकल्पते यत्पुरावभृथादपो वाभ्यवेयादभि वैनं
वर्षेत्स्वकामिन[37] स परिह्वालं वाचं वदति न प्रसूतां मानुषीꣳ स यत्परिह्वालं वाचं
वदति न प्रसूतां मानुषीम् ॥२६॥

देवा वै यज्ञेनेमां जितिं जित्वा येयमेषां जितिस्ते होचुर्हन्तेदं तथा करवा-
महा इति यथा न इदमनभ्यारुह्यं मनुष्यैरसदिति ते यज्ञस्य रसं निर्धीय यथा मधु-
कृतो निर्धयेयुरेवं विदुह्य यज्ञं यूपेन योपयित्वा तिरो बभूवुस्तद्यदेनेनायोपयꣳस्तस्मा-
द्यूपो नाम ॥२७॥

तद्वृषीणामनुश्रुतमास तं यथा यथर्षयो[38] यज्ञꣳ समभरꣳस्तथायं यज्ञः
संभृतो यथो वै तद्दृषयो यज्ञꣳ समभरन्नेवमु वा एष एतद्यज्ञꣳ संभरति यो
दीक्षते ॥२८॥[39]

स वै वागेव यज्ञः स यदेव तत्र यज्ञस्य देवैर्निर्धीतं यद्विदुग्धं तदेवैतेन
हविषैतेन रसेनाप्याययति न ह्याप्याययेद्यत्प्रसूतां मानुषीं वाचं वदेत्तस्मात्परिह्वालं
वाचं वदति न प्रसूतां मानुषीम् ॥२९॥

अथ यद्दीक्षितो[40] नाम वाचे वा एष एतद्दीक्षते[41] यज्ञाय हि दीक्षते यज्ञो 30
हि वाक्तस्माद्दीक्षितो नाम धीक्षितो ह वै नामैतद्यद्दीक्षित इत्याहुः ॥३०॥ द्वितीयं
ब्राह्मणम् ॥

1 यथऋषयो M. 2 संयत MSS. 3 °पतिर्वै M.
4 इदमहन्यदीक्षिष्ट MSS. 5 कुर्यात्क MSS. 6 Read
विसर्जयन्त्यन्येन ? 7 इति O P C C[3] (sec. m.).
8 °यति नाम्नौ जुह्वति B O, °यति नाम्नौ जुह्वति P C C[3] W.
9 Thus accented MSS. 10 °यति B. 11 यथा
B W C[1] (orig.). 12 सुव्रत B W. 13 श्रपये°
O P C C[3] (sec. m.). 14 पयोव्रत MSS.
15 तेनैव M. 16 °द्विंदति MSS. 17 पुण्या MSS.

18 Thus MSS. Read अश्नन्त्यपरमिवानुरात्रे ऽपराह्णे ? 19 वचोंदां B M My. 20 वोपोल्सिचत्यल्पं MSS. 21 तद्भूय° MSS. 22 °ल्सिचति MSS. 23 Read perhaps °स्तदभिमृष्यमेव. 24 °प्रद उपवोल्सिचति MSS. 25 तनुः the Saṃhitā. 26 Om. M. 27 पुनर्न्य-स्यति B. 28 संभवेति MSS. 29 स्वप्स्यन्भवति MSS. 30 एतस्यास्वप्नो O C C^3. 31 स्वप्स्यन्भवति MSS. 32 यदिह MSS. 33 यदस्वाप्स्मे° B, यद्-स्वाप्स्मे° O P C C^3 W. 34 रात्रियो MSS. except M. °35 ईयात् instead of इयाद् most of the MSS. 36 पुरावभृ° MSS. 37 °त्स्वकामिनं B, °त्स्वकामिनं O P C C^3 W. 38 °त्स्वकामिनं B O P C W. 39 यथऋषयो M. 40 B W C^3 give only the first words of section 27 and 28. 41 यद्दीक्षितो MSS. except M My. 42 एतद्दीक्षते M My.

M. III. 2. 3 K. IV. 2. 3

1-4 स वा एतमादित्यं चरुं निर्वपति प्रायणीयꣳ स यदेष आदित्यश्चरुः प्राय-णीयो भवति देवा ह वै यज्ञमस्यां तनिरे ते हास्यां तन्वाना इमां यज्ञादन्तरीयुः ॥१॥

सो हेयमीक्षां चक्रे हन्तैषां यज्ञं मोहयानीति य एव मयि तन्वाना मां यज्ञा-दन्तरगुरिति तेषाꣳ ह यज्ञं मोहयां चकार ते देवा इमामेवोपाधवन्न त्वय्येव यज्ञ-मतꣳस्महीति कथं नो यज्ञो न प्ररोचते कथं नो ऽमुहदिति ॥२॥

5-7 सा होवाचाहमेव वो यज्ञममूमुहमिति होवाच यदेव मयि तन्वाना इति मां यज्ञादन्तरगात तेनैव वो यज्ञममूमुहमिति ते मह्यं नु भागं कल्पयतेत्यथ वो यज्ञः प्ररोचिष्यत इति तथेति होचुस्तवैव प्रायणीयं तवोदयनीयमिति तादियं वा अदितिस्त-स्मादेष आदित्य एव चरुः प्रायणीयो भवत्यादित्य उदयनीयस्तत एभ्यो यज्ञः प्रारो-चत तमसृजन्त तमतन्वत स यदेष आदित्यश्चरुः प्रायणीयो भवति यज्ञस्यैव दृष्ट्ये यज्ञमेवैतेन पश्यति तं दृष्ट्वा क्रीत्वा तꣳ सृजते तं तनुते तस्माद्वा एष आदित्यश्चरुः प्रायणीयो भवति तन्निरुप्तमेवꣳ हविरासीदनिष्टा देवता ॥३॥

अथैभ्यः पथ्या स्वस्तिः प्रारोचत तामयजन्वाग्वै पथ्या स्वस्तिर्यज्ञ उ वै 8
वाक्तद्यज्ञमपश्यꣳस्तमसृजन्त तमतन्वत ॥४॥

अथैभ्यो ऽग्निः प्रारोचत तमयजꣳस्ततो यदाग्नेयं यज्ञ आसीत्तदपश्य- 9
न्यद्वै शुष्कं तदाग्नेयं यदग्निदाह्यं तदसृजन्त तदतन्वत ॥५॥

अथैभ्यः सोमः प्रारोचत तमयजꣳस्ततो यत्सौम्यं यज्ञ आसीत्तदप- 10
श्यन्यद्वा आर्द्रं तत्सौम्यं तदसृजन्त तदतन्वत ॥६॥

अथैभ्यः सविता प्रारोचत तमयजꣳस्ततो यत्सावित्रं यज्ञ आसीत्तदपश्य- 11
न्पशवो वै सावित्रा यज्ञ उ वै पशवस्तद्यज्ञमपश्यꣳस्तदसृजन्त तदतन्वत ॥७॥

अथादितिमयजꣳस्तत एभ्यो यज्ञः प्रारोचत तमसृजन्त तमतन्वत ॥८॥

ता वा एताः पञ्च देवता यजति पाङ्क्तो वै स यज्ञो मुग्ध आसीत्तमेताभिरेव 12-14
पञ्चभिः प्राजानन्पञ्चर्तवो मुग्धा आसꣳस्तानेताभिरेव पञ्चभिः प्राजानन्पञ्च दिशो
मुग्धा आसꣳस्ता एताभिरेव पञ्चभिः प्राजानन् ॥९॥

उदीचीं पथ्यया स्वस्त्या वाग्वै पथ्या स्वस्तिस्तस्मादौत्तराहै[10] वाग्वद- 15
तीत्याहुः कुरुपञ्चालेषु कुरुमहावृषेष्वित्येताꣳ[11] हि तया दिशं प्राजानन्नेषा हि तस्या
दिक् प्रज्ञाता ॥१०॥

प्राचीमग्निना तस्मादग्निं पश्चात्प्राञ्चमुद्धृत्योपासत एताꣳ हि तेन दिशं 16
प्राजानन्नेषा हि तस्य दिक् प्रज्ञाता ॥११॥

दक्षिणाꣳ[12] सोमेन तस्मादाहुः पितृदेवत्यः सोम इति तस्मात्तं दक्षिणा[13] 17
परिवहन्त्येताꣳ हि तेन दिशं प्राजानन्नेषा हि तस्य दिक् प्रज्ञाता ॥१२॥

प्रतीचीꣳ सवित्रैष वाव सविता य एष तपति तस्मादेष एतामेवाहरह- 18
र्दिशमेत्येताꣳ हि तेन दिशं प्राजानन्नेषा हि तस्य दिक् प्रज्ञाता ॥१३॥

ऊर्ध्वामदित्येयं वा अदितिस्तस्मादस्या ऊर्ध्वा ओषधयो वनस्पतय इमाः 19
प्रजा वर्धन्त एताꣳ ह्येतया दिशं प्राजानन्नेषा ह्येतस्या दिक् प्रज्ञाता ॥१४॥

बाहू वै यज्ञस्य प्रायणीयोदयनीये[14] शिर आतिथ्यं तस्मादेते हविषी अभित 20
आतिथ्यं भवत उभयतो ह्यमौ शिरो बाहू स यत्पञ्च प्रायणीये देवता यजति
पञ्चोदयनीये तस्माद्विमाः पञ्चाङ्गुलयः पञ्चो इमाः ॥१५॥

तदाहुर्यदेव प्रायणीये कुर्यादिति तदुदयनीये स्यादिति तदेव मेक्षणं 21-23

प्रयुत्य निदध्यादिति तथैवानिर्णिक्ताꣳ स्थालीं निदध्यादिति तदेव बर्हिः संनह्य निदध्यादिति त एवर्त्विजः स्युरिति तत्सदृक्करोतीति तस्मादिमौ सदृशौ बाहू तस्मात्सरूपाविति[15] तदु तथा न कुर्यादभ्यादध्यादेव मेक्षणं निर्णेनिज्यात्स्थालीं यदु कामयेताप्यन्यैव स्थाली स्यादभ्यादध्याद्बर्हिर्यदि त ऋत्विजो ऽविप्रेताः[16] स्युस्त एव स्युर्यद्यु ते विप्रेताः स्युरप्यन्य एव स्युर्यद्भाव स एव यज्ञो भवति ता देवता यजति[17] तदेव सदृक्करोति तस्मादेवेमौ सदृशौ बाहू तस्मात्सरूपौ[18] तच्छंय्वन्तं भवति बाहू वै यज्ञस्य प्रायणीयोदयनीये पूर्वार्ध उ वै बाहू पूर्वार्धमेवैतद्यज्ञस्याभिसꣳस्करोति ॥१६॥ तृतीयं ब्राह्मणम् ॥

1 °रीयुः ॥१॥ सो O P C C[2] (sec. m.), °रीयुः ॥१॥ सो C[2] (orig.). 2 यज्ञादंतरगुरिति MSS. 3 Thus MSS. Read probably इमामेवोपाधावन्यन्नु. 4 ꣳ om. MSS. except M. 5 मुहमिति MSS. except M. 6 यज्ञादंतरागत MSS. 7 भवति MSS. 8 तंनि° B W O P C[2] C (orig.). 9 हविरासी° MSS. 10 Thus all. 11 Thus M only (cp. Ath. S. V. 22. 4, 5), कुरुमहाविषेष्वि° B W, कुरुमहविषेष्वि° the other MSS. 12 दक्षिणा MSS. except C[2] sec. m. 13 सोमेन ins. M. 14 प्रायणीयोद° B W. 15 तस्मात्स्वरूपाविति M. 16 विप्रेताः MSS. 17 यजति MSS.

M. III. 2. 4 K. IV. 2. 4

1 दिवि ह वै सोम आसाथेह देवास्ते[1] देवा ऐच्छन्ना नः सोमो गच्छेदिति तेनागतेनेह यजेमहीति तत एते माये असृजन्त सुपर्णी च कद्रूं च वाग्वै सुपर्णीयं कद्रूस्तदु तत्सौपर्णीकाद्रवमिति[2] धिष्ण्यानां ब्राह्मणे[3] व्याख्यायते यथा यथा तदासीत्तत एभ्यो गायत्री सोममच्छापतत्तस्या आहरन्त्या विश्वावसुर्गन्धर्वो ऽन्तरा परिमुमोष ॥१॥

2 ते होचुर्देवाः प्र वै परस्तात्सोमो ऽच्योष्टेति तमन्तरा गन्धर्वाः पर्यमोषिषुरुपजानीत यथा नः स आगच्छादिति ॥२॥

ते होचुर्योषित्कामा वै गन्धर्वा इति वाचमेवैभ्यः प्रहिणवाम सैव न एनमा- 3
गमयिष्यतीति ते ह वाचं प्रजिघ्युः सा हैनान्त्सह सोमेनाजगाम तासु ह गन्धर्वा अन्वाजग्मुः ॥३॥

ते होचुर्युष्माकꣳ सोम इत्यस्माकं वाग्यया नो ऽक्रैष्टेति त उ होचुरिहो 4-6
चेदागमदिति मैव न एनाꣳ सहसेव निसृज्यै नैष्ट विद्मेयामहा एवैनामिति तथेति तां व्यद्धयन्त तस्यै ह गन्धर्वा यज्ञमेव वेदं प्रोचिर इत्थं यज्ञं विद्मेत्थं विद्म वीर्यवन्तः स्म इत्यथ ह देवा विदां चक्रुर्मोघा वै स्त्रिय इति ते ह वीणामेव सृष्ट्वा वीणां जनयित्वा तया ह्यस्यै निजगुरित्थं वै वयं तुभ्यं निगास्याम इत्थं त्वा प्रमादयिष्यामहे ऽस्मानेवोपावर्तस्वेति सा तदुपावर्तत सा वै सा तन्मोघमुपावर्तत या नृत्तं गीतꣳ स्तुवतः शꣳसतस्तस्माद्य एव मोघसꣳहितो यो नृत्यति यो गायति तत्रैव योषा निमिश्रतमा एवꣳ ह्यग्रे वागुपावर्तत यामनु योषाः ॥४॥

तदुभयं देवेष्वासीद्वाक्च सोमश्च स यत्सोमं क्रीणात्यागतय एवागतेन 7
सोमेन यजा इति तस्माद्वाव सोमं क्रीणाति ॥५॥

तद्यदध्वर्वायामाज्यं भवति तच्चतुर्जुह्वां विगृह्णात्यथ बर्हिषा हिरण्यं प्रबध्या- 8
वदधाति समानजन्म वा एतद्यत्पयश्च हिरण्यं चाग्नेर्ह्येवोभयꣳ रेतः कृत्स्नेन पयसा जुहवानीति तस्माद्धिरण्यमवदधाति ॥६॥

सो ऽवदधात्येषा ते शुक्र तनूरेतद्वर्च इति वर्चो ह्येतद्धिरण्यं तया संभवेति 9
तया संपृच्यस्वेत्येवैतदाह भ्राजं गच्छेति सोमो वै भ्राट् सोमं गच्छ यस्मै त्वा प्रहिण्म इत्येवैतदाह यदाह भ्राजं गच्छेति ॥७॥

अथ जुहोति स यज्जुहोत्येतद्वा एनामेतत्प्रहिणोति यथैनामदो देवाः 10
प्राहिण्वन्वाग्वा एषा निदानेन यत्सोमक्रयणी तामेतयाहुत्या प्रीणाति प्रीतया सोमं क्रीणानीति तस्माद्वाव जुहोति ॥८॥

स जुहोति जूरसीत्येतद्ध वा एकं वाचो नाम यज्जूरिति तस्मादाह जूर- 11.12
सीति धृता मनसेति मनसा हि वाग्धृता मनो हीदं पुरस्ताद्वाचश्चरति वदैतन्मैतद्वादीरित्यलग्लꣳ ह्यभक्तं वाग्वदेद्यन्मनो न स्यात्तस्मादाह धृता मनसेति जुष्टा विष्णव इति सोमो वै विष्णुर्जुष्टा सोमाय यस्मै त्वा प्रहिण्म इत्येवैतदाह यदाह जुष्टा विष्णव इति तस्यास्ते सत्यसवसः प्रसव इति सत्यप्रसवा न एधि सोमं नो ऽच्छेहीत्येवैतदाह तनुयन्त्वमशीय स्वाहेति यज्ञस्योदृचमशीयेत्येवैतदाह यज्ञस्योदृचमशीयेति हि

स कामयते यो दीक्षते तस्मादाह तनुयन्त्रमशीय स्वाहेति ॥९॥

13 अथ हिरण्यमुद्धरति स यद्धापि हिरण्यमहोष्यत्परागधैव मनुष्येभ्यो हिरण्यमभविष्यत्स यद्धिरण्यमुद्धरति तस्माद्विदं मनुष्येषु हिरण्यम् ॥१०॥

14 स उद्धरति चन्द्रमसि शुक्रमस्यमृतमसि वैश्वदेवमसीति कृत्स्नेनैवैतत्पयसा हुत्वा यदेवैतद्धवति तदेनत्करोति चन्द्रꣳ ह्येतच्छुक्रꣳ ह्येतदमृतꣳ ह्येतद्वैश्वदेवमसीति वैश्वदेवꣳ ह्येतत् ॥११॥

15 अथापरं चतुर्गृहीतमाज्यं गृहीत्वाहेहि यजमानेति तत्पुरस्तात्सोमक्रयण्युपतिष्ठते प्रत्यस्यन्ति द्वारं तामाहुरुदीचीमतिविच्छायतेति तामुदीचीमतिविच्छमानामभिमन्त्रयते स यदेनामभिमन्त्रयते प्रहितां वैवैनामेतत्सतीं भूयः प्रहिणुतो वाग्वा एषा निदानेन यत्सोमक्रयणी तामेतयाहुत्या प्रीत्वैतद्वैवैनामेतत्प्रथमं प्रहिणोति यथैनामदो देवाः प्राहिण्वन् ॥१२॥

16 सो ऽभिमन्त्रयते चिदसि मनासीति मनसो वै चित्तमनु वाग्वदति तस्मादाह चिदसि मनासीति धीरसीति वाग्वै धीर्वाचा हि धिया मनुष्या जीवन्त्यनूक्तेन ब्रह्मणा प्रकामोद्येन तस्मादाह धीरसीति दक्षिणासीति वाग्वै दक्षिणा वाचा हि दक्षिणां ददाति तस्मादाह दक्षिणासीति क्षत्रियासि यज्ञियासीति क्षत्रिया ह्येषा यज्ञिया ह्येषादितिरस्युभयतःशीर्ष्णीति यद्विपर्यासं वाचा वदति यदेव पूर्वं तदपरं यदपरं तत्पूर्वं तस्मादाहोभयतःशीर्ष्णीति ॥१३॥

17 सा नः सुप्राची सुप्रतीची भवेति सुप्राची न एधि सोमं नो ऽच्छेहीत्येवैतदाह सुप्रतीची भवेति सुप्रतीची न एहि सोमं न आहरेत्येवैतदाह यदाह सा नः सुप्राची सुप्रतीची भवेति ॥१४॥

18 मित्रस्त्वा पदि बध्नीतामिति न वा एतामभिदधति वरुण्या हि रज्जुर्वरुणो हैनां गृह्णीयाद्यदभिहिता स्यादृयतो वै स्याद्यदनभिहिता स्यादेतदु वा अवरुण्यं यन्मैत्रं तथाह यता भवति तथो एनां वरुणो न गृह्णाति तस्मादाह मित्रस्त्वा पदि बध्नीतामिति ॥१५॥

19 पूषाध्वनस्पात्वितीयं वै पूषेमामेवास्मा एतदध्वनि गोप्तारं करोति तस्य हि नार्तिरस्ति न ह्वला यमियमध्वन्गोपायति तस्मादाह पूषाध्वनस्पात्विति ॥१६॥

20 इन्द्रायाध्यक्षायेति स्वध्यक्षासदिति तस्मादाहेन्द्रायाध्यक्षायेत्यनु त्वा माता मन्यतामनु पितेति मातुश्च हि पितुश्च संभवत्यनु भ्राता सगर्भ्यो ऽनु सखा

सयूथ्य इति यदस्या जन्म तेनानुमतया सोमं क्रीणातीति ॥१७॥

सा देवि देवमच्छेहीति देवी ह्येषैतद्देवमच्छैति यद्वागिन्द्राय सोमं तस्मादाह सा देवि देवमच्छेहीतीन्द्राय सोममितीन्द्रो यज्ञस्य देवता तस्मादाहेन्द्राय सोममिति ॥१८॥

रुद्रस्त्वावर्तयत्विति रुद्रो वा आसामीष्टे तꣳ हि पशवो नातियन्ति तथा नात्येति तस्मादाह रुद्रस्त्वावर्तयत्विति ॥१९॥

स्वस्ति सोमसखा पुनरेहीति स्वस्ति नः सोमेन सह पुनरागच्छेत्येवैतदाहै- 21.22
तद्वा एनामेतत्प्राहैषीद्यथैनामदो देवाः प्राहिण्वन्त्सा यथा सा सह सोमेनागच्छदेवमेतद्भवति तां यथा तद्देवा व्यूहयन्त गन्धर्वैरेवमेनामेतद्यजमानो विहयते सा यथा देवानुपावर्तत गन्धर्वेभ्य एवमेतद्यजमानमुपावर्तत उदीची वै मनुष्याणां दिक् सा यजमानस्य सा यदस्य स्वां दिशमुपावर्तते तद्यजमानमुपावर्तते तत्स्वायामेवैनामेतद्दिशि वृङ्क्ते ॥२०॥ चतुर्थं ब्राह्मणम् ॥ द्वितीयोऽध्यायः ॥

1 ह ins. M. 2 °स्यौपर्णिका° M, °स्यौपर्णका° the other MSS.; cp. IV. 6. 2. 3. 3 viz. infra IV. 6. 2. 4 प्रजिग्युः MSS. except M (प्रयुञ्जुः). 5 Thus M only, होचुर्हो the other MSS. 6 निस्पृज्य M. Read perhaps निस्पृत्य or निःस्पृत्य. 7 वि° MSS. 8 °तः O P C (pr. m.) C². 9 Read निगास्याम ? 10 नृत्यं M. 11 वागुपावर्तत MSS. 12 प्रꣳ MSS. 13 गछेति MSS.

K. IV. 3. 1 M. III. 3. 1

स वै पदान्येवानुनिक्रामति स यत्पदान्यनुनिक्रामति वृङ्क्त एवैनां तत्स सप्त 1
पदान्यनुनिक्रामति यत्र वै वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै शाक्करी परार्ध्या छन्दसां तस्मादेतानि सप्त पदान्यनुनिक्रामति स वै वाच एव रूपेणानुनिक्रामति ॥१॥

सो ऽनुनिक्रामति वस्व्यस्यदितिरस्यादित्यासीति वाचमेवैतदाह रुद्रासि 2
चन्द्रासीति वाचमेवैतदाह बृहस्पतिष्ट्वा सुम्ने रम्णात्विति ब्रह्म वै बृहस्पतिर्यज्ञ उ वै सुम्नं ब्रह्म त्वा यज्ञे साधौ रमयत्वित्येवैतदाह रुद्रो वसुभिराचक इति रुद्रो वा आसामीष्टे तꣳ हि पशवो नातियन्ति तथा नात्येति तस्मादाह रुद्रो वसुभिराचक इति ॥२॥

3 अथ पदमभिजुहोति वज्रो वा आज्यꣳ स्तृणुत एवैनां तत्तासꣳ स्तृत्वा स्वीकुरुते तस्मात्पदमभिजुहोति हिरण्यमुपास्य न वा अनग्नावाहुतिर्हूयते ऽग्नेरु वा एतद्रेतो यद्धिरण्यं तथास्यैषाग्निमत्याहुतिर्हुता भवति ॥३॥

4.5 स जुहोत्यदित्यास्त्वा मूर्धन्नाजिघर्मीतीयं वा अदितिरस्या वा एतदुपरिष्टाज्जुहोत्युपरिष्टाद्धयं मूर्धा तस्मादाहादित्यास्त्वा मूर्धन्नाजिघर्मीति देवयजने पृथिव्या इति देवयजने ह्येतत्पृथिव्या जुहोतीलायास्पदमसीति गौर्वा इला तस्या एतत्पदं तस्मादाहेलायास्पदमसीति घृतवत्स्वाहेति घृतवद्धि भवति प्रदाय स्रुचमपोद्धूत्य हिरण्यꣳ स्फ्येन परिलिखति वज्रो वै स्फ्यो वज्रेणैवैनामेतत्समन्तं परिगृह्णाति तथा नात्येति ॥४॥

6 स परिलिखत्यस्मे रमस्वेति यजमानायैवैतदाहाथ स्थाल्यां वा चमसे वावपत्यस्से ते बन्धुरिति यजमानायैवैतदाह ॥५॥

7 अथ तत्राप उपनिनयति यदेवास्याः परिलिखन्तो वोल्लिखन्तो वा विवा लिशन्ति क्षिण्वन्ति वापो वै भेषजꣳ शान्तिस्तदद्भिः शान्त्या शमयति तदद्भिः संदधाति ॥६॥

8.9 अथ यजमानाय प्रयच्छति त्वे राय इति पशवो वै रायस्त्वयि पशव इत्येवैतदाहास्से राय इति यजमानः प्रतिगृह्णाति पशवो वै रायो मयि पशव इत्येवैतदाह मा वयꣳ रायस्पोषेण वियौष्मेत्यात्मानमभिमृशति तथो अध्वर्युरात्मानं पशुभ्यो नान्तरेति ॥७॥

10 अथ सोमक्रयण्याः पदं पत्न्यै प्रयच्छन्ति गृहा वै पत्नी पशवो वै सोमक्रयण्याः पदं गृहेष्वेवैतत्पशून्प्रतिष्ठापयति ॥८॥

11 स प्रयच्छति तोतो राय इति पशवो वै रायस्त्वयि त्वयि पशव इत्येवैतदाह ॥९॥

अथ सोमक्रयण्या पत्नीꣳ संख्यापयति सोमो वा एषा भवति यया सोमं क्रीणन्ति वृषा वै सोमो योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥१०॥

12 स संख्यापयति समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा। मा म आयुः प्रमोषीर्मो अहं तव वीरान्विदेय तव देवि संदृशीत्याशिषमेवैतदाशास्ते वीरान्पुत्रान्विदेय तव संदृशीति ॥११॥

13 सा या बभ्रुः पिङ्गाक्षी सा सोमक्रयणीन्द्राविष्णू वै यत्र त्रेधा सहस्रं व्यैर-

येतां तदेकात्यशिष्यत तस्मादप्येतर्हि यत्त्रेधा सहस्रं व्याकुर्युरेकैवातिशिष्येत तां त्रेधा व्याकुरुतां त्रेधा प्राजनयताम् ॥१२॥

तस्मादप्येतदृषिणाभ्यनूक्तमुभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामिति ॥१३॥

सा या बभ्रुः पिङ्गाक्षी तां सोमक्रयणीमथ या रोहिण्यश्येताक्षी तां 14-16
वार्त्रघ्नीं यां क्षत्रियाय संग्रामं जिग्युषे वार्त्रघ्नीमुदजन्त्यथ या रोहिणी श्येताक्षी तां पितृलोकं यते ऽनुस्तरणीं तस्माद्यैव बभ्रुः पिङ्गाक्षी सा स्यात्सा हि सोमक्रयणी यद्यु तां न विन्देयुरपि यारुणा सा स्यात्तद्ध्यस्या नदीयो रूपं यद्यु तां न विन्देयुरपि या रोहिण्यश्येताक्षी सा स्याच्छ्येताक्ष्यास्त्वाशां नेयात्साप्रवीता स्याद्वाग्वा एषा निदानेन यत्सोमक्रयण्ययातयामा वै वागयातयामो वा एषा भवति याप्रवीतानुपार्ष्टकर्णाकाणाकूटावण्डाश्रोणासप्तशफैकरूपा सा ह्ययातयामा भवति ॥१४॥
प्रथमं ब्राह्मणम् ॥

K. IV. 3. 2 M. III. 3. 2

स वै पाणी अवनिज्यास्यां हिरण्यं बध्नीते स यदस्यां हिरण्यं बध्नीते 2
द्वयं वा इदं न तृतीयमस्ति सत्यं चैवानृतं च ततः सत्यं देवा अनृतं मनुष्या अश्नेरु वा एतद्रेतो यद्धिरण्यꣳ सत्येनाꣳशूनुपस्पृशानीति सत्येन सोमं पराहृणानीति तस्मादस्यां हिरण्यं बध्नीते ॥१॥

अथाह सोमोपनहनमाहर सोमपर्याणहनमाहरोष्णीषमाहरेति तद्यदेव 3
शोभनतमं तत्सोमोपनहनꣳ स्याद्वासो ह्यस्यैतद्भवति स यो ह्यैतच्छोभनतमं कुरुते शोभते ह्यैव सो ऽथ यो ह्यैतद्यदेव किं च कुरुते तथा ह्यैव भवति तस्माद्यदेव शोभनतमं तत्सोमोपनहनꣳ स्यात् ॥२॥

स यद्यहोष्णीषं विन्देयुः स एव स्याद्यद्युष्णीषं न विन्देयुः सोमपर्याणहन- 4
स्यैव पूर्वार्धमवकृत्य तदुष्णीषभाजनꣳ स्यात्तदध्वर्युर्वा यजमानो वादत्ते ॥३॥

तौ प्राञ्चौ जपन्तावित एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते 6
त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानानाꣳ साम्राज्यं गच्छतादिति मे सोमाय ब्रूतादिति ॥४॥

तौ यदेवं जपन्तावित एकं वा एष भागं क्रीयमाणो ऽभिक्रीयते यत्सोमश्छन्दसामेव साम्राज्यं छन्दसाꣳ राज्यं तस्मा एवैतत्पुरस्ताद्विवेदयति छन्दसां वै

त्वा साम्राज्याय क्रीणामि छन्दसाꣳ राज्याय न वधायेति घ्नन्ति ह्येनमेतद्यदभिषुण्वन्ति तथा रातमनाः क्रयाय भवति ॥५॥

7 अथ जघनेन जान्वक्ष उपविशत्यास्माको ऽसीत्यागतो ह्येनं भवति यमागतमद्धका क्रेष्यन्भवति तस्मादाहास्माको ऽसीति शुक्रस्ते ग्रह इति शुक्रꣳ ह्यस्माद्ग्रहं ग्रहीष्यन्भवति विचितस्त्वा विचिन्वन्त्विति कृत्स्नमेवैनं तत्करोति कृत्स्नतायै ॥६॥

8 तद्धैके यान्यौषधिरापन्ना भवति तामपास्यन्ते तदेनं कृत्स्नं कुर्म इति वदन्तस्तदु तथा न कुर्यात्क्षत्रं वै सोमो विशो ऽन्या ओषधयो यथा वै ग्रस्तमेवमेतस्यैतद्भवति यात्रान्यौषधिरापन्ना भवति स यथा ग्रस्तमाच्छिद्यापास्येदेवꣳ ह तत्तस्माद्वेतद्यजुरेव जपेत्तदेवैनं कृत्स्नं करोति ॥७॥

9 अथ सोमोपनहनं द्विगुणं वा चतुर्गुणं वा कृत्वा प्राग्दशं वोदग्दशं वोपस्तीर्य तस्मिन्नेनं मिमीते स यदेनं मिमीते तस्माद्वियं मनुष्येषु मात्रा यत्कौष्ठो यत्कुम्भी येयं का च मनुष्येषु मात्रा ॥८॥

10.11 सावित्र्या मिमीते सविता वै देवानां प्रसविता सवितृप्रसूत एवैतन्मिमीते ऽतिच्छन्दसैषा वै सर्वाणि छन्दाꣳसि यदतिच्छन्दाः सर्वैर्मे छन्दोभिर्मितो ऽसदिति ॥९॥

12 स मिमीते ऽभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं कविम् । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वरिति ॥१०॥

13 एतयैव सर्वाभिरेतया चतसृभिरेतया तिसृभिरेतया द्वाभ्यामेतयैकयैतया पुनरेकयैतया द्वाभ्यामेतया तिसृभिरेतया चतसृभिरेतया सर्वाभिरथाप्यञ्जलिनावपति ॥११॥

16 स यदुदाचं न्याचं मिमीते विराजमेवैतत्पराचीं चार्वाचीं च युनक्ति सा पराची देवेभ्यो यज्ञं वहत्यर्वाची मनुष्यानवति ॥१२॥

15 अथ यद्वेवोदाचं न्याचं मिमीत इमा एवैतदङ्गुलीर्नानावीर्याः करोति तस्माद्विमा अङ्गुलयो नानावीर्यास्तस्मादप्येकयार्थं कुरुते ऽथो द्वाभ्याम् ॥१३॥

14.17 अथ यद्वेवोदाचं न्याचं मिमीते तस्माद्विमा असꣳश्लिष्टा अङ्गुलयः स वै

दश कृत्वो मिमीते दशाक्षरा वै विराड्विराळु वै यज्ञो विराजमेवैतद्यज्ञमभिसंपादयति ॥१४॥

अथ समुत्पार्योपनह्यति प्रजाभ्यस्त्वेति प्रजाभ्यो ह्येनमेतत्स यदुपनद्धस्योपेनितमिव भवति तस्माच्छिरश्चाऽसौ चान्तरेणोपेनितमिव ॥१५॥ 18

अथाकाशमिव करोति प्रजास्त्वानुप्राणन्त्वित्यपिदधातीव वा एतत्प्राणं यत्समायच्छति प्राणमेवैतदुत्सृजति तेनैनमुत्सृष्टेन प्राणेनेमाः प्रजा अनुप्राणन्ति तस्मादाह प्रजास्त्वानुप्राणन्त्विति ॥१६॥ द्वितीयं ब्राह्मणम् ॥ 19

K. IV. 3. 3 M. III. 3. 3

तं वै पणत एव स यदेनं पणते तस्माद्विद्ꣳ सकृत्सर्वं पण्यं तं वै पृष्ट्वा पणते सोमविक्रयिन्क्रय्यस्ते सोमाꣳ इति क्रय्य इत्याह तं वै ते क्रीणानीति क्रीणीहीत्याह कलया ते क्रीणानीति ॥१॥ 1.2

स आह सोमविक्रयी भूयो वा अतः सोमो राजार्हतीति भूयो वा अतः सोमो राजार्हति महाꣳस्तु गोर्महिमेत्यध्वर्युर्गोवैं प्रतिधुक्तस्याः शृतं तस्या दधि तस्या आतञ्चनं तस्या आमिक्षा तस्या वाजिनं तस्या नवनीतं तस्या घृतं तस्याः शरस्तस्या मस्तु ॥२॥

शफेन ते क्रीणानीति भूयो वा अतः सोमो राजार्हतीत्येवाह सोमविक्रयी भूयो वा अतः सोमो राजार्हति महाꣳस्त्वेव गोर्महिमेत्येवाध्वर्युरेतान्येव प्रतिसंख्याय पदा ते ऽधेन ते गवा ते क्रीणानीति क्रीतः सोमो राजेत्याह वयाꣳसि संपश्येति ॥३॥ 3

स संपश्यति चन्द्रं छागा वस्त्रं धेनुर्मिथुनौ गावावन्यास्तिस्र इति स यदर्वाक्प्राहाथ परः संपादयति तस्मादपीदं मानुषे ऽर्वाङ्गेवाग्रे प्राहुरथ परः संपादयति स यद्भूयो वा अतः सोमो राजार्हतीत्येतावदेव सोमविक्रय्याहाथैतान्रसानेतानि वीर्याणि गोरध्वर्युः संपश्यति महितो वै सोमो देवो हि स गामेवैतन्महयत्येतान्रसानेतानि वीर्याणि विद्वानस्याः क्रीणात्विति स वै पञ्च कृत्वः पणते संवत्सरसंमितो यज्ञः पञ्चर्तवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वः पणते ॥४॥ 4.5

अथैनꣳ हिरण्येन क्रीणाति चन्द्रं त्वा चन्द्रेण क्रीणामीति चन्द्रꣳ ह्येनमेतन्द्रेण क्रीणाति यत्सोमꣳ हिरण्येन शुक्रꣳ शुक्रेणेति शुक्रꣳ ह्येनमेतच्छुक्रेण क्रीणाति 6

यत्सोमꣳ हिरण्येनामृतममृतेनेत्यमृतꣳ ह्येनमेतदमृतेन क्रीणाति यत्सोमꣳ हिरण्येन ॥५॥

7 अथ पुनरपादत्ते सꣳसृजे ते गोरित्यस्से ते चन्द्राणीति न्यस्यति तद्यदेवास्य शुक्रं तदस्मिन्दधात्यथास्यैतच्छरीरेणैव क्रीणाति तस्मादाहास्मे ते चन्द्राणीति ॥६॥

8 अथैनमजयावाग्ग्रीवया पणते तपसस्तनूरसीति तपसो ह वा अस्यैषा संभूता तस्मादाह तपसस्तनूरसीति प्रजापतेर्वर्ण इति यत्त्रिः संवत्सरस्य विजायते तेन प्रजापतेर्वर्णः परमेण पशुना क्रीयस इति यत्त्रिः संवत्सरस्य विजायते तेन परमः पशुः सहस्रपोषं पुषेयमित्याशिषमेवैतदाशास्ते भूमा वै सहस्रपोषो भूमो वै श्रीराशिषमेवैतदाशास्ते श्रियं गच्छेयमिति तस्मादाह सहस्रपोषं पुषेयमिति ॥७॥

9 स यदजां प्रदाय सोममादत्ते यदेनमजयैव प्रच्यावयति तस्माद्वैषाजा नामाजा ह वै नामैतद्यदजेत्याहुस्तस्मादजां प्रदाय सोममादत्ते ॥८॥

10 स आदत्ते मित्रो न एहि सुमित्रध इत्यह्वꣳसन्नः शिव एधीत्येवैतदाह यदाह मित्रो न एहि सुमित्रध इतीन्द्रस्योरुमाविश दक्षिणमितीन्द्रो यजमानस्तस्यैतद्दक्षिण ऊरावासादयति तस्मादाहेन्द्रस्योरुमाविश दक्षिणमित्युशन्नुशन्तमिति प्रियः प्रियमित्येवैतदाह यदाहोशन्नुशन्तमिति स्योनः स्योनमिति शिवः शिवमित्येवैतदाह ॥९॥

12 अथ शिरो ऽपोर्णुते गर्भो वा एष भवति यो दीक्षते स एतं यज्ञमजीजनत्स एष गर्भो भवत्या सुत्यायास्तस्मात्परिवृत इव भवति तिर इव हि गर्भो जायते यजमानस्तस्माच्छिरो ऽपोर्णुते ॥१०॥

11 शिरो ऽपावृत्य जपति स्वान भ्राजाङ्गारे बम्भारे हस्त सुहस्त कृशानो। एते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्नित्येतेषꣳ ह वा एते भाजनेन य एते गन्धर्वाः सोमपाला धिष्ण्या एतान्यु वै तेषां नामानि तेभ्य एवैनानेतदनुदिशति तथो तेषामनृणो भवति ॥११॥

13.14 अथ जपति परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भजेत्यासीनं वा एनमेतत्सोम आगच्छति स आगत उपोत्तिष्ठति तत्तन्मिथ्याकरोति व्रतं प्रमिनाति यदासीनमागच्छत्यागत उपोत्तिष्ठत्यग्निर्वै देवानां व्रतपतिस्तमेवैतदुपधावति तथास्य तन्न मिथ्याकृतं भवति तथा व्रतं न प्रमिनाति परि माग्ने दुश्चरिताद्बाधस्वेति नात्र तिरोहितमिवास्त्या मा सुचरिते भजेत्या मा साधौ भजेत्येवैतदाहोदायुषा स्वायुषोदस्थाम-

मृतांꣳ अन्वित्यमृतो वै सोमस्तमेतदनूत्तिष्ठति तस्य नार्तिर्न ह्वला भवति य एतम-मृतꣳ सोममनूत्तिष्ठति ॥१२॥

अथ जपति प्रति पन्थामपद्महि स्वस्तिगामनेहसमित्येतस्माद्ध वै देवा 15-17
बिभयां चक्रुर्यन्न इममन्तरा नाष्ट्रा रक्षाꣳसि न हन्युरिति त एतेन स्वस्त्यत्यायꣳस्तथो वा एष एतेन स्वस्त्यत्येति प्रति पन्थामपद्महि स्वस्तिगामनेहसमिति नात्र तिरोहित-मिवास्ति येन विश्वाः परि द्विषो वृणक्ति विन्दते वस्विति येन विश्वा नाष्ट्राः परि-वृणक्ति श्रेय इदमभिगच्छतीत्येवैतदाह तं वा इति पाणिना हरन्त्यथानसा परिवहन्ति महयत्येवैनं तद्वीर्यमेवास्मिन्दधाति यज्ञमु वा अनु प्रजास्तस्माच्छिरसा बीजमभ्य-वहरन्त्यनसोदावहन्ति ॥१३॥

स यदेनमपामन्ते क्रीणात्यापो वा अस्य रसः सरसमेवैनं तत्क्रीणात्यथ 18
यदेनꣳ हिरण्येन क्रीणाति सशुक्रमेवैनं तत्क्रीणात्यथ यदेनमजया क्रीणाति सतपस-मेवैनं तत्क्रीणात्यथ यदेनं वाससा क्रीणाति त्वग्वा अस्य वासः सत्वचमेवैनं तत्क्रीणा-त्यथ यदेनं धेन्वा क्रीणाति साशिरमेवैनं तत्क्रीणात्यथ यदेनं मिथुनाभ्यां क्रीणाति समिथुनमेवैनं तत्क्रीणाति तस्मादेता अच्युताः सोमक्रयण्यो भवन्ति तं वै दशभिरेव क्रीणाति नादशभिर्दशाक्षरो वै विराड्विराळु वै यज्ञो वैराजः सोमो विराजमेवैतद्यज्ञ-मभिसंपादयत्यपीद्धै पुरा क्रय इति हैके ऽनड्वाहं वान्यं वा गां प्रयच्छन्ति ॥१४॥
तृतीयं ब्राह्मणम् ॥

K. IV. 3. 4 M. III. 3. 4

स वै कृष्णाजिनं नील आस्तृणात्यदित्यास्त्वगसीति सो ऽसावेवैतस्य 1
यजुषो बन्धुस्तस्मिन्राजानमासादयत्यदित्यै सद आसीदेत्यन्तरिक्षरूपमिव वा एतद्यदन इयमु वा अदितिरियं प्रतिष्ठा तदेनमनस्यासादयन्नस्यां प्रतिष्ठायां प्रतिष्ठा-पयति तस्मादाहादित्यै सद आसीदेति ॥१॥

अथाभिमृशत्यस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या 2-5
इत्येतस्माद्ध वै देवा बिभयां चक्रुर्यन्न इममन्तरा नाष्ट्रा रक्षाꣳसि न हन्युरिति तदेनेनेमांल्लोकानास्पृणोति ज्यायाꣳसमेनं वधात्करोति तस्य हि न हन्तास्ति येनेमे लोका आस्पृताः स्युरासीदद्विश्वा भुवनानि सम्राळिति तदेनेनेदꣳ सर्वमास्पृणोति ज्यायाꣳसमेनं वधात्करोति तस्य हि न हन्तास्ति येनेदꣳ सर्वमास्पृतꣳ स्याद्वि-श्वेत्तानि वरुणस्य व्रतानीति तदस्मा इदꣳ सर्वमनुवर्त्म करोत्यप्रत्युद्यामि तस्मादाह

विश्वेत्तानि वरुणस्य व्रतानीति ॥२॥

6 अथैनं पर्यातनोति नेदेनꣳ सर्वतो नाष्ट्रा रक्षाꣳसि हिनसानीति तिर इव वै देवा मनुष्येभ्यस्तिर इवैतत्करोति गर्भो वा एष भवत्या सुत्यायास्तिर इव वै गर्भस्तस्मात्पर्यातनोति ॥३॥

7 स पर्यातनोति वनेषु व्यन्तरिक्षं तनोति वनेषु हीदमेषु वृक्षाग्रेष्वन्तरिक्षं विततं तस्मादाह वनेषु व्यन्तरिक्षं ततानेति वाजमर्वत्सु पय उस्रियास्विति पुमाꣳसो वा अर्वन्तो वीर्यं वाजः पुꣳसु वीर्यमित्येवैतदाह यदाह वाजमर्वत्स्विति पय उस्रियास्विति पय उ हीदमुस्रियासु हृत्सु क्रतुं वरुणो विक्ष्वग्निमिति हृत्सु ह्ययं क्रतुरासां प्रजानां मनोजवः प्रविष्टस्तस्मादाह हृत्सु क्रतुमिति वरुणो विक्ष्वग्निमिति विक्षु ह्ययमग्निरासु प्रजासु प्रविष्टो दिवि सूर्यमदधात्सोममद्राविति दिवि ह्यसौ सूर्यो हितः सोममद्रावित्यद्रिषु ह्ययमेषु गिरिषु सोमो हितस्तस्मादाह सोममद्राविति ॥४॥

8 अथ यदि द्वे कृष्णाजिने भवतस्तयोरन्यतरत्पुरस्तात्प्रत्यानह्यति यद्युवेकं भवति कृष्णाजिनग्रीवा अवकृत्य प्रत्यानह्यति ॥५॥

तदभिमन्त्रयते सूर्यस्य चक्षुरारोहाग्नेरक्ष्णः कनीनकाम् । यत्रैतशेभिरीयसे भ्राजमानो विपश्चितेति सूर्यमेवास्यैतत्पुरस्तात्पुरोगां करोति तथो हास्य सूर्य एव पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्प्रभिन्द्नेत्यथैतमभयꣳ नाष्ट्रे निवाते वहति ॥६॥

9.10 अथोद्धते फलके भवतस्तदन्तरीषे तिष्ठन्तसुब्रह्मण्या प्राजति को ह्येतमर्हत्यभ्यारोहुꣳ श्रेयान्ह्येष उपाधिरोहात्तस्मादधस्तिष्ठन्प्राजति पर्णशाखया प्राजत्येषा वा अरूक्षा यत्पर्णशाखा तस्मात्पर्णशाखया प्राजत्यथो यथाद आमावास्ये यदिह किं चित्सोमस्य न्यक्तं तदिहाप्यसदिति तस्मात्पर्णशाखया प्राजति ॥७॥

11 अथानड्वाहावाजन्ति तौ यद्युभौ वा कृष्णौ भवतो ऽन्यतरो वा तद्विद्याद्वर्षुवर्षी पर्जन्यो भविष्यति वर्षिष्यतीत्येतदु विज्ञानम् ॥८॥

स दक्षिणमेवाग्रे युनक्त्यथ सव्यꣳ सव्यं वा अग्रे मानुषे युनक्त्यथैवं देवत्रा ॥९॥

12 तावभिमन्त्रयत उस्रा एतं धूर्षाहावित्युस्रौ ह्येतौ धूर्षाहौ ह्येतौ युज्येथामनश्रू इत्यनार्तावित्येवैतदाह यदाहानश्रू इत्यवीरघ्नावित्यपापकृतावित्येवैतदाह ब्रह्मचोदनाविति ब्रह्मचोदनौ ह्येतौ स्वस्ति यजमानस्य गृहान्गच्छतमिति नेदनमन्तरा नाष्ट्रा

रक्षाꣳसि हिनसन्निति ॥१०॥

अथाह सोमाय प्रोह्यमाणायानुब्रूहीति पर्युह्यमाणायेति वान्वाह होता वाच- 13-16
यत्यध्वर्युर्भद्रो मे ऽसि प्रच्यवस्व भुवस्पत इत्येष वा एतस्य भद्रो भवति तस्मादेष न राजानं चनाद्रियते ऽथो पूर्वो राज्ञो ऽभिवदति तथास्यैष एव भद्रो भवति तस्मादाह भद्रो मे ऽसीति प्रच्यवस्व भुवस्पत इत्येष ह्येषाꣳ सर्वेषां भुवनानामीष्टे विश्वान्यभि धामानीत्यङ्गानि वै धामानि सर्वाण्यभ्यङ्गानीत्येवैतदाह मा त्वा परिपरिणो विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो विदन्निति नेदेनमन्तरा नाष्ट्रा रक्षाꣳसि हिनसन्निति श्येनो भूत्वा परापत यजमानस्य गृहान्गच्छ तत्रौ सꣳस्कृतमिति वय एवैनमेतद्भूतं प्रपादयत्येतद्वा ओजिष्ठं बलिष्ठं वयसां यच्छश्येनस्तद्धि रक्षाꣳसि नान्ववयन्ति तद्वय एवैनमेतद्भूतं प्रपादयत्यथास्येदꣳ शरीरमेवानसान्वावहन्ति यजमानस्य गृहान्गच्छ तत्रौ सꣳस्कृतमिति नात्र तिरोहितमिवास्ति ॥११॥

अथ सुब्रह्मण्यामाह्वयति यथा येभ्यः पक्ष्यन्त्स्यात्तेभ्यो निवेदयेदा मा 17
गच्छाथ पक्तास्मि व इत्येवमेतद्देवेभ्य एतं यज्ञं निवेदयति ब्रह्म वै देवान्प्रच्यावयति ब्रह्मणो एतद्देवान्प्रच्यावयत्येतं यज्ञमभि तस्मात्सुब्रह्मण्यामाह्वयति ॥१२॥

स आह्वयति सुब्रह्मण्यो३ꣳ सुब्रह्मण्यो३ꣳ सुब्रह्मण्यो३मितीन्द्रागच्छतीन्द्रो 18-20
यज्ञस्य देवता तस्मादाहेन्द्रागच्छेति हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने गौरावस्कन्दिन्नहल्यायै जारेति यान्येवास्य चरणानि तैरेवैनमेतत्प्रमुमोदयिषति तैरेनं प्रमोदयति कौशिक ब्राह्मण गौतम ब्रुवाणेति शश्वद्धैतदारुणिनोपज्ञातं यद्गौतम ब्रुवाणेति देवा ब्राह्मण आगच्छतेति तदेवाꣳश्च ह्वयति य उ चेमे मनुष्यदेवा ब्राह्मणाः शुश्रुवाꣳसो ऽनूचानास्तैर्ह्येष्यत्रार्थो भवति ये याजयन्तीत्यहे सुत्यामागच्छतेति स यथा येभ्यः पक्ष्यन्त्स्यात्तेभ्यो निवेदयेदितिथं माद्दरागच्छाथ तद्वः पक्तास्मीत्येवमेतद्देवेभ्य एतं यज्ञं निवेदयति ॥१३॥

अथाग्नीषोमीयेण पशुना प्रतिप्रस्थाता प्रत्युपतिष्ठते ऽग्नीषोमौ वा एतमन्त- 21
र्जम्भमादधाते यो दीक्षत आत्मावैष्णवꣳ ह्येतो दीक्षणीयꣳ हविर्भवति य उ वै विष्णुः सोमो वै स हविर्ह्येनयोर्भवति तस्मादेनमग्नीषोमावन्तर्जम्भमादधाते स एतेन पशुना पशुमात्मानं निष्क्रीणाति तेन निष्क्रीतेन स्वेन सतात्मना यजते ॥१४॥

स द्विरूपः स्याद्द्विदेवत्यो हि भवति स कृष्णसारङ्गः स्यात्तद्धयेनयो रूप- 23
तरं यदि कृष्णसारङ्गं न विन्देदपि रोहितसारङ्गः स्याद्द्विरूपस्तु स्यात् ॥१५॥

22 तद्धैक आहवनीयादुल्मुकमादाय प्रत्युपतिष्ठन्ते ऽयमग्निरयꣳ सोम इत्युभाभ्याꣳ सह सद्भ्यां निष्क्रीणीम इति वदन्तस्तदु तथा न कुर्याद्यत्र वा एतौ क्व च सन्तौ सहैव तस्मादुल्मुकं नाद्रियेत ॥१६॥

24 सो ऽभिमन्त्रयते नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत। दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसतेति नम एवास्मा एतया करोति मित्रधेयमेवैनेनैतत्कुरुते ॥१७॥

25 अथोपस्तभ्नाति वरुणस्योत्तम्भनमसीति वरुणस्य स्कम्भसर्जनी स्थ इति शम्ये उद्धन्ति वरुण्यो ह्येष भवत्या सुत्यायाः ॥१८॥

26-28 अथ चत्वार आसन्दीमुद्यच्छन्ति द्वौ वा अस्मै मानुषाय राज्ञ उद्यच्छतो ऽथैतस्मै चत्वारो यो ऽस्य सकृत्सर्वस्येष्ट औदुम्बरी भवत्यन्नं वा ऊर्गुदुम्बरस्तस्मादौदुम्बरी भवत्यधोनाभि भवत्येष हि रेतस आशयो रेतो हि सोमः ॥१९॥

29 तामभिमृशति वरुणस्य ऋतसदन्यसीति वरुणस्य ऋतसदनमसीति कृष्णाजिनमास्तृणाति वरुणस्य ऋतसदनीमासीदेत्यासादयति वरुण्यो ह्येष भवत्या सुत्यायाः ॥२०॥

30 अथैनं प्रपादयति या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्। गायस्फानः प्रतरणः सुवीरो ऽवीरहा प्रचरा सोम दुर्यानिति गृहा वै दुर्या अपापकृन्नः शिवः शान्तो गृहान्प्रचरेत्येवैतदाह तं दक्षिणेनाहवनीयं निदधति तन्नान्तरेण संचरेत् ॥२१॥

31 तद्धैक उदपात्रमुपनिनयन्ति यथा ब्राह्मणाय वा राज्ञे वोदकायोदकं याचेदेवमेतदिति तदु तथा न कुर्यान्मानुषꣳ ह कुर्याद्यत्तथा कुर्याद्व्यृद्धं वै तद्यज्ञस्य यन्मानुषं तस्मात्तथा न कुर्यात् ॥२२॥ चतुर्थं ब्राह्मणम् ॥ तृतीयो ऽध्यायः ॥

M. III. 4. 1 K. IV. 4. 1

1 शिरो वा एतद्यज्ञस्य यदातिथ्यं बाहू एव प्रायणीयोदयनीये तस्मादेते हविषी अभित आतिथ्यं भवत उभयतो ह्येमौ शिरो बाहू ॥१॥

2 अथ यदातिथ्यं नामातिथिर्वा एष एतस्य गृहानभ्यागच्छति यत्सोमः क्रीतस्तस्मै यथातिथये ऽभ्यागताय ब्राह्मणाय वा राज्ञे वा महोक्षं वा महाजं वा पचेत्तन्मानुषꣳ हविर्देवानामेवमस्मा एतदातिथ्यं निर्वपति तस्मादातिथ्यं नाम ॥२॥

3 स पूर्वो ऽतीत्य गृह्णीयाच्छ्रेयान्वा एष एतस्य गृहानभ्यागच्छति यत्सोमः

क्रीतो यत्र वै श्रेयानभ्यागच्छति यदि वै तत्र तं नापचायन्ति क्रुध्यति वै स तत्र तथा ह्यपचितो भवति तस्मात्पूर्वोऽतीत्य गृह्णीयात् ॥३॥

तदु विमुक्त एवान्यतरः स्यादनड्वानविमुक्तोऽन्यतरोऽथ गृह्णीयात्तद्यो ह्ययं विमुक्तस्तेनागतोऽथ योऽविमुक्तस्तेनापचितस्तस्माद्विमुक्तोऽन्यतरः स्याद्-विमुक्तोऽन्यतरोऽथ गृह्णीयात् ॥४॥ 4

तदुभावेव विमुच्य प्रपाद्यासाद्य गृह्णीयाद्यथा वै देवानां चरणं तद्वा अनु मनुष्याणां तद्वा इदं मनुष्याणां यद्यपि राजाभ्यागच्छति यावन्न विमुञ्चते नैवोदकꣳ ह्वरन्ति नापचितिं कुर्वन्त्यथ यदैव विमुञ्चन्तेऽथैवोदकꣳ ह्वरन्त्यथापचितिं कुर्वन्ति तस्मादुभावेव विमुच्य प्रपाद्यासाद्य गृह्णीयात्स संत्वरमाण इव क्षिप्रमिव गृह्णीयात्तथा ह्यपचितो भवति ॥५॥ 5

तत्पत्न्यन्वारभते यजमानो वै पर्युह्यमाणमन्वारभते ऽथैतत्पत्न्युभयत एवैनमेतन्मिथुनेनान्वारभते यत्र वै श्रेयानभ्यागच्छति सर्वगृह्या इव वै तत्र चेष्टन्ति तथा ह्यपचितो भवति ॥६॥ 6

सोऽन्येन ततो यजुषा गृह्णाति यथो चान्यानि हवीꣳषि गृह्णाति स यदन्येन ततो गृह्णात्येकं वा एष भागं क्रीयमाणोऽभिक्रीयते यत्सोमश्छन्दसामेव साम्राज्यं छन्दसाꣳ राज्यं तस्य छन्दाꣳस्यभितः साचयानि यथा राज्ञोऽराजानो राजकृतः सूतग्रामण्योऽभितः साचय एवमस्य छन्दाꣳस्यभितः साचयानि स नाह तदवकल्पते यच्छन्दोभ्य इति द्वितीयꣳ हविर्गृह्णीयाद्यथैवात्र छन्दाꣳस्यन्वाभजेत्तथैव गृह्णीयात्तस्माद्यत्रैव राज्ञे कुर्वन्ति तदेवाभितः साचयोऽन्वाभक्ताः ॥७॥ 7.8

स गृह्णात्यग्नेस्तनूरसि विष्णवे त्वेत्यग्निर्वै गायत्री तद्गायत्रीमन्वाभजति सोमस्य तनूरसि विष्णवे त्वेति क्षत्रं वै सोमः क्षत्रं त्रिष्टुप्तत्त्रिष्टुभमन्वाभजत्यतिथेरातिथ्यमसि विष्णवे त्वेत्येष ह्यस्योद्धारो यथा श्रेष्ठिन उद्धार एवꣳ ह्यस्यैष उद्धार ऋते छन्दोभ्यः श्येनाय त्वा सोमभृते विष्णवे त्वेति तद्द्वितीयं गायत्रीमन्वाभजति स यच्छश्येनो भूत्वा दिवः सोममाभरत्तेन गायत्री श्येनः सोमभृत्तेनो वा एनामेतद्वीर्येण द्वितीयमन्वाभजत्यग्नये त्वा रायस्पोषदे विष्णवे त्वेति पशवो वै जगती पशवो रायस्पोषस्तज्जगतीमन्वाभजति स यद्विष्णवे त्वा विष्णवे त्वेति गृह्णाति विष्णवे ह्येतद्यज्ञाय गृह्णाति स वै पञ्च कृत्वो गृह्णाति संवत्सरसंमितो यज्ञः पञ्चर्तवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वो गृह्णाति ॥८॥ 9-14

15 स वा एष नवकपालः पुरोलाशो भवति नवाक्षरा वै गायत्र्यष्टौ तानि यान्यन्वाह प्रणवो नवमः पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध उ वै शिरस्तस्मादेष नवकपालः पुरोलाशो भवत्येतामभि संपदम् ॥९॥

16 कार्ष्मर्यमयाः परिधयो भवन्ति वनस्पतिषु ह वै देवा एतꣳ राक्षोघ्नं ददृशुर्यत्कार्ष्मर्यꣳ शिरो वै यज्ञस्यातिथ्यं नेच्छिरस्तो नाष्ट्रा रक्षाꣳसि यज्ञꣳ हिनसन्निति तस्मात्कार्ष्मर्यमयाः परिधयो भवन्ति ॥१०॥

17 आश्ववालः प्रस्तरो यज्ञो ह वै देवेभ्यो ऽपचक्राम सो ऽश्वो भूत्वा पराङावर्तत तस्य ह देवा अनुहाय वालानभिपेदुस्ते प्रलुलुपिरे तान्यासुस्ता एता ओषधयो जज्ञिरे यदश्ववालाः शिरो वै यज्ञस्यातिथ्यं जघनार्धो वाला उभयत एवैतद्यज्ञं परिगृह्णाति ॥११॥

18 ऐक्षव्यौ विधृती नेद्धर्हिश्चाश्ववालश्च प्रस्तरः संमुह्यादित्यसंमोहाय चतुर्गृहीतान्याज्यानि गृह्णाति न ह्यत्रानुयाजान्यजति ॥१२॥

19 आसाद्य हवीꣳष्यग्निं मन्थति शिरो वा एतद्यज्ञस्य यदातिथ्यमग्निरु वै यज्ञो जायत उ वा एतद्यदेनं मन्थन्ति शिरस्तो वै जायमानो जायते शिरस्त एवैतद्यज्ञमग्निं जनयति शिरो वा एतद्यज्ञस्य यदातिथ्यमग्निरु वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वति शिरस्त एवैतत्सर्वाभिर्देवताभिर्यज्ञꣳ समर्धयति ॥१३॥

20 सो ऽधिमन्थनमादत्ते ऽग्नेर्जनित्रमसीत्येतस्माद्धि दारुणो ऽधिजायते वृषणौ स्थ इति कुशतरुणके तद्यावेमौ स्त्रिया एतावेवैता उर्वश्यसीत्यधरारणिमायुरसीत्याज्यविलापन्यामनक्ति पुरूरवा असीत्युत्तरारणिमुर्वशी जायाप्सराः पतिः पुरूरवा अथ यदेतस्मान्मिथुनाद्जायत तदायुस्तथो वा एनमेष एतस्मान्मिथुनादेतं यज्ञमग्निं जनयति ॥१४॥

23 अथाहाग्नये मथ्यमानायानुब्रूहीत्यन्वाह होता मन्थत्यध्वर्युर्गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामीत्येवमात्मानमभिमन्थति तथो यज्ञमात्मनो न पराञ्चं कुरुते तं वै छन्दोभिर्मन्थति छन्दोभिर्जनयति छन्दाꣳसि मथ्यमानायान्वाह छन्दाꣳस्येवैतद्यज्ञमन्वायातयति यथामुꣳ सूर्यꣳ रश्मयो ऽन्वायत्ता एवमेतच्छन्दाꣳसि यज्ञमन्वायातयति जातायानुब्रूहीत्यनुप्रह्रियमाणायानुब्रूहीति ॥१५॥

24 सो ऽनुप्रहरति भवतं नः समनसौ सचेतसा अरेपसौ । मा यज्ञꣳ हिꣳ-

सिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य न इति शान्तिमेवाभ्यामेतद्ददति शमयत्येवैनावेतत् ॥१६॥

अथाभिजुहोत्यग्ना अग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपावा। स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहेत्याहुतये वा एतं मन्थन्ति तमेतयाहुत्या शमयति ॥१७॥ 25

अथ प्रचरन्ति तदिलान्तमेव भवति शिरो वा एतद्यज्ञस्य यदातिथ्यं पूर्वार्ध उ वै शिरः शिरस्त एवैतद्यज्ञमभिसꣳस्करोति नानुयाजान्यजति यद्धानुयाजान्यजेद्यथा शिरस्तः पादौ प्रतिदध्यादेवꣳ ह तत्तस्मादिलान्तमेव भवति नानुयाजान्यजति ॥१८॥ 26

प्रथमं ब्राह्मणम् ॥

K. IV. 4. 2 M. III. 4. 2

आतिथ्येन वै देवा इष्ट्वा तान्त्समद्विवेद ते न समजानतान्यो ऽन्यस्य श्रैष्ठ्यायातिष्ठमानास्ते चतुर्धा व्यद्रवन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैरित्येक आहुरेते त्वेव ते विश्वे देवास्तान्ह तथा विद्वुतानसुररक्षसान्यनुव्यवेयुः ॥१॥ 1

ते होचुरसुररक्षसानि वै नो ऽनुव्यवागुरिति द्विषद्भ्यो वै रध्याम इति ते हन्त संजानामहा इति मा द्विषद्भ्यो रध्यामैकस्य श्रिये तिष्ठामहा इति ते ह सर्वे देवा इन्द्रस्य श्रिये ऽतिष्ठन्त तस्मादाहुरिन्द्रः सर्वा देवता इतीन्द्रश्रेष्ठा देवा इत्येतस्य हि श्रिये सर्वे देवा अतिष्ठन्तेति तस्मादु स्वा नतीयेरन्यो ह परस्तरामिव द्विषन्भ्रातृव्यो भवति स हैनानुतानुव्यवैत्यप्रियꣳ ह द्विषतां करोति न ह द्विषद्भ्यो रध्यति य एवं विद्वान्त्संजानीते ॥२॥ 2.3

ते होचुः संज्ञाय हन्तेदं तथा करवामहा इति यथा न इदमाप्रदिवमेवाजय्यमसदिति तथेति होचुस्ते वै जुष्टास्तनूः प्रियाणि धामानि समवदाय ब्रवामेत्येतेन[1] नः स नानासदिति यो नो ऽन्यो ऽन्यस्मै द्रुह्याद्यो नो ऽतो ऽन्यद्ब्रूदादिति तथेति होचुस्तस्य नः क उपद्रष्टेति तनूनप्त्रैव[2] शाकर इति होचुस्तदयं वाव तनूनप्ता शाकरो यो ऽयं पवत एष ह वै प्रजानामुपद्रष्टा स वा अयमेक इवैव पवते सो ऽयं पुरुषे ऽन्तः प्रविष्टः प्राङ् च प्रत्यङ् च तौ प्राणोदानौ तस्मादाहुर्मनो देवा मनुष्यस्याजानन्तीति मनसा संकल्पयति तत्प्राणमपिपद्यते प्राणो वातमपिपद्यते वातो देवेभ्य आचष्टे यथा पुरुषस्य मनः ॥३॥ 4-6

7.8 तस्मादप्येतदृषिणाभ्यनूक्तं मनसा संकल्पयति तद्वातमपिगच्छति वातो देवेभ्य आचष्ट यथा पुरुष[1] ते मन इति ते देवा जुष्टास्तनूः प्रियाणि धामानि समवदायोच्चुरेतेन नः स नानासदिति यो नो ऽन्यो ऽन्यस्मै द्रुह्याद्यो नो ऽतो ऽन्यद्व-दादिति तदेदानमेव[2] देवा नातिक्रामन्ति के ह्यभविष्यन्यदत्यक्रमिष्यन्नृत[3] ह्यकरि-ष्यन्नेतद्ध वा एकं देवा व्रतं चरन्ति यत्सत्यं तस्माद्यशस्तस्मादेषां जितमनपजय्यं यशो ह भवति य एवं विद्वान्त्सत्यं वदति ॥४॥

9 तदेतन्निदानेन यत्तानूनप्त्रे ते देवा जुष्टास्तनूः प्रियाणि धामानि समवाद्य-न्तायैत[4] आज्यान्येव गृह्णते त आज्यानि गृह्णानास्तथो एव जुष्टास्तनूः प्रियाणि धामानि[5] समवद्यन्ते तस्मादु नैव सर्वेणेव समवेयान्नेन्मे सर्वेणेवेति जुष्टास्तन्वः प्रियाणि धामानि[6] सहासन्निति येनो समवेयान्न[7] तस्मै द्रुह्येदित्याहुर्न सतानूनप्त्रिणे द्रोग्ध-व्यमिति ह्याहुः ॥५॥

10-12 अथ वा अतो गृह्णात्येवापतये त्वा गृह्णामि परिपतये त्वा गृह्णामीत्ययं वा आ च पतति परि च पतति यो ऽयं पवत एतस्मा उ हि गृह्णाति तस्मादाहापतये त्वा गृह्णामि परिपतये त्वा गृह्णामीति तनूनप्त्रे शाक्करायेत्ययं वाव तनूनप्ता शाक्करो यो ऽयं पवत एतस्मा उ हि गृह्णाति तस्मादाह तनूनप्त्रे शाक्करायेति शक्मन्नोजि-ष्ठायेत्ययं वाव शक्मन्नोजिष्ठो यो ऽयं पवत एतस्मा उ हि गृह्णाति तस्मादाह शक्मन्नोजिष्ठायेति ॥६॥

13 अथ समवमृशन्त्येतद्ध देवा भूयः समामिर इत्थं नः सो ऽमुथासदिति यो नो ऽन्यो ऽन्यस्मै द्रुह्याद्यो नो ऽतो ऽन्यद्वदादिति तथो वा एते भूयः समामत इत्थं नः सो ऽमुथासदिति यो नो ऽन्यो ऽन्यस्मै द्रुह्याद्यो नो ऽतो ऽन्यद्वदादिति ॥७॥

14 ते समवमृशन्त्यनाधृष्टमस्यनाधृष्यमित्यनाधृष्टा हि देवा अनाधृष्या आस-न्त्सह सन्तः समानं वदन्तः समानं दध्राणा देवानामोज इति देवानाꣳ हि जुष्टास्तन्वः प्रियाणि धामान्यनभिशस्त्यभिशस्तिपा इति श्रेयाꣳसो हि देवा अभिशस्तेरनभिशस्ते-न्यमित्यनाधृष्यमित्येवैतदाहाञ्जसा[8] सत्यमुपगेषमित्यञ्जसा सत्यमुपगेषं मेदमतिक्रमि-षमित्येवैतदाह सुविते[9] मा धा इति सुविते[10] ह्येतद्देवानदधुर्ये समानमवदन्त्समानम-ध्रियन्त[11] ॥८॥

15.16 तत्पलीङ्क्त्यापिधाय निदधति तस्मिन्नभ्युन्नीय गृहपतये व्रतं प्रयच्छन्ति स हि तेषामिन्द्रभाजनं[12] भवति यद्यु दक्षिणावता यजेत यजमानाय ते प्रयच्छन्ति स

हि तेषामिन्द्रभाजनं भवति तद्या देवा जुष्टास्तनूः प्रियाणि धामानि समवाद्यन्त तदिन्द्रे संन्यदधत स एष एवेन्द्रो य एष तपति तेन हैष एतद्वीर्येण तपति शश्वद्धैष पुरा कृष्ण[1] एवासाथ ये बहवो दीक्षन्ते गृहपतौ ते संनिदधते तथो एव जुष्टास्तनूः प्रियाणि धामानि[2] स हि तेषामिन्द्रभाजनं भवति यद्यु दक्षिणावता यजेत यजमाने ते संनिदधते तथो एव जुष्टास्तनूः प्रियाणि धामानि स हि तेषामिन्द्रभाजनं भवति तद्या देवा जुष्टास्तनूः प्रियाणि धामानि समवाद्यन्त तत्सार्धꣳ संजग्मे ततः साम संबभूव तस्मादाहुः सत्यꣳ सामेति देवजꣳ सामेत्यतो हि तत्संभूतमिति ॥९॥

द्वितीयं ब्राह्मणम् ॥

1 These words are probably corrupt. 2 तनूनप्तैव MSS. 3 पुरुष MSS. 4 तदेदानमेव MSS. (तदेवानमेव M). 5 °क्रमिषन्नृतꣳ all MSS. except M. 6 Thus C[2] pr. m., समवाद्यंताथैत the other MSS. 7 धामानि O P. 8 समवेयान्न B O P W C. 9 अभिशस्तेरन्नभि° MSS. except M. 10 स्विते M. 11 सुविते MSS. (M स्विते). 12 °समानमभ्रियंत MSS. 13 तेषामिंद्र° O P. 14 कृत्स्न or कृस्न MSS. except M.

K. IV. 4. 3 M. III. 4. 3

आतिथ्येन वै देवा इष्ट्वा तान्त्समद्विवेद ते[1] न[2] समजानताम्यो ऽन्यस्य श्रैष्ठ्यायातिष्ठमानास्त उ वै तानूनप्त्रे समजानत ते होचुस्तानूनप्त्रे संज्ञायात्यमिव वा इदमचारिष्मेति[3] ये दीक्षिताः सन्तो ऽन्यो ऽन्यं पापमवादिष्म प्रायश्चित्तिमस्येच्छामहै[4] प्रायश्चित्तिं करवामहा[5] इति ते नाह पुरावभृथात्पुनर्दीक्षामुपाजानꣳस्त[6] एतामेवावान्तरां दीक्षामपश्यन्[7] ॥१॥ 1

ते ऽग्निनैव त्वचं विपल्यैङ्गयन्त तपो वा अग्निस्तपो दीक्षा संतरां मेखलामौहन्त तदेनां पर्यस्ताꣳ सतीं पुनः पर्यास्यन्त तद्यदवान्तरां दीक्षामपश्यꣳस्तस्मादवान्तरदीक्षा नाम तथो वा एष एतदवान्तरां[8] दीक्षामुपैति[9] ॥२॥ 2

सो ऽग्निनैव त्वचं विपलीङ्गयते तपो वा अग्निस्तपो दीक्षा संतरां मेखलामूहते तदेनां पर्यस्ताꣳ सतीं पुनः पर्यस्यते स यदतः प्रागव्रत्यं करोति वा वदति वा 3

तस्यैषा प्रायश्चित्तिस्त ऊचुः प्रजामुपायामेति ॥३॥

4 ते ऽग्निनैव त्वचं विपल्यैङ्गयन्ताग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रजामुपायन्त्संतरां मेखलामौहन्त तत्प्रजामात्मन्यकुर्वत तथो वा एष एतत्प्रजामेवोपैति ॥४॥

5 सो ऽग्निनैव त्वचं विपलीङ्गयते ऽग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रजामुपैति संतरां मेखलामूहते तत्प्रजामात्मनि कुरुते तस्माद्वा अवान्तरदीक्षामुपैति ॥५॥

6 अथ यद्वेवावान्तरदीक्षामुपैति देवा ह स्म वै दीक्षिताः सन्तः समिधमभ्याधायमिति[1] वितिष्ठन्ते तान्ह तथा विष्ठितानसुररक्षस्यनुव्यवेत्य जिघाꣳसां चक्रुरितरस्यैवेतरꣳ रूपेणेतरस्येतरं ते ह्यन्यो ऽन्यं पापं वदन्त उपसमेयुरित्थं वै मा[2] त्वमवादीरित्थं मावादीरित्यग्निर्हैव तथा नान्यमुवाद नो ह्यन्यः कश्चनाग्निं तथोवाद ॥६॥

7.8 ते ह देवा अग्निमूचुरग्ने[10] ऽपि त्वामित्थं वदन्तीꣳ इति न मामिति होवाच ते ह देवा ऊचुरयं वै नो विरक्षस्तमो[11] यदग्निरिति हन्तास्यैव सर्वे रूपं भवामेति तथा रक्षाꣳस्यतिमोक्ष्यामह इति तथा स्वर्गं लोकꣳ समश्नुविष्यामह इति त एतस्यैव[12] सर्वे रूपमभवन्यदग्नेस्तथा रक्षाꣳस्यत्यमुच्यन्त तथा स्वर्गं लोकꣳ समाश्नुवत तथो वा एष एतदेतस्यैव[13] रूपं भवति यदग्नेस्तथा रक्षाꣳस्यतिमुच्यते[14] तथा स्वर्गं लोकꣳ समश्नुते तस्माद्वा अवान्तरदीक्षामुपैति ॥७॥

9 स समिधमभ्यादधदवान्तरदीक्षामुपैत्यग्ने[15] व्रतपास्त्वे व्रतपा इत्यग्निर्वै देवानां व्रतपतिस्तस्मादाहाग्ने व्रतपास्त्वे व्रतपा इति या तव तनूरियꣳ सा मयि या मम तनूरेषा सा त्वयीति तदग्निना त्वचं विपलीङ्गयते सह नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरिति नात्र तिरोहितमिवास्त्येतदवान्तरां[16] दीक्षामुपैत्यत्र[17] खलु संतरां मेखलामूहते संतरामङ्गुलीरचति संतरां नीविम् ॥८॥

10.11 अथ मदन्तीभिरुपचरन्ति तप्त इव वा अग्निस्तप्ता इव मदन्त्यो ऽग्नेर्ह्येष एतद्रूपं भवति तस्मान्मदन्तीभिरुपचरन्ति मदन्तीरुपस्पृश्य सोममाप्याययन्ति वज्रो वा आज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसानीति तस्मान्मदन्तीभिरुपचरन्ति मदन्तीरुपस्पृश्य सोममाप्याययन्ति ॥९॥

12 तदाहुर्यथापूर्वमेव कुर्यादित्यातिथ्येनैवेष्ट्वेत्याप्यायनमेवाग्रे यस्मा एतदाप्यायनं क्रियते ऽथ तानूनप्त्रमथावान्तरदीक्षेति तदु तथा न कुर्याद्यज्ञस्य वा एतत्कर्मात्रो

वा एनान्त्समद्विवेद त उ वै तानूनप्त्रे समजानत तस्मात्तानूनप्त्रमेवाग्रे ऽथवान्तर-दीक्षाथाप्यायनमेतदेव स्थितम् ॥१०॥

स यत्सोममाप्याययन्ति दिवि वै सोमो देवो हि सोमो वृत्रो वै सोमस्त- 13
स्यैतच्छरीरं यद्गिरयो यदश्मानस्तदेषौशान्या[१७] नामौषधिर्जायत[१८] इति होवाच श्वेत-केतुरौद्दालकिस्तामेतदाहृत्याभिषुण्वन्तीति तां दीक्षोपसद्भिस्तानूनप्त्रेणाप्यायनेन सोमं कुर्वन्ति तथो खलु सोमो भवतीति[१९] ॥११॥

अथ यद्वेव सोममाप्याययन्ति मधु सारघमित्याहुर्यज्ञो वाव मधु सारघ- 14
मथैत एव सरघा[२०] यदृत्विजः स यथा मधु मधुकृत आप्याययेयुरेवमेवैतदाप्याय-यन्ति[२१] ॥१२॥

अथ यद्वेव सोममाप्याययन्ति देवा वै यज्ञेनेमां जितिं जित्वा येयमेषां जिति- 15
स्ते होचुर्हन्तेदं तथा करवामहा इति यथा न इदमनभ्यारुह्यं[२२] मनुष्यैरसदिति ते यज्ञस्य रसं निर्धीय यथा मधुकृतो निर्धयेयुरेवं विदुह्य यज्ञं यूपेन योपयित्वा तिरो बभूवुस्तद्यदेनेनायोपय ँस्तस्माद्यूपो नाम ॥१३॥

तद्वृषीणामनुश्रुतमास तं यथा यथर्षयो[२३] यज्ञꣳ समभरꣳस्तथायं यज्ञः 16
संभृतो यथो[२४] वै तदृषयो यज्ञꣳ समभरन्नेवमु वा एष एतद्यज्ञꣳ संभरति यो दीक्षते ॥१४॥

स वै वागेव यज्ञः स यदेव तत्र यज्ञस्य देवैर्निर्धीतं यद्विदुग्धं तदेवैतदाप्याय- 17
यन्त्यथ समृद्ध एव यज्ञः षळाप्याययन्ति षड्वा ऋतव ऋतव एवैतद्भूत्वाप्याय-यन्ति ॥१५॥

त आप्याययन्त्यꣳशुरꣳशुष्टे देव सोमाप्यायतामिति तदस्याꣳशुमꣳशुमे- 18
वाप्याययन्त्यꣳशावꣳशावेव रसं दधाति तस्मादाहाꣳशुरꣳशुष्टे देव सोमाप्यायता-मितीन्द्रायैकधनविद इतीन्द्रो यज्ञस्य देवता तस्मादाहेन्द्रायेत्येकधनविद इति दश दश वा ह स्मैष एकैको ऽꣳशुर्देवान्प्रतीन्द्रायैकधनानाप्याययन्ति शतꣳ शतं वा तस्मादाहैकधनविद इत्या तुभ्यमिन्द्रः प्यायतामितीन्द्रो यज्ञस्य देवता या ते देवता सा त आप्यायतामित्येवैतदाहा त्वमिन्द्राय प्यायस्वेति तदेतस्मिन्नाप्यायनं दधात्याप्याययास्मान्त्सखीन्त्सन्या मेधयेति यत्सनोति तेन तदाह मेधयेति यन्मेध-यानुब्रूते स्वस्ति ते देव सोम सुत्यामुद्दचमशीयेत्याशीरेषर्त्विजां च यजमानस्य च स्वस्ति यज्ञस्योद्दचꣳ सꣳस्थां गच्छेमेति[२५] ॥१६॥

19 अथ प्रस्तरे निह्नवत उत्तरतउपचारो वै यज्ञो जिह्मा उ वा एते यज्ञाद्यन्ति ये सोममाप्याययन्ति दक्षिणेव ह्यन्वक्यन्ति ते देवताभ्य आवृश्च्यन्ते यज्ञ उ वै प्रस्तरस्तत्पुनर्यज्ञमारभते[16] तथा न जिह्मा यज्ञाद्यन्ति तथो देवताभ्यो नावृश्च्यन्ते तस्मात्प्रस्तरे निह्नवते ॥१७॥

21 ते निह्नवत एष्टा रायः प्रेष भगायेत्यृतमृतवादिभ्य इति सत्य ँ सत्यवादिभ्य इत्येवैतदाह नमो दिवे नमः पृथिव्या इति तदाभ्यां द्यावापृथिवीभ्यां नमस्करोति ययोरिद ँ सर्वमधि ॥१८॥

20.22 तदाहुरक्के[17] निह्नवीता३[18] अनक्का३ इति तद्वनक्त एव निह्नवीतानुप्रहरण ँ ह्येवाक्तस्य समुल्लुप्यादायाहाग्नीन्मदन्त्यापा३ इति मदन्तीति तत्समुदितभाजनं ताभिरेहीत्युपर्युपर्यतिहरति स यदुपर्युपर्यतिहरति तदनुप्रहृतभाजनमथ यन्नानुप्रहरत्येतेनो ह्या श्वः सुत्यायाश्चरन्ति ॥१९॥ तृतीयं ब्राह्मणम् ॥

1 तेन MSS. 2 चाध्मेति B W. 3 Thus C sec. m. only; °त्तिमत्स्येछेत्स्यामहै B W, °त्तिमछामहै P, °न्तिमछा (in margin त्स्ये) या (blotted out?)-महै O, °तिमछस्यामहै C¹ (pr. m.), °त्तिमत्स्येत्स्यामहै C² (sec. m.), °त्तिमन्वेच्छामहै M, °त्तिमछयैछामहै My. 4 करवा° MSS. 5 °क्षामपाजा° MSS. except M. 6 °पश्यन् B O P W. 7 °वांतरदीक्षामुपेति B, changed into °वांतरांदीक्षा° (without accent). 8 Conjectural reading, °भ्याधायाहमिति M, °भ्याधायमति all the other MSS. 9 मां MSS. except M. 10 Thus the accent B W, °चुरग्ने the other MSS. 11 विरक्षस्तमो MSS. 12 एतदेव MSS. except M. 13 ? एतदेतदेव MSS. except M (एतदेव). 14 Read रक्षाꣳस्यतिमुच्यते ? 15 समिधमभ्यादधद° MSS. 16 °वांतरदीक्षा° B M. 17 Thus M, °स्तदेषोसंज्ञा W O P C² My, °स्तदेषो-संज्ञा C, °स्तदेषासंज्ञा B (cp. V. 3. 1. 12). 18 नामोष°

MSS. except M. 19 °तीति B W O P C. 20 Thus accented MSS. 21 In M Kaṇḍikā 12 precedes 11; the first words, however, स यत्...°यन्ति and अथ यद्वेव...°यन्ति, are given by M also, as is natural, in the order of the other MSS. 22 °रूह्यं B W O P C C². 23 यथऋषयो O P C² C (pr. m.). 24 यतो M. 25 °मेति MSS. 26 Thus accented MSS. 27 Read °तदाहुरुक्ते निं°?

K. IV. 4. 4 M. III. 4. 4

ग्रीवा ह वा अस्योपसदस्तस्माद्यदि प्रवर्ग्यवान्भवति प्रवर्ग्येण चरित्वा 1.2
शिरः प्रवर्ग्यो ऽथास्निग्धेता ग्रीवाः प्रतिदधाति[1] तद्याः पूर्वाह्णे ऽनुवाक्या अन्वाह
ता अपराह्णे याज्या या याज्यास्ता अनुवाक्या एवं व्यतिषजति ग्रीवाणामेवैतदस्थी-
नीमान्त्स्कन्धान्व्यतिषजति[2] तानीमानि ग्रीवाणामस्थीनीमे स्कन्धा[3] व्यतिषक्ता अथ
यदुपसद्भिर्यजते ॥१॥

देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त ततो ह्यसुरा एषु लोकेषु 3
पुरश्चक्रिरे ऽयस्मयीमस्या५ रजतामन्तरिक्षे हरिणीं दिवि ॥२॥

तदु वै देवा अस्पृण्वत ता उपसद्भिरुपासीद५स्ताः प्राभिन्दन्प्राजय५- 4.5
स्तस्मान्मानुष उपसदा पुरं जयन्तीत्याहुरथैताभिरेव देवा अजयन्नथ यदेष एताभि-
र्यजते नाहैवैतस्मा एषु लोकेषु तथा पुरः कुर्वत इमा५स्त्वेवैतल्लोकान्प्रभिनत्तीमां-
ल्लोकान्प्रजयति तस्माद्वा उपसद्भिर्यजते ॥३॥

ता आज्यहविषो भवन्ति वज्रो वा आज्यमेतेनैव वज्रेणाज्येन देवा 6
इमांल्लोकान्प्राभिन्दन्प्राजय५स्तथो वा एष एतेन वज्रेणाज्येनेमांल्लोकान्प्रभिनत्तीमांल्लो-
कान्प्रजयति तस्मादाज्यहविषो भवन्ति ॥४॥

सो ऽष्टौ कृत्वो जुह्वां गृह्णाति चतुरुपभृति तद्वा आहुश्चतुरेव जुह्वां गृह्णीया- 7-9
दित्यष्टौ कृत्व उपभृतीत्यष्टौ त्वेव कृत्वो जुह्वां गृह्णाति चतुरुपभृति वज्रमेवैतदभिभारं
करोत्यग्नीषोमा उ वै देवाना५ सयुजौ ताभ्यामेव सह गृह्णाति तौ सयुजौ करोत्ये-
काकिने विष्णवे स पूर्वमेवाघारमाघारयति नोत्तरं प्रतिक्रामति वा उत्तरमाघारमा-

घार्याभिजितय॑ एव तस्मात्पूर्वमेवाघारमाघारयति नोत्तरम् ॥५॥

10-13 आश्राव्य न होतारं प्रवृणीते॑ सीद होतरित्येवाह सीदति होता होतृषदने प्रसूतः स्रुचावादायाहाग्नेय ऽनुब्रूहीत्यतिक्रम्याश्राव्याहाग्निं यजेति वषट्कृते जुहोति सोमायानुब्रूहीत्याह तत्रैव तिष्ठन्नाश्राव्याह सोमं यजेति वषट्कृते जुहोति समानयमान आह विष्णवे ऽनुब्रूहीत्याश्राव्याह विष्णुं यजेति वषट्कृते जुहोति स यत्सार्धमेव तिष्ठञ्जुहोति न यथेदमुतान्यस्मिन्यज्ञे प्रचरन्त्संचरत्यभिजितय॑ एव तस्मात्सार्धमेव तिष्ठञ्जुहोति न संचरति ॥६॥

14-16 ता वा एतास्तिस्रो देवता यजति स यदेतास्तिस्रो देवता यजति वज्रमेवैतत्स॑स्करोत्यग्निमनीक॑ सोम॑ शब्यं विष्णुं कुल्मलं तद्वज्रमेवैतत्स॑स्करोत्यहर्वा अग्नी रात्रिः सोमो ऽथ यो ऽहोरात्रयोः॑ संधिस्तद्विष्णुरेते उ वै संवत्सर एते हि परिप्लवमाने संवत्सरं कुरुतस्तद्वज्रमेवैतत्संवत्सर॑ स॑स्करोत्येतेन वै वज्रेण संवत्सरेण देवा इमांल्लोकान्प्राभिन्दन्प्राजय॑स्तथो वा एष एतेन वज्रेण संवत्सरेणेमांल्लोकान्प्रभिनत्तीमांल्लोकान्प्रजयति तस्माद्वा एतास्तिस्रो देवता यजति ॥७॥

17.18 स यदि तिस्र उपसदो भवन्ति त्रयो वा ऋतवः संवत्सरस्य संवत्सररूपमेवैतत्क्रियते संवत्सरमेवैतत्स॑स्करोति द्विरेकया द्विरेकया प्रचरति॑ तत्षट् षड्वा ऋतवः संवत्सरस्य संवत्सररूपमेवैतत्क्रियते संवत्सरमेवैतत्स॑स्करोति ॥८॥

19.20 यद्यु वै द्वादशोपसदो भवन्ति द्वादश वै मासाः संवत्सरस्य संवत्सररूपमेवैतत्क्रियते संवत्सरमेवैतत्स॑स्करोति द्विरेकया द्विरेकया प्रचरति॑ तच्चतुर्वि॑शतिश्चतुर्वि॑शतिर्वा अर्धमासाः संवत्सरस्य संवत्सररूपमेवैतत्क्रियते संवत्सरमेवैतत्स॑स्करोति ॥९॥

21.22 स यत्सायंप्रातः प्रचरति संपदश्च कामाय तथा हि संपत्संपद्यते सुजितमसदिति चेदं नु यत्प्रातः प्रचरति जयत्येव॑ तदथ यत्सायं प्रचरति सुजितमसदित्यथ यज्जुहोतीदं वै पुरं युध्यन्ति तां जयन्ति तां जित्वा स्वा॑ सतीं प्रपद्यन्ते स यत्प्रचरति युध्यत्येव॑ तदथ यत्संतिष्ठते जयत्येव॑ तदथैतत्स्वा॑ सतीं प्रपद्यते यज्जुहोति स प्रथमया द्विरेकया द्विरेकया प्रचरति॑॰ ॥१०॥

23 स जुहोति या ते अग्ने ऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो अपावधीत्स्वेषं वचो अपावधीत्स्वाहेत्येव॑रूपा हि सासीदयस्मयी हि सासीदथापरया

द्विरेकया द्विरेकया प्रचरति ॥११॥

स जुहोति या ते अग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो 24
अपावधीत्स्वेषं वचो अपावधीत्स्वाहेत्येवꣳरूपा हि सासीद्रजता हि सासीदथापरया द्विरेकया द्विरेकया प्रचरति ॥१२॥

स जुहोति या ते अग्ने हरीशया[11] तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो अपाव- 25
धीत्स्वेषं वचो अपावधीत्स्वाहेत्येवꣳरूपा हि सासीद्धरिणी[12] हि सासीत्स यदि द्वादशोपसदो भवन्ति चतुरहमेकया चरति[13] चतुरहमेकया चतुरहमेकया ॥१३॥

अथ वा अतो व्रतोपसदामेव परउर्व्यो वा अन्या उपसदः परोऽह्नो[14] 26.27
ऽन्यास्तद्याः परउर्व्य एकं प्रथमेन दोग्ध्यथ द्वावथ त्रीꣳस्ताः परउर्व्यो ऽथ याः परोऽह्नयस्त्रीन्प्रथमेन दोग्ध्यथ द्वावथैकं ताः परोऽह्नयस्तद्या इमाः परउर्व्यस्ताः परोऽह्नयो ऽथ याः परोऽह्नयस्ताः परउर्व्यस्तपसा वै लोकं जयन्ति तत्परः पर एवैतद्धरीयो वरीयस्तपो भवति स श्वः श्वः श्रेयान्भवति परः परो वरीयाꣳसं वरीयाꣳसं[15] लोकं जयति[16] य एवं विद्वान्परोऽह्नीरुपैति तस्मात्परोऽह्नीरेवोपेयात्स यदि द्वादशोपसदो भवन्ति त्रीꣳश्चतुरहं दोग्धि द्वौ चतुरहमेकं चतुरहम् ॥१४॥ चतुर्थं ब्राह्मणम् ॥ चतुर्थो ऽध्यायः ॥

1 °दधति O P C C[2] (orig.) My. 2 Thus emended, °नीमास्कंधाव्यति° MSS. except M which has : °नीमां and omits the following words up to °स्थीनीमे. Are we to emend व्यतिषजन्ति ? 3 स्कंधा MSS. 4 °भिजितय MSS. 5 प्रवृणीते B. 6 होरात्रयोः O P. 7 प्रचरति MSS. 8 जयत्येव B W O P C[2]. 9 युध्यत्येव MSS. 10 प्रचरति B W. 11 हरिशया M (sec. m.). 12 °द्धरिणी B W O P. 13 Thus MSS., but in C accent blotted out. Read प्रचरति ? 14 परोड्° instead of परोऽ° B W O P C here and after. 15 वरी° B W O P C C[1] (sec. m.). 16 जयंति B W, जयन्ति M.

M. III. 5. 1 K. IV. 5. 1

1-6 स वै शालायाः पूर्वार्धात्प्राङ् प्रक्रामति त्रीन्विक्रमाꣳस्तच्छङ्कुं निहन्ति सो ऽन्तःपातो वेदेस्तस्माच्छङ्कोर्दक्षिणा प्रक्रामति पञ्चदश विक्रमाꣳस्तच्छङ्कुं निहन्ति सा दक्षिणा श्रोणिरथास्मादेव मध्यमाच्छङ्कोरुदङ् प्रक्रामति पञ्चदश विक्रमाꣳस्तच्छङ्कुं निहन्ति सोत्तरा श्रोणिरथास्मादेव मध्यमाच्छङ्कोः प्राङ् प्रक्रामति षट्त्रिꣳशतं विक्रमाꣳस्तच्छङ्कुं निहन्ति स पूर्वार्धो वेदेस्तस्माच्छङ्कोर्दक्षिणा प्रक्रामति द्वादश विक्रमाꣳस्तच्छङ्कुं निहन्ति स दक्षिणो ऽꣳसो ऽथास्मादेव मध्यमाच्छङ्कोरुदङ् प्रक्रामति द्वादश विक्रमाꣳस्तच्छङ्कुं निहन्ति स उत्तरो ऽꣳस एषा मात्रा वेदेः ॥१॥

7.8 सा यत्त्रिꣳशद्विक्रमा पश्चाद्भवति त्रिꣳशदक्षरा वै विराड्विराजा वै देवा अस्यां प्रत्यतिष्ठꣳस्तथो वा एष एतद्विराजैवास्यां प्रतितिष्ठति त्रयस्त्रिꣳशद्विक्रमा वा त्रयस्त्रिꣳशदक्षरा वाव विराट् तदु विराजैवास्यां प्रतितिष्ठति सैषा मीमाꣳसैव त्रिꣳशद्विक्रमैव पश्चात्स्यात् ॥२॥

9 अथ यत्षट्त्रिꣳशद्विक्रमा प्राची भवति षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गं लोकꣳ समाश्नुवत तथो वा एष एतद्बृहत्यैव स्वर्गं लोकꣳ समश्नुते तदस्य दिव्याहवनीयो भवति ॥३॥

10 अथ यच्चतुर्विꣳशतिविक्रमा पुरस्ताद्भवति चतुर्विꣳशत्यक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धो वा एष वेदेस्तस्माच्चतुर्विꣳशतिविक्रमा पुरस्ताद्भवति[1] ॥४॥

11 सा पश्चाद्वरीयसी स्यात्पश्चाद्वरीयसीव वै श्रोणिमतीव[2] योषा भवति[3] तत्प्रजाभ्य एवैतद्वरीयः प्रजननं[4] करोति तस्माद्वरीयसः प्रजननादिमाः प्रजाः प्रजायन्ते ॥५॥

12.13 नासिका ह वा एषा यज्ञस्य यदुत्तरवेदिः स यदेनामुत्तरां वेदेरुपकिरति तस्मादुत्तरवेदिर्नाम द्वय्य उ वाव प्रजा आदित्या एवान्ये ऽङ्गिरसो ऽन्ये ततो ह्याङ्गिरसः पूर्वं यज्ञꣳ संजहुः ॥६॥

ते होचुर्यज्ञꣳ संभृत्य श्वःसुत्यामादित्येभ्यः प्रब्रवामेति तेन नो यज्ञेन याजयन्त्विति ते ह्याग्निमेव दूतं प्रजिघ्युस्तान्होवाचाग्निरित्योवाच श्वःसुत्यां वो ऽङ्गिरसः प्राहुरिति तेन नो यज्ञेन याजयतेति ॥७॥

त उ होचुरादित्या उपजानीतेति यथास्मानेवाङ्गिरसो याजयेयुर्न 14-16
वयमङ्गिरस इति ते होचुरन्तरामेव सुत्यां ध्रियामहा इति[1] नापक्रमणमस्त्विति[2]
ते ह यज्ञꣳ संजह्रुः ॥८॥

ते होचुर्यज्ञꣳ संभृत्य श्वःसुत्यां वा अस्मभ्यमङ्गिरसः प्रावोचन्नित्य-
द्यसुत्यामेव वयं तुभ्यं प्रब्रूमो ऽङ्गिरोभ्यश्च तेषां नस्त्वꣳ होतासीति साह तत्रैवा-
ग्निरासाथान्यमेव[3] दूतं प्रजिघ्युस्त उ हाङ्गिरसो ऽन्वेत्याग्निमृदुरिवापि[4] कथं नः
प्रहितो न प्रत्यागा इति ॥९॥

स होवाचानिन्द्या एव मावृषतेति तेषां वृतो ऽपक्रमितुं नाशकमिति 17-20
तस्मादनिन्द्येन वृतो नापक्रामेत्ततो हैषां वितरामियाय क्रोधस्तेन सद्यःक्रिया-
ङ्गिरस आदित्यान्याजयां चक्रुः स सद्यःक्रीस्तेभ्यो ह दक्षिणानां काले वाचमेव
दक्षिणामानिन्युस्ताꣳ ह न प्रतिजगृहुर्हास्यामहे यदि प्रतिग्रहीष्याम इति तत्कर्म
न व्यमुच्यत[5] दाक्षिणं तेभ्यो हापरꣳ सूर्यमानिन्युस्तꣳ ह प्रतिजगृहुस्तस्माद्वा
अङ्गिरस आहुर्वयमेवार्त्विजीनाः[6]स्मो वयं दक्षिणीया इति येभ्यो नो ऽपि सूर्यं
दक्षिणामनयन्निति[7] तस्मादप्येतर्हि सद्यःक्रियो[8] ऽश्वः श्वेतो दक्षिणा तस्य रुक्मः
पुरस्तात्तद्धयेतस्य रूपं क्रियते[9] य एष तपति ॥१०॥

सो हेयं वाक् चुक्रोध न मदेष केन चन श्रेयानिति न बन्धुना न केन 21
चन कथमेतं[10] प्रतिगृह्णीयुर्न[11] मामिति सा ह सिꣳही भूत्वान्तरा देवासुरान्त्सं-
यत्तानाददानाक्षिणती[12] चचार ताꣳ होभय एव विदां चक्रुर्यतरानेव न इयमुपा-
वर्त्स्यतीति ते भविष्यन्ति परेतरे भविष्यन्तीति तामुभय एवोपमन्त्रयां चक्रिरे
सो ऽग्निरेव देवानां दूत आस सहरक्षा इत्यसुररक्षसमसुराणाम् ॥११॥

सा होवाचाग्निमुपावर्त्स्यन्ती किं मम ततो भविष्यतीति यद्युष्मानुपाव- 22
र्त्स्यामीति[13] ते होचुः प्रथमामेव त्वाहुतिः प्राप्स्यतीत्यपि त्वा पूर्वामग्नेराहुतिः प्राप्स्य-
तीति तस्माद्धारयन्त्यग्निमथैतां[14] व्याघारयन्ति तदेनां प्रथमामाहुतिः प्राप्नोति ॥१२॥

सा होवाचोपावर्तमाना यामु कां च मया यूयमाशिषमाशासिष्यध्वे तां[15]
वः समर्धयिष्यामीति स याꣳ हैनया[16] कां चाशिषमाशासते तामसै
समर्धयति[17] ॥१३॥

सैषा निदानेन यदुत्तरवेदिः स यदुत्तरवेदिमुपकिरति यज्ञस्यैव सर्व- 23
त्वाय कृत्स्नतायै वाग्वा उत्तरवेदिर्यज्ञ उ वै वाक्तस्मादुत्तरवेदिमुपकिरति ॥१४॥

24.25 तां वै युगशम्येन विमिमीते युगेन यत्र कुर्वन्ति शम्यया यत आहरन्ति युगशम्येन वै योग्यं युञ्जन्ति[20] सा यददो बर्हिर्धेव[21] यज्ञादभवत्तदेनामेतद्युगशम्येनैव यज्ञे युनक्ति तस्माद्यामन्यस्मै दक्षिणामानयेयुर्न तां निवृत्तदक्षिणां[22] प्रतिगृह्णीयात् सि꣡ꣳही हैनं भूता[23] विक्षिणाति[24] नो वा एनां यजमान आत्मना[25] कुर्वीत[26] सि꣡ꣳह्यु हैवैनं भूता[27] विक्षिणाति[28] नो वा एनामन्यस्मै दद्याद्यज्ञ꣡ꣳ हात्मनः पराञ्चं कुर्वीत यदेनामन्यस्मै दद्यात्तस्माद्य[29] एष समानबन्धुरपि दुरनुभूत[30] इव स्यात्तस्मा एवैनां दद्यात्[31] स यदहैनां[32] ददाति तेनैन꣡ꣳ सि꣡ꣳही भूता न विक्षिणाति यद्वेनां ददत्समानाय[33] ददाति तेनो यज्ञमात्मनो न पराञ्चं कुरुत एषा प्रतिष्ठा निवृत्तदक्षिणायाः ॥१५॥

26-30 अथ खलु शम्यां च स्फ्यं चादाय[34] यो ऽसा[35] उत्तरार्धे शङ्कुर्भवति ततः प्रत्यङ् प्रक्रामति त्रीन्विक्रमा꣡꣯ꣳस्तत्स्फ्येन परिलिखति तप्तायनी मे ऽसीति पश्चादुदीचीमिमां तत्पृथिवीमाहास्या꣡ꣳ हि तप्त एति वित्तायनी मे ऽसीत्यग्रेणोदीचीमिमां तत्पृथिवीमाहास्या꣡ꣳ हि विविदान एत्यवतान्मा व्यथितमिति दक्षिणतः प्राचीमिमां तत्पृथिवीमाह यत्र व्यथैतन्मावतादित्यवतान्मा नाथितमित्युत्तरतः प्राचीमिमां तत्पृथिवीमाह[36] यत्र नाधैतन्मावतादिति[37] ॥१६॥

31 अथाग्नीनां नामानि गृह्णन्हरति स यदग्नीनां नामानि गृह्णन्हरति यत्र ह वा अग्रे देवा अग्नि꣡ꣳ होत्राय प्रावृणत तत्प्राधन्वन्त꣡ इमाः पृथिवीः प्राविशदियमेका परे द्वे तैरेवैनमेतं निदानैर्हरति ॥१७॥

32a स प्रहरति विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहीति यत्प्राधन्वत्तदस्मिन्नायुर्दधाति तदेन꣡ꣳ समीरयति यो ऽस्यां पृथिव्यामसीति स यो ऽस्यां पृथिव्यां भवति त꣡ꣳ हरति पराहृत्य निदधाति यत्ते ऽनाधृष्टं नाम यज्ञियं तेन त्वादध इति यत्ते ऽनाधृष्ट꣡ꣳ रक्षोभिर्नाम यज्ञियं तेन त्वादधामीत्येवैतदाह ॥१८॥

अथ द्वितीयं प्रहरति विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहीति यत्प्राधन्वत्तदस्मिन्नायुर्दधाति तदेन꣡ꣳ समीरयति यो द्वितीयस्यां पृथिव्यामसीति स यो द्वितीयस्यां पृथिव्यां भवति त꣡ꣳ हरति पराहृत्य निदधाति यत्ते ऽनाधृष्टं नाम यज्ञियं तेन त्वादध इति यत्ते ऽनाधृष्ट꣡ꣳ रक्षोभिर्नाम यज्ञियं तेन त्वादधामीत्येवैतदाह ॥१९॥

अथ तृतीयं प्रहरति विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहीति यत्प्राधन्वत्तदस्मिन्नायुर्दधाति तदेनꣳ समीरयति यस्तृतीयस्यां पृथिव्यामसीति स यस्तृतीयस्यां पृथिव्यां भवति तꣳ हरति पराहृत्य निदधाति यत्ते ऽनाधृष्टं नाम यज्ञियं तेन त्वादध इति यत्ते ऽनाधृष्टꣳ रक्षोभिर्नाम यज्ञियं तेन त्वादधामीत्येवैतदाह ॥२०॥

अनु त्वा देववीतय इति चतुर्थꣳ हरति देवेभ्यस्त्वा जुष्टꣳ हरामीत्येवैतदाह स वै चतुःस्रक्तेश्चात्वालाद्धरति[32] दिशो वै स्रक्तयः सर्वाभ्य एवैनं तद्दिग्भ्यः समीरयति तस्माच्चतुःस्रक्तेश्चात्वालाद्धरति ॥२१॥ 32b

अथाभिमृशति सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्वेति सा यत्सिꣳही भूत्वाददाना[33] क्षिणत्यचरत्तस्मादाह सिꣳह्यसीति सपत्नसाहीति त्वया सपत्नान्पापीयसः करवामेत्येवैतदाह देवेभ्यः कल्पस्वेति योषा वा एषा यद्वेदिस्तदेनामेतद्देवेभ्य एव कल्पयति ॥२२॥ 33

अथ युगेन सर्वतः परिमिमीते यजमानस्य वा पदैर्दश दश सर्वतो दशाक्षरा वै विराड्विराग्वै विराड्विराग्वा एषा निदानेन तस्माद्यजमानस्य पदैर्दश दश सर्वतो ऽथ जघनेन[34] नाभिकां करोति[35] सार्धमासीनो व्याधारयाणीति ॥२३॥ 34

अथाद्भिरभ्युक्षति सा यत्सिꣳही भूत्वाददाना[33] क्षिणत्यचरदशान्तापो वै शान्तिस्तदद्भिः शान्त्या शमयति योषा वा एषा यद्वेदिर्हिन्वत्येवैनां[36] तत्सो[37] ऽभ्युक्षति सिꣳह्यसि सपत्नसाही देवेभ्यः शुन्धस्वेति[38] ॥२४॥ 35

अथ सिकताभिरनुप्रकिरत्यलंकारो ह वा अस्याः सिकता भ्लाशन्त इव हि सिकता भ्लाशत इव योषालंकृताग्नेरु वा एतद्वैश्वानरस्य भस्माग्निमु वा अस्यामभ्याधास्यन्भवति[39] तथाहैनां नातिदहति तथो एनां न हिनस्ति सो ऽनुप्रकिरति सिꣳह्यसि सपत्नसाही देवेभ्यः शुम्भस्वेति ॥२५॥ प्रथमं ब्राह्मणम् ॥ 36

1 °द्भवति MSS. 2 श्रोणिमतीव C. 3 भवति MSS. 4 प्रजनने B W. 5 इति नापक्रमणहास्त्विति W. 6 Read °म्निरासाथा°? 7 Thus B W My, न्वेयाग्निमृदुरिवापि C (pr. m.), न्वेयाग्निमूदुरिवापि others. What is to be read? 8 °च्यत MSS. 9 B W

C My omit the visarga. 10 Read दक्षिणा-मानयन्निति. 11 °क्रेयो W. 12 क्रियते MSS. 13 कथमेतं MSS. (कथम् । एतम् । प्रतिगृह्णीयुः । न । माम् । इति). 14 Cp. IV. 5. 1. 22, IV. 5. 2. 7. 15 °नुपा-वर्त्स्यामीति MSS. 16 तस्माद्वा° C. 17 After तां B W insert प्र. 18 हैनया C. 19 °यति MSS. 20 युंजंति MSS. 21 बहिर्धैव B W. 22 निवृत्त-दक्षिणां MSS. 23 भूता विक्षिणाति MSS. 24 Thus MSS., probably corrupt; अमा कुर्वीत the Mādhy. 25 दद्या° MSS. 26 Thus accented MSS. 27 यदहैनां MSS. 28 दद° MSS. 29 चादाय योसा MSS. 30 C adds in the margin : यत्र नाथैतन्मावतादित्यवतान्मा नाथितमित्युत्तरतः प्राचीमिमां तत्पृथिवी-माह. 31 °तादिति C. 32 चतुत्र° B. 33 भूत्वाद-दाना MSS. 34 जघने C My. 35 करोति MSS. 36 Thus accented MSS. 37 Read तत्सो. 38 °स्वेति MSS. 39 अस्यामभ्या° MSS.

M. III. 5. 2 K. IV. 5. 2

1 स वै संभारान्त्संभरति पैतुद्रवान्परिधीन्त्सुग्गुलु सुगन्धितेजनं वृष्णे स्तुकामभ्यादधातीध्मं[1] चात्वालादुपयमनीरुपकल्पयत्यधिश्रयत्याज्यꣳ स्रुवं च स्रुचं[2] च संमार्ष्ट्यर्द्धास्याज्यमुत्पूय पञ्चगृहीतं गृह्णीते सीदति होता होतृषदन उद्य-च्छन्तीध्ममुपयच्छत्युपयमनीः ॥१॥

2 अथाहाग्नये प्रहियमाणायानुब्रूह्येकस्फ्ययानूदेहीति[3] स यदेकस्फ्ययानू-दैत्यन्तर्वेदि[4] वा अस्येतरे धिष्ण्या भवन्त्यथास्यायमनेनान्तःपातेन व्यवच्छिन्नो भवति[5] तमेवैतदनुसंतनोति तथास्यैष संततो ऽव्यवच्छिन्नो भवति ॥२॥

3-7 तद्धैक ओत्तरवेदेर्यन्ति तदु तथा न कुर्यादेवैतस्माच्छङ्कोरियादथ[6] प्रोक्ष-णीरादायोत्तरवेदिं प्रोक्षति स समान एव प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति यत्किं च प्रोक्षति ॥३॥

स प्रोक्षतीन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्वितीन्द्रघोषस्त्वा वसुभिः पुरस्ताद्गोपायत्वित्येवैतदाह प्रचेतास्त्वा रुद्रैः पश्चात्पात्विति प्रचेतास्त्वा रुद्रैः पश्चाद्गोपायत्वित्येवैतदाह मनोजवास्त्वा पितृभिर्दक्षिणतः पात्विति मनोजवास्त्वा पितृभिर्दक्षिणतो गोपायत्वित्येवैतदाह विश्वकर्मा त्वादित्यैरुत्तरतः पात्विति विश्वकर्मा त्वादित्यैरुत्तरतो गोपायत्वित्येवैतदाह ॥४॥

अथ याः परिशिष्टाः प्रोक्षण्यो भवन्ति ताः पूर्वार्धे दक्षिणार्धे निनयतीदमहं 8
तꣳ वार्बहिर्धा यज्ञान्निःसृजामीति सा यद्दस्तꣳस्तेव शोचन्त्यचरत्तामेवास्याꣳ एतच्छुचं बहिर्धा यज्ञान्निःसृजत्येवं ब्रूयाद्यदि नाभिचरेद्यद्युवभिचरेदिदमहं तꣳ वार्बहिर्धा यज्ञादमुमभिनिःसृजामीति ब्रूयात्तथाह तं खलु शुचा विध्यति तथो स शोचन्नेव म्रियते ॥५॥

अथ व्याधारयति तदेतदेकं कुर्वन्तो द्वे कुर्वन्ति यदहाब्रवीत्प्रथमांꣳ त्वाहुतिः 10a.9
प्राप्स्यतीति तदेनामेतत्प्रथमामाहुतिः प्राप्नोत्यथ यदब्रवीद्यासु कां च मया यूयमाशिषमाशासिष्यध्व इति तां वः समर्धयिष्यामीति स याꣳ हैनया कां चाशिषमाशासते तामस्मै समर्धयति ॥६॥

स व्याधारयति सिꣳह्यसि स्वाहेति सा यत्सिꣳहीभूत्वाददानाꣳ क्षिणत्यचरत्तस्मादाह सिꣳह्यसि स्वाहेति सिꣳह्यस्यादित्यवनिः स्वाहेति यदेनामादित्या दक्षिणामनयन्त्सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहेति ते अस्मा एते आशिषावाशास्ते यद्ब्रह्म च क्षत्रं च सिꣳह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहेति तदस्मैꣳ प्रजां च पशूꣳश्चाशास्ते सिꣳह्यस्यावह देवान्यजमानाय स्वाहेति तदेतस्मै यज्ञाय देवानावहयति भूतेभ्यस्त्वेति स्रुचमुद्यच्छति प्रजा वै भूतंꣳ तदाभ्यः सर्वाभ्यः प्रजाभ्य आह तस्मादाह भूतेभ्यस्त्वेतिꣳ ॥७॥ 11-13

अथ परिधीन्परिदधाति गुप्तये वाव परिधीन्परिदधाति गोपीथाय दूरे ह्येनमितरे परिधय आगमिष्यन्तो भवन्ति ॥८॥

स परिदधाति ध्रुवो ऽसि पृथिवीं दꣳहेति मध्यमं ध्रुवक्षिदस्यन्तरिक्षं दꣳहेति दक्षिणतो ऽच्युतक्षिदसि दिवं दꣳहेत्युत्तरत एवमिमाꣳल्लोकान्दल्हान्कृत्वा तैरेनꣳ सर्वतः परिदꣳहतिꣳ नेदेनं नाष्ट्रा रक्षाꣳसि हिनसन्नित्यथाग्नेः पुरीषमसीतीतरानुपनिवपति पुरीषꣳ ह्यस्यैतद्भवतिꣳ ॥९॥ 14

15-18 स यदेते संभारा भवन्त्यग्नेरेव सर्वत्वाय कृत्स्नताया इदं नु यत्पैतुद्रवाः परिधयो भवन्त्यस्थि ह वा अस्य पीतुदारु[15] स्वेनैवैनं तदस्था समर्धयत्यथ यद्गुग्गुलु[16] भवति मा॑ꣳस॒ꣳ ह वा अस्य गुग्गुलु[17] स्वेनैवैनं तन्मा॑ꣳसेन समर्धयत्यथ यत्सुगन्धितेजनं भवति गन्धो ह वा अस्य सुगन्धितेजन॒ꣳ स्वेनैवैनं तद्गन्धेन समर्धयत्यथ यद्वृष्णे स्तुका भवति वृष्णेर्ह वा अन्तरा विषाणे एका॒ꣳ रात्रिमग्निरुवास स यदिह किं चिदग्नेर्न्यक्तं तदिहाप्यसदिति तस्माद्या[18] शिरसो नेदीयसी[19] तां[20] ग्रीवाभ्य आच्छिद्याहरेद्यद्यु तां[21] न विन्देदपि यत एव कुतश्चाहरेदथ यदाहाग्नेः पुरीषमसीति पुरीष॒ꣳ ह्यस्यैतद्भवति ॥१०॥

अथाह[22] व्युत्क्रामतेत्यथोत्तरं परिग्राहं[23] परिगृह्णाति दक्षिणमेवाग्रे ऽथ पश्चादथोत्तरतो ऽथ प्रतियौति यत्रासौ जघनार्धे शङ्कुर्भवत्यथ प्रोक्षणीरासादयतीध्मबर्हिरुपसादयन्ति[24] स प्रोक्षणीरादायेध्ममेवाग्रे प्रोक्षत्यथ वेदिमथास्मै बर्हिः प्रयच्छन्ति तत्प्रोक्ष्योपनिनीय संनहनमुपसंगृह्योत्तरवेदे स्तृणन्नेति न वा एतामुत्तरेण परिग्राहेण परिगृहीतामवमृशन्ति[25] नाभितिष्ठन्त्या[26] बर्हिषस्तदेनां बर्हिषा शमयति तस्या॒ꣳ शान्ताया॒ꣳ सदोहविर्धानं[27] त्वच्छमयन्त्यभि[28] त्वत्तिष्ठन्ति ॥११॥

द्वितीयं ब्राह्मणम् ॥

1 स्तुका° MSS. 2 स्रुचं C. 3 °ह्येकस्फ्यया° MSS. 4 यदेकस्फ्यया° MSS., नूदेत्य° B W. 5 भवति MSS. 6 कुर्यादेवै° B W C. 7 शोचंत्यचर° B. 8 यदहाब्र° B W; the singular अब्रवीत् must be corrupt. 9 भूःवाददाना B W C. 10 तदेतस्मै B W. 11 Thus MSS. Read भूतानि ? 12 °स्त्वेति MSS. 13 Thus C (orig.), परिवृ॒ꣳहति or °बृ॒ꣳहति the other MSS.; cp. I. 1. 1. 7. 14 ह्यसौ तद्भवति C. 15 °दारुः B. 16 यद्गुग्गुलु B, यत् गुग्गुलु C, यद्गुग्गुलु W. 17 °लुः B W. 18 °द्याः MSS. 19 नेदीयसि C (sec. m.). 20 ता MSS. 21 ता MSS. except C. 22 अथाह MSS. 23 परिग्राहं MSS. 24 प्रोक्ष° B W. 25 Thus emended;

°भृशंत्यनाभिति° MSS. 26 Conjectural reading; सदोहविर्धानं त्वछम्यचं (sec. m. न्वं) त्यभि B, सदोहविर्धानं त्वछम्वंन्वंत्यभि C, सदोहविर्धानं त्वछम्यन्वंत्यभि W, सदोहविर्धानं त्वछंम्यंन्वंत्यभि My.

K. IV. 5. 3 M. III. 5. 3

पुरुषो ह यज्ञः पुरुषस्तेन यज्ञो यदेनं पुरुष एव तनुते स वै तायमानो 1
यावानेव पुरुषस्तावान्विधीयते पुरुषस्यैव विधामनु तस्माद्ध पुरुष एव यज्ञः ॥१॥

तस्य शिर एव हविर्धानं वैष्णवं देवतया सोमो वै देवानाꣳ हविः सो 2
ऽस्मिन्भवति स यदस्मिन्त्सोमो भवति तस्माद्धविर्धानं नाम ॥२॥

मुखमेवास्याहवनीयः स यदाहवनीये जुह्वति यथा मुख आसिञ्चेदेवं 3.4
तदयमेवास्य[1] स्तुपो यूप आग्नीध्रीयश्च मार्जालीयश्च बाहू[2] ॥३॥

उदरमेवास्य सदस्तस्मात्सदसि भक्षयन्ति तस्माद्यर्किं चेदमश्नन्ति 5
तदुदरे प्रतितिष्ठत्यैन्द्रं देवतयाथ यदस्मिन्विश्वे देवा असीदꣳस्तस्मात्सदो नाम त
उ एवास्मिन्नप्येत एतर्हि ब्राह्मणा विश्वगोत्राः सीदन्ति ॥४॥

विजामानो ह्येवास्य धिष्ण्या इमे वै समङ्क्ता विजामान एते ह्येवास्यैत 6
आत्मनः पादावेवास्यामू यावमू शालायामग्नी प्रतिष्ठे एवास्य ते एष उ वै यज्ञ-
स्तायमानः पुरुषस्यैव विधामनु विधीयते तस्माद्ध पुरुष एव यज्ञः[3] ॥५॥

तद्वा उभयतोद्वारꣳ हविर्धानं भवत्युभयतोद्वारꣳ सदस्तथा शाला तस्मा- 7
दयमान्तमेव संतृण्णः पुरुषः ॥६॥

ते वा एते हविर्धाने प्रणिक्ते उपतिष्ठेते दक्षिणत एव दक्षिणमुत्तरत उत्तरं 8.9
तद्यद्वर्षीयस्तद्दक्षिणꣳ स्यात्तथा ह्युदक्प्रवणं भवति ते समवत्यर्धानिदधत्युप-
रिष्टाच्छदिर्वा छदिःसंमितां वा भित्तीमध्यूहन्ति रराट्यां परिवृण्वन्ति[4] परिवर-
णीभिः[5] ॥७॥

अथ प्रतिपरेत्य सावित्रं जुहोति सविता वै देवानां प्रसविता सवितृप्रसूतो 10-12
यज्ञं तनवा इति युञ्जते मन उत युञ्जते धिय इति मनश्च ह वै वाक् च युक्ते देवेभ्यो
यज्ञं वहतः स यदाह युञ्जते मन इति तन्मनो युनक्त्युत युञ्जते धिय इति वाग्वै
धीर्वाचा हि धिया मनुष्या जीवन्त्यनूक्तेन ब्रह्मणा प्रकामोद्येन तस्मादाहोत युञ्जते
धिय इति विप्रा विप्रस्य बृहतो विपश्चित इत्यनूचानाः[6] वै विप्रास्तस्मादाह विप्रा

विप्रस्य बृहतो विपश्चित इति वि होत्रा दधे वयुनाविदेक इदिति वि हि होत्रा दधते यज्ञं तन्वाना महीं देवस्य सवितुः परिष्टुतिरिति सविता वै देवानां प्रसविता सवितृप्रसूतो यज्ञं तनवा इति ॥८॥

13a अथापरं चतुर्गृहीतमाज्यं गृहीत्वाहेहि यजमानेत्यनूदैति पत्नी स दक्षिणस्य हविर्धानस्य दक्षिणे वर्त्मनि जुहोति हिरण्यमुपास्य ॥९॥

15 देवा ह वै यज्ञं तन्वाना असुरराक्षसानां दक्षिणत आसङ्गाद्भियां चक्रुस्त एतं वज्रं दक्षिणतः प्रत्युदश्रयꣳस्तेन दक्षिणतो नाष्ट्रा रक्षाꣳस्यपाबाधन्त वज्र उ वा आज्यं तथो वा एष एतं वज्रं दक्षिणतः प्रत्युच्छ्रयति तेन दक्षिणतो नाष्ट्रा रक्षाꣳस्यपबाधते तथो हास्य रक्षाꣳसि नियानं नान्ववयन्त्यथ यद्धिरण्यमुपास्य न वा अनग्नावाहुतिर्हूयते ऽग्नेरु वा एतद्रेतो यद्धिरण्यं तथास्यैषाग्निमत्याहुतिर्हुता भवति ॥१०॥

13b स जुहोतीदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूल्हमस्य पाꣳसुरे स्वाहेति ॥११॥

16a अथ पत्न्याः पाणौ सꣳस्रवमवनयति योषा वै पत्नी रेत आज्यं योषायां वै रेतः सिक्तं प्रतितिष्ठति तत्ततः प्रजायते योषायामेवैतत्पत्न्याꣳ रेतः प्रतिष्ठापयति तत्ततः प्रजनयति तेन पत्नी संतापमक्षस्य प्रत्युपानक्ति संतापाद्वा इमाः प्रजाः प्रजायन्ते यदा हि स्त्रियाश्च पुꣳसश्च संतप्यते ऽथ रेतः सिच्यते मिथुनमेवैतत्प्रजननं क्रियते ॥१२॥

13c.16b सोपानक्ति देवश्रुतौ देवेष्वाघोषतमित्येतदेवैतद्रेतः सिक्तं तद्देवेभ्यो निवेदयति तद्देवाः प्रजनयन्ति सा वै परागेवोपानक्ति परागध्येव रेतः सिच्यते प्रयच्छति प्रतिप्रस्थात्रे स्रुवं च स्रुचं च ॥१३॥

14a सो ऽपरं चतुर्गृहीताज्यं गृह्णीते जघनेन गार्हपत्यं पत्नीं पर्याणयन्ति स उत्तरस्य हविर्धानस्य दक्षिणे वर्त्मनि जुहोति तथो एव हिरण्यमुपास्येरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः स्वाहेति ॥१४॥

14b अथ पत्न्या एव पाणौ सꣳस्रवमवनयति तेन पत्नी संतापमेव प्रत्यक्षस्योपानक्ति देवश्रुतौ देवेष्वाघोषतमिति सो ऽसावेव बन्धुः प्रतिपरैति पत्नी ॥१५॥

17 अथायमाह हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीत्यन्वाह होता वाचयत्यध्वर्युः प्राची प्रेतमध्वरं कल्पयन्ती इति यज्ञो वा अध्वरः प्राची प्रेतं यज्ञं कल्पयन्ती

College Library, Hyderab. I.M. 5. 3. 23

इत्येवैतदाहोर्ध्वं यज्ञं नयतं मा जिह्वरतमित्यूर्ध्वमिमं यज्ञं नयतं मा ह्वलयतमित्येवैतदाह यदाहोर्ध्वं यज्ञं नयतं मा जिह्वरतमित्यथ यद्युत्सर्जेत् ॥१६॥

अथाभिमन्त्रयेत स्वं गोष्ठमावदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां 18
मा निर्वादिष्टमित्यसुर्या वा एषा वाग्यदक्षे[13] सैषा यज्ञे वदति तामेवैतेन शमयत्येवं ब्रूयाद्यद्युत्सर्जेद्यद्यु[14] नोत्सर्जेन्नैतदाद्रियेत[15] ॥१७॥

अथोत्तरेण परीत्योत्तरवेदेः प्रत्यङ् प्रक्रामति त्रीन्विक्रमा४स्तद्रमयत्यथो 19.20
यत्र वेलां मन्येतात्र रमेथां वर्ष्मन्पृथिव्या इति वर्ष्म वा एतत्पृथिव्या यदाहवनीयो दिवि ह्यस्याहवनीयो भवति तस्मादाहात्र रमेथां वर्ष्मन्पृथिव्या इति[16] ॥१८॥

अथ दक्षिण४ हविर्धानमुपस्तभ्नाति विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थि- 21
वानि विममे रजा४सि । यो अस्कभायदुत्तर४ सधस्थं विचक्रमाणस्त्रेधोरुगाय इति विष्णवे त्वेति मेथीमुपनिहन्ति ॥१९॥

अथोत्तर४ हविर्धानं प्रतिप्रस्थाता दिवो वा विष्ण उत वा पृथिव्या महो वा 22
विष्ण उरोरन्तरिक्षात् । उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्यादिति विष्णवे त्वेत्येव मेथीमुपनिहन्ति ॥२०॥

स यद्वैष्णवैर्यजुर्भिर्जुहोति त्वदुपस्तभ्नाति[17] वैष्णव४ हि हविर्धानमथेदमु- 23
परिष्टादभिमृशति छदिर्वा छदिःसमितां वा भित्तीं प्र तद्विष्णुः[18] स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वेतीद४ हैवास्यैतत्कपालं यदिदमुपरिष्टात्स यदाहाधिक्षियन्तीत्यधि[19] ह्येतदन्येषु कपालेषु क्षियन्त्यथ[20] ये इमे हविर्धानयोश्छदिषी इमे हैवास्यैते कपाले ये इमे अभितो ऽथ यददः पश्चादध्यूहति छदिर्वा छदिःसमितां वा भित्तीमिद४ हैवास्यैतत्कपालं यदिदं पश्चात् ॥२१॥

अथ विष्णो रराटमसीति रराट्यामभिमृशति रराट४ हैवास्यैषा [21]तस्मादै- 24
षीकीत्यलोमकेव[22] भवत्यलोमकमिव[23] हीद४ रराटमथ[24] विष्णोः श्नप्त्रे स्थ इति परिवरण्यावभिमृशति स्नके हैवास्यैते तस्मादेते तालम्यौ[25] वा वैरण्यौ वा नालम्यौ[25] वा भवतो[26] लोमशे इव हीमे[27] स्नके[27] ॥२२॥

अथ लस्पूजनीमादाय[28] निषीद्यति विष्णोः स्यूरसीति विष्णोर्ध्रुवो ऽसीति 25
ग्रन्थिं करोति दृंहमसत्रेद्यघ्नाता इति तत्प्रकृते कर्मणि विस्र४सयति तथा यजमानं

वाध्वर्यु वा नाग्राहो[29] विन्दति तत्संमितमभिमृशति वैष्णवमसीति वैष्णवꣳ हि हविर्धानम् ॥२३॥ तृतीयं ब्राह्मणम् ॥

1 °वास्य MSS. 2 बाहू C. 3 The first sentence of section 5 corresponds to Madhy. III. 6. 2. 1; cp. Kāṇva IV. 6. 2. 1. 4 परिवृष्णंति MSS. 5 We expect a dual (cp. IV. 5. 3. 22). 6 इत्यनूचाना MSS. 7 इति MSS. 8 गृहीत्वाहेहि यजमानेति MSS. (cp. IV. 2. 4. 12) 9 प्रत्युक्षयति MSS. 10 परा° MSS. 11 °हेति MSS. 12 संतापमेव प्रत्यक्षं° MSS. 13 वाग्यदक्षे MSS. 14 °द्यू C (sec. m.), °द्यदू B, °द्यदु C (pr. m.), °द्यदा My. 15 नोत्सर्जेन्नैतदा° C. 16 इति MSS. 17 त्वदुपस्तभ्नाति MSS. After °स्तभ्नाति probably त्वद् has fallen out. 18 °ष्णु C. 19 यदाहाधि° MSS. 20 क्षीयंत्यथ My. 21 तस्मादेषी° B W My. 22 °लोमक इव B W My C (orig.). 23 भवत्य° MSS. 24 रारा° B W. 25 ? Thus MSS. 26 भवतो MSS. 27 हीमे स्रक्के B W, हीमे स्रक्के C. 28 लस्पूजनी° MSS., but cp. IV. 6. 1. 25. 29 Thus MSS.; cp. IV. 6. 1. 25.

M. III. 5. 4 K. IV. 5. 4

1 द्वयमभ्युपरवाः खायन्ते शिरो वा एतद्यज्ञस्य यद्धविर्धानमथ य एवेमे शिरसः कूपा येष्विमे प्राणा एतानेवास्मिन्नेतत्करोत्येतानस्मिन्नेतद्दधाति ॥१॥

2 अथ देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त ततो ह्यासुरा देवेभ्यः कृत्यां वलगान्निचख्नुरुतैनानित्थं चिदभिभवेमेति ॥२॥

3 तदु वै देवा अस्पृण्वत तामेतैरुपरवैरुदकिरन्यदा वै कृत्यामुत्किरन्त्यथ वै सालसा मोघा भवति तामलसां मोघामकुर्वꣳस्तथो वा एष एतद्यामस्मै द्विषन्भ्रातृव्यः कृत्यां वलगान्निखनति तामेतैरुपरवैरुत्किरति तामलसां मोघां करोत्ये-

तद्द्वयं यस्मादुपरवाः खायन्ते ॥३॥

सो ऽभिमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददे नार्यसीत्युक्तो यजुषो बन्धुरथ यदाह नार्यसीति योषा ह्यभिर्योषा हि नारी तस्मादाह नार्यसीति ॥४॥ 4

स दक्षिणस्य हविर्धानस्याधो ऽधः प्रउगं तत्परिलिखतीदमहꣳ रक्षसो ग्रीवा अपिकृन्तामीति वज्रो वा अभिर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति तान्प्रादेशसंमितान्परिलिखति प्रादेशसंमिता ह्येमे प्राणाः स इममेवाग्रे परिलिखत्यथेमथेमथेमम्[1] ॥५॥ 5

तान्यथापरिलिखितं खनति बृहन्नसि बृहद्वा इत्युपस्तौत्येवैनानेतन्महयत्येव यदाह बृहन्नसि बृहद्वा इति बृहतीमिन्द्राय वाचं वदेतीन्द्रो यज्ञस्य देवता वैष्णवी वा एते यदुपरवास्तथास्यैते सेन्द्रा भवन्ति तस्मादाह बृहतीमिन्द्राय वाचं वदेति रक्षोहणं वलगहनं वैष्णवीमिति रक्षसाꣳ ह्येते वलगानां वधाय खायन्ते तस्मादाह रक्षोहणं वलगहनमिति वैष्णवीमिति वैष्णव्यु ह्येषा वाग्या हविर्धाने तस्मादाह वैष्णवीमिति ॥६॥ 8.9

इदमहं तं वलगमुद्वपामि यं नो निष्ट्यो यममात्यो निचखानेति निष्ट्यो वा वा अमात्यो वा कृत्यां वलगान्निखनति तामेवैतदलसां मोघां करोति ॥७॥ 10

इदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखानेति समानो वा वा असमानो वा कृत्यां वलगान्निखनति तामेवैतदलसां मोघां करोति ॥८॥ 11

इदमहं तं वलगमुद्वपामि यं नः सबन्धुर्यमसबन्धुर्निचखानेति सबन्धुर्वा वा असबन्धुर्वा कृत्यां वलगान्निखनति तामेवैतदलसां मोघां करोति ॥९॥ 12

इदमहं तं वलगमुद्वपामि यं नः सजातो यमसजातो निचखानेति सजातो वा वा असजातो वा कृत्यां वलगान्निखनति तामेवैतदलसां मोघां करोति ॥१०॥ 13.14

उत्कृत्यां किरामीत्यन्तत उत्किरति तत्सर्वामेवैतत्कृत्यामुत्किरति स यावद्बाहुनान्वाप्नुयात्तावत्खनेत्तावान्वन्तो[2] ऽन्तादेवैतत्कृत्यामुत्किरत्यन्तात्कृत्यां मोहयति तान्परोक्षणया[3] संतृणत्ति तस्माद्रिमे प्राणाः परोक्षणया[3] संतृण्णास्तस्मात्परः संविद्रते ॥११॥

तान्यथाखातमवमर्शयति स्वरालसि सपत्नहा सत्रराळस्यभिमातिहा जन- 15

रालसि रक्षोहा सर्वरालस्यमित्रहेत्युप चैवैनानेतत्स्तौत्याशिषश्चाशास्ते स्वरालसीति तदुपस्तौति सपत्नहेति तदाशिषमाशास्त एवमेव सर्वेषु ॥१२॥

16.17a अथ संमृशेते स यः पूर्वयोर्दक्षिणस्तमध्वर्युर्यो ऽपरयोरुत्तरस्तं यजमानः सो ऽध्वर्युराह यजमान किमत्रेति भद्रमिति तन्नौ सहेत्युपांशु जपत्यथ यो ऽपरयोर्दक्षिणस्तमध्वर्युर्यः पूर्वयोरुत्तरस्तं यजमानः स यजमान आहाध्वर्यो किमत्रेति भद्रमिति तन्म इत्याह ॥१३॥

17b तौ यदेवꣳ संमृशेते इमानेवैतत्प्राणान्व्यतिषजत इमान्प्राणान्त्सयुजः कुरुतस्तस्माद्विमे प्राणा व्यतिषक्तास्तस्मात्सयुजो ऽथ यदाह भद्रमिति कल्याणी वा एषा मानुषी वाग्यद्भद्रमिति तामेवैतद्यज्ञे वदतस्तां यज्ञे ऽवकल्पयतो ऽथ प्रोक्षति स समान एव प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति यत्किं च प्रोक्षति ॥१४॥

18 स प्रोक्षति रक्षोहणो वलगहनः प्रोक्षामि वैष्णवानिति रक्षसाꣳ ह्येते वलगानां वधाय खायन्ते तस्मादाह रक्षोहणो वलगहन इति प्रोक्षामि वैष्णवानिति वैष्णवा ह्येते यदुपरवाः ॥१५॥

19 अथ याः परिशिष्टा आपो भवन्ति ता अवनयति रक्षोहणो वलगहनो ऽवनयामि वैष्णवानित्येष्वेवैतच्छिद्रेष्वपो दधाति ता इमा एषु छिद्रेष्वापो हिता अन्नमु वा आपो ऽन्नमु वै प्राण एष्वेवैतच्छिद्रेषु प्राणान्दधाति त इम एषु छिद्रेषु प्राणा हिताः ॥१६॥

20.21 अथोदगग्राणि च प्रागग्राणि च बर्हींꣳष्यवस्तृणाति रक्षोहणो वलगहनो ऽवस्तृणामि वैष्णवानित्येष्वेवैतच्छिद्रेषु लोमानि दधाति तानीमान्येषु छिद्रेषु लोमानि हितानि तस्माद्विमे प्राणा अनुच्छोषुका अथ प्रागग्राणि बर्हींꣳषि प्रस्तृणाति केशा ह्येवास्येते ॥१७॥

22-24 अथाधिषवणे उपदधाति रक्षोहणौ वलगहना उपदधामि वैष्णवी इति हनू ह्येवास्येते तस्मादेते संबद्धान्ते इव भवतः संबद्धान्ते इव ह्येमे हनू ॥१८॥

अथ पर्यूहति रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी इति दल्हे असतो नेदपस्रꣳसैते इत्यथ वैष्णवमसीति रोहितं चर्म परिकृत्तं न्यस्यति जिह्वा ह्येवास्यैषा स यद्रोहितं भवति लोहिनीव ह्येयं जिह्वाथ संमुखान्ग्राव्णः करोति दन्ता ह्येवास्य ग्रावाणः स यद्ग्रावभिरभिषुणोति यथा दद्भिः प्सायादेवं तत्तदेतद्यज्ञस्य शिरः

समस्कारिषुः ॥१९॥ चतुर्थं ब्राह्मणम् ॥ पञ्चमोऽध्यायः ॥

1 °थेमं । अथेमथेमं B C. 2 Thus emended, °त्तावान्वांतो B C W, °त्तावान्वातो My. 3 Thus MSS. Read परो ऽक्षणया ? 4 °श्राशासते B W. 5 भद्रमेति B W. 6 कल्याणी C. 7 भवतः MSS. 8 परिकृत्तं B W.

K. IV. 6. 1 M. III. 6. 1

उदरꣳ ह वा अस्य सदस्तस्मात्सदसि भक्षयन्ति तस्माद्यत्किं चेदमश्नन्ति 1
तदुदरे प्रतितिष्ठत्यैन्द्रं देवतयाथ यदस्मिन्विश्वे देवा असीदꣳस्तस्मात्सदो नाम त
उ एवास्मिन्नप्येत एतर्हि ब्राह्मणा विश्वगोत्राः सीदन्ति ॥१॥

तदौदुम्बर्या[1] मिनोत्यन्नं वा ऊर्गुदुम्बरो ऽन्नमेवैतदूर्जं मध्यतो यज्ञस्य 2
दधाति तस्मादौदुम्बर्या[2] मिनोति तां यजमानसंमितां परिवासयति यजमानो हि
यज्ञो यज्ञसंमितामेवैनामेतत्परिवासयति ॥२॥

स यो ऽसौ जघनार्धे शङ्कुर्भवति ततः प्राङ् प्रक्रामति षड्विक्रमान्दक्षिणा 3
सप्तमꣳ संपदः कामाय यत्र वै वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै शाक्करी
परार्ध्या छन्दसां तस्मादेतानि सप्त पदानि प्रक्रामति ॥३॥

सो ऽश्निमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ता- 4
भ्याम्। आददे नार्यसीत्युक्तो यजुषो बन्धुरथ यदाह नार्यसीति योषा ह्यग्निर्योषा
हि नारी तस्मादाह नार्यसीति ॥४॥

तयावटं परिलिखतीदमहꣳ रक्षसो ग्रीवा अपिकृन्तामीति वज्रो वा 5
अग्निर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति ॥५॥

अथ प्राञ्चमुत्करमुत्किरति तत्प्राचीमौदुम्बरीं निदधात्यथ बर्हीꣳषि याव- 6
न्मात्राणीवाथ यवमतीः प्रोक्षणीः कुरुते ॥६॥

स यद्यवमत्यो भवन्त्यपां वा ओषधयो रसस्तस्मादाप आसक्तयः पीता 7
न[3] धिन्वन्त्योषधीनामु वा आपो रसस्तस्मादोषधय आसक्तयः खादिता न[3] धिन्व-
न्ति यदैवोभयैः सꣳसृजन्त्यथैव धिन्वन्ति तत्सरसाभिः प्रोक्षणीति स यद्यवैरेवै-
तत्करोति ॥७॥

8.9 देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त ततो ह सर्वाँ अन्याँ ओषधयो यवेभ्यो ऽसुरानुपावर्तुर्यवा ह्वै देवानामासुस्ते देवा यवैरेवासुराणाꣳ सपत्नानामोषधीरन्नाद्यमयुवत तान्त्सर्वस्मादयुवत तस्माद्यवा नाम यदेभिरयुवत ॥८॥

10 ते ह देवा ऊचुर्हन्त यदन्यासामोषधीनां वीर्यमिति तद्यवेषु दधामेति तद्यदन्यासामोषधीनां वीर्यमासीत्तद्यवेष्वदधुस्तस्माद्यत्रान्या ओषधयो म्लायन्ति तदेते मोदमाना इव वर्धन्त एतेषु हि वीर्यमदधुस्तथो वा एष एतद्यवैरेव द्विषतः सपत्नस्यौषधीरन्नाद्यं युते तान्त्सर्वस्माद्युते तस्माद्यवमत्यो भवन्ति ॥९॥

11 स आवपति यवो ऽसि यवयास्मद्द्वेषाँ यवयारातीरित्येतस्यैषा यजुषो बन्धुताथ प्रोक्षति स समान एव प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति यत्किं च प्रोक्षति ॥१०॥

12 स प्रोक्षति दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेत्यन्नं वा ऊर्गुदुम्बर इमानेवैतल्लोकानूर्जाँ रसेन भाजयत्येष्वेव लोकेषूर्जꣳ रसं दधाति ॥११॥

13 अथ याः परिशिष्टाः प्रोक्षण्यो भवन्ति ता अवटे ऽवनयति शुन्धन्तां लोकाः पितृषदना इति पितृदेवत्य इव वा अवटो मेध्यमेवैनमेतत्करोत्यपितृदेवत्यम् ॥१२॥

14 अथोदगग्राणि च प्रागग्राणि च बर्हीꣳष्यवस्तृणाति पितृषदनमसीति पितृदेवत्यमिव वा अस्या एतद्भवति यन्निखातꣳ सा यथौषधिष्वेव मिता स्यादनिखातैवमेतदोषधिष्वेव मिता भवत्ययतो वै स्याद्यदनिखाता स्यात्तथाह यता भवति तथो अपितृदेवत्या भवति ॥१३॥

15 अथोच्छ्रयत्युद्दिवꣳ स्तभानान्तरिक्षं पृण दृꣳहस्व पृथिव्यामितीमानेवैतल्लोकानूर्जाँ रसेन भाजयत्येष्वेव लोकेषूर्जꣳ रसं दधाति ॥१४॥

16 अथाभ्यवहरति द्युतानस्त्वा मारुतो मिनोत्वित्ययं वाव द्युतानो मारुतो यो ऽयं पवते तदेनामेष मिनोति मित्रावरुणौ ध्रुवेण धर्मणेति प्राणोदानौ वै मित्रावरुणौ तदेनां प्राणोदानाभ्यामेव मिनोति ॥१५॥

17 अथ पर्यूहति ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामीति बह्वी वा आशीर्यजुःषु तेँ अस्माँ एते आशिषावाशास्ते यद्ब्रह्म च क्षत्रं च रायस्पोषवनि

पर्यूहामीति भूमा[17] वै रायस्पोषो भूमानमेवास्मा एतदाशास्ते ॥१६॥

अथ पर्यृषति ब्रह्म ह꣣ क्षत्रं ह꣣ायुर्ह꣣ प्रजां ह꣣हेत्याशिषमेवैतदा- 18
शास्ते तत्समंभूमि पर्यृषण꣣[21] स्यात्तथागर्तमिद्भवति[22] गर्तस्य वा उपरिभूमि[23] पर्यृ-
षणं[24] भवत्यथैवं देवत्रा तस्मात्समंभूमि पर्यृषण꣣ स्यात् ॥१७॥

अथ तत्राप उपनिनयति यदेवास्याः खनन्तो वा पर्यृषन्तो वा वि वा 19
लिशन्ति क्षिण्वन्ति वापो[25] वै भेषज꣣ शान्तिस्तदद्भिः शान्त्या शमयति तदद्भिः
संदधाति ॥१८॥

अथाभिमृशति ध्रुवासीति ध्रुवा ह्येषा ध्रुवो ऽस्मिन्यजमान आयतने 20
भूयादिति यस्मिन्वा[26] काम[27] कामयेत स हास्मै कामः समृध्यते ॥१९॥

अथ विष्टपे ऽभिजुहोति घृतेन द्यावापृथिवी पूर्येथामितीमे एवैतद्द्यावापृथि- 21
व्या[28] ऊर्जा रसेन भाजयत्यनयोरेव द्यावापृथिव्योरूर्ज꣣ रस꣣ दधाति तत्संततमवन-
येत्तथा संततवर्ष्यनुच्छोषुकः[29] पर्जन्यो भवति तस्मात्संततमवनयेत् ॥२०॥

अथ छदिराहरन्ति तदभिमृशतीन्द्रस्य छदिरसीत्यैन्द्र꣣ हि सदो विश्व- 22
जनस्य छायेति वैश्वदेव꣣ हि सदः[30] ॥२१॥

अथाभितश्छदिषी उपदधाति छदिःसंमिते वा भित्त्या उत्तराणि त्रीणि
पराणि त्रीणि तन्नव तत्त्रिवृत्त्रिवृद्धि यज्ञः ॥२२॥

तद्वा एतदुदग्व꣣श꣣ मिनोत्येतद्वै[31] निष्केवल्यं देवानां यद्धविर्धानं तस्मात्त- 23
त्प्राग्व꣣श꣣ सत्प्राग्द्वारं तस्मात्तत्र नाश्नन्ति न भक्षयन्ति यो ह तत्राश्नीयाद्वा
भक्षयेद्वा शिरो हास्य विपतेदथैतन्मिश्र[32] यदाग्नीध्रं च सदश्च तस्मात्तत्राश्नन्ति
त्वद्धक्षयन्ति त्वन्मिश्र꣣ ह्येतत्स यदहोदग्व꣣श꣣ तदस्य मानुषं यदुदग्व꣣श꣣
सत्प्राग्द्वारं तदस्य देवत्रा तस्मादेतदुदग्व꣣श꣣ मिनोति ॥२३॥

अथ परिवृणोति परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु 24
वृद्धयो जुष्टा भवन्तु जुष्टय इतीन्द्रो वै गिर्वा विशो गिर्वाणः[33] क्षत्रमेवैतद्विशा[34]
परिवृणोति तदिदं क्षत्रं विशा परिवृतम् ॥२४॥

अथ लस्पूजनीमादाय निषीद्यतीन्द्रस्य ध्रुवो ऽसीति 25
ग्रन्थिं करोति दृढ्हमसन्नेद्यवपद्याता इति तत्प्रकृते कर्मणि विस्र꣣सयति तथा
यजमानं वाध्वर्युं वा नाग्राहो[35] विन्दति तत्संमितमभिमृशत्यैन्द्रमसीत्यैन्द्र꣣ हि
सदः[36] ॥२५॥

26 अथ हविर्धानयोरपालम्बꣳ[२६] समन्वीक्ष्य तदाग्नीध्रं मिनोत्यर्धमन्तर्वेद्यर्धं बहिर्वेद्यथो यावन्मात्रमिवैव बहिर्वेद्यथ सर्वमेवान्तर्वेद्यथो सर्वमेवान्तर्वेदि तत्संमितमभिमृशति वैश्वदेवमसीतीदं नु यदेतस्मिन्हविष्येतासु वसतीवरीष्वेताꣳ रात्रिं देवा उपवसन्ति यैषोपवसथ्या[२७] तस्मान्वेव वैश्वदेवम् ॥२६॥

27-29 देवा उ ह वै यज्ञं तन्वाना असुरराक्षसानां दक्षिणत आसङ्गाद्भियां चक्रुस्तान्हासुरराक्षसानि दक्षिणत आसेदुस्तान्ह सदसो जिग्युस्तान्त्सदसो जित्वैतान्धिष्ण्यानुद्वापयां चक्रुस्तस्मादेते न ज्वलन्ति यथा ह वा आहवनीयो वा गार्हपत्यो वाग्नीध्रो वा ज्वलेदेवꣳ ह स्म वा एते पुरा ज्वलन्ति त[२८] आग्नीध्रꣳ समनुपेदुस्ते[२९] ह्याग्नीध्रस्यार्धं जिग्युस्ते ऽर्धादेतद्विश्वे[३०] देवा अमृतत्वमपाजयꣳस्ते ऽपजित्वैतान्धिष्ण्यान्पुनः प्रतिसमैन्धत स[३१] यथा[३२] पुनः प्रत्यवस्येदेवमेतत्तस्मादप्येतर्ह्येतान्त्सवनाय सवनाय समिन्धत एवꣳ ह्येनान्देवाः समैन्धत तदेतदनार्तं यदाग्नीध्रं तस्माद्यो दीक्षितानामबल्यं निगच्छेदाग्नीध्रमेनं नयतेति ब्रूयुस्तदनार्तं तन्नारिष्यतीति न ह्यैवर्च्छति[३३] तस्माद्य एव समृद्धः स एताꣳ होत्रां कुर्याद्यो वै ज्ञातो ऽनूचानः स समृद्धस्तस्मै प्रथमाय दक्षिणां नयामीति[३३] स यदतो विश्वे देवा अमृतत्वमपाजयꣳस्तस्माद्वैश्वदेवं तस्माद्वैतत्संमितमभिमृशति वैश्वदेवमसीति ॥२७॥ प्रथमं ब्राह्मणम् ॥

1 उदर B W. 2 Thus MSS. Read तदौदुम्बरीं, तस्मादौदुम्बरीं ? 3 नि MSS. 4 सर्वान्या MSS. 5 यवया° MSS. 6 बंधुताथ MSS. 7 °वैतंलोका° MSS. 8 पृथि° B W. 9 ते अस्मा B W. 10 भूमो B W. 11 पर्यूषणꣳ C. 12 °ऋवति MSS. 13 उपरि° MSS. 14 पर्यूषणं C. 15 वापो B W. 16 Thus MSS.! 17 °पृथिवी MSS. 18 Thus emended, संततवर्ष्यन्क्षोषुकः B W, संततवर्षनूक्षोषुकः C, संततवर्ष्यनूक्षोषुकः My, cp. IV. 5. 4. 17. 19 सदः MSS. 20 मिनो° B W. 21 °थैतंमिश्रं B W C. 22 Thus MSS. Read गिरः ? 23 क्षत्रमेवैतद्विशा C, क्षत्रमेवैतद्विशा B W. 24 Thus MSS., cp. IV.

5. 3. 23. 25 सदः MSS. 26 °ोरपालंबꣳ B W. 27 Thus accented MSS. Read °सथ्था ? (cp. III. 2. 7. 4). 28 ता MSS. 29 समनपेदुस्ते B W, समनुपेदुस्ते C, समनयेदुस्ते My. 30 Thus emended, द्धानेतद्विश्वे B W, द्धानेतद्विश्वे C, र्धानेतद्विश्वे My. 31 सयथा B W. 32 Thus hesitatingly emended, हैवत्स्यंति MSS. 33 Thus MSS.

K. IV. 6. 2 M. III. 6. 2

विजामानो ह वा अस्य धिष्ण्या इमे वै समङ्क्ता विजामान एते हैवास्यैत 1-3
आत्मनोऽथ दिवि ह वै सोम आसाथेह देवास्ते देवा ऐच्छन्ना नः सोमो गच्छेदिति तेनागतेनेह यजेमहीति तत एते मायेऽसृजन्त सुपर्णी च कद्रूं च वाग्वै सुपर्ण्यंयं कद्रूस्ताभ्याꣳ ह समदं चक्रुस्ते ह समद्विक्ते क्रतीयमाने[1] ऊचतुर्यतरा नौ दवीयः परापश्यादिति सा नावात्मानं जयादिति ॥१॥

सा होवाच कद्रूः सुपर्णी परापश्येति सा होवाच सुपर्ण्यस्य सलिलस्य 4.5
परस्तादित्यश्वः श्वेतः स्थाणौ सेवते तमहं पश्यामीत्यथ होवाच कद्रूस्तस्याश्वस्य वालो न्यषङ्क्षीति[2] तममुं वात आधूनोति तमहं पश्यामीति सा यदुवाचास्य सलिलस्य परस्तादिति वेदिꣳ हैव तदुवाच यावती हि वेदिस्तावती पृथिव्यश्वः श्वेतः स्थाणौ सेवत इति यूप स्थाणुरग्निरश्वः श्वेतस्तद्ध तदुवाच तस्याश्वस्य वालो न्यषङ्क्षीति[2] तममुं वात आधूनोति तमहं पश्यामीति यत्कद्रूरुवाच रशनाꣳ हैव तदुवाच ॥२॥

सा होवाच सुपर्णी कद्रूं त्वं वै किल नावजैषीरिति[3] प्रेहि गमिष्यावः 6.7
प्रेहि वेदिष्याव इति सा होवाच त्वमेव गच्छेति त्वमेव न आख्यास्यसीति तथेति सा ह जगामेद्यथैव कद्रूरुवाच तथा[4] सा ह पुनराजगाम ताꣳ हाभ्युवाद त्वमजैषी३-रहा३मिति[5] सा होवाच त्वमेवेति ते यत्तत्र ते समूदाते तदिदꣳ सौपर्णीकाद्रवमित्याख्यानमाख्यायते[6] ॥३॥

सा होवाच कद्रूः सुपर्णीमात्मानं वै त्वाजैषमिति[7] सो ऽसौ दिवि सोम 8.9
इति होवाच तं देवेभ्य आहर तेनात्मानं मृत्योर्निष्क्रीणीष्वेति तथेति सा ह छन्दाꣳसि

ससृजे वाग्वै सुपर्णी वाचो वै छन्दाꣳसि प्रजातानि तत एभ्यो[4] गायत्री सोममच्छापतत्स हैष सोमो हिरण्मय्योर्हे[5] कुश्योरवहित आस ते ह स्म क्षुरपवी निमेषं निमेषꣳ ह स्माभिसंधत्तो दीक्षातपसी[6] हैव ते आसतुः ॥४॥

10-12 तमु हैते गन्धर्वा गोपायां चक्रुर्य एते धिष्ण्या या एता होत्राः सो हेयं गायत्री तयोः कुश्योरन्यतरामाच्छिद्य तामाजहार[7] सा दीक्षा तया देवा अदीक्षन्ताथापरमुत्पपात सेतरां कुशीमाच्छिद्य तामाजहार तत्तपस्तेन देवास्तप उपायन्नेता उपसदो[8] ऽथापरमुत्पपात सा राजानं खदिरेणाच्छाद तस्मात्खदिरो नाम यदेनेनाखिदत्तस्मात्खादिरो[9] यूपो भवति खादिरः[10] स्फ्यो ऽच्छावाकस्य हैनं गोपीथ आदद्दे सो ऽहीयत ॥५॥

13-16 तमिन्द्राग्नी अनुसमतनुतां प्रजानां प्रजातये तस्मादेष ऐन्द्राग्नो ऽच्छावाकस्तस्मादु दीक्षिता राजानꣳ सुगुप्तं गोपायेयुर्यस्य ह गोपनायामपहरन्ति हीयते ह स तस्मादाचार्यं ब्रह्मचारिणः सुगुप्तं गोपायेयुर्यद्वा अस्य गृहान्पशून्गोपायन्ति तदाचार्यं गोपायन्ति यस्य ह गोपनायामपहरन्ति हीयते ह स तमाजहार तꣳ सुपर्णी देवेभ्यः प्रददौ तेनात्मानं मृत्योर्निरधिक्रिये तस्मादाहुः पुण्यलोक ईजान इत्यृणꣳ ह वै जायमान एव मनुष्यो मृत्यवे जायते स यद्यजते तदात्मानं मृत्योर्निष्क्रीणीते तस्मादाहुः पुण्यलोक ईजान इति ॥६॥

17.18 तमु हैते गन्धर्वा अन्वाजग्मुर्य एते धिष्ण्या या एता होत्रास्ते होचुरैव[11] नो यज्ञे भजतेत्यप्येव नो यज्ञे[12] ऽस्त्विति ते होचुः किमस्माकं ततः स्यादिति ते होचुर्गोसार एव वः स्यामेति यथैवैनममुत्राजूगुपामेत्येवमेवैनं[13] युष्मभ्यमिह गोप्स्याम इति ॥७॥

19 तथेति होचुरेते वः सोमक्रयणा इति तस्मात्सोमक्रयणानेतेभ्यो ऽनुदिशति स्वान भ्राजाङ्गारे बम्भारे हस्त सुहस्त कृशानो । एते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्नित्येतेषाꣳ ह्येते भाजनेनैतानि ह्येतेषां नामानि ॥८॥

अथेति होचुरपहृतो वै युष्मत्सोमपीथ इति ते[14] न[15] सोमाहुतिमर्हथ[16] तृतीयसवन एव वो घृत्याहुतिरश्नवातै[17] न सौम्यापहृतो हि युष्मत्सोमपीथ इति स यदद[18] शालाकैर्धिष्ण्यान्व्याधारयति यदेनाꣳस्तृतीयसवने घृत्याहुतिरश्नुते[19] न सौम्यापहृतो ह्येतेभ्यः सोमपीथः ॥९॥

अथ यदाहवनीये होष्यन्तीति तद्वो ऽविष्यतीति[23] तद्धैनानवति यदाहव- 20
नीये जुह्वत्यथ यद्व उपर्युपरि सोमं बिभ्रतः संचरिष्यन्तीति तद्वो ऽविष्यतीति तद्धैनानवति यदेनानुपर्युपरि सोमं बिभ्रतः संचरन्ति तस्मादेतान्प्रत्यङ्ङध्वर्युर्नाति-क्रामेदध्वर्युर्वै सोमं बिभर्ति तꣳ हैते व्याक्तेन प्रत्यासते स यद्ध प्रत्यङ्ङतिक्रामेद्व्याक्तꣳ हैषामापद्येत तꣳ हाग्निर्वाभिदहेदर्यं[24] वा देवो ऽभिमन्येत यो ऽयं पशूनामीष्टे तस्मा-द्यद्यस्य शालायामर्थः[25] स्यादग्नेरेवाग्नीध्रमेतेन संचरेदेषा हि यज्ञस्य द्वाः ॥१०॥

ते वा एते[26] गुप्तये[26] परि निकीर्यन्त आहवनीयः पुरस्तान्मार्जालीयो दक्षि- 21
णत आग्नीध्रीय उत्तरतो ऽथ य इमे सदसि ते पश्चादथैतं मध्ये गोपायन्ति ॥११॥

त उ हैत एव दध्रिरे ऽर्धान्न उपकिरन्त्वर्धाननुदिशन्त्विति तथामुष्माल्लो- 22.23
कान्न जिह्मा एष्यामो यत आगता दिवः स्म[27] इति[27] तद्यानह न उपकरिष्यन्तीति तैरिह प्रत्यक्षं भविष्यामो ऽथ यान्नो ऽनुदेक्ष्यन्तीति[28] तैर्वमुष्माल्लोकान्न जिह्मा एष्यामो यत आगता दिवः स्म[27] इति[27] तद्यानहोपकिरन्ति तैरिह प्रत्यक्षमथ याननुदिशन्ति तैर्वमुष्माल्लोकान्न जिह्मा यन्ति यत आगता दिवस्तस्मादर्धानुपकिरन्त्यर्धाननु-दिशन्ति ॥१२॥

त उ हैत एव दध्रिरे न वा एभिर्नामभिरारात्स्मेति येषां नः सोममुपाहार्षु- 24
र्द्वितीयानि नामानि करवामहा[29] इति ते द्वितीयानि नामान्यकुर्वत यथैतद्बिभूरसि प्रवाहण इति सर्वे द्विनामानस्ते[30] ऽराध्नुवन्यानपहृतसोमपीथान्त्सत[31] एतद्देवा यज्ञ आभजꣳस्तस्माद्ब्राह्मणेनानृध्यमाने द्वितीयं नाम कर्तव्यꣳ राध्नोति हैव स य एवं विद्वान्द्वितीयं नाम कुरुते ॥१३॥

स यदाहवनीये जुह्वति तद्देवेषु जुह्वति तस्माद्देवाः सन्ति यत्सदसि भक्ष- 25.26
यन्ति तन्मनुष्येषु जुह्वति तस्मान्मनुष्याः सन्त्यथ यन्नाराशꣳसान्त्सादयन्ति हविर्धा-नयोस्तत्पितृषु जुह्वति तस्मात्पितरः सन्ति मनुष्याननु पशवो देवाननु वयाꣳस्यो-षधयो वनस्पतयो यदिदं किं चान्यदेवम्विमाः प्रजा यज्ञ आभजति या इमा अपरा-भूताः सैषा संपाहवनीये देवाः सदसि मनुष्या हविर्धानयोः पितरस्तद्ध स्मैतत्पुरा दृश्यमाना एव संपिबन्ति तद्वेतर्ह्यदृश्यमानाः सो एवैषा संपा या सा तर्ह्यास[32] ॥१४॥
द्वितीयं ब्राह्मणम् ॥

1 ऋतीयमाने C. 2 न्त्यषंजीति C. 3 °जैषीदिति
MSS. Are the words त्वं वै किल नावजैषीरिति an

interpolation ? 4 Thus MSS. Read तथास ? 5 Thus accented MSS.; त्वमजैषी° the Mādhy. 6 Thus C My, सौपर्णका° B W. 7 °षमिति MSS. 8 एभ्यो B W. 9 ह is superfluous ! 10 Thus emended, °तपसोः B, °तपसो C W My. 11 तामाजहार B W. 12 उपसदो B W. 13 °त्खदिरो B W. 14 °र B W. 15 होचुरैव MSS. 16 यज्ञो B W. 17 °त्राजगूपा° B W, °त्राजुगुपा° C My. 18 तेन MSS. 19 सोमाहुतिर्मथा C. 20 °श्नुवाते B C W. 21 Viz. V. 4. 4. 4. 22 °तिरश्नुते B W. 23 विहतीति B. 24 Thus accented MSS. Read °र्वाभिदहे° ? 25 °मर्थं B W My, °मर्थाः C. 26 एते गुप्तये B W. 27 Thus emended, स्महीति MSS. 28 नोदेष्यंतीति MSS. 29 करवामहा MSS. (as if, like the Mādhyandina rec., हन्त preceded). 30 °नामानस्ते MSS. 31 °सत MSS. 32 तर्ह्यासः B W C My.

M. III. 6. 3 K. IV. 6. 3

1 स वै वैसर्जिनानि जुहोति स यद्वैसर्जिनानि जुहोति सर्वꣳ ह वाव दीक्षमाणो ऽभि दीक्षते यज्ञꣳ ह्यभि दीक्षते यज्ञꣳ हि संभरति यज्ञꣳ ह्येवेदमनु सर्वं तं यज्ञꣳ संभ्रियमाणमिदꣳ सर्वमनुसमैति यदिदं किं च स वा अयं यज्ञः[1] संतिष्ठमानः[2] पराङेव संतिष्ठते स यद्वैतानि न जुहुयात्परारुग्धैवेद꣡ꣳ सर्वꣳ स्यात् ॥१॥

2.3 स यद्वैसर्जिनानि जुहोति यावानेव यज्ञो यावत्यस्य मात्रा तावन्तं[3] यज्ञꣳ संभृत्याथेदं यथायतनं यथाप्रतिष्ठं विसृजति स यद्विसृजति तस्माद्वैसर्जिनानि नाम तदपिव्रता[4] अन्वारभन्त[5] इदं प्रत्यक्षं विसृजत इति वदन्तस्तदु यदि कामयेतान्वारभेत यद्यु कामयेतापि नैवाद्रियेत स्वयꣳ ह्येव तद्विसृजते यदपि परोक्षाद्यज्ञ[6] उ वै विष्णुः स इमां देवेभ्यो विक्रान्तिं विचक्रम इमामेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्विं तृतीयेन तासु वा एष एतस्मै यज्ञो विष्णुर्विक्रान्तिं विक्रमते ॥२॥

अथ खल्वभ्यादधातीध्मं चात्वालादुपयमनीरुपकल्पयत्युपस्थे यजमानो राजानमादत्त ऽनूदेति पत्नी स ꣳसादयन्ति वायव्यानि द्रोणकलशꣳ[1] ग्राव्णो दशापवित्रेꣳ[2] यदेतमभितो भवति तदधिश्रयत्याज्यꣳ संमृजन्ति स्रुच उद्गास्याज्यमुत्पूय चतुर्जुह्वां गृह्णाति चतुरुपभृति पञ्चगृहीतं पृषदाज्यम् ॥३॥ 4a.6b

स गृह्णाति पृषदाज्यं ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समिदिति विश्वरूपा हि पशवः पशवो हि पृषदाज्यं तस्मादाह विश्वरूपमित्यथ सोमक्रयण्याः पदं जघनेन गार्हपत्यं परि णिवपति पदा वै प्रतितिष्ठति प्रतिष्ठितयꣳ एव ॥४॥ 6c.4b

तद्धैके चतुर्धा कुर्वन्ति यत्राद आहवनीयं प्रणयन्ति तासूपयमनीषु चतुर्भागमावपन्त्यक्षं चतुर्भागेणोपाञ्जतेꣳ[3] तासूपयमनीषु चतुर्भागं जघनेन गार्हपत्यं चतुर्भागं चतुष्पदाꣳ[4] वै पशव इति तच्चतुर्धा प्रतितिष्ठतीति वदन्तस्तदु तथा न कुर्याज्जघनेनैव गार्हपत्यꣳ सार्धमेव परि णिवपेत्पदा वै प्रतितिष्ठति प्रतिष्ठितयꣳ एव तस्मात्सार्धमेव परि णिवपेत् ॥५॥ 5.6a

अथ प्रदीप्त इध्मे जुहोत्यन्वारब्धेषु त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्यो ऽन्यकृतेभ्यः । उरु यन्तासि वरूथꣳ स्वाहेत्येतयास्मिल्लोके प्रतितिष्ठत्येतयेमंꣳ[5] लोकꣳ स्पृणुते ॥६॥ 6c.7

अथासवे द्वितीयामाहुतिं जुहोत्येष उ ह्येवैतत्सोम उवाचाप्तुं मा कृत्वातिनयतानुपलभ्यमितिꣳ[6] कनीयाꣳसं वधात्कृत्वेति स्तोकोꣳ[7] वा अप्तुस्तदेनमप्तुं करोत्यनुपलभ्यं कनीयाꣳसं वधात्तस्मादासवे द्वितीयामाहुतिं जुहोति जुषाणो अप्तुराज्यस्य वेतु स्वाहेत्यथोद्यच्छन्तीध्ममुपयच्छन्त्युपयमनीः समाददते यदेतमभितो भवति ॥७॥ 8.9a

अथाह सोमाय प्रणीयमानायानुब्रूहीत्यग्नये प्रह्रियमाणायेति वा सोमायेति त्वेव ब्रूयात्स एष यज्ञ ऊर्ध्व एत्येतत्स्वर्गं लोकं यजमानो वै यज्ञो यजमान एवैतदेत्यन्वाह होता वाचयत्यध्वर्युरग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेमेत्यग्निमेवास्यैतत्पुरस्तात्पुरोगां करोति तथो हास्याग्निरेव पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्प्रभिन्दन्नेत्यथैतमभये ऽनाष्ट्रे निवाते हरति ॥८॥ 9b,10c.11

अथाग्नीध्रे समाधाय जुहोत्ययं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजाञ्जयतु वाजसाता अयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहेत्येतयास्मिन्नन्त- 12.13

रिक्षलोके[17] प्रतितिष्ठत्येतयैतं लोकꣳ स्पृणुते तत्सꣳसादयन्ति वायव्यानि द्रोणकलशं ग्राव्णो दशापवित्रे[18] ॥९॥

14.15 अथाहवनीयमित्वा प्रोक्षणीरादायेध्ममेवाग्रे प्रोक्षत्यथ वेदिमथास्मै बर्हिः प्रयच्छन्ति तत्प्रोक्ष्योपनिनीयैतमाश्ववालं प्रस्तरं गृह्णात्येकवृदेव बर्हिः[19] स्तीर्त्वा परिधीन्परिधायैतान्कार्ष्मर्यमयान्त्समिधावभ्याधाय जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेत्येतयामुष्मिन्त्स्वर्गे लोके प्रतितिष्ठत्येतयैतꣳ स्वर्गं लोकꣳ स्पृणुते ॥१०॥

16 स यद्वैष्णव्या जुहोत्यप्तुं वा एनमिदं कृत्वात्यनैषीदनुपलभ्यं कनीयाꣳसं बंधात्कृत्वा तदेनमेतदभये ऽनाष्ट्रे स्वर्गे लोके कृत्स्नं करोति यावान्यज्ञो यावत्यस्य मात्रा तावन्तमेवैनमेतत्करोति ॥११॥

17 अथ खरे प्रस्तरमासादयति तज्जुहूमासादयत्यथोपभृतमथ पृषदाज्यमासाद्य[20] हवीꣳषि संभृत्याप उपस्पृश्य राजानमादाय प्रपद्यते स दक्षिणस्य हविर्धानस्य कृष्णाजिनं नील आस्तृणाति तस्मिन्राजानमासादयति ॥१२॥

18 स आह देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन्निति सविता वै देवानां प्रसविता तस्मा एवैतद्गुप्तये परिददाति सुगुप्तो ऽसदिति[21] ॥१३॥

19 अथानुसुज्य जपत्येतत्त्वं देव सोम देवो देवाꣳ[22] उपागाः। इदमहं मनुष्यान्त्सह रायस्पोषेणेत्याशिषमेवैतदाशास्ते यदाहेदमहं मनुष्यान्त्सह रायस्पोषेणेत्यग्नीषोमौ वा एतमन्तर्जम्भमादधाते यो दीक्षत आग्नावैष्णवꣳ ह्यदो दीक्षणीयꣳ हविर्भवति य उ वै विष्णुः सोमो वै स हविर्ह्येनयोर्भवति तस्मादेनमग्नीषोमावन्तर्जम्भमादधाते स एतत्सोमाग्निर्मुच्यते स एतस्मादनृणो भवति ॥१४॥

20 अथ निष्क्रामति स्वाहा निर्वरुणस्य पाशान्मुच्य इति वरुणपाश इव वा एषो ऽन्तर्भवति यो ऽन्यस्यास्ये तस्मादेवैतन्निर्मुच्यते[23] तस्मादाह स्वाहा निर्वरुणस्य पाशान्मुच्य इति[24] ॥१५॥

21a अथ समिधमभ्यादधात्यग्ने व्रतपास्त्वे व्रतपाः। या तव तनूर्मय्यभूदेषा सा त्वयि या मम तनूस्त्वय्यभूदियꣳ सा मयि। यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिरित्येतदग्नेर्निर्मुच्यत एतदेतस्मादनृणो भवति तदुभाभ्यामग्नीषोमाभ्यां निर्मुच्य स्वेन सतात्मना यजते ॥१६॥

21b अत्र ह खल्वस्याश्नीयान्मानुषो हि भवति न ह वै दीक्षितस्याश्नीयाद्धविर्वा

एष भवति यो दीक्षते स यथा हविषो ऽहुतस्याश्नीयादेवꣳ ह तत्तस्मादस्यात्राश्नीयान्मानुषो[22] हि भवति तस्मादस्य नामग्राहꣳ सुब्रह्मण्यामाह्वयन्त्यसौ यजते ऽमुष्य पुत्रो यजत इति मानुषो हि भवत्यथाङ्गुलीर्विसृजते ॥१७॥ तृतीयं ब्राह्मणम् ॥

1 यज्ञ: संति° MSS. 2 °परामृष्यैवेदꣳ B W. 3 तावंतं MSS. 4 तदपिव्रतान्वारभंत MSS. 5 परोक्षा° B W. 6 °कलशं B. 7 दशपवित्रे B W, दशपवित्रे C. 8 °य MSS. 9 °पांजंते B W C. 10 चतुष्पादा C. 11 °त्येतयैमं MSS. 12 कृत्वातिनयितानु° MSS. 13 स्तोको MSS. 14 °ऽंतरिक्षलोके B W. 15 दशा° MSS. 16 बर्हि B W. 17 पृषदाज्य° C. 18 सदिति MSS. 19 देवां २ B W. 20 °तंनिर्मु-च्यते B W. 21 इति MSS. 22 तत्तस्मादस्या-इनीया° C.

K. IV. 6. 4 M. III. 6. 4

स वै यूपं व्रक्ष्यन्नेतया वैष्णव्यर्चैतामाहुतिꣳ हुत्वाथ यूपमच्छैति स यद्वैष्णव्या जुहोति वैष्णवो हि यूपो यज्ञो वै विष्णुर्यज्ञेनो एवैतदच्छैति स यद्यह स्रुचा जुहोति चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यद्यु स्रुवेण स्रुवेणो एव ॥१॥ 1-3a

स जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेत्यथ यत्स्थाल्यां परिशिष्टं भवति तच्च स्रुवं[1] चादत्ते ऽथ यत्तक्ष्णः शस्त्रं[2] भवति तत्स आदत्ते ॥२॥ 3b.4

ते यां दिशं यूपं वेत्स्यन्तो भवन्ति तद्यन्ति स यत्र यूपं विन्दति तदेनं पश्चात्प्राङुपतिष्ठमानो जपत्यत्यन्यां[3] अगां नान्यां[3] उपागामित्यति[4] ह्येकानेति[5] येषु न विन्दति नो एकानुपैत्यर्वाक्त्वा परेभ्यः परो ऽवरेभ्य इत्यर्वाग्घ्येनं परेभ्यो यान्नाभ्याप्नोति पर उ वा एनमवरेभ्यो येषु न विन्दति तस्मादाहार्वाक्त्वा परेभ्यः परो ऽवरेभ्य इति तं त्वा जुषामहे देव वनस्पते देवयज्याया इति यथा बहूनाꣳ सार्धं तिष्ठतामेकꣳ साधुकृत्यायै जोषयेतैवमेनमेतज्जोषयते देवास्त्वा देवयज्यायै जुषन्तामिति तद्धि समृद्धं यदेनमपि देवा जोषयेरꣳस्तथा रातमना व्रश्चनाय भवति विष्णवे त्वेति वैष्णवो हि यूपः[6] ॥३॥ 5-9

10.11 अथ यत्र वृश्चन्भवति[6] तत्कुशतरुणकमभिनिदधात्योषधे त्रायस्वेति वज्रो वा एष यत्परशुस्तदेनमेतदोषधिभिरेवान्तर्दधाति[7] तथैनमेष वज्रो न हिनस्ति स्वधिते मैनꣳ हिꣳसीरिति प्रहरति वज्रो वा एष यत्परशुस्तथैनमेष वज्रो न हिनस्ति स यत्प्रथममपच्छिनत्ति तदादत्ते तमनक्षस्तस्मै वृश्चेदुत[8] ह्येनमनसा वक्ष्यन्तो भवन्त्युतो स्वर्गꣳ हास्य लोकं यतो ऽक्षस्तस्मः स्यात्तस्मादनक्षस्तस्मै वृश्चेत् ॥४॥

12 तं प्राञ्चं पिपातयिषेत्प्राची हि देवानां दिगथो उदञ्चमुदीची हि मनुष्याणां दिगथो प्रत्यञ्चमस्यास्त्वेवैनं दक्षिणाया दिशः[10] परिबिबाधिषेत ॥५॥

13.14 तं प्रच्यवमानमभिमन्त्रयते दिवं मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या संभवेति वज्रो वा एष भवति यं यूपायेति वृश्चन्ति वज्रो हि यूपस्तस्मात्प्रच्यवमानादिमे लोकाः सꣳरेजन्त एभ्य एवैनमेतल्लोकेभ्यः शमयतीमानेवैतल्लोकाञ्छमयति दिवं मा लेखीरिति दिवं मा हिꣳसीरित्येवैतदाहान्तरिक्षं मा हिꣳसीरित्यन्तरिक्षं मा हिꣳसीरित्येवैतदाह पृथिव्या संभवेति पृथिव्या संजानीष्वेत्येवैतदाहायꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगायेत्येष ह्येनं महते सौभगाय प्रणयति यं यज्ञाय प्रणयति तस्मादाह प्रणिनाय महते सौभगायेति[11] ॥६॥

15 अथाव्रश्चनमभिजुहोति वज्रो वा आज्यं नेदितो नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानिति तद्वज्रेणाज्येनाववाधते ऽथो रेतो वा[12] आज्यं वनस्पतिष्वेवैतद्रेतः सिञ्चति तेन रेतसा वनस्पतय आव्रश्चनात्प्रजायन्ते ॥७॥

16 सो ऽभिजुहोत्यतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेमेत्याशिषमेवैतदाशास्ते यदाह सहस्रवल्शा वि वयꣳ रुहेमेति[13] ॥८॥

17 अथैनं परिवासयति स यावन्तं वा एनमत्र परिवासयति तावानेव भवति ॥९॥

18 तं पञ्चारत्नि परिवासयेत्पाङ्क्तो वै यज्ञः पाङ्क्ताः पशवः पञ्चर्तवः संवत्सरस्य तस्मात्पञ्चारत्नि परिवासयेत् ॥१०॥

19 अथो षळरत्निꣳ षड्वा ऋतवः संवत्सरस्य तस्मात्षळरत्निम् ॥११॥

20 अथो[14] अष्टारत्निमष्टाक्षरा[15] वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धो वा एष वेदेस्तस्मादष्टारत्निम् ॥१२॥

22 अथो एकादशारत्निमेकादशाक्षरा वै त्रिष्टुब् वज्रो वै त्रिष्टुब् वज्रो वै यूपस्तस्मादेकादशारत्निम् ॥१३॥

अथो पञ्चदशारत्निं पञ्चदशो हि वज्रो वज्रो हि यूपस्तस्मात्पञ्चदशारत्निꣳ 25
सप्तदशारत्निर्वाजपेययूपो भवति ॥१४॥

तदु नाद्रियेतापरिमितेन वा एतेन देवा अपरिमितमजयꣳस्तथो वा एष 26.27
एतेनापरिमितेनैवापरिमितं जयति सो ऽष्टाश्रिर्भवत्यष्टाक्षरा वै गायत्री पूर्वार्धो वै
यज्ञस्य गायत्री पूर्वार्धो वा एष वेदेस्तस्मादष्टाश्रिर्भवति ॥१५॥ चतुर्थं ब्राह्मणम् ॥
षष्ठो ऽध्यायः ॥

1 स्रुवं C. 2 Thus accented MSS. 3 जपत्य° C. 4 °ति ह्येषानेति B W C (orig.) My, °ति ह्येकानेति C (sec. m.). 5 यूपः MSS. 6 वृश्च° MSS. Read व्रश्च°? 7 °वांतर्दधाति C. 8 वृश्चेदुत C. 9 वृश्चेत् C. 10 दिशः MSS. 11 °येति MSS. 12 वा omitted in B W. 13 °मेति MSS. 14 अथोष्टार° B W C (orig.).

K. IV. 7. 1 M. III. 7. 1

स वा अभ्रिमेवादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो 1
हस्ताभ्याम्। आददे नार्यसीत्युक्तो यजुषो बन्धुरथ यदाह नार्यसीति योषा ह्यभ्रिर्योषा हि नारी तस्मादाह नार्यसीति ॥१॥

तया यूपावटं परिलिखत्यर्धमन्तर्वेद्यर्धं बहिर्वेदीदमहꣳ रक्षसो ग्रीवा 2
अपिकृन्तामीति वज्रो वा अभ्रिर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति
तमुपरसंमितं[1] यूपावटं[2] खनति ॥२॥

अथ प्राञ्चमुत्करमुत्किरति तत्प्राञ्चं यूपं निदधात्यथ बर्हींꣳषि यावन्मात्राणीवाथ यूपशकलं चषालमथ[3] यवमतीः प्रोक्षणीः कुरुते सो ऽसावेव बन्धुर्यवमतीनामथ प्रोक्षति स समान एव प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति यत्किं च प्रोक्षति ॥३॥

स प्रोक्षति दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेति वज्रो वा एष यद्यूप एषां 5
लोकानामभिजितय एषां त्वा लोकानामभिजितये प्रोक्षामीत्येवैतदाह ॥४॥

अथ याः परिशिष्टाः प्रोक्षण्यो भवन्ति ता यूपावटे ऽवनयति शुन्धन्तां 6.7
लोकाः पितृषदना इति सो ऽसावेव बन्धुरथोदगग्राणि च प्रागग्राणि च बर्हींꣳ-

ष्यवस्तृणाति पितृषदनमसीत्यसावेव बन्धुः ॥५॥

8 अथ यूपशकलं प्रास्यत्येतद्ध वै तेजो वनस्पतीनां यद्ब्राह्याः[४] शकलास्तस्मादेतेष्वपच्छिन्नेषु[५] म्लायन्ति[६] तत्तेज एवास्मिन्नेतद्दधाति सतेजसमेनमिति तेजस्वन्तं मिनवानीति स यदेतदेवैतत्प्रास्यत्येताद्धि यजुष्कृतं मेध्यं भवति तस्मादेतदेवैतत्प्रास्यति ॥६॥

9 स प्रास्यत्यग्रेणीरसि स्वावेश उन्नेतृणामित्येतद्धयस्मादग्रे ऽपच्छिनत्ति तस्मादाहाग्रेणीरसीति स्वावेश उन्नेतृणामेतस्य वित्तादधि त्वा स्थास्यतीत्याधि ह्येनत्तिष्ठति ॥७॥

10a अथाज्याहुतिं जुहोति वज्रो वा आज्यं नेदितो नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानिति तद्वज्रेणाज्येनावबाधते ॥८॥

10b.11 अथ पुरस्तात्परीत्याह यूपायाज्यमानायानुब्रूहीति यूपमञ्जो ऽनुब्रूहीति वान्वाह होतानक्त्यध्वर्युर्देवस्त्वा सविता मध्वानक्त्विति सविता वै देवानां प्रसविता सर्वमु वा इदं मधु यजमानो वै यूपो ऽनेनैवैतत्सर्वेण यजमानꣳ सꣳस्पर्शयति तदस्मै सविता प्रसविता प्रसौति तस्मादाह देवस्त्वा सविता मध्वानक्त्विति[७] ॥९॥

12 अथोभयतश्चषालमक्त्वा प्रतिगूहति सुपिप्पलाभ्यस्त्वौषधीभ्य इति पिप्पलमेवास्मिन्नेतद्दधाति स यदेतत्सोपनितमिव भवति तस्मात्पिप्पलं च वृक्षं चान्तरेणोपनितमिव ॥१०॥

13 अथाग्निष्ठामनक्ति यजमानो वा अग्निष्ठा रस आज्यं यजमानमेवैतद्रसेनानक्ति स परिव्ययणवेलायाꣳ[८] समन्तं परिमृशति समन्तमेवास्मिन्नेतद्रसं[९] दधाति तमोपरादनक्ति ॥११॥

14 अथाहोच्छ्रीयमाणायानुब्रूहीत्यन्वाह[१०] होतोच्छ्रयत्यध्वर्युर्दिवमग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणाद्ꣳहीरिति वज्रो वा एष यद्यूपस्तदेनेनेमांल्लोकान्त्स्पृणुत एभ्यो लोकेभ्यो द्विषन्तं भ्रातृव्यं निर्भजति बहिर्धा करोति तस्मादेवमुच्छ्रयति ॥१२॥

15 अथाभ्यवहरति या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्राह[११] तदुरुगायस्य[१२] विष्णोः परमं पदमवभाति भूरीत्येतया त्रिष्टुभा वज्रो वै त्रिष्टुब्र वज्रो वै यूपस्तस्मात्त्रिष्टुभा मिनोति स यद्वैष्णव्या मिनोति वैष्णवो हि यूपः ॥१३॥

स संप्रत्यग्निमग्निष्टां करोति तथा यजमान आयतनान्न ह्वलति यद्वाग्निष्टा- 16
मग्नेर्ह्वलयेयुर्ह्वलेद्ध यजमान आयतनात्तस्मात्संप्रत्यग्निमग्निष्टां करोति ॥१४॥

अथ पर्यूहति ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामीत्यथ पर्यूषति ब्रह्म ह ऽइह क्षत्रं ह ऽइहायुर्ह ऽइह प्रजां ह ऽइहेति समंभूमि पर्यूषणं भवत्युदपात्रमुपनिन-यत्यसावेव बन्धुः ॥१५॥

अथ परिगृह्य जपति विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य 17
युज्यः सखेति वज्रं वा एतत्प्राहार्षीद्यद्यूपमुदशिश्रियदिमां विष्णोर्विजितिं पश्यतेमां[१२] जितिमित्येवैतदाहेन्द्रस्य युज्यः सखेतीन्द्रो यज्ञस्य देवता वैष्णवो वै यूपस्तथास्यैष सेन्द्रो भवति तस्मादाहेन्द्रस्य युज्यः सखेति[१३] ॥१६॥

अथ चषालमुदीक्षते तद्विष्णोः परमं पद ऽसदा पश्यन्ति सूरयः। दिवीव 18
चक्षुराततमिति वज्रं वा एतत्प्राहार्षीद्यद्यूपमुदशिश्रियदिमां विष्णोर्विजितिं पश्यतेमां[१४] जितिमित्येवैतदाह ॥१७॥

अथ परिव्ययत्यनग्नतायै वा एनं परिव्ययति तस्मान्नीविदग्ने[१५] परिव्यय- 19.20
त्यत्रैव हीदं वासो ऽथो अन्नाद्यमेवास्मिन्नेतद्दधात्यत्रैव वा इदमन्नं प्रतितिष्ठति तस्मान्नीविदग्ने[१६] परिव्ययति त्रिवृता परिव्ययति त्रिवृद्धयन्नं पशवो ह्यन्नं पिता माता यज्ञायते तत्तृतीयं तस्मात्त्रिवृता परिव्ययति ॥१८॥

स परिव्ययति परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं यजमान ऽ 21
रायो मनुष्याणामित्याशिषमेवैतदाशास्ते यदाह परीमं यजमान ऽ रायो मनुष्या-णामिति[१६] ॥१९॥

अथ दिवः सूनुरसीति यूपशकलमवगूहति प्रजा ह्येवास्यैषा तस्माद्यूपैका- 22.24.23
दशिन्यां यथायथमवगूहेत्तथा ह्यास्यानुव्रता[१७] अमुग्धाः[१७] प्रजाः प्रजायन्ते ऽथ यस्य यूपैकादशिन्यां मोहयन्त्यननुव्रता ह्यास्य मुग्धाः प्रजाः प्रजायन्ते ऽथ यत्स्वरुर्नाम स्व ऽ ह्यस्यैतदरुरेतस्माद्धयेतत्सर्वस्मादपतक्ष्णोति तस्मात्स्वरुर्नाम स्वर्गस्य वा एतल्लो-कस्य[१८] संक्रमणं यद्यूपशकलमिद ऽ हि रशना यूपशकलं चषालं तत ऊर्ध्वः स्वर्गं लोक ऽ समश्नुते ॥२०॥

तद्यन्निखातं तेन पितृलोकं जयत्यथ यदूर्ध्वं निखननाद्रशनायास्तेन 25
मनुष्यलोकमथ यदूर्ध्व ऽ रशनाया आ चषालात्तेन देवलोकमथ यदूर्ध्वं चषालाद् द्यङ्कुलं वा ऽयङ्कुलं वातिरिक्तं तेन साध्या इति देवास्तेषा ऽ सलोकतां जयति सलोको

ह साध्यैर्देवैर्भवति य एवमेतद्वेद ॥२१॥

26 तं वा एतं पुरस्तान्मिनोति वज्रो वै यूपो वज्रो वै दण्डः पूर्वार्धे वै दण्डस्याभिपद्य[15] प्रहरति तस्मात्पुरस्तान्मिनोति पुरस्ताद्वै मनोजवः पुरस्तात्प्रजा प्राची देवयज्या तस्मात्पुरस्तान्मिनोति ॥२२॥

27.28 देवा[16] उ वै[17] यज्ञेनेमां जितिं जित्वा येयमेषां जितिस्ते होचुर्हन्तेदं तथा करवामहा इति यथा न इदमनभ्यारुह्यं मनुष्यैरसदिति ते यज्ञस्य रसं निर्धीय यथा मधुकृतो निर्धयेयुरेवं विदुह्य यज्ञं यूपेन योपयित्वा तिरो बभूवुस्तद्यदेनेनायोपयꣳस्तस्माद्यूपो नाम सो ऽष्टाश्रिर्भवत्यष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धो वा एष वेदेस्तस्मादष्टाश्रिर्भवति ॥२३॥

29 तꣳ ह स्मैतं देवा यत्रैवादः परिधीननुप्रहरन्ति तद्ध स्मैवानुप्रहरन्ति तस्मादप्येतर्ह्येके तां वेलामनुप्रहरन्ति तथो वै रक्षाꣳस्यनूदपिपत ॥२४॥

30-32 ते होचुर्यूपशकलमेव जुहवामेति तदहैवैषो ऽनुप्रहृतो भविष्यति[18] तत्स्वगाकृत इति तथो रक्षाꣳसि नानूत्पास्यन्ते ऽयं वाव वज्र उद्यत इति ते यूपशकलमेवाजुहवुस्तदहैवैषो ऽनुप्रहृत आसीत्तत्स्वगाकृतस्तथो रक्षाꣳसि नानूदपिपतायं वाव वज्र उद्यत इति तस्माद्यूपशकलमेव जुहुयात्तदहैवैषो ऽनुप्रहृतो भवति[19] तत्स्वगाकृतस्तथो रक्षाꣳसि नानूत्पिपते ऽयं वाव वज्र उद्यत इति सो ऽनुयाजानिष्ट्वा जुहोति दिवं ते धूमो गच्छत्वन्तरिक्षं ज्योतिः पृथिवीं भस्मनापृण स्वाहेति ॥२५॥

प्रथमं ब्राह्मणम् ॥

1 तमुपर° MSS. 2 यूपावटं B C W. 3 चषाळमथ B W C. 4 यद्वाह्य C (orig.). 5 शकला° MSS. 6 म्ला° MSS. 7 °क्त्विति MSS. 8 परिव्ययणवेलायाꣳ B C W. 9 समंतमेवा° MSS. 10 अथाहोच्छ्रय° C. 11 अत्राहैत° MSS. 12 पश्येतेमां MSS. 13 °खेति MSS. 14 पश्येतेमां MSS. except C sec. m. (पश्यतेमां). 15 नीविद्भ्रे MSS. 16 °मिति MSS. 17 °व्रता अमु° B W, व्रतामु° C My. 18 एतंलो° MSS. 19 °भिपद्य B. 20 देवा उ ह वै My. 21 We expect an accented

verb. The Mādhyandina recension also has the verb without accent.

K. IV. 7. 2 M. III. 7. 2

स वा एतां यूपैकादशिनीं मिनोति स यदेतां यूपैकादशिनीं मिनोत्येतावती 1
ह वै पृथिवी यावती वेदिर्वज्रा[1] वै यूपाः स एतैर्वज्रैरिमां पृथिवीꣳ स्तृणुते ऽस्याः
सपत्नान्निर्भजति बहिर्धा करोति तस्माद्वा एतां यूपैकादशिनीं मिनोत्युपशयो द्वादशो
वितष्टो भवति तं दक्षिणे[2] वेद्यन्ते[3] निदधाति ॥१॥

देवा ह वै यज्ञं तन्वाना असुररक्षसानां दक्षिणत आसङ्गाद्भियां चक्रुर्यथो 2
वा इषुरायतावसृष्टा तया वै स्तृणुते वा न वा स्तृणुते यथोद्यतं[4] प्रहृतं[5] तेन वै स्तृ-
णुते वा न वा स्तृणुत एवं वा एते यूपा य उच्छ्रिता अथैष वज्र एव दक्षिणत उद्यतो
यथेषुरायतानवसृष्टा यथोद्यतमप्रहृतमेवमेष वज्रो दक्षिणत उद्यतो नाष्ट्राणाꣳ
रक्षसामपहृतये ॥२॥

तमभिमृशत्येष ते पृथिव्यां लोक आरण्यस्ते पशुरिति पशुश्च वै यूपश्च 3a
तमस्मा एतमारण्यं पशुमनुदिशति तेनैष पशुमान्भवति ॥३॥

तान्हैक उपवसथ एव सर्वानुच्छ्रयन्ति तत्तत्कर्मण एव प्रकुद्रतायै[6] क्षिप्रं 3b.4
यज्ञꣳ सꣳस्थापयामेत्येवाथो उपवसथे वै यूपस्योच्छ्रयणमिति वदन्तस्तदु तथा न
कुर्यान्न वै पुरा परिव्ययणाद्यूपमन्वर्जन्त्यपरिवीता उ वा एत एताꣳ रात्रिं वसन्ति
सा न्वेव परिचक्षाथो पशवे[7] वै यूपमुच्छ्रयन्ति न वा एतेषु तद्दहः पशुमालप्स्यमानो[8]
भवति[9] ये ऽन्ये ऽग्निष्ठाद्भवन्ति तस्मादग्निष्ठमेव तद्दहरुच्छ्रयेत्तꣳ हि परिव्ययति[10]
तस्मिन्पशुमालभते तस्मादग्निष्ठमेव तद्दहरुच्छ्रयेत् ॥४॥

तद्धैके य एवाग्निष्ठादुत्तरस्तमग्र उच्छ्रयन्त्यथ दक्षिणमथोत्तरं यथा दक्षि- 5-7
णार्ध्यमुत्तममुच्छ्रयेदेवं[11] तथा ह्युदीची भवतीति तदु तथा न कुर्याद्य एवाग्निष्ठाद्द-
क्षिणस्तमेवाग्र[12] उच्छ्रयेदथोत्तरमथ दक्षिणं यथोत्तरार्ध्यमुत्तममुच्छ्रयेदेवं[13] तथा
ह्युदीची भवतीति स यो वर्षिष्ठः स दक्षिणार्ध्यः स्यादथ ह्रसीयानथ ह्रसीयान्यथो-
त्तरार्ध्यो ह्रसिष्ठ एवं तथा ह्युदीची भवतीति[14] ॥५॥

अथैतं पत्नीयूपं त्रयोदशं पत्नीभ्य उच्छ्रयति सर्वत्वाय वा एतमुच्छ्रयति 8a
कृत्स्नतायै त्रयोदश वै मासाः संवत्सरस्य तस्मादेतं त्रयोदशमुच्छ्रयति ॥६॥

तत्त्वाष्ट्रं पशुमालभते त्वष्टा वै रेतः सिक्तं विकरोति तदेतद्रेतः सिक्तं 8b

तस्त्वष्टा विकरोति स मुष्करो भवति मुष्करो हि प्रजननयिता प्रजननꣳ हि त्वष्टा तस्मान्मुष्करो भवति तं पर्यग्निकृतमेवोत्सृजति न सꣳस्थापयति यद्धैनꣳ सꣳस्थापयेत्परिगृह्णीयात्प्रजननं तत्प्रजा एवैतदुत्सृजति ता इमा उत्सृष्टाः प्रजा अनुपस्थिताः प्रजायन्ते तस्मात्पर्यग्निकृतमेवोत्सृजति न सꣳस्थापयति ॥७॥ द्वितीयं ब्राह्मणम् ॥

1 वेदिर्वज्रो MSS. 2 No accent in the MSS. 3 वेद्यंते MSS. 4 Thus emended; यथोद्यद्यत्प्रहृतं C, यथोद्यद्यत्प्रहृतं B W My. 5 प्रकुद्रतायै C W, प्रकुद्रतायै B and My (without accent). 6 पशवे MSS. 7 Thus emended; °लिप्स्यमानो My, °लिप्समानो B W C. 8 भवति MSS. 9 परिव्यति B W. 10 °णार्धमु and °रार्धमु the MSS. 11 °दक्षिणतस्तमे° B. 12 °तीति MSS.

M. III. 7. 3 K. IV. 7. 3

1.2 पशुश्च वै यूपश्च तस्माद्यूप एव पशुमालभन्ते नर्ते यूपात्कदा चन स यद्यूप एव पशुमालभन्ते[1] नर्ते यूपान्न ह वा अग्रे पशवस्तस्मै चक्षमिरे[2] यदन्नमभविष्यन्यथेदमन्नं भूतास्ते होच्छ्रिता एव द्विपादश्चेरुर्यथायं पुरुष एवमुत न इत्थं चिन्नालभेरन्निति ततो ह देवा एतं वज्रं ददृशुर्यद्यूपं तमुच्छिश्रियुस्तस्माद्धीषा[3] प्राव्लीयन्त ततश्चतुष्पादोꣳ[4] ऽभवꣳस्ततो ऽन्नमभवन्यथेदमन्नं भूता एतस्मा उ ह्येते ऽतिष्ठन्त तस्माद्यूप एव पशुमालभन्ते नर्ते यूपात्कदा चन ॥१॥

3 अथ पशुमुपाकृत्याग्निं मन्थति स यत्पशुमुपाकृत्याग्निं[5] मन्थति[6] न ह वा अग्रे पशवस्तस्मै चक्षमिरे[7] यद्धविरभविष्यन्यथेदꣳ हविर्भूतास्तान्हातिष्ठमानान्देवा उपन्यूदुस्तानुपनिरुरुधुस्त उपनिरुद्धा नोपावेयुः ॥२॥

4-6 ते होचुर्देवा न वा इम इमं यामं विदुर्यो हविषो यामो या प्रतिष्ठेति तस्मान्नोपावयन्तीति होचुस्ते हन्ताग्निं मथित्वाग्नौ जुहवामेति[8] तथा वेदिष्यन्ति पशव एष वै किल हविषो याम इत्यग्नौ वै किल हविर्जुह्वत्येषा प्रतिष्ठेति त उपावैष्यन्ति ते रातमनस आलम्भाय भविष्यन्तीति त ऽग्निं मथित्वाग्नावजुह्वुस्ततो ऽविदुः पशव एष वै किल हविषो याम इत्यग्नौ वै किल हविर्जुह्वत्येषा प्रतिष्ठेति त उपावायꣳ-

स्ते रातमनस आलम्भायाभवꣳस्तथो वा एष एतदुपावैति स रातमना आलम्भाय भवति तस्मात्पशुमुपाकृत्याग्निं मन्थति ॥३॥

तद्वा आहुर्न पशुमुपाकुर्यान्नाग्निं मन्थेदिति परिह्वालमिव वा एतदिति 7
रशनामेवादायोपपरेत्यैनं[1] नियुञ्ज्यात्तदेवैनमञ्जसालभत इति वदन्तस्तदु तथा न कुर्याद्यथाधर्मेण[2] तिरश्चता कुर्यादेवꣳ ह तत्तस्मादेतदेवानुपरीयात् ॥४॥

अथ पशुमुपाकरिष्यꣳस्तृणमादत्ते द्वितीयवान्निरुणधा इति द्वितीयवान्हि 8
वीर्यवान्यदा हि द्वितीयमुपयुते ऽथ वीर्यवत्तरो भवति ॥५॥

स आदत्त उपावीरसीत्युप हि द्वितीयो[3] ऽवति[4] तस्मादाहोपावीरसीत्युप 9.10
देवान्दैवीर्विशः प्रागुरिति दैव्यो वा एता विशो[5] यत्पशवस्तानेवैतदाहास्थिषत देवेभ्य इति यदाहोप[6] देवान्दैवीर्विशः प्रागुरित्युशिजो वह्नितमानिति विद्वाꣳसो हि देवाः ॥६॥

देव त्वष्टर्वसु रमेति त्वष्टा वा एषामीष्टे पशवो वै वसु स यस्यैव पशवो 11.12
यः पशूनामीष्टे तमेवैतदाहोपनिवदैनानिति यदाह देव त्वष्टर्वसु रमेति हव्या ते स्वदन्तामिति यदा वा एते ऽकामयन्ताथैनान्हविरकुर्वत[7] तस्मादाह हव्या ते स्वदन्तामिति ॥७॥

रेवती रमध्वमिति पशवो वै रेवन्तस्तस्मादाह[8] रेवती रमध्वमिति बृहस्पते 13
धारया वसूनीति ब्रह्म वै बृहस्पतिः पशवो वै वसु तानेवैतदतिष्ठमानान्देवाः परस्ताद्ब्रह्मणा पर्यगृह्णन्त तथा नात्यायꣳस्तथो वा एनानेष एतदतिष्ठमानान्परस्ताद्ब्रह्मणा परिगृह्णीते तथा नातियन्त्येवं पशुमुपाकृत्याग्निं मन्थत्यग्निं मथित्वा नियुनक्ति तस्यातः ॥८॥ तृतीयं ब्राह्मणम् ॥

1 पशुमालभंते MSS. 2 जक्षमिरे MSS., but C, as far as visible, corrected into चक्ष°. 3 Thus emended; तमशिश्रियुं MSS. 4 ततश्च-तुष्पादो B, ततश्चतुष्पादो C. 5 °मिं मंथति MSS. 6 जक्षमिरे MSS. 7 जुहवामेति MSS. 8 °परैत्यैनं B W C, परीत्यैनं My. 9 Thus accented MSS. Read °द्यथाधर्मेण ? 10 द्वितीयो भवति B. 11 विशो

C. 12 यदाहोप B. 13 कामय° MSS. 14 रेवंतस्त° MSS.

M. III. 7. 4 K. IV. 7. 4

1.2 स वै रशनामेवादायोपोत्थाय प्रतिमुञ्चत्यृतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि धर्षान्मानुष इति वरुण्या वै रज्जुस्तदेनमृतस्यैव पाशेनैतद्देवहविः प्रतिमुञ्चति तथैनमेषा वरुण्या रज्जुर्न हिनस्ति धर्षान्मानुष इति न वा एतमग्रे मनुष्यो धृष्णोति स यदैवैनमृतस्य पाशेनैतद्देवहविः प्रतिमुञ्चत्यथैवैनं धृष्णोति तस्मादाह धर्षान्मानुष इति[1] ॥१॥

3 अथैनं नियुनक्ति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नीषोमाभ्यां जुष्टं नियुनज्मीति[2] स यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवतायाय आदिशत्यथ प्रोक्षति स समान एव प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति यत्किं च प्रोक्षति ॥२॥

4.5 स प्रोक्षत्यद्भ्यस्त्वौषधीभ्यः प्रोक्षामीति स यतश्चैव पशुः संभवति यतश्च जायते तत एवैनमेतन्मेध्यं करोतीदꣳ हि यदा वर्षत्यथौषधयो जायन्त ओषधीर्जग्ध्वापः पीत्वा ततो रेतः संभवति रेतसः पशुस्तस्मादाहाद्भ्यस्त्वौषधीभ्यः प्रोक्षामीत्यनु त्वा माता मन्यतामनु पितेति मातुश्च हि पितुश्च संभवत्यनु भ्राता सगर्भ्यो[3] ऽनु सखा सयूथ्य[4] इति यदस्य जन्म[5] तेनानुमतमालभा इत्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामीति[6] स यस्यै देवतायै हविर्भवत्येष पशुस्तस्या एवैनमेतन्मेध्यं करोति ॥३॥

6 अथ निपाययत्यपां पेरुरसीति तदेनमन्तरतो मेध्यं करोत्यथोपोक्षत्यापो देवीः सदन्तु स्वात्तं चित्सदेवहविरिति तदेनꣳ सर्वतो[7] मेध्यं करोति ॥४॥

7 अथाहाग्नये समिध्यमानायानुब्रूहीति स उत्तरमाधारमाधार्यासꣳस्पर्शयन्नत्याक्रमति तत्पशौ[8] समनक्ति शिरो वा एतद्यज्ञस्य यदुत्तर आधार एष उ वा अत्र यज्ञो भवति यत्पशुर्यज्ञ एवैतच्छिरः प्रतिदधाति ॥५॥

8.9 स समनक्ति सं ते प्राणो वातेन गच्छतामिति शिरसि समङ्गानि यजत्रैरित्यꣳसयोः सं यजमान आशिषेति श्रोणौ यस्मै त्वा कामायालप्सतेति[9] तत्प्राप्नुहीत्येवैतदाहेदꣳ हि यदा पशुꣳ संज्ञपयन्त्यथास्य वातं प्राणो ऽभिपद्यते तत्प्राप्नुहि यत्ते वातं प्राणो ऽभिपद्याता इत्येवैतदाह समङ्गानि यजत्रैरित्यङ्गैर्वा अस्य यजन्ते

तत्प्राप्नुहि यत्ते ऽङ्गैर्यजान्ता इत्येवैतदाह सं यजमान आशिषेत्येतेन वै यजमानाया-
शिष आशासते[10] तत्प्राप्नुहि यत्त्वया यजमानायाशिष आशासान्ता इत्येवैतदाहा-
श्राव्य होतारं प्रवृणीते सो ऽसावेव बन्धुः ॥६॥

अथ द्वितीयमाश्रावयति मैत्रावरुणस्य प्रवराय स मैत्रावरुणस्याह प्रवरा- 10a
याश्रावयति यजमानं त्वेव प्रवृणीते ॥७॥

स वा आश्राव्याहाग्निर्दैवीनां[11] विशां पुरएतेत्यग्निर्वै देवतानां मुखं तस्मा- 10b.11
दाहाग्निर्दैवीनां विशां पुरएतेत्ययं यजमानो मनुष्याणामिति तं वा एषो ऽन्वर्धो
भवति यस्मिन्नर्धे यजन्ते तस्मादाहायं यजमानो मनुष्याणामिति तयोरस्थूरि गार्ह-
पत्यं दीदयच्छतꣳ हिमा द्वा यू इति तयोरनार्तानि गार्हपत्यानि सन्तु शतं वर्षाणी-
त्येवैतदाह राधाꣳसीत्संपृञ्चानावसंपृञ्चानौ तन्व इति यदग्नौ जुहोति यजमानस्तद-
ग्नये राधः प्रयच्छत्यथ यामाशिषमाशास्ते तामस्मा अग्निराशिषꣳ संनमति तद्रा-
धाꣳसि संपृञ्चाते असंपृञ्चानौ तनूरिति[12] यथा यजमानमग्निर्न प्रदहेदेवमेतदाह यद्धि
यजमानो ऽग्निना त्वचꣳ संपृञ्चीत[13] प्रैनं[13] दहेत्तस्मादाहासंपृञ्चानौ[14] तन्व इति ॥८॥
चतुर्थं ब्राह्मणम् ॥ सप्तमो ऽध्यायः ॥

1 इति MSS. 2 Thus, not युनग्मि, as Weber's edition of the Samhitā. 3 सगभ्यौ B. 4 सयूथ्य C. 5 जन्म C. 6 प्रोक्षामीति B, प्रोक्षामीति W. 7 सर्वतो C. 8 तस्मात्पशौ B W. 9 Thus emended, कामायालिप्सतेति B W C, कामायालिप्स्यतेति My. 10 आशासते MSS. 11 °व्याहाग्नि° C. 12 तनूरिति C. 13 संपृंचीतत्प्रैनं C (but the त् before प्रैनं hardly visible), संपृंचीततत्प्रैनं B W, संपृंचीत्प्रेनं My. 14 दहे° MSS.

K. IV. 8. 1 M. III. 8. 1

स वै यदैतत्प्रवृतो होता होतृषदने सीदत्यथाग्रीभिश्चरन्ति स यदाग्रीभि- 1.2
श्चरन्ति सर्वेणेव वा एष मनसा सर्वेणेवात्मना यज्ञꣳ संभरति यो दीक्षते तꣳ सर्वेण
मनसा सर्वेणात्मना यज्ञꣳ संभृत्य देवेभ्यः प्रयच्छति तं देवेभ्यः प्रदाय रिरिच्यान
इव भवति स एताभिराग्रीभिः पुनराप्यायते स यदेताभिराग्रीभिः पुनराप्यायत

एताभिरेनमाप्रीणाति तस्मादाप्रियो नाम ॥१॥

3 ते वा एते प्रयाजा एकादश भवन्त्येकादशो[1] वा अयं पुरुषो दश प्राणा आत्मैकादशः कृत्स्नमेवैनं तत्सर्वतन्वमाप्याययति[2] तस्मादेते प्रयाजा एकादश भवन्ति ॥२॥

4.5 अथ खलु प्रसूतः स्रुचावादायातिक्रम्याध्वर्युराश्राव्याह समिधः प्रेष्येति प्रेष्य प्रेष्येति चतुर्थं चतुर्थं समानयमानो दश प्रयाजान्यजति[3] दश प्रयाजानिड्वात्याक्रम्याह[4] शासमाहरेत्यसि[5] वै शास इत्याचक्षते यूपशकलमाहरेति तावग्रे जुह्वामक्त्वा पशोर्ललाटे स[6]स्पर्शयति घृतेनाक्तौ पशुं त्रायेथामिति वज्रो वै यूपशकलो वज्रः शासो वज्र आज्यं कृत्स्नमेवैतद्वज्रं कृत्वा तमस्याभिगोत्तारं करोति नेदेनं नाष्ट्रा रक्षा[7]सि हिनसन्निति वज्रो हि नाष्ट्राणा[8] रक्षसामपहन्ता पुनर्यूपशकलमवगूहति प्रयच्छति शमित्रे शासम् ॥३॥

6 तमाहैषा ते ऽश्रिः[9] प्रज्ञातास्त्विति सादयित्वा स्रुचावाह पर्यग्नये ऽनुब्रूहीत्यच्छिद्रमेवैनमेतत्समन्तमग्निना[10] परिगृह्णाति नेदेनं नाष्ट्रा रक्षा[11]सि प्रमृशानित्यग्निर्हि[12] नाष्ट्राणा[13] रक्षसामपहन्ता ॥४॥

7.8 तदाहुर्यदैतेन पर्यग्नि कुर्यादित्यथान्यमेव निर्मथ्य तेन श्रपयेयुरित्याहवनीयो वा एष इति तस्मै वा एष यदेतस्मिञ्छृतं जुहुयुरिति न वा एष तस्मै यदेतस्मिन्नश्रृत[14] श्रपयेयुरिति तस्मादन्यमेव निर्मथ्य तेन श्रपयेयुरिति तदु तथा न कुर्याद्यथा वै ग्रस्तमेवमेतस्यैतद्भवति येन पर्यग्नि कुर्वन्ति स यथा ग्रस्तमाच्छिद्यान्यस्मै प्रयच्छेदेव[15] ह तत्समद[16] ह कुर्यात्तस्मादुत एवोल्मुक[17] हृत्वा तं निमृज्योप[18] समादध्युरथ[19] पुनरुल्मुकमप्यर्जेयुस्तथासमद्भवति ॥५॥

9 अथ यत्रैनमुदञ्चो नेष्यन्तो भवन्ति तदुल्मुकमादायाग्नीत्पूर्वः प्रतिपद्यते ऽग्निमेवास्यैतत्पुरस्तात्पुरोगां करोति तथो हास्याग्निरेव पुरस्तान्नाष्ट्रा रक्षा[20]स्यपघ्नन्प्रभिन्दन्नेत्यथैतमभये ऽनाष्ट्रे निवाते नयति ॥६॥

अथास्याः[21] स्तीर्णायां[22] वेदेर्द्वे तृणे आदत्ते तमुदञ्चं नीयमानं वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभते प्रतिप्रस्थातारमध्वर्युरध्वर्युं यजमानस्तेनोदञ्चो यन्ति ॥७॥

10a तदाहुर्नैतं यजमानो ऽन्वारभेतेति मृत्यवे ह्येनं नयन्तीत्यनवकॢप्तं वै तदिति यन्मृत्यवे नीयमानं यजमानो ऽन्वारभेतेति[23] तदन्वारभेतैव न वा एतं मृत्यवे नयन्ति

यं यज्ञाय नयन्ति यज्ञायो वा एतं नयन्ति तस्मादन्वारभेतैवात्मानमु[12] ह यज्ञादन्तरि-
याद्यदेनं[13] नान्वारभेत तस्मादन्वारभेतैव ॥८॥

तं वा अन्वारभमाणः परोक्षमन्वारभते वपाश्रपणीभ्यां प्रतिप्रस्थाता प्रति- 10b
प्रस्थातारमध्वर्युरध्वर्युं यजमानस्तदेनं परोक्षमन्वारभते ॥९॥

स वा आश्राव्याहोपप्रेष्य होतर्हव्या देवेभ्य इति तत्पशौ वैश्वदेवं करोत्य- 11-13
न्वाह होता वाचयत्यध्वर्यू[14] रेवति यजमान इति वाग्वै रेवती तस्मादाह रेवति
यजमान इति प्रियं धा आविशेत्यनार्तिमाविशेत्येवैतदाह यदाह प्रियं धा आविशेत्यु-
रोरन्तरिक्षात्सजूर्देवेन वातेनेत्यन्तरिक्षं वा अनु रक्षश्चरति यथायं पुरुषो ऽमूल उभ-
यतः परिच्छिन्नो ऽन्तरिक्षमन्वयं पवते यो ऽयं पवते तद्वाचमेवैतदाह वातेनैनꣳ
संविदानान्तरिक्षाद्वोपायेति यदाहोरोरन्तरिक्षात्सजूर्देवेन वातेनेत्यस्य हविषस्त्मना
यजेत्यस्य हविषो ऽनार्तेन यजेत्येवैतदाह समस्य तन्वा भवेति वाचमेवैतदाह ॥१०॥

अथ यत्रैनं निविध्यन्ति तदनयोस्तृणयोरन्यतरदुपास्यति वर्षो वर्षीयसि 14
यज्ञे यज्ञपतिं धा इति बर्हिरेवास्मा एतत्स्तृणात्यस्कन्नꣳ हविरसदिति यदस्य विश-
स्यमानस्य[15] किं चित्स्कन्दादिति तद्बर्हिषि प्रतितिष्ठादिति[16] ॥११॥

अथ पुनरेत्योत्तरेणाहवनीयं दक्षिणावृत्यासते नेदस्य संज्ञप्यमानस्याध्यक्षा 15
असामेति तस्य न कूटेन प्रघ्नन्ति मानुषꣳ ह कुर्याद्यदस्य कूटेन प्रहण्युर्नो[17] एव
पश्चात्कर्णे पितृदेवत्य उ ह[18] स्यान्मुखमेवापिगृह्य विपृङ्क्तेण[19] संज्ञपयन्ति तद्धि देवत्रा
तं नाहुर्जहीति न मारयेति मानुषꣳ ह कुर्याद्यदेनं ब्रूयुर्जहीति[20] वा मारयेति वा संज्ञ-
पयतानुगमयतेत्येवैतर्हि ह्येष देवाननुगच्छति तस्मादाहुरन्वगन्निति[21] ॥१२॥

अथ पुरा संज्ञपनाज्जुहोति[22] स्वाहा देवेभ्य इत्यथ संज्ञप्ते देवेभ्यः स्वाहेति 16
पुरस्तात्स्वाहाकृतयो वा अन्ये देवा उपरिष्टात्स्वाहाकृतयो ऽन्ये तानेवैतदुभयान्प्रीणाति
त एनमुभये देवाः प्रीताः सुधायां दधति ते एते परिपशव्ये इत्याहुती ते जुहुयाद्यदि
कामयेत यद्यु कामयेतापि नैवाद्रियेत ॥१३॥ प्रथमं ब्राह्मणम् ॥

1 भवंत्येकादशो MSS. 2 तत्सर्वतन्वमा° C W and without accent My, तत्सर्वतत्सर्वतन्वमा° B. 3 प्रयाजा° C. 4 शासमाहरेत्यसिं B, शासमाहरेत्यसिं C W. 5 श्रितः B W. 6 °त्समंतमग्निना C, °त्समंत-

तमग्निना B W. 7 प्रमृशा° MSS. 8 तत्समद्ं MSS. 9 Thus accented MSS. 10 °स्या स्तीर्णाया MSS. 11 न्वारभेतेति C My, न्वारभतेति B W. 12 °तैवात्मानमु MSS. 13 यज्ञादंतरिया° C, यज्ञादंतरीया° B W My. 14 °र्धु C. 15 विशस्यमा° MSS. 16 °दिति MSS. 17 प्रहण्युर्नो C, प्रहण्युर्नो B W. 18 हि MSS. except C. 19 ? Thus C, विपृडेण My, वित्वृंगेण B W. 20 ब्रूयुर्जेहीति MSS. 21 °न्निति MSS. 22 संज्ञपमाना° B W.

M. III. 8. 2 K. IV. 8. 2

1-3 स वै यदैतदाहुः संज्ञप्तः पशुरित्यथाध्वर्युरुपोत्तिष्ठन्नाह नेष्टः पत्नीमुदानयेति स नेष्टा पत्नीमुदानयति तामुदानेष्यन्वाचयति नमस्त आतानेति यज्ञो वा आतानो यज्ञं हि तन्वते जघनार्धो वा एष यज्ञस्य यत्पत्नी सेदं प्राची यज्ञं प्रसत्स्यन्ती भवति तस्मा एवैतन्नमस्करोति तस्मै निह्नुते तथैनमेष यज्ञो न हिनस्ति तस्मादाह नमस्त आतानेत्यनर्वा प्रेहीत्यसपत्नेन प्रेहीत्येवैतदाह घृतस्य कुल्या उप ऋतस्य पथ्या उपेति साधूपेत्येवैतदाह देवीरापः शुद्धा वोद्वयं सुपरिविष्टा देवेषु। सुपरिविष्टा वयं परिवेष्टारो भूयास्मेत्यप एवैतत्पुनाति ॥१॥

4 अथाद्भिः पशोः प्राणान्त्सꣳस्पर्शयति सा यदद्भिः पशोः प्राणान्त्सꣳस्पर्शयति जीवं वै देवानाꣳ हविरमृतममृतानां म्रन्त्यु वा एतत्पशुं यदेनꣳ संज्ञपयन्त्यापो वै प्राणो ऽन्नꣳ ह्यापो ऽन्नꣳ हि प्राणस्तदस्मिन्नेतान्प्राणान्दधाति तदेनꣳ समीरयति तथा ह्यत उदेति तथा संजीवति तथैतज्जीवं देवानाꣳ हविर्भवत्यमृतममृतानाम् ॥२॥

5 सा यत्पत्नी योषा वै पत्नी योषाया वा इमाः प्रजाः प्रजायन्ते तदेनं योषायाः पत्न्या एतज्जनयति ॥३॥

6a सा वाचं ते शुन्धामीति मुखं प्राणं ते शुन्धामीति नासिके चक्षुस्ते शुन्धामीत्यक्षिणी श्रोत्रं ते शुन्धामीति कर्णौ मेढ्रं ते शुन्धामीति वा नाभिं ते शुन्धामीति वा यो ऽयं पुरस्तात्प्राणो ऽथ पायुं ते शुन्धामीति यो ऽयं पश्चात्प्राण एतदस्मिन्नेतान्प्राणान्दधात्येतदेनꣳ समीरयति ॥४॥

अथ पदः[4] सꣳहृत्य चरित्राꣳस्ते शुन्धामीति पद्भिर्वै प्रतितिष्ठति सा[5] 6b
यदास्मिन्नेतान्प्राणान्दधाति[6] यदेनꣳ समीरयत्यथैनं पद्भिः प्रतिष्ठापयति तस्मादाह चरित्राꣳस्ते शुन्धामीति[7] ॥५॥

अथ याः परिशिष्टा आपो भवन्ति ताभिरध्वर्युश्च यजमानश्चानुषिञ्चतः 7-8
प्राणाꣳश्चैवास्मिꣳस्तद्धत्तः समीरयतश्चैनं यदु चैवास्य संज्ञपयन्तः क्रूरीकुर्वन्ति यदास्थापयन्ति तदु चैवास्यैतदाप्याययतस्तच्छमयतो मेध्यमु चैवैनमेतत्कुरुतस्तस्मादनुषिञ्चतः ॥६॥

तावनुषिञ्चतो मनस्त आप्यायतां वाक्त आप्यायतां प्राणस्त आप्यायतां 9-11a
चक्षुस्त आप्यायताꣳ श्रोत्रं त आप्यायतामित्येतदस्मिन्नेतान्प्राणान्धत्त एतदेनꣳ समीरयतो यत्ते क्रूरं यदास्थितं तत्त आप्यायतां तत्ते निष्ठ्यायतामिति तद्यदस्य संज्ञपयन्तः[9] क्रूरीकुर्वन्ति यदास्थापयन्ति तदेवास्यैतदाप्याययतस्तच्छमयतस्तत्ते शुध्यत्विति तदेनं मेध्यं कुरुतः ॥७॥

शमहोभ्य इति जघनार्धे निषिञ्चति क्रूरीर्[10] वा इदं कुर्वन्ति यत्पशुꣳ 11b
संज्ञपयन्ति नेदिदमन्वहोरात्राणि शोचानित्यापो[11] वै शान्तिस्तद्भिः शान्त्या शमयति तस्मादाह शमहोभ्य इति[12] ॥८॥

अथोत्तानं पर्यस्यन्ति स इदं तृणमधिनिदधात्योषधे[13] त्रायस्वेति वज्रो वा 12-14
एष यच्छासस्तदेनमेतदोषधिभिरेवान्तर्दधाति तथैनमेष वज्रो न हिनस्ति स्वधिते मैनꣳ हिꣳसीरित्याच्छ्यति वज्रो वा एष यच्छासस्तथैनमेष वज्रो न हिनस्ति स यदेतया प्रज्ञातयाश्रियाच्छ्यत्येषा हि यज्ञुष्कृता मेध्या भवति स यदिदमग्रं तृणस्य तत्सव्ये पाणौ कुरुते यदवुग्नं तद्दक्षिणे स यथो[15] लोहितमुत्पतति तदुभयतो ऽनक्ति रक्षसां भागो ऽसीति रक्षसाꣳ ह्येष भागो यदसृक् स यदुभयतः परिच्छिन्नं भवत्युभयतः परिच्छिन्नानि[16] हि रक्षाꣳस्यमूलान्युभयतः परिच्छिन्नान्यन्तरिक्षमनुचरन्ति[17] तस्मादुभयतः परिच्छिन्नं भवति[18] ॥९॥

तदुपास्याभितिष्ठतीदमहꣳ रक्षो ऽभितिष्ठामीदमहꣳ रक्षो ऽवबाधे । 15
इदमहꣳ रक्षो ऽधमं तमो नयामीति यज्ञो वै यजमानो यज्ञेनैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधते[19] ॥१०॥

अथ वपामुत्खिद्य वपाश्रपण्यौ प्रोर्णोति घृतेन द्यावापृथिवी प्रोर्णवाथामि- 16

तीमे एवैतद्द्यावापृथिव्या[१६] ऊर्जा रसेन भाजयत्यनयोरेव द्यावापृथिव्योरूर्जꣳ रसं दधाति ॥११॥

17 स यत्कार्ष्मर्यमय्यौ वपाश्रपण्यौ भवतो यत्र ह वा अग्रे देवाः पशुमालेभिरे[१७] तस्य होदीचः कृष्यमाणस्यावाङ् मेधः पपात स एष वनस्पतिरजायत स यत्कृष्यमाणात्समभवत्तस्मात्कार्ष्मर्यो नाम तेनैवैनमेतन्मेधसा समर्धयति कृत्स्नं करोति तस्मात्कार्ष्मर्यमय्यौ वपाश्रपण्यौ भवतः[१८] ॥१२॥

18 परिवास्य[१९] वपां पशुश्रपणे प्रतपति श्रपयत्येवैनां तन्नेदश्रुतामाहवनीये श्रपयाणीत्यथोल्मुकमादाय पूर्वः प्रतिपद्यते तत्पुनरप्यर्जत्यथ यदिदमग्रं तृणस्य भवति तत्प्रास्यति वायो वेः स्तोकानामिति स्तोकानामेवैषा समित्स्तोकेभ्य एवैनमेतत्समिन्द्धे ॥१३॥

19 अथोत्तरतो वपां प्रतपति श्रपयत्येवैनां तदथो अत्येष्यन्वा एतदग्निं पर्येष्यन्भवत्यग्नय एवैतन्निह्नुते तथैनमेषोऽग्निरतियन्तं न हिनस्ति[२०] ॥१४॥

20 सोऽन्तराहवनीयं च यूपं च हरति स यदेतामनेन जघनेन न हरन्ति येनान्यानि हवीꣳषि श्रुतानि हरन्ति नेदनयाश्रुतया क्रूरीकृतया यज्ञं प्रसजानीति[२१] बहिर्धा ह[२२] यज्ञात्स्याद्यदग्रेण यूपꣳ हरेयुस्तथा न बहिर्धा यज्ञाद्भवति तस्मादन्तराहवनीयं च यूपं च हरत्यथ दक्षिणार्धे श्रपयति ॥१५॥

21-23a अथाभिजुहोति जुषाणो अग्निराज्यस्य वेतु स्वाहेति तथा हैते श्रुताः स्वाहाकृता स्तोका अग्निं प्राप्नुवन्त्यथाह स्तोकेभ्यो ऽनुब्रूहीति स एता आग्नेयी स्तोकेभ्यो ऽन्वाह[२३] स यदाग्नेयी स्तोकेभ्यो ऽन्वाहेतःप्रदाना वै वृष्टिरितो वा अग्निर्वृष्टिं वनुते स एतैस्तोकैरेतान्स्तोकान्वनुते त एते वर्षन्ति तस्मादाग्नेयी स्तोकेभ्यो ऽन्वाहाथ यदाह श्रुता प्रचरेति ॥१६॥

23b.24a अथ स्रुचावादायाश्राव्याह स्वाहाकृतिभ्यः प्रेष्येति वषट्कृते जुहोति स वपामेवाग्रे ऽभिघारयत्यथ पृषदाज्यम् ॥१७॥

24b.25a तद्वा आहुः पृषदाज्यमेव पूर्वमभिघारयेदिति प्राणः पृषदाज्यमिति वपाꣳ हाभिघारयन्तं[२४] याज्ञवल्क्यं ब्राह्मणो ऽनुव्याजहारान्तरगादयमध्वर्युः प्राणं प्राण एनꣳ हास्यतीति स ह स्माह स्थविरो जीर्णिः शयान इमौ पलितौ बाहू अभूतां क स्विदेव ब्राह्मणस्य वचो बभूवेत्युत्तममु वै प्रयाजमिष्ट्वा ध्रुवामेवाग्रे ऽभिघारयति तस्या हि

प्रथमावाज्यभागौ यक्ष्यन्भवत्यथ यथापूर्वमन्यानि हवी॑ꣳष्युत्तम उ वा एष प्रयाज[15] एतामु[16] वा अत्र प्रथमा॑ꣳ होष्यन्भवति तस्माद्वपामेव पूर्वामभिघारयेदथ पृषदाज्यम् ॥१८॥

स यद्वपामभिघारयति तदेवास्यापि पशुरभिघारितो[17] भवत्यथ यत्प्रत्यक्षं 25b
पशुं नाभिघारयति नेदश्रुतमभिघारयाणीत्येतदेवाभिघारितो भवति[18] यद्वपामभिघारयति ॥१९॥

उपस्तृणीत आज्यमवदधाति हिरण्यशकलमवदधाति वपामवदधाति हिर- 26.27a
ण्यशकलमथ[19] द्विरभिघारयति स यदुभयतो हिरण्यशकलौ[20] करोति जीवं वै देवाना॑ꣳ हविरमृतममृतानां प्रत्यु वा एतत्पशुं यदेनमग्नौ जुह्वत्यायुर्वा अमृत॑ꣳ हिरण्यमायुष्येवैनमेतदमृते ऽन्ततः प्रतिष्ठापयति तथा[21] हात[22] उदेति तथा संजीवति तथैतज्जीवं देवाना॑ꣳ हविर्भवत्यमृतममृतानाम् ॥२०॥

अथाहाग्नीषोमाभ्यां छागस्य वपायै मेदसो ऽनुब्रूहीत्याश्राव्याहाग्नीषोमाभ्यां 27b-30
छागस्य वपां मेदः प्रेष्येति न प्रस्थितमित्याह प्रसुते प्रस्थितमित्याह[23] वषट्कृते जुहोति स यद्वपां जुहोति यस्या एव देवतायै हविर्भवत्येष पशुस्तामेव देवतामेतेन मेधसा प्रीणाति मेधो ह्येतद्यन्मेदः[24] सैतेन मेधसा प्रीतोत्तर॑ꣳ हविरुपरमते श्रप्यमाणमथ समीच्यौ वपाश्रपण्यौ कृत्वोत्तरतो ऽनुप्रास्यति स्वाहाकृते ऊर्ध्वनभसं मारुतं गच्छतमिति याभ्यां वपामशिश्रपाम[25] नेत्ये[26] अमुयेवासत[27] इत्यथ चात्वाले मार्जयन्ते क्रूरीव[28] वा इदं कुर्वन्ति यत्पशु॑ꣳ संज्ञपयन्ति यद्विशासत्यापो वै शान्तिस्तद्भिः शान्त्या शमयति तस्माच्चात्वाले मार्जयन्ते ॥२१॥ द्वितीयं ब्राह्मणम् ॥

1 Thus emended (cp. VI. 2. 2. 7), यज्ञं प्रशस्यंती भवति B W, यज्ञं प्रशस्यंती भवति C. 2 Thus MSS. Read तथैनामेष ? 3 वा B W. 4 पदः B W. 5 सा यदास्मिन्नेता॰ MSS., ॰प्राणान्दधाति MSS. 6 ॰मीति MSS. 7 ॰पयंतः C. 8 Without accent the MSS. 9 शोचा॰ MSS. 10 इति MSS. 11 तृणमभि॰ C (cp. IV. 1. 2. 5). 12 यथो or यथा MSS. Read यतो. 13 परिछिन्नानि MSS. both times. 14 भवति C. 15 Thus C

(orig.), °स्यपबाधते B W C (sec. m.) My. 16 °पृथिव्या MSS. 17 पशुमालें° B W. 18 भवतः C. 19 परिवास्य MSS. 20 °स्ति MSS. 21 प्रसजानीति MSS. 22 ह om. C. 23 न्वाह MSS. 24 हाभिघारयंतं MSS. 25 प्रयाया B. 26 एतमु B W. 27 पशुमभिं° B W. 28 भवति MSS. 29 °शल्क° instead of °शकल° B W My. 30 °शल्कौ MSS. (cp. IV. 8. 3. 8.). 31 तथाहात C. 32 प्रस्थि° MSS. 33 °न्मेदः MSS. 34 °श्रपासु B W C (orig.) My, °श्रपाम C (sec. m.). 35 Thus B, नेत्ये W C My. 36 अमुयेवा° MSS. 37 Without accent the MSS.

M. III. 8. 3 K. IV. 8. 3

1.2 स वै यद्देवत्य एवैष पशुर्भवति तद्देवत्यं पुरोलाशमनुनिर्वपति स यत्तद्देवत्यं पुरोलाशमनुनिर्वपति सर्वेषां वा एष पशूनां मेधो यद्व्रीहियवौ तेनैवैनमेतन्मेधसा समर्धयति कृत्स्नं करोति स यद्वपया प्रचर्याथैतेन प्रचरन्ति[1] मध्यतो[2] वै वपामुत्खिदन्ति मध्यत एवैनमेतेन मेधसा समर्धयति मध्यतो ऽस्मिन्नेतन्मेधो दधाति तस्माद्वपया प्रचर्याथैतेन प्रचरन्त्यथैतं पशुं विशास्ति ॥१॥

3 तमाह त्रिः प्रत्यावयतादित्युत्तमे प्रत्याव[3] उत्तमार्धे हृदयं कुरुतादिति त्रिवृद्धि यज्ञस्तस्मादाह त्रिः प्रत्यावयतादित्यथ यदाह श्रुतः प्रचरेति ॥२॥

4 अथ शमितारं विशासति यत्त्वा पृच्छाच्छृतꣳ हविः शमिताꣳ इति श्रुतमित्येव ब्रवसि मा श्रुतꣳ हीति मा श्रुतꣳ हि भगव इति श्रुतमित्येव ब्रवसीति[4] ॥३॥

5-7 अथ पृषदाज्यस्योपहत्योपनिष्क्रम्य पृच्छति श्रुतꣳ हविः शमिताꣳ इति श्रुतमिति शमिता प्रत्याह तद्देवानामित्याहोपाꣳशु स यदेवं पृच्छति श्रुतं वै देवानाꣳ हविर्नाश्रुतꣳ शमितो[5] वा एतद्वेद यदैतच्छृतं भवति श्रुतेन प्रचराणीति तथा यद्यप्यश्रुतं भवति श्रुतमेव देवेभ्यो भवति श्रुतं यजमानायानेना अध्वर्युः शमितर्येव तदेनो ऽथ यदुपाꣳश्वाह तद्देवानामिति तद्धि देवानां यच्छृतं नाश्रुतं तस्मादुपाꣳश्वाह तद्देवानामिति स वै त्रिः पृच्छति त्रिवृद्धि यज्ञः ॥४॥

अथ पृषदाज्येन हृदयमभिघारयत्यात्मा वै मनो हृदयं प्राणः पृषदाज्यमात्म- 8
न्येवैतन्मनसि प्राणं दधाति तथा ह्यत उदेति तथा संजीवति तथैतज्जीवं देवानाꣳ
हविर्भवत्यमृतममृतानाम् ॥५॥

सो ऽभिघारयति सं ते मनो मनसा सं प्राणः प्राणेन गच्छतामिति न 9.10
स्वाहा करोति न ह्येषाहुतिः स येनैव पशुं नयन्ति तेन पुनराहरन्ति तमन्तराहवनीयं
च यूपं च हरति स यदेतꣳ श्रुतꣳ सन्तमनेन जघनेन न हरन्ति येनान्यानि हवीꣳषि
श्रुतानि हरन्ति नेदनेनाङ्गशो विकृत्तेन क्रूरीकृतेन यज्ञं प्रसजानीति बहिर्धा ह यज्ञा-
त्स्याद्यदग्रेण यूपꣳ हरेयुस्तथा न बहिर्धा यज्ञाद्भवति तस्मादन्तराहवनीयं च
यूपं च हरति ॥६॥

अथ दक्षिणार्धे ऽवद्यति तत्प्लक्षशाखोत्तरबर्हिर्भवति स यत्प्लक्षशाखोत्तरब- 11.12
र्हिर्भवति यत्र ह वा अग्रे देवाः पशुमालेभिरे तद्धैनं त्वष्टा शिरस्तो ऽभिववामोतैन-
मित्थं चिन्नालभेरन्निति त्वष्टा हि पशवस्तदेतत्त्वष्टुरभिवान्तं यन्मस्तिष्को यदनूके
मज्जा तस्मादेतद्वान्तमिव भवति तस्मादेतस्य नाश्नीयात्त्वष्टुर्ह्येतदभिवान्तं तस्याभिवा-
न्तस्य पशोरवाङ् मेधः पपात स एष वनस्पतिरजायत तं देवाः प्रापश्यꣳस्तस्मात्प्रक्षो
नाम प्रक्षो ह वै नामैतद्यत्प्लक्ष इत्याहुस्तेनैवैनमेतन्मेधसा समर्धयति कृत्स्नं
करोति तस्मात्प्लक्षशाखोत्तरबर्हिर्भवति ॥७॥

उपस्तृणीत आज्यं जुह्वां चोपभृति चावदधाति हिरण्यशल्का उपस्तृणीत 13
आज्यं वसाहोमहवन्यां च समवत्तधान्यां च ॥८॥

अथाह मनोतायै हविषो ऽवदीयमानस्यानुब्रूहीति स यन्मनोताया अनु- 14
वाच आह सर्वा वै देवताः पशुमालभ्यमानमुपसंगच्छन्ते मम नाम ग्रहीष्यति
मम नाम ग्रहीष्यतीति सर्वासाꣳ ह्येतद्देवतानाꣳ हविर्यत्पशुस्तासाꣳ सर्वासां देवतानां
पशौ मनाꣳस्योतानि भवन्ति तान्येवैतत्प्रीणाति तथो तान्यमोघायोपसंगच्छन्ते
तस्मान्मनोताया अनुवाच आह ॥९॥

स वै हृदयस्याग्रे ऽवद्यति स यन्मध्ये सतो ऽथ हृदयस्याग्रे ऽवद्यति प्राणो 15.16
वै हृदयमेतस्माद्धयमूर्ध्वः प्राण उच्चरति प्राण उ वै पशुर्यावद्धयेव प्राणेन प्राणिति
तावदेव पशुरथ यदा प्राणो ऽपक्रामत्यनर्थ एव दारु भूतः शेते स एष पशुर्यद्धृदयं
तत्प्रत्यक्षमेवैतत्पशोरवद्यति तथा यद्यप्यवदानं जहात्यहीनमेवास्य तद्भवति तस्मा-
द्धृदयस्याग्रे ऽवद्यत्यथ यथापूर्वमवद्यति ॥१०॥

17-19 अथ जिह्वाया अवद्यति सा हीयं पूर्वार्धे प्रतिष्ठित्यथ वक्षसस्तद्धि ततो ऽन्वगथ दोष्णो ऽथ पार्श्वयोरथ वृक्कयोरथ तनिम्नो ऽथैतं गुदं त्रेधा करोति तद्यत्स्थविमं तदुपयड्भ्य उपनिदधत्यथ यन्मध्यं तज्जुह्वां द्वेधा कृत्वावदधात्यथ यदणिम तत् त्र्यङ्गेष्वथाध्यूधसः श्रोणेरेतावज्जुह्वामवद्यत्यथोपभृति[16] त्र्यङ्गयस्य दोष्ण एतद्गुदस्य तृतीयं द्वेधा कृत्वा त्र्यङ्गयायाः श्रोणेरेतावदुपभृत्यथ हिरण्यशल्कावधायाभिघारयति[17] ॥११॥

20-23 अथ वसाहोमं गृह्णीते रेलसीति लेलयमिव[18] हि यूस्तस्मादाह रेलसीत्यग्निहा श्रीणात्वित्यग्निर्ह्येतच्छ्रीणात्यापस्त्वा समरिणन्नित्यापो ह्येतꣳ सर्वेभ्यो ऽङ्गेभ्यो रसꣳ संभरन्ति तस्मादाहापस्त्वा समरिणन्निति वातस्य त्वा ध्राज्यै पूष्णो रꣳह्या इत्यन्तरिक्षाय वा एतद्गृह्णात्यन्तरिक्षमन्वयं पवते यो ऽयं पवत एतस्मा उ हि गृह्णाति तस्मादाह वातस्य त्वा ध्राज्या इति पूष्णो रꣳह्या इत्येष वाव पूषा यो ऽयं पवत एतस्मा उ हि गृह्णाति तस्मादाह पूष्णो रꣳह्या इत्यूष्मणो व्यथिषदित्येष वा ऊष्मा यो ऽयं पवत एतस्मा उ हि गृह्णाति तस्मादाहोष्मणो व्यथिषदिति[19] ॥१२॥

24 अथ द्विरभिघार्य शासेन वा पार्श्वेन वा प्रयौति प्रयुतं द्वेष इति नाष्ट्रा एवैतद्रक्षाꣳस्यपहन्ति ॥१३॥

25,26 अथ समवत्तधान्यां यूरासिच्य तद्वदधाति जिह्वाꣳ हृदयं वक्षस्तनिमं मतस्ने वनिष्ठुमथ द्विरभिघारयति स यद्युभयतो हिरण्यशल्कौ करोति जीवं वै देवानाꣳ हविरमृतममृतानां घ्नन्त्यु वा एतत्पशुं यदेनमग्नौ जुह्वत्यायुर्वा अमृतꣳ हिरण्यमायुष्येवैनमेतदमृते ऽन्ततः प्रतिष्ठापयति तथा ह्यात उदेति तथा संजीवति तथैतज्जीवं देवानाꣳ हविर्भवत्यमृतममृतानाम् ॥१४॥

27 अथ यदक्ष्णयावद्यति सव्यस्य च दोष्णो दक्षिणायाश्च श्रोणेर्दक्षिणस्य च दोष्णः सव्यायाश्च श्रोणेस्तस्मादयमक्ष्णया पशुः पदः प्रहरति यद्ध सम्यगवद्येत्सम्यगेव पशुः पदः प्रहरेदथ यन्न शिरसो नाꣳसयोर्नानूकस्य नापरसक्थिनोरवद्यति[20] ॥१५॥

28.29a असुरा ह वा अग्रे पशुमालेभिरे तद्देवा भीषा नोपावेयुः सो हेयमदितिरुवाचेयं वै पृथिव्यदितिर्मा यूयमेतदाहद्ध्वमित्यहमेवैतस्याध्यक्षा भविष्यामि यथा यथैत एतेन चरिष्यन्तीति तेन ह यदा चेरुरथ होवाचान्यतरामाहुतिमहौषुरित्यन्यतरां पर्यशिषन्निति तद्यां पर्यशिषꣳस्तानीमान्यवदानानि येषामेतद्वद्यति तत एतद्देवाः

स्विष्टकृते ऽयङ्गान्यपाभजꣳस्तस्मात्तेषामुपभृत्यवद्यति ॥१६॥

अथ ह्यासुराः शिरसो ऽꣳसयोरनूकस्यापरसक्थिनोरित्यवाद्यꣳस्तस्मात्तेषां 29b.c
नावद्यत्यवत्तꣳ हि तेषां यातयामानि हि तान्यथ यद्वेव त्वष्टानूकमभ्यवामीत्तस्मा-
दनूकस्य नावद्यति ॥१७॥

अथाहाग्नीषोमाभ्यां छागस्य हविषो ऽनुब्रूहीत्याश्राव्याहाग्नीषोमाभ्यां 29d
छागस्य हविः प्रेष्येति न प्रस्थितमित्याह प्रसुते प्रस्थितमित्याह[११] ॥१८॥

सो ऽर्धर्चे वसाहोमं जुहोति स यदर्धर्चे वसाहोमं जुहोतीतो वा अय- 30
मूर्ध्व उच्छ्रितो रसो यमिदमिमाः प्रजा उपजीवन्त्यर्वाग्दिवो ऽस्मिन्नन्तरिक्षे रसो
वै वसाहोमस्तमेतꣳ रसमेतेन रसेन तीव्रीकरोत्येतस्मिन्नस एतꣳ रसं दधाति तस्मा-
दयꣳ रसो ऽद्यमानः पीयमानो न क्षीयते ॥१९॥

अथ यद्वेवार्धर्चे[१२] जुहोत्यर्धं वा इयं याज्याया अर्धमसौ द्यौरन्तरो वै द्यावा- 31
पृथिव्यावन्तरिक्षमन्तरिक्षाय[१३] वा एतज्जुहोति तस्मादुभावर्धर्चावन्तरेण जुहोति ॥२०॥

स जुहोति घृतं घृतपावानः पिबत वसां वसापावानः पिबत । अन्तरिक्षस्य 32
हविरसि स्वाहेत्येतेन वैश्वदेवेन यजुषा वैश्वदेवꣳ हीदमन्तरिक्षं यदेनमिमाः प्रजा या
इमाः प्राणन्ति[१४] चोदनन्ति[१५] च ता[१६] अनुसंचरन्ति[१७] तेन वैश्वदेवं वषट्कृते यज्जुह्वां
भवति तज्जुहोति ॥२१॥

अथ पृषदाज्यस्योपहत्याह वनस्पतये ऽनुब्रूहीत्याश्राव्याह वनस्पतये प्रेष्येति 33
वषट्कृते जुहोत्येतम्वेवैतद्वज्रं यूपं भागिनं करोत्येष हि वनस्पतिरेतम्वेवैतत्पशुꣳ
सोमं करोति सोमो हि वनस्पतिः स यदुभे आहुती अन्तरेणैतद्यजति[१८] तेन होभे
व्याप्नोति तेनोभे सोमो भवति तस्मादुभे आहुती अन्तरेणैतद्यजति ॥२२॥

पर्यस्यमान[१९] आह यदुपभृति भवत्यग्नये स्विष्टकृते ऽनुब्रूहीत्याश्राव्याहा- 34.35
ग्नये स्विष्टकृते प्रेष्येति वषट्कृते जुहोत्यथ यदिदं परिशिष्टं वसाहोमस्य भवति तेन
दिशो व्याधारयति दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः[२०] स्वाहेति पञ्च
दिशो रसो वै वसाहोमः सर्वास्वेवैतद्दिक्षु रसं दधाति तस्मादयं दिशि दिश्येव[२१]
रसो ऽभिगम्यते ॥२३॥

अथ पशुꣳ संमृशत्येषैव संमर्शनस्य वेला यदि तु मन्येतेमे[२२] विमथिष्यन्ते 36
य इमे ऽभितस्तिष्ठन्तीत्यपि पुरैव संमृशेदेषा त्वेव वेला ॥२४॥

37 स संमृशत्यैन्द्रः प्राणो अङ्गे अङ्गे निधीत ऐन्द्र उदानो अङ्गे अङ्गे निदीध इति तद्यदङ्गशो विकृत्तः क्रूरीकृतो भवति तदेनमेतत्प्राणोदानाभ्यामेव संदधाति तदेनꣳ समीरयति देव त्वष्टर्भूरि ते सꣳसमेतु सलक्ष्मा यद्विषुरूपं भवातीति कृत्स्नवृतमेवैनमेतत्सꣳस्करोति देवत्रा यन्तमवसे सखायो ऽनु त्वा मातापितरो मदन्त्विति कृत्स्नवृतमेवैनमेतत्सꣳस्कृत्य यत्रैतदग्नावहौषीत्तत्सर्वमनुसमस्यति तथास्यैष कृत्स्न एव सर्वतनूरमुष्मिल्लोके पशुः संभवति ॥२५॥ तृतीयं ब्राह्मणम् ॥

1 प्रचरंति MSS. 2 मेध्यतो B W. 3 Without accent the MSS. 4 ब्रवसीति B W, ब्रवसीति C. 5 Read शमितो? 6 तथैवैतज्जीवं C. 7 °नां MSS. 8 हरंति B W. 9 पशुमालें B W. 10 °भिवातं B W. 11 भवति C. 12 तस्याभिवांतस्य MSS. 13 वसा° B W. 14 आनु° B W. 15 जहात्य° MSS. 16 श्रोणेवरेताव° B. 17 °शल्काववदायाभि° MSS. 18 Cp. I. 2. 1. 10. 19 °दिति MSS. 20 °रवद्यति MSS. 21 °त्याह B W. 22 यद्वेवार्धचें B. 23 °पृथिव्याव° MSS. 24 Thus accented MSS. (some चोदनंति), cp. V. 1. 2. 9. 25 ता अनुसंचरंति C and without accent My, ता अनुचरंति B W. Read ता अनुसंचरन्ति? (cp. IV. 8. 4. 2). 26 °रेणैतद्यजति MSS. 27 पर्वस्य° MSS. 28 दिग्भ्यः B W. 29 दिश्येव MSS. 30 मन्येतेमे MSS.

M. III. 8. 4 K. IV. 8. 4

1 त्रीणि ह वै पशावेकादशान्येकादश प्रयाजा एकादशानुयाजा एकादशोपयज एतावान्हि[1] पशुर्दशेमाः[2] पाण्या अङ्गुलयो दशामूः पाद्या दशेमे प्राणाः प्राण उदानो व्यान एतमु वा अनु सर्वे पशवस्तस्मादेतानि त्रीणि पशावेकादशानि ॥१॥

2-4 तदाहुः किं तद्यज्ञे क्रियत इति यस्मात्सर्वेभ्यो ऽङ्गेभ्यः शिवः प्राण इति गुदो वै प्राणः स ह्ययं प्राङ्गाततस्तं प्राणो ऽनुसंचरति[3] स यदेतं त्रेधा करोति तृतीयं जुह्वां तृतीयमुपभृति तृतीयमुपयङ्भ्यस्तस्मात्सर्वेभ्यो ऽङ्गेभ्यः शिवः प्राणः ॥२॥

तदाहुः स वै पशुमालभेतेति य एनं मेध उपनयेदिति स यदि कृशः 5.6
स्याद्यत्रैवादो वपामुत्खिदन्ति तद्यदध्युदर्यं[1] मेदः[2] परिशिष्टꣳ स्यात्तद्गुदे समृषेद्गुदो[3] वै प्राणः स ह्ययं प्राङ्ततस्तं प्राणो ऽनुसंचरति[4] प्राण उ वै पशुर्यावद्ध्येव प्राणेन प्राणिति तावदेव पशुरथ यदा प्राणो ऽपक्रामत्यनर्थ्य एव दारु भूतः शेते स एष पशुर्यद्गुदो मेद[5] उ वै मेधस्तदेनं मेध उपनयत्येवं कुर्याद्यदि कृशः स्याद्यद्युवꣳसलः स्यान्नैतदाद्रियेत स्वयꣳ ह्येव स मेध उपेतो[6] भवति ॥३॥

अथ पृषदाज्यं गृह्णीते स यत्पृषदाज्यं गृह्णीते मिथुनमेवैतत्प्रजननं क्रियते 7
यदाज्यं च भवति दधि च द्वे[7] वै ते भवतो द्वन्द्वं वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते ॥४॥

तेनानुयाजेषु प्रचरन्ति पशवो वा अनुयाजाः पयः पृषदाज्यं पशुष्वेवैतत्पयो दधाति तदिदं पशुषु पयो हितं[8] प्राण उ वै पृषदाज्यमन्नꣳ हि पृषदाज्यमन्नꣳ हि प्राणस्तदिमं पुरस्तात्प्राणं दधात्यथ यत्पश्चाद्गुदेनोपयजति गुदो वै प्राणः स ह्ययं प्राङ्ततस्तं प्राणो ऽनुसंचरति[9] तदिदं पश्चात्प्राणं दधाति ताविमा उभयतः प्राणौ हितौ यश्चायमुपरिष्टाद्यश्चाधस्तात्स वा एष एको होता द्वाभ्यां वषट्करोति यश्चायं प्रचरति यश्चोपयजति स यद्यजन्तमुपयजति तस्मादुपयजो[10] नाम स यदुपयजति प्रैवैनं तज्जनयति तस्माज्जघनार्धं उपयजति जघनार्धाद्धि योषितः प्रजाः प्रजायन्ते ॥५॥ 8-10

स उपयजति समुद्रं गच्छ स्वाहेति रेतो वै समुद्र आपो हि समुद्र आपो 11
हि रेतो रेत एवैतत्सिञ्चति ॥६॥

देवꣳ सवितारं गच्छ स्वाहेति सविता वै देवानां प्रसविता सवितृप्रसूत 13
एवैतत्प्रजनयति ॥७॥

अन्तरिक्षं गच्छ स्वाहेत्यन्तरिक्षं वा अन्विमाः प्रजाः प्रजायन्ते ऽन्तरिक्षमेवै- 12
तदन्विमाः प्रजाः प्रजनयति ॥८॥

मित्रावरुणौ गच्छ स्वाहेति प्राणोदानौ वै मित्रावरुणौ प्राणोदानावेवैतदासु[11] 14
प्रजासु दधाति ताविमौ प्राणोदानावासु प्रजासु हितौ[12] ॥९॥

अहोरात्रे गच्छ स्वाहेत्यहोरात्रे वा अन्विमाः प्रजाः प्रजायन्ते ऽहोरात्रे 15
एवैतदन्विमाः प्रजाः प्रजनयति ॥१०॥

16 छन्दाꣳसि गच्छ स्वाहेति सप्त वै छन्दाꣳसि सप्त वै ग्राम्याः पशवः सप्तारण्यास्तानेवैतदुभयान्प्रजनयति ॥११॥

17.18 द्यावापृथिवी गच्छ स्वाहेत्येता एवैतत्प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां परिजग्राह ता इमाः प्रजा आभ्यां द्यावापृथिवीभ्यां परिगृहीतास्तद्यदेतावदेवाभविष्य-द्यावत्यो हैवाग्रे प्रजाः सृष्टास्तावत्य एवाभविष्यन्न प्राजनिष्यत[15] प्रत्येव जनयति ॥१२॥

III. 8. 5. 2 सोमं गच्छ स्वाहेति रेतो वै सोमो रेत एवैतत्सिञ्चति ॥१३॥

1 यज्ञं गच्छ स्वाहेति रेतो वै यज्ञो रेत एवैतत्सिञ्चति ॥१४॥

3 नभो दिव्यं गच्छ स्वाहेति रेतो वै नभो दिव्यमापो हि नभो दिव्यमापो हि[13] रेतो रेत एवैतत्सिञ्चति ॥१५॥

4.5 अग्निं वैश्वानरं गच्छ स्वाहेतीयं वै पृथिव्यग्निरिमामेवैतत्प्रतिष्ठामभीमाः प्रजाः प्रजनयति ता इमाः प्रजा इमां प्रतिष्ठामभि प्रजायन्ते स यदेतत्पुनः प्रजनयति तस्माद्विमाः प्रजाः पुनरभ्याकारं[17] प्रजायन्ते ऽथ मुखं विमृष्टे मनो मे हार्द्यच्छेति तथो आत्मानं न प्रवृणक्ति ॥१६॥

6.7 अथ जाघन्या पत्नीः संयाजयन्ति योषा वै पत्नी जघनार्धाद्वै[15] योषितः प्रजाः प्रजायन्ते तस्माज्जाघन्या पत्नीः संयाजयन्ति सो ऽन्तरतो देवानां पत्नीभ्यो ऽवद्यत्य-न्तरतो हि योषितः प्रजाः प्रजायन्त उपरिष्टादग्नये गृहपतये वृषा वा अग्निरुपरिष्टाद्वै योषां वृषाधिद्रवति तस्मादुपरिष्टादग्नये गृहपतये ॥१७॥

8-10 अथ हृदयशूलेनावभृथं यन्त्येतद्वै पशोरालभ्यमानस्य हृदयꣳ शुक्समवैति सा हृदयाच्छूलꣳ स यत्रैव श्रपयति[15] स हृदयशूलो ऽथालंजुषꣳ शृतमेव[19] परि-तृन्दन्ति[17] तस्माच्छ्रपयितव[14] एव ब्रूयात्स न परास्यो यद्धैनं परास्येदोषधीश्च ह वनस्पतीꣳश्च शुक्प्रविशेद्युद्यु[15] हैनमप्सु परास्येदपो[20] ह शुक्प्रविशेदवभृथमेवैनेनेयात्स यद्यहान्तिकमुदकꣳ स्यात्तदेवेयाद्यद्यु तस्मै ग्लायेद्बर्हिर्वेद्युदपात्रं निनीय तदार्द्रस्य च शुष्कस्य च संधा उपगूहति मापो मौषधीर्हिꣳसीरिति तथा नापो नौषधीर्हिनस्ति धान्नो धान्नो राजꣳस्ततो वरुण नो मुञ्च। यदाहुरन्या इति वरुणेति शपामह इति सर्वस्मान्नः किल्बिषादेनसो वरुणयात्प्रमुञ्चेत्येवैतदाह तथा सर्वस्मात्किल्बिषादेनसो वरुणयात्प्रमुच्यते ॥१८॥

11 अथाप उपस्पृशन्ति सुमित्रिया न आप ओषधयः सन्त्वित्येतस्माद्वै भीषा

यावदेतेन प्रचरन्ति तावदापश्चौषधयश्चापक्रामन्ति[11] ताभिरेवैतत्पुनर्मित्रधेयं कुरुते ता एनं पुनः प्रविशन्ति ता आत्मनि कुरुते तस्मादाह सुमित्रिया न आप ओषधयः सन्त्विति स वा एष नाग्नीषोमीयस्य पशोः क्रियते नाग्नेयस्य वशाया एव क्रियते सꣳस्थाꣳ ह्येषो ऽनुक्रियते तद्वेवापीतरयोः कृतो भवति ॥ १९ ॥ चतुर्थं ब्राह्मणम् ॥ अष्टमो ऽध्यायः ॥

1 एतावान्हि पशुर्दं° B My, एतावान्हि पशुर्दं° C. Read °र्दंशेमाः ? (cp. IV. 1. 4. 15). 2 नुसंचरति MSS. 3 °दध्युदर्यङ्मेदः C My. 4 Thus emended, संमृशें° My, समृशें° B W C. 5 मेध B W C (orig.). 6 उपेतो C. 7 द्वे B C W. 8 Without accent the MSS. 9 °याजो B. 10 °दासु MSS. 11 हितौ MSS. 12 Thus emended, प्राजनिष्यंतः MSS. 13 हि om. B W. 14 पुन° B W. 15 Read जघनार्धाद्धि (cp. IV. 8. 4. 5). 16 Without accent the MSS. 17 शृतमेव परिसृंदंति MSS. 18 तस्माच्छूपयितव C (sec. m.), तस्माच्छूपयित B W My, तस्माच्छूपयतिव C (orig.). Read तस्माच्छूपयितवा ? 19 °शेद्यदु B W C My. 20 °दपो B W. 21 °श्चापक्रामंति MSS.

K. IV. 9. 1 M. III. 9. 1

प्रजापतिर्ह वै प्रजाः ससृजानः स ह रिरिच्यान इव मेने तस्मादु ह पराच्यः 1
प्रजा बभूवुर्नास्मा अतिष्ठन्त श्रिये ऽन्नाद्याय ॥१॥

स हेक्षां चक्रे ऽरिक्ष्यहेति[1] यस्मा उ कामाय प्रजा असृक्षि न मे तत्समार्धि 2.3
पराच्यस्ता अभूवन्न मे तिष्ठन्ते श्रिये ऽन्नाद्यायेति स कथं नु पुनश्चात्मानमाप्यायये-
त्युप च मा प्रजाः समावर्तेरꣳस्तिष्ठेरन्मे श्रिये ऽन्नाद्यायेति ॥२॥

सो ऽर्चञ्छ्राम्यन्नेतामेकादशिनीं ददर्श तयेजे तयेष्ट्वा पुनर्हात्मानमाप्याययदु- 4.5
पैनं प्रजाः समावर्तन्तातिष्ठन्तास्मै श्रिये ऽन्नाद्याय स वशीयानेवेष्ट्वाभवत्तस्मै[2] कमेका-
दशिन्या यजेतैवꣳ हैव प्रजया पशुभिराप्यायत उपैनं प्रजाः समावर्तन्ते[3] तिष्ठन्ते[3]

ऽस्मै श्रिये ऽन्नाद्याय स वशीयानेवेद्वा भवति तस्मादेकादशिन्या यजेत ॥३॥

6 स एष आग्नेयः प्रथमः पशुर्भवत्यग्निर्वै देवतानां मुखꣳ स प्रजापतिः स एष यजमानो निदानेन ॥४॥

7 अथ सारस्वतो वाग्वै सरस्वती वाचैवैतत्प्रजापतिराप्यायत वागेनमुपसमावर्तत वाचमनुकामात्मनो ऽकुरुत वाचो एवैष एतदाप्यायते वागेनमुपसमावर्तते वाचमनुकामात्मनः कुरुते ॥५॥

8 अथ सौम्यो ऽन्नं वै सोमो ऽन्नेनैवैतत्प्रजापतिराप्यायतान्नमेनमुपसमावर्तताऽन्नमनुकमात्मनो ऽकुरुताऽन्नेनो एवैष एतदाप्यायते ऽन्नमेनमुपसमावर्तते ऽन्नमनुकमात्मनः कुरुते ॥६॥

9 स यदन्वङ् भवति सारस्वतꣳ सौम्यो वाग्वै सरस्वत्यन्नꣳ सोमस्तस्माद्यो वाचा प्रसाम्यन्नाद एव भावुकः ॥७॥

10 अथ पौष्णः पशवो वै पूषा पशुभिरेवैतत्प्रजापतिराप्यायत पशव एनमुपसमावर्तन्त पशूनुकानात्मनो ऽकुरुत पशुभिर्वैषꣳ एतदाप्यायते पशव एनमुपसमावर्तन्ते पशूनुकानात्मनः कुरुते ॥८॥

11 अथ बार्हस्पत्यो ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैतत्प्रजापतिराप्यायत ब्रह्मैनमुपसमावर्तत ब्रह्मानुकमात्मनो ऽकुरुत ब्रह्मणो एवैष एतदाप्यायते ब्रह्मैनमुपसमावर्तते ब्रह्मानुकमात्मनः कुरुते ॥९॥

12 स यदन्वङ् भवति पौष्णं बार्हस्पत्यो ब्रह्म वै बृहस्पतिः पशवः पूषा तस्माद्ब्राह्मण एव पशूनपिधृष्णुतमो यदस्य पुरआहिता मुखआहिताः पशवो भवन्त्युत हि सर्वं दत्त्वा चरति ॥१०॥

13 अथ वैश्वदेवः सर्वं वै विश्वे देवाः सर्वेणैवैतत्प्रजापतिराप्यायत सर्वमेनमुपसमावर्तत सर्वमनुकमात्मनो ऽकुरुत सर्वेणो एवैष एतदाप्यायते सर्वमेनमुपसमावर्तते सर्वमनुकमात्मनः कुरुते ॥११॥

14 स यदन्वङ् भवति बार्हस्पत्यं वैश्वदेवो ब्रह्म वै बृहस्पतिः सर्वं विश्वे देवा अस्यैवैतत्सर्वस्य ब्रह्म मुखं करोति तस्मादस्य सर्वस्य ब्राह्मण एव मुखम् ॥१२॥

15 अथैन्द्रः क्षत्रं वै वीर्यमिन्द्रः क्षत्रेणैवैतद्वीर्येण प्रजापतिराप्यायत क्षत्रमेनं वीर्यमुपसमावर्तत क्षत्रं वीर्यमनुकमात्मनो ऽकुरुत क्षत्रेणो एवैष एतद्वीर्येणाप्यायते क्षत्रमेनं वीर्यमुपसमावर्तते क्षत्रं वीर्यमनुकमात्मनः कुरुते ॥१३॥

स यदन्वङ् भवति वैश्वदेवमैन्द्रः क्षत्रं वा इन्द्रो विशो विश्वे देवा अन्नमु 16
वै विशः क्षत्रस्यैवैतत्पुरस्तादन्नं करोति तस्मात्क्षत्रियो ऽन्नादो यदस्य पुरआहितं मुखआहितमन्नं भवति ॥१४॥

अथ मारुतो विशो वै मरुतो देवविशं भूमो वै विड्भूम्नैवैतत्प्रजापतिरा- 17
प्यायत[13] भूमैनमुपसमावर्तत भूमानमनुकमात्मनो ऽकुरुत भूम्नो एवैष एतदाप्यायते भूमैनमुपसमावर्तते भूमानमनुकमात्मनः कुरुते[14] ॥१५॥

स यदन्वङ् भवत्यैन्द्रं मारुतः क्षत्रं वा इन्द्रो विशो विश्वे देवा विशो मरुत 18
उभयत एवैतत्क्षत्रं विशा परिवृ[15]हति तदिदं क्षत्रमुभयतो विशा परिवृढ्हम् ॥१६॥

अथैन्द्राग्नस्तेजो वा अग्निरिन्द्रियं वीर्यमिन्द्रस्तदुभाभ्यामेवैताभ्यां वीर्याभ्यां 19
प्रजापतिराप्यायतोभे एनमेते वीर्ये उपसमावर्तेतामुभे एते वीर्ये अनुके आत्मनो ऽकुरुतोभाभ्यामेवैष एताभ्यां वीर्याभ्यामाप्यायत उभे एनमेते वीर्य उपसमावर्तेते उभे एते वीर्ये अनुके आत्मनः कुरुते ॥१७॥

अथ सावित्रः सविता वै देवानां प्रसविता तथो हास्मा एते सवितृप्रसूताः 20
सर्वे कामाः समृध्यन्ते ॥१८॥

अथ वरुणो वरुण्यादेवैतत्सर्वस्मात्किल्बिषादेनसो ऽन्ततो वरुणपाशात्प्रजाः 21
प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायन्ते तस्माद्वारुणः ॥१९॥

स यदि यूपैकादशिन्यामेतां पञ्चैकादशिनीमालभेताग्नेयमग्निष्ठ[16] आलभे- 22-27
ताथेतरान्यथापूर्वं यद्युवेकयूप[17] आग्नेयं प्रथममालभेताथेतराननूचो[18] यथापूर्वं तान्य-
त्रोदीचो नयेयुस्तदाग्नेयं प्रथमं नयेयुरथेतराननूचो यथापूर्वं तान्यत्र संज्ञपये-
युस्तदाग्नेयमवरार्धे संज्ञपयेयुरथेतरान्यथापूर्वं[19] पराचस्तैरु श्रुतैर्यथान्तरं प्रच-
रन्ति ॥२०॥ प्रथमं ब्राह्मणम् ॥

1 °रिष्यहेति C My. 2 Thus MSS. Read वसी°? 3 °वर्त्ततेतिष्ठते B C W. 4 Read वसीयान् as before. 5 °राप्यायत B W. 6 एतदाप्यायते C. 7 Read एव भावुकः? 8 I. e. पशुभिः। उ। एव। एषः. 9 Read perhaps पशूनभिष्ट°. 10 Thus MSS. 11 दृत्वा MSS. 12 °राप्यायत B C W. 13 °राप्यायत B W. 14 करोति C. 15 पञ्चैकादशिनी° B W,

पश्चेकादशिनी° C, °मालभेता° B C W. 16 यद्युवेकयूप B, यद्युवेकयूप C W. 17 प्रथममालभेता° B C W. 18 संज्ञपये° C.

M. III. 9. 2 K. IV. 9. 2

1 स वै वसतीवरीराहरति स यद्वसतीवरीराहरति यत्र वै यज्ञस्य शिरोऽच्छिद्यत तस्य रसो द्रुत्वापः प्राविशत्स एष रस एति या एता आपः स्यन्दन्ते तेनैवैना एतद्रसेन स्यन्दमाना मन्यन्ते यः स यज्ञस्य रसस्तमेवैतद्रसꣳ स्यन्दमानं मन्यन्ते ॥१॥

2.3 स यद्वसतीवरीराहरति य एव स यज्ञस्य रसो ऽपः प्राविशत्तमेवैतद्रसमाहरति तं यज्ञे दधाति तस्मादेनाः सर्वेषु सवनेषु त्रेधानुविभजति सर्वेष्वेवैतत्सवनेषु रसं दधाति सर्वाण्येव सरसानि करोति तस्माद्वाव वसतीवरीराहरति ॥२॥

4 ताः स्यन्दमानानां गृह्णीयादैद्धि स यज्ञस्य रस एतमु वाव तं यज्ञस्य रसꣳ स्यन्दमानं मन्यन्ते या एता आपः स्यन्दन्ते तेनैवैना एतद्रसेन स्यन्दमाना मन्यन्ते यः स यज्ञस्य रसस्तत्प्रत्यक्षं यज्ञस्य रसं गृह्णानीति तस्मात्स्यन्दमानानां गृह्णीयात् ॥३॥

5 गुप्त्य उ वा एता गृह्णाति गोपीथाय सर्वमु वा इदमन्यदीलयत्यपि यो ऽयं पवते स ईलयत्यथैता एव नेलयन्ति तस्मात्स्यन्दमानानां गृह्णीयात् ॥४॥

6.7 स दिवा गृह्णीयात्पश्यन्यज्ञस्य रसं गृह्णानीत्येतस्मा उ वा एता गृह्णाति य एष तपति विश्वेभ्यो हि देवेभ्यो गृह्यत्येते हि रश्मयो विश्वे देवा दिवो वा एष तस्मादिवैव गृह्णीयादेतदु वा एतस्मिन्हविष्येतासु वसतीवरीष्वेताꣳ रात्रिं देवा उपवसन्ति यैषोपवसथ्या स यथा श्रेयसे ऽभ्यागमिष्यत आवसथमुपकल्पयेदेवमेतत्तस्मादिवैव गृह्णीयात् ॥५॥

8.9 अथ यद्यगृहीता अभ्यस्तमियाद्यदि पुरेजानः स्याद्य एवास्य निनाह्यः कुम्भस्तस्माद्गृह्णीयात्पुरा वै तस्य दिवा गृहीता भवन्ति यः पुरेजानो भवति यद्यात्मनानीजानः स्याद्यद्युपावसितो वा प्रतिवेशो वा पुरेजानः स्यात्तस्य निनाह्यात्कुम्भाद्गृह्णीयात्पुरा वै तस्य दिवा गृहीता भवन्ति यः पुरेजानो भवति तस्मात्तस्य निनाह्यात्कुम्भाद्गृह्णीयादथो उपर्युपर्युल्कुषीं धारयेयुस्तदेतस्य रूपं क्रियते य एष तपत्यथो हिरण्यं तद्वेवैतस्य रूपं क्रियते य एष तपत्येषो प्रायश्चित्तिः ॥६॥

10-12 अथ वा अतो गृह्णात्येव हविष्मतीरिमा आपो हविष्मां२° आविवासतीति

यज्ञस्य वा आसु रसः प्रविष्टस्तस्मादाह हविष्मतीरिमा आप इति हविष्मां३[1] आविवासतीति यजमानो वै हविष्मान्त्स एना आविवासति हविष्मान्देवो अध्वर इति यज्ञो वा अध्वरस्तदेतं यज्ञमाह यस्मा एतद्गृह्णाति हविष्मां३[2] अस्तु सूर्य इत्येतस्मै वा एता गृह्णाति य एष तपति विश्वेभ्यो हि देवेभ्यो गृह्णात्येते हि रश्मयो विश्वे देवास्तस्मादाह हविष्मां३[3] अस्तु सूर्य इति[4] ॥७॥

अथाग्रेण पत्नीं जघनेन गार्हपत्यं तत्सादयत्यग्नेर्वो ऽपन्नगृहस्य सदसि सादयामीत्यग्नेर्वो ऽनार्तगृहस्य सदसि सादयामीत्येवैतदाह यदाहाग्नेर्वो ऽपन्नगृहस्य सदसि सादयामीत्यथ यदा पशुना संतिष्ठते ॥८॥ 13

अथ परिहरति स जघनेन पत्नीं परीत्य दक्षिणेन परिहृत्योत्तरवेदेर्दक्षिणस्याꣳ श्रोणौ सादयतीन्द्राग्न्योर्भागधेयी स्थेति विश्वेभ्यो वा एतद्देवेभ्यो गृह्णात्येतद्धविरेता वसतीवरीरिन्द्राग्नी उ वै सर्वा देवतास्तस्मादाहेन्द्राग्न्योर्भागधेयी स्थेति ॥९॥ 14

स तेनैव पुनराहृत्याग्रेण पत्नीं निधाय जघनेन परीत्योत्तरेण परिहृत्योत्तरवेदेरुत्तरस्याꣳ श्रोणौ सादयति मित्रावरुणयोर्भागधेयी स्थेति हैके सादयन्ति तदु तथा न सादयेदिति तथा संपद्विच्यते न तथा संपत्संपद्यत इन्द्राग्न्योर्भागधेयी स्थेत्येतावतैव सादयेत्तथैव संपत्संपद्यते ॥१०॥ 15

ता वा एता गुप्तये परिहरति गोपीथाय तदग्निरह[5] पुरस्ताद्गोपायत्यथैताः[6] समन्तं नाष्ट्रा रक्षाꣳस्यपघ्नत्यः परिप्लवन्ते[7] ॥११॥ 16a

ता आग्नीध्रे सादयति विश्वेषां देवानां भागधेयी स्थेति तदासु विश्वान्देवान्त्संवेशयति ते वै वसतां वरं यद्विश्वे देवास्तस्माद्वसतीवर्यो नाम वसताꣳ ह वरं भवति य एवमेतद्वेद ॥१२॥ 16b

तानि वा एतानि सप्त यजूꣳषि ततश्चतुर्भिर्गृह्णात्येकेन गार्हपत्ये सादयति समानेन परिहरत्येकेनाग्नीध्रे यत्र वै वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै शक्करी परार्ध्या छन्दसां तस्मादेतैः सप्तभिर्यजुर्भिर्गृह्णात्येतामभिसंपदम्[8] ॥१३॥ द्वितीयं ब्राह्मणम् ॥ 17

1 शिरो C. 2 स्यंदते B W. 3 सरसानि B C W. 4 Thus emended, गृह्णीयादैध्य B W My, गृह्णीयात् । एध्य C. 5 मन्यते B. 6 With ळ B

W My, with ल C. 7 °सथ्या MSS. 8 The passage between 8...8 in B is not marked with accents and is struck out. 9 धारयें° B C W. 10 हविष्मां ऽ B W. 11 इति MSS. 12 तदग्निरहः MSS. 13 °द्रोपायंत्य° MSS. 14 °ध्रुवंते B (orig.), °प्लुवंते B (sec. m.) and W. 15 Thus also the Mâdhy. rec. Read °त्येतामभि संपदम् ?

M. III. 9. 3 K. IV. 9. 3

2 स वै सोममुपावहरति स यत्सोममुपावहरतीयं वै प्रतिष्ठेयं जनूरासां प्रजानां तदेनमिमां प्रतिष्ठामिमां जनूमभ्युपावहरति तमस्यां प्रतिष्ठायां तनुते तस्मात्सोममुपावहरति ॥१॥

3b संमुखेषु ग्रावसु क्षत्रं वै सोमो विशो ग्रावाणः क्षत्रमेवैतद्विश्यध्यूहत्यथ यत्संमुखेषु क्षत्रायैवैतद्विशꣳ संमुखामविवादिनीं करोति तस्मात्संमुखेषु ग्रावसु[1] ॥२॥

3a सो[2] ऽन्तरेषे[3] उपावहरति यज्ञो ऽनस्तथा न बहिर्धा यज्ञात्करोति तदन्वारब्धो यजमानो भवति ॥३॥

4.5 स उपावहरति हृदे त्वा मनसे त्वेति हृदयेन वै मनसा यजमानस्तं कामं कामयते[3] यस्मै कामाय यजते तस्मादाह हृदे त्वा मनसे त्वेति दिवे त्वा सूर्याय त्वेति देवलोकाय त्वेत्येवैतदाह यदाह दिवे त्वेति सूर्याय त्वेति देवेभ्यस्त्वेत्येवैतदाहोर्ध्वो अध्वरं दिवि देवेषु होत्रा[4] यच्छेति यज्ञो वा अध्वर ऊर्ध्वमिमं यज्ञं दिवि देवेषु धेहीत्येवैतदाह ॥४॥

6.7 सोम राजन्विश्वास्त्वं प्रजा उपावरोहेति तदेनमाभ्यः प्रजाभ्य उपावहरत्याधिपत्याय राज्यायानुसृज्य जपति विश्वास्त्वां प्रजा उपावरोहन्त्वित्ययथायथमिव वा इदं करोति यदाह विश्वास्त्वं प्रजा उपावरोहेत्यथ यदाह विश्वास्त्वां प्रजा उपावरोहन्त्विति तद्यथायथं करोति तस्मात्क्षत्रियमुपर्यासीनमधस्ताद्विश इमाः प्रजा उपासते ॥५॥

8 अथोपसन्नो होता भवति यत्रैतदासीनः प्रातरनुवाकमन्वाहाथ समिधमभ्याधायाह देवेभ्यः प्रातर्यावभ्यो ऽनुब्रूहीति छन्दोभ्यस्तदनुवाच[5] आहाथ यदेताꣳ

समिधमभ्यादधाति छन्दाꣳस्येवैतया समिन्द्धे ॥६॥

तदु हैक आहुः प्रातर्यावभ्यो ऽनुब्रूहीत्येव न देवेभ्य इति तदु तथा न 9
ब्रूयाच्छन्दाꣳसि वै देवाः प्रातर्यावाणश्छन्दाꣳस्यु वा अनुयाजा देवेभ्यः प्रेष्य
देवान्यजेत्यु वा अनुयाजानाह तस्माद्ब्रूयाद्देवेभ्यः प्रातर्यावभ्यो ऽनुब्रूहीत्येव ॥७॥

स यदतो[६] होतान्वाह यातयामानि वै देवैश्छन्दाꣳसि स्वगꣳ ह्येभिर्लोकꣳ 10
समाश्नवत नो वा अत्र स्तुवते न शꣳसन्ति छन्दाꣳस्येवान्वाह छन्दाꣳस्येवैतत्पुन-
राप्याययत्ययातयामानि करोति तैरयातयामभिर्यज्ञं तन्वते[७] तस्माद्वा एतद्धोता
प्रातरनुवाकमन्वाह ॥८॥

तदाहुः कः प्रातरनुवाकस्य प्रतिगर इति तदाहुर्निमिषन्नेवोपासीत सो 11a
ऽस्य प्रतिगर इति तदु नाद्रियेत यद्येनं निद्रास्यादपि[८] काममेव स्वप्यात् ॥९॥

अथ परिधानीयायां परिहितायां प्रचरणीति स्रुग्भवति तस्यां चतुर्गृही- 11b.12
तमाज्यं गृहीत्वा हुत्वा प्रसुते ऽपो ऽच्छैति स यद्धुत्वा प्रसुते ऽपो ऽच्छैति यत्र
वै यज्ञस्य शिरो ऽच्छिद्यत तस्य रसो द्रुत्वापः प्राविशत्तं वा अदः पूर्वेद्युर्वसती-
वरीभिराहरत्यथ यः[९] सः[१०] रसस्तत्र[११] परिशिष्टो भवति तमेवैतत्प्रसुते ऽच्छैति तमाहरति
तं यज्ञे दधाति तस्मात्प्रसुते ऽपो ऽच्छैति ॥१०॥

अथ यदेतामाहुतिं जुहोति य एव स यज्ञस्य रसो ऽपः प्राविशत्तमेवैतदभि- 13
प्रस्तृणीते तमारुन्द्धे याभ्य उ च देवताभ्य एतामाहुतिं जुहोति ता उ चैवास्मै देवताः
प्रीता एतं यज्ञस्य रसꣳ संनमन्ति तस्माद्वा एतामाहुतिं जुहोति ॥११॥

स जुहोति शृणोत्वग्निः समिधा हवं म इति शृणोतु मे ऽग्निरनु मे जाना- 14
त्वित्येवैतदाह यदाह शृणोत्वग्निः समिधा हवं म इति शृण्वन्त्वापो धिषणाश्च
देवीरिति शृण्वन्तु म आपो ऽनु मे जानन्त्वित्येवैतदाह श्रोता ग्रावाणो विदुषो न
यज्ञमिति शृण्वन्तु मे ग्रावाणो[१०] ऽनु मे जानन्त्वित्येवैतदाह विदुषो न यज्ञमिति वि-
द्वाꣳसो हि ग्रावाणः शृणोतु देवः सविता[११] हवं म इति सविता वै देवानां प्रसविता
सवितृप्रसूत एवैतं यज्ञस्य रसमच्छैति ॥१२॥

अथापरं चतुर्गृहीतमाज्यं गृहीत्वाहाप इष्य[१२] होतरित्यप इच्छ होतरित्येवै- 15
तदाह स यदतो होतान्वाह य एव स यज्ञस्य रसो ऽपः प्राविशत्तमेवैतदभिप्रस्तृणीते
तमारुन्द्धे तमपो याचति यथो चैनानन्तरा नाष्ट्रा रक्षाꣳसि न विन्देयुरपो ऽच्छ्यत[१३]

एवमु चैवैष एतदनुतिष्ठते ॥१३॥

16 अथ संप्रेष्यति मैत्रावरुणस्य चमसाध्वर्यवेहि नेष्टः पत्नीरुदानयैकधनिन एताग्नीच्चात्वाले वसतीवरीभिः प्रत्युपतिष्ठासै होतृचमसेन चेति स एष संप्रैष एवैतद्व्रतः करिष्यन्तो भवन्ति तत्संप्रैषीत्तेऽग्रेणाग्नीध्रं जघनेन चात्वालमेतेनोदञ्चो यन्त्येष हि यज्ञस्य द्वाः ॥१४॥

17-19 तद्यदपि पत्नीर्नयन्ति यो वै स यज्ञस्य रसो ऽपः प्राविशत्तꣳ ह गन्धर्वा ररक्षुस्ते ह देवा ऊचुरियमु[15] न्वा[16] इह नाष्ट्रायनि[17] यद्गन्धर्वा इति कथमभये ऽनाष्ट्रे निवाते यज्ञस्य रसमाहरिष्याम इति ॥१५॥

20-22 ते होचुर्योषित्कामा वै गन्धर्वा इति पत्नीरपि नयामेति होचुस्ते पत्नीष्वेव गन्धर्वा गर्धिष्यन्ति पत्नीषु सङ्क्ष्यन्त[18] इत्यथ वयमभये ऽनाष्ट्रे निवाते यज्ञस्य रसमाहरिष्याम इति ते[19] पत्नीरनयꣳस्ते[20] पत्नीष्वेव गन्धर्वा अगृध्यन्पत्नीष्वसज्यन्ताथ देवा अभये ऽनाष्ट्रे निवाते यज्ञस्य रसमाहरꣳस्तथो वा एते पत्नीभिः सह यन्ति ते पत्नीष्वेव गन्धर्वा गृध्यन्ति पत्नीषु सज्यन्ते ऽथैते ऽभये ऽनाष्ट्रे निवाते यज्ञस्य रसमाहरन्ति तस्मात्पत्नीभिः सह यन्ति ॥१६॥

23.24 ते यां दिशमापो भवन्ति तद्यन्ति स यत्रापो विन्दति तदपो ऽभिजुहोति स यदपो ऽभिजुहोति यो वै स यज्ञस्य रसो ऽपः प्राविशत्स एतामाहुतिꣳ हुतामुपसमैति तां प्रत्युत्तिष्ठति तमाविष्कृत्य गृह्णात्यप उ चैवैतं यज्ञस्य रसं याचति तस्मादपो ऽभिजुहोति[21] ॥१७॥

25 सो ऽभिजुहोति देवीरापो अपां नपादिति देव्यो ह्यापस्तस्मादाह देवीरापो अपां नपादिति यो व ऊर्मिर्हविष्य इति यो व ऊर्मिर्यज्ञिय इत्येवैतदाहेन्द्रियावान्मदिन्तम इति वीर्यवानित्येवैतदाह यदाहेन्द्रियावानिति मदिन्तम इति स्वादिष्ठ इत्येवैतदाह तं देवेभ्यो देवत्रा दातेत्येतं[22] यज्ञस्य रसमयाचीच्छुक्रपेभ्य इति सत्यꣳ हि देवाः सत्यꣳ हि शुक्रं येषां भाग स्थ स्वाहेति तेषांꣳ हि भागो यो यज्ञस्य रसस्तस्मादाह येषां भाग स्थ स्वाहेति[23] ॥१८॥

26.27 अथ मैत्रावरुणचमसेनैतामाहुतिमपप्लावयति कार्षिरसीति यथा वा अग्निनाङ्गारः प्सातः स्यादेवं वा एषाहुतिस्तया देवतया प्साता भवति यस्या एनां जुहोति तस्मादाह कार्षिरसीत्येताभिर्वै राजानमुपसृक्ष्यन्भवति[24] या एता मैत्रावरुणचमस

आपो भवन्ति वज्रो वा आज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसानीति तस्माद्वा एतामाहुतिमपप्लावयति समुद्रस्य त्वाक्षित्या उन्नयामीति गृह्णात्यापो वै समुद्रो ऽप्स्वेवैतदक्षितिं दधाति तस्मादापो न क्षीयन्ते यदाभिरिदं भुञ्जते[३४] ॥१९॥

स यन्मैत्रावरुणचमसेन यज्ञो वै देवेभ्यो[३५] ऽपचक्राम तं देवाः प्रैषैः[३६] प्रैषमैच्छन्त[३७] निविद्भिर्न्यवेदयन्त[३७] पुरोरुग्भिः प्रारोचयन्त तमेवमन्वविन्दꣳस्तथो वा एष एतं यज्ञस्य रसमनुविन्दति तदन्वेकधनान्गृह्णते तदनु[३८] पात्नेजनान् ॥२०॥ 28

अथायन्ति त उपर्युपरि चात्वालꣳ सꣳस्पर्शयन्ति समापो अद्भिरग्मत समोषधीभिरोषधीरिति यश्चायं पूर्वेद्युर्गृहीतो यज्ञस्य रसो यश्चायमिदानीमिति तमेतदुभयꣳ सꣳसृजाम इति ॥२१॥ 29

तद्वैके समवनयन्त्येवाबैव[३९] मैत्रावरुणचमसाद्वसतीवरीषु नयन्त्यव वसतीवरीभ्यो मैत्रावरुणचमस एतदेनाः प्रत्यक्षꣳ सꣳसृजाम इति वदन्तस्तदु तथा न कुर्याद्यद्वा एना उभयीराधवनीये समवनयति तदेवैनाः सꣳसृजति तस्माद्वेतद्यजुरेव जपेत् ॥२२॥ 30a

स यदुपर्युपरि चात्वालं यत्र वै देवा यज्ञेन स्वर्गं लोकꣳ समाश्नुवत त एतस्मादेव चात्वालादूर्ध्वा उच्चक्रमुस्तमेवैतत्पन्थाꣳ स्वर्ग्यं देवयानं यजमानमनुसंख्यापयति ॥२३॥ 30b

अथैति तꣳ होता पृच्छत्यवेरपो[४०] ऽध्वर्याऽवित्यविदो ऽपाऽ इत्येवैतदाहोतेव ननमुरिति प्रत्याहाविदमथो मे ऽनꣳसतेत्येवैतदाह ॥२४॥ 31

स यदि प्रचरण्याꣳ सꣳस्रवः परिशिष्टो भवत्यलमाहुतये तमेव जुहुयाद्यद्यु स नालमाहुतये भवत्यपरं चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जनाः । स यन्ता शश्वतीरिषः स्वाहेत्याग्नेय्या जुहोत्यग्नावेवाग्निष्टोमं प्रतिष्ठापयति मर्त्यवत्या पुरुषसंमितो हि यज्ञ एवं जुहुयाद्यद्यग्निष्टोमः स्याद्यद्युक्थ्यः स्यान्मध्यममेव परिधिमुपस्पृशेत्त्रयः परिधयस्त्रीण्युक्थान्यैतैर्हि[४१] तर्हि यज्ञः प्रतितिष्ठति यद्यु षोलशी वातिरात्रो वा वाजपेयो वा स्यान्न जुहुयान्नोपस्पृशेत्समुद्रैव[४२] प्रपद्येतैवमु[४३] यज्ञक्रतून्यथायथं व्याकरोति ॥२५॥ 32.33

अथैते ऽयुङ्नायुङ्नमेकधनाः स्युस्त्रयो वा पञ्च वा सप्त वा नव वा नवदश[४३] वा यथायुङ्नायुङ्नमेवं द्वन्द्वं मिथुनं प्रजननमथ यो ऽयमेको ऽतिरिच्यते स यजमानस्य 34

श्रियमभ्यतिरिच्यते स वा एषोऽ स एको धनं[34] यो यजमानस्य श्रियमभ्यतिरिच्यते[35] तस्मादेकधना नाम ॥२६॥ तृतीयं ब्राह्मणम् ॥

1 °सु B W. 2 सांतरे। ष B W. 3 कामयते MSS. 4 होत्रा B W. 5 °भ्यस्तदनुवाच MSS. 6 यदतो MSS. 7 तन्वते B C W. 8 Thus B W C, निंद्रास्या° My. Read निद्राया° ? 9 Thus conjecturally, यत्समस्तत्र MSS., but C sec. m. यसमस्तत्र. 10 ग्रावाणो B C W. 11 सविता B W. 12 यिष्य B C, इछ My W. 13 Without accent the MSS. 14 त° MSS. 15 Conjectural reading, ऊचुरियमन्वा MSS., cp. I. 4. 3. 2, VII. 5. 3. 3-5. 16 ? Obviously corrupt. °यनि C W My, °यनिं B. 17 संक्ष्यंत B C W. 18 तत् C. 19 पत्नीरनयऽस्ते C. 20 °ति B. 21 This difference from Mādhyandina S. VI. 27 is not noted by Weber; cp. Kāṭh. III. 9 : 27. 19. 22 °हेति MSS. 23 राजानमपस्त° B W My. 24 भुंजते MSS. 25 देवेभ्यो B W. 26 Thus emended, प्रैषीः MSS. 27 Thus accented MSS. Read प्रैषमैच्छन्त निविद्धिन्वंवेदयन्त ? 28 तद्वनु B W. 29 °नयंति। एवावैव MSS. (°नयन्ति। एव। अव। एव). 30 °रपो B C W. 31 °ण्युक्थ्या-न्न्येतैर्हि B W, °ण्युक्थान्न्येतैर्हि C; My as above (but without accent). 32 °घैव प्रपद्येतैवमु B C W. 33 न° C. 34 धनं MSS. 35 °भ्यतिरिच्यते C.

M. III. 9. 4 K. IV. 9. 4

1 ते वा एते ऽधिषवणे पर्युपविशन्त्यथास्याऽ हिरण्यं बभ्रीते स यदस्याऽ हिरण्यं बभ्रीते द्वयं वा इदं न तृतीयमस्ति सत्यं चैवानृतं च ततः सत्यं देवा अनृतं मनुष्या अग्नेरु वा एतद्रेतो यद्धिरण्यऽ सत्येनाऽशूनुपस्पृशानीति सत्येन सोमं परा-

हणानीति तस्मादस्याꣳ हिरण्यं बभ्रीते ॥१॥

अथ ग्रावाणमादत्ते स यं वाव प्रथममादत्ते स एवोपाꣳशुसवनस्ते वा एते 2
ऽश्ममया भवन्ति स यदेते ऽश्ममया भवन्ति दिवि वै सोमो देवो हि सोमो वृत्रो वै सोमस्तस्यैतच्छरीरं यद्गिरयो यदश्मानो घ्नन्त्यु वा एनमेतद्यदभिषुण्वन्ति तदेतेनैवैतं घ्नन्ति स्वेनैवैनं तच्छरीरेण समर्धयतिᵗ कृत्स्नं करोति तथो अनेनस्यं भवति तस्माद्वा एते ऽश्ममया भवन्ति ॥२॥

तमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। 3
आददे रावासीति सविता वै देवानां प्रसविता तस्मादाह देवस्य त्वा सवितुः प्रसव इत्यश्विनोर्बाहुभ्यामित्यश्विना उ वै देवानामध्वर्यू तयोरेवैतद्बाहुभ्यामादत्ते न स्वाभ्यां पूष्णो हस्ताभ्यामिति पूषा वै देवानां भागदुघो ऽशनं पाणिभ्यामुपनिधाता तस्यैवैतद्धस्ताभ्यामादत्ते न स्वाभ्यां तन्नᵗ वा एतस्य मनुष्यो भर्ता वज्रो ह्येष तदेनं देवताभिरेवोद्यच्छति देवताभिर्बिभर्ति तथैनमेष वज्रो न हिनस्ति ॥३॥

रावासीति यदा वा एतेनाभिषुण्वन्त्यथाहुतिर्भवति यदाहुतिरथ दक्षिणा 4.5
तद्धयेष उभयꣳ रासते तस्मादाह रावासीति गभीरमिममध्वरं कृधीति यज्ञो वा अध्वरो महान्तामिमं यज्ञं कुर्वित्येवैतदाहेन्द्राय सुषूतममितीन्द्रो यज्ञस्य देवता तस्मादाहेन्द्रायेति सुषूतममिति सुसुततममित्येवैतदाहोत्तमेन पवित्रेत्येष वा उत्तमः पवित्रंयत्सोमस्तस्मादाहोत्तमेन पवित्रेत्यूर्जस्वन्तं मधुमन्तं पयस्वन्तमिति रसवन्तमित्येवैतदाह नात्र तिरोहितमिवास्ति यदाहोर्जस्वन्तं मधुमन्तं पयस्वन्तमित्यथ वाचं यच्छति ॥४॥

देवा ह वै यज्ञं तन्वाना असुररक्षसानामासङ्गाद्बिभयां चक्रुस्ते होचुरसुर- 6
रक्षसानामासङ्गाद्बिभ्यत उपाꣳशु यजामहा इति ते वाचमयच्छन्वाग्वै यज्ञस्त उपाꣳश्वयजन्त तथो वा एष एतद्वाचं यच्छति वाग्वै यज्ञः स उपाꣳशु यजते तस्माद्वाचं यच्छति ॥५॥

अथ निग्राभ्यासु यजमानं वाचयति निग्राभ्या स्थ देवश्रुतस्तर्पयत मा। 7
मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत। आत्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्निति रसो वा आपस्तमेवासामेतदाशास्ते सर्वं च म आत्मानंᵗ तर्पयतेति पशूꣳश्च मे तर्पयत गणाꣳश्च मे तर्पयत गणाश्च मे मा वितृषन्नितिᵗ ॥६॥

8 अथोपाꣳशुसवनमभिमिमीते स यदेतं मिमीते तस्माद्वियं मनुष्येषु मात्रा यत्कौष्ठो यत्कुम्भी येयं का च मनुष्येषु मात्रा व्यान उ ह वा अस्योपाꣳशुसवनः स विवस्वानादित्यो निदानेन घ्नन्त्यु वा एनमेतद्यदभिषुण्वन्ति तथा ह्यत उदेति तथा संजीवति न हि स्वो व्यान आत्मानꣳ हिनस्ति तस्मादुपाꣳशुसवनमभिमिमीते[1] ॥७॥

9-11 सो ऽभिमिमीत इन्द्राय त्वा वसुमते रुद्रवत इतीन्द्रो यज्ञस्य देवता तस्मादाहेन्द्राय त्वेति वसुमते रुद्रवत इतीन्द्रमेवानु वसूꣳश्च रुद्राꣳश्चाभजतीन्द्राय त्वादित्यवत इतीन्द्रमेवान्वादित्यानाभजतीन्द्राय त्वाभिमातिघ्न इति सपत्नो वा अभिमातिरिन्द्राय त्वा सपत्नघ्न इत्येवैतदाहैष ह्यस्योद्धारो यथा श्रेष्ठिन[6] उद्धार एवꣳ ह्यस्यैष उद्धारः इयेनाय त्वा सोमभृत इति तद्वायव्यै मिमीते सा यच्छ्येनो भूत्वा दिवः सोममाभरत्तेन गायत्री इयेनः सोमभृदग्नये त्वा रायस्पोषद इति तद्द्वितीयं गायत्र्यै मिमीते ऽग्निर्हि गायत्री सा यच्छ्येनो भूत्वा दिवः सोममाभरत्तेन गायत्री इयेनः सोमभृत्तेनो वा एनामेतद्वीर्येण द्वितीयमन्वाभजति स वै पञ्च कृत्वो मिमीते संवत्सरसंमितो यज्ञः पञ्चर्तवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वो मिमीते ॥८॥

12 अथाभिमृशति यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरा अन्तरिक्षे । तेनास्मै यजमानायोरु रायेऽध्यधि दात्रे वोच इति यत्र ह वा एषो ऽग्रे देवानाꣳ हविर्बभूव[7] तद्वेक्षां चक्रे मैव सर्वेणेवात्मना देवानाꣳ हविर्भूवमिति स तिस्रस्तनूरपनिदधे ॥९॥

13 तदु वै देवा अस्पृण्वत ता अस्यैतेनावरुन्धत स कृत्स्नो देवानाꣳ हविरभवत्तथो वा अस्यैष एतेनैता अवरुन्द्धे स कृत्स्नो देवानाꣳ हविर्भवति तस्मादेवमभिमृशति ॥१०॥

14.15a अथ निग्राभ्याभिरुपसृजति स यन्निग्राभ्याभिरुपसृजत्यापो ह वै वृत्रं जघ्नुस्तेनैतद्वीर्येण स्यन्दन्ते तस्मादेनाः स्यन्दमाना न किं चन प्रतिधारयति ता ह स्वमेव वशं चेरुः[8] कस्मै नु वयं तिष्ठेमहीति याभिरस्माभिर्वृत्रो हत इति सर्वमु[9] वा इदमिन्द्राय तस्थानमास[10] ता हेन्द्र उपमन्त्रयां चक्रे सर्वं वा इदं मह्यं तस्थानमिति तिष्ठध्वमेव[11] मह्यमिति[12] ता होचुः किमस्माकं ततः स्यादिति ॥११॥

15b स होवाच प्रथममक्ष एव वः सोमस्य राज्ञ इति तथेति तस्मा अतिष्ठन्त तास्तस्थाना उपावृत्ता उरसि न्यगृह्णीतेन्द्रो वै यजमानस्तथो वा एतस्मा एतास्ति-

ष्ठन्ते तास्तस्थाना उपावृत्ता उरसि निगृह्णीते स यदेना उरसि निगृह्णीते[12] तस्मान्निग्राभ्या नाम स यदाभिरेतत्प्रथमतः सोमꣳ राजानमुपसृजत्येष[13] आसां प्रथमभक्षः सोमस्य राज्ञः ॥१२॥

स उपसृजति श्वात्रा स्थ वृत्रतुर इति शिवा ह्यापस्तस्मादाह श्वात्रा स्थेति 16
वृत्रतुर इत्येताभिर्हि वृत्रो हतो राधोगूर्ता अमृतस्य पत्नीरित्यमृतꣳ ह्यापस्ता देवीर्देवत्रेमं यज्ञं नयतेति ता देव्यो देवत्रेमं यज्ञं धत्तेत्येवैतदाहोपहूताः सोमस्य पिबतेति तदुपहूताः सोमस्य राज्ञः प्रथमभक्षं भक्षयन्त्येष आसां प्रथमभक्षः सोमस्य राज्ञः[14] ॥१३॥

अथ प्रहरन्मनसा ध्यायेदिदमहममुष्मै[15] प्रहरामीति यं द्विष्याद्यो न्वा इमं 17
मानुषं ब्राह्मणꣳ हन्ति तं[16] न्वेव[16] परिचक्षते ऽथ किं य एतꣳ हनादेवो ह्येष तथाह तस्य न जीवातुरस्ति यस्मै तथा करोति तथो अनेनस्यं भवत्युतो ब्राह्मणो न हिनस्ति तृणाय वा प्रहरामि पाप्मने वेति ध्यायेत्तथो अनेनस्यं भवति ॥१४॥

स उद्यच्छति मा भैर्मा संविक्था इति मा भैषीर्मा संविक्था अमुष्मा अहं 18.19
प्रहरामि न तुभ्यमित्येवैतदाहोर्जं धत्स्वेति रसं धत्स्वेत्येवैतदाह धिषणे वीड्वी सती वीलयेथामूर्जं दधाथामितीमे एवैतत्फलके आहुरिति[17] हैक आहुस्तदु किमाद्रियेत यदप्येते भिद्येयातामेवेमे हैव द्यावापृथिव्यावेतस्माद्वज्राद्युद्यतात्सꣳरेजेते[18] ताभ्यामेवैनमेतच्छमयत्यूर्जं दधाथामिति रसं दधाथामित्येवैतदाहाथ त्रिरभिषुणोति त्रिः संभरति चतुर्निग्राभमुपैति तद्दश दशाक्षरा वै विराड्विराळु वै यज्ञो विराजमेवैतद्यज्ञमभिसंपादयति ॥१५॥

अथ निग्राभमुपैति स यन्निग्राभमुपैति यत्र ह वा एषो ऽग्रे देवानाꣳ हविर्बभूव[19] तद्ध दिशो ऽभिदध्यावाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पृशेयेति तमेतद्देवा आभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पर्शयन्यन्निग्राभमुपायꣳस्तथो वा एनमेष एतदाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पर्शयति यन्निग्राभमुपैति तस्मान्निग्राभमुपैति ॥१६॥

स उपैति प्रागपागुदगधराक् सर्वतस्त्वा दिश आधावन्तु । अम्ब निष्पर 21
समरीर्विदामिति योषा वा अम्बा योषा वै दिशस्तदेनमाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पर्शयति समरीर्विदामिति[20] प्रजा वा अर्यस्तस्माद्विमाः प्रजा अपि विदूरमिव सत्यः समेव[21] विद्रते[21] ॥१७॥

22 अथ यत्सोमो नाम यत्र ह वा एषो ऽग्रे देवानाꣳ हविर्बभूव[15] सा यास्य जुष्टतमा तनूरास तामपनिदधे[16] तदु वै देवा अस्पृण्वत ते होचुरुपैवैतां प्रवृहस्वेति[17] सहैव न एतया हविरेधीति तां पश्चेवोपप्रावृहत[18] सो वै म एषेति स यदब्रवीत्सो वै म एषेति तस्मात्सोमो नाम[19] ॥१८॥

23 अथ यद्यज्ञो नाम भ्रन्त्यु वा एनमेतद्यदभिषुण्वन्ति तं वै तज्जनयति यदेनं तन्वते यन्वै[20] तज्जायते[21] यत्तायमानस्तस्माद्यज्ञो[22] नाम यज्ञो[23] ह वै नामैतद्यद्यज्ञ इत्याहुः ॥१९॥

24 स हन्यमान[24] एतां वाचमुवाद त्वमङ्ग प्रशꣳसिषो देवः शविष्ठ मर्त्यम् । न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वच इति ॥२०॥

25 हन्यमानो[25] हैतां वाचमुवाद मर्त्यो भवꣳस्त्वमेवेतो[26] जनयितासि[27] न त्वदन्य इतीन्द्रमथ निग्राभ्याभ्यो ग्रहान्विगृह्णते स यन्निग्राभ्याभ्यो ग्रहान्विगृह्णत आपो ह वै वृत्रं जघ्नस्तेनैतद्वीर्येण स्यन्दन्ते तस्मादेनाः स्यन्दमाना न किं चन प्रतिधारयति स्यन्दमानानामु वै वसतीवरीर्गृह्णाति वसतीवरीभ्यो निग्राभ्या निग्राभ्याभ्यो ग्रहान्विगृह्णते वीर्याद्धोतृचमसाद्योषा वा ऋग्घोता योषाया वा इमाः प्रजाः प्रजायन्ते तदेना योषाया एवर्चो वीर्याद्धोतृचमसाद्विगृह्णते तत एनाः प्रजनयन्ति तस्मान्निग्राभ्याभ्यो ग्रहान्विगृह्णते ॥२१॥ चतुर्थं ब्राह्मणम् ॥ नवमो ऽध्यायः ॥

॥ अध्वरकाण्डं समाप्तम् ॥

1 °यंति B, °यति W C My. 2 तंत्र C (orig.). 3 B ins. च. 4 °न्निति MSS. 5 °ते B W. 6 श्रेष्ठिन MSS. 7 बभूव without accent the MSS. 8 चेरुः B. 9 सर्वंहमु B W. 10 तत्स्थानमास B W. 11 °व मंह्यमिति B W, °व मह्यमिति C. 12 निगृह्णीते B C. The MSS. repeat the words यदेना उरसि निगृह्णीते (thus accented the second time). 13 °सृजत्येष MSS. 14 राज्ञः MSS. 15 ध्यायेद् । इद° MSS. 16 तन्वेव MSS. 17 आहुरिति MSS. 18 द्यावापृथिव्या° MSS. 19 बभूव without accent the MSS. 20 रसमरी°

B. 21 स्वमेव विद्वते B W, स्वमेव विद्वते C, स्वमेव also My. 22 तामुपनिं MSS. 23 प्रवृं B W. 24 पश्चेवो° C sec. m., पश्येवो° B W, पश्येवो° My C (orig.). 25 नाम MSS. 26 यंवै MSS. 27 तज्जायते MSS. 28 यज्ञो B, यज्ञो (both times) C. 29 हन्यमानः MSS. 30 हन्यमानो MSS. 31 भं° MSS. 32 °तासि MSS.

—:०:—

M. IV. 1. 1 K. V. 1. 1

1.2 प्राणो ह वा अस्योपाꣳशुर्य्यान् उपाꣳशुसवन उदानो ऽन्तर्यामो ऽथ यदुपाꣳशुर्नामाꣳशुर्ह वै नाम ग्रहः स प्रजापतिस्तस्यैष प्राणः स यदꣳशोः प्राणस्तस्मादुपाꣳशुर्नाम ॥१॥

3 तं वै बहिष्पवित्राद्गृह्णाति पराञ्चमेवास्मिꣳस्तत्प्राणं दधाति तस्मादयं पराङ् प्राणो निरर्दति तं वा अꣳशुभिः पवयति पूतो ऽसदिति षड्भिः पवयति षड्वा ऋतव ऋतुभिरेवैनं तत्पवयति ॥२॥

4 तदाहुर्यदꣳशुभिरुपाꣳशुं पवयतीति सर्वे सोमाः पवित्रपूता अथ केनैतानꣳशून्पुनाति केनास्यैते पूता भवन्तीति ॥३॥

5 तान्पुनरप्यर्जति यत्ते सोमादाभ्यं नाम जागृवि तस्यै ते सोम सोमाय स्वाहेत्येतेन हैतान्त्स्वाहाकारेण पुनात्येतेनास्यैते पूता भवन्ति तस्माद्वेवमेतान्पुनरप्यर्जति स वा एष सर्वमेव ग्रहः सर्वेषाꣳ ह्येष सवनानाꣳ रूपं क्रियते ॥४॥

6.7 देवा उ ह वै यज्ञं तन्वाना असुररक्षसानामासङ्गाद्बिभयां चक्रुस्ते होचुरसुररक्षसानामासङ्गाद्बिभ्यतो हन्त प्रातःसवन एवेति सर्वं यज्ञꣳ सꣳस्थापयामेति तथा यदि नो ऽसुररक्षसान्यासजेयुरिति सꣳस्थित एव नो यज्ञः स्यादिति तमेतस्मिन्नेव प्रथमे ग्रहे यजुष्टः सर्वं यज्ञꣳ समस्थापयन्प्रथमे स्तोत्रे सामतः प्रथमे शस्त्र ऋक्तस्तेन सꣳस्थितेनात ऊर्ध्वेनाचरꣳस्तदप्येतर्हि तथैव क्रियते ॥५॥

8 सो ऽष्टौ कृत्वो ऽभिषुणोत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनं तत्प्रातःसवनस्य रूपं क्रियते ॥६॥

9 स गृह्णाति वाचस्पतये पवस्व वृष्णो अꣳशुभ्यां गभस्तिपूत इति प्राणो वै वाचस्पतिः प्राणो वा एष ग्रहस्तस्मादाह वाचस्पतये पवस्वेति वृष्णो अꣳशुभ्यामिति सोमाꣳशुभ्याꣳ ह्येनं पवयति गभस्तिपूत इति पाणी वै गभस्ती पाणिभ्याꣳ ह्येनं पवयति ॥७॥

10 अथैकादश कृत्वो ऽभिषुणोत्येकादशाक्षरा वै त्रिष्टुप् त्रैष्टुभं माध्यंदिनꣳ सवनं तन्माध्यंदिनꣳ सवनं क्रियते ॥८॥

11 स गृह्णाति देवो देवेभ्यः पवस्व येषां भागो ऽसीति देवो ह्येष एतद्देवेभ्यः पवते येषां भागो ऽसीति तेषाꣳ हि भागः ॥९॥

12 अथ द्वादश कृत्वो ऽभिषुणोति द्वादशाक्षरा जगती जागतं तृतीयसवनं

तत्तृतीयसवनस्य रूपं क्रियते ॥१०॥

स गृह्णाति मधुमतीर्न इषस्कृधीति रसमेवास्मिꣳस्तद्दधाति स्वदयत्येवैनं 13
तत्तस्मादेष हतो न पूयति यं वै कं[10] चान्यं घ्नन्ति सर्व एव स पूयत्यथ यदेनं जुहोति
तदेनꣳ सꣳस्थापयति ॥११॥

तदाहुरष्टावष्टौ कृत्व इति ब्रह्मवर्चसकामस्याभिषुणुयादित्यष्टाक्षरा वै गाय- 14
त्री[11] ब्रह्म वै गायत्री ब्रह्मवर्चसी हैव भवति यस्याष्टावष्टौ कृत्वो ऽभिषुण्वन्तीति ॥१२॥

तद्वेव चतुर्विꣳशतिं कृत्वो ऽभिषुतं भवति चतुर्विꣳशतिर्वा अर्धमासाः 15.16
संवत्सरस्य संवत्सरो यज्ञः प्रजापतिस्तद्वेव यज्ञꣳ सꣳस्थापयति तद्यज्ञस्य सꣳस्था-
मश्नुते पञ्च पञ्च कृत्वः पशुकामस्याभिषुणुयादित्याहुः पाङ्क्ता वै पशवः पशुमान्हैव
भवति यस्य पञ्च पञ्च कृत्वो ऽभिषुण्वन्तीति पाङ्क्तो वै यज्ञस्तद्वेव यज्ञꣳ सꣳस्था-
पयति तद्यज्ञस्य सꣳस्थामश्नुते सैषा मीमाꣳसैवेतरं त्वेव क्रियते ॥१३॥

तं परिमार्ष्टि नेद्यवश्चोतादिति[12] तं न सादयति प्राणो ह्यस्यैष तस्मादयम- 17.18
सन्नः प्राणः संचरति यदि त्वभिचरेत्सादयेदेनमिदमहममुष्य[13] प्राणꣳ सादयामीति
तथाह[14] तस्य न जीवातुरस्ति यस्मै तथा करोत्यथ यत्सादयित्वा नान्वर्जति[15] तेनो
अध्वर्युश्च यजमानश्च जीवतो ऽथो अपिदध्यादिदमहममुष्य[16] प्राणमपिदधामीति तथा-
ह न मोहयति यन्न सादयति तथो तस्य न[17] जीवनमस्ति यस्मै तथा करोत्येषो
ऽत्र मेनिः ॥१४॥

अथान्तरेवासीनः स्वाहाकरोति स यदन्तरासीनः स्वाहाकरोत्येतस्माद्ध वै 19
देवा बिभयां चक्रुर्यन्न इमं[18] ग्रहमन्तरा[19] नाष्ट्रा रक्षाꣳसि न हन्युरिति तमेतदन्तरे-
वासीनाः स्वाहाकारेणाजुहवुस्तꣳ हुतमेव सन्तमग्नावजुहवुस्तथो वा एनमेष एत-
दन्तरेवासीनः स्वाहाकारेण जुहोति तꣳ हुतमेव सन्तमग्नौ जुहोति तस्मादन्तरे-
वासीनः स्वाहाकरोति ॥१५॥

उर्वन्तरिक्षमन्वेमीति प्रैत्यन्तरिक्षं वा अनु रक्षश्चरति यथायं पुरुषो ऽमूल 20.21
उभयतः परिच्छिन्नो ब्रह्मणैवैतदभयमनाष्टमन्तरिक्षं कुरुत उपनिष्क्रम्य होष्यन्वरं
वृणीत इदं मे ऽस्त्वथ होष्यामीति क्षिप्रꣳ ह वा एतस्य ग्रहस्य देवा होमं प्रेप्स-
न्ति तस्मै ह तं वरꣳ समर्धयन्ति यं वरं वृणीते क्षिप्रं नो जुहवदिति ॥१६॥

स जुहोति स्वांकृतो ऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इति 22

प्राणो वा एष ग्रहो ऽयमु वै प्राणो यो ऽयं पवते स्वयं वा एष कृतः स्वयं जातो न ह्येतस्यान्यः[१] कर्तास्ति न जनयिता तस्मादाह स्वांकृतो ऽसीति विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इति सर्वाभ्यो ह्येष आभ्यः प्रजाभ्यो जातो मनस्त्वाष्ट्रिति प्रजापतिर्वै मनः प्रजापतिस्त्वाश्नुतामित्येवैतदाह स्वाहा त्वा स्वभवः[२] सूर्यायेत्यवरꣳ स्वाहाकारं करोति परां देवताम् ॥१७॥

23 एतस्मिन्वा एतन्मण्डले ऽहौषीद्य एष तपति सर्वमु वा एष ग्रहस्तत्सर्वस्मादेवैतदस्मादेनमुत्तरं करोति य एषो ऽस्मात्सर्वस्मादुत्तरो यद्धावरां देवतां कुर्यात्परꣳ स्वाहाकारमन्यद्धैतस्मादुत्तरं कुर्यात्तस्मादवरꣳ स्वाहाकारं करोति[३] परां देवताम् ॥१८॥

24 अथोर्ध्वमुन्मार्ष्टि पराञ्चꣳ ह्येवास्मिꣳस्तत्प्राणं दधात्यथोत्तानेन पाणिना परिधिमुपस्पृशति पराञ्चꣳ ह्यस्मिꣳस्तत्प्राणं दधाति देवेभ्यस्त्वा मरीचिपेभ्य इति ॥१९॥

25 एतस्मिन्वा एतन्मण्डले ऽहौषीद्य एष तपत्येत उ वै देवा मरीचिपा यद्ग्रहमयस्तदेतान्प्रीणाति तथास्यैते प्रीता भवन्ति ॥२०॥

26 तं वा एतं मन्त्रेण जुहोति न वा एतस्यानुवाक्यामन्वाह न याज्यां तेनैषो ऽनुवाक्यवाꣳश्च याज्यवाꣳश्च यदेनं मन्त्रेण जुहोत्यथ यद्यभिचरेद्यद्यस्यात्मनि वा[४] वाससि[५] वाꣳशुराश्लिष्टः स्यात्तं जुहुयादेवाꣳशो यस्मै त्वेले । तत्सत्यमुपरिप्लुता भङ्गेन हतो ऽसौ फालिति यथा वै हन्यमानानामुपश्रुत्य मुच्येतैवं वा एष एतन्मुच्यते यो ऽभिधूयमाणानाꣳ स्कन्दति तथा ह तेषां नापधावꣳश्चन मुच्यते येभ्यस्तथा करोत्येषो ऽत्र मेनिः ॥२१॥

27.28 अथोत्तरार्धं सादयति प्राणाय त्वेति प्राणो ह्यस्यैष तद्वा आहुर्दक्षिणार्ध एव सादयेदिति दक्षिणाꣳ ह्यसौ दिशमन्वावर्तते यो ऽसौ तपतीति तदुत्तरार्ध एव सादयेन्न ह्यन्यैतस्मादुत्तराहुतिरस्त्यथोपाꣳशुसवनमादाय[६] तं न दशाभिर्न पवित्रेणोपस्पृशति यथा प्रणिक्त एवꣳ हि तत्स्याद्यदेनं दशाभिर्वोपस्पृशेत्पवित्रेण वा पाणिनैव[७] प्रध्वꣳस्यानुनिपातयति[८] व्यानाय त्वेति व्यानो ह्यस्यैषः ॥२२॥ प्रथमं ब्राह्मणम् ॥

1 अस्योपाꣳशु° MSS. 2 तान्पुनरप्यर्जयति B W, तान्पुनरप्यर्जति C O. 3 °रप्यर्जयति B W My.

4 क्रियते C O P. 5 °तो MSS. 6 यदि MSS. 7 सामतः MSS. 8 क्रियते B P W. 9 हि भागः B. 10 Thus emended, किं MSS. 11 बृह ins. in B. 12 °इच्योतदिति B, °इच्योतादिति W (cp. V. 1. 2. 10). 13 °त्सादयेदेन° MSS. 14 तथाह B. 15 नान्वर्जयति B W. 16 अपिदध्या° MSS. 17 Om. in B P. 18 इदमग्रहम° B, इहमग्रह° W pr. m., इदम° W sec. m. 19 °न्यः MSS. 20 स्वभवः B, स्वभवः the other MSS. (differently from Weber's ed. of the Saṃhitā). Cp. infra V. 1. 2. 12 and TS VI. 4. 5. 5: प्राणा वै स्वर्भवसो देवाः. 21 करोति B. 22 वा वाससि MSS. 23 °दुत्तराहुति° MSS. 24 °नैव प्रध्व°स्या° MSS.

K. V. 1. 2 M. IV. 1. 2

प्राणो ह वा अस्योपा°शुर्व्यान उपा°शुसवन उदानो ऽन्तर्यामो ऽथ यदन्तर्यामो नाम यो वाव प्राणः स उदानः स उ एव व्यानस्तं वा अस्मिन्नदः पराञ्चं दधाति यदुपा°शुं गृह्णाति तस्मेवास्मिन्नेतत्प्रत्यञ्चं दधाति यदन्तर्यामं गृह्णाति तस्मादयमन्तरात्मन्नुदानो यतः स यदयमन्तरात्मन्नुदानो यतो यद्वैनेनेमाः प्रजा यतास्तस्मादन्तर्याम इत्याख्यायते ॥१॥ 1.2

तं वा अन्तःपवित्रादृगृह्णाति प्रत्यञ्चमेवास्मि°स्तदुदानं दधाति तद्वेवाप्युपा°शुरन्तःपवित्रादृगृहीतो भवति समान° हि तद्यदुपा°श्वन्तर्यामौ तथो सो ऽन्येषु ग्रहेष्वनाक्षिद्धवति ॥२॥ 3

अथ यद्राजानं पवित्रेण पवयन्ति सोमो ह वै राजा बृहस्पति° स्वं पुरोहितं जिज्यौ तस्मा उ ह पुनर्ददौ तां प्रायश्चित्तिं चक्रे तस्मिन्पुनर्ददुष्येनः पर्येव शिशिषे यदीन्नूनं ब्रह्माभिदधर्ष ज्यानाय स यदेव तदेनो ऽकरोत्तदेवास्यैतत्पवित्रेण पवयन्ति स पूत एव मेध्यो देवाना° हविर्भवति तस्माद्वाव पवित्रेण सोमं पवयन्ति ॥३॥ 4.5

अथ यदुपयामेन ग्रहान्गृह्णन्तीयं वा अदितिस्तस्या अदो हविः प्रायणीयं 6

भवत्यसावादित्यश्चरुस्तद्वैतत्पुरेव सुत्याया भवति[13] सो[13] सुत्यायां देवेष्वपित्वमीषे ऽपि मे प्रसुते ऽस्त्विति ॥४॥

7.8 ते होचुर्विभक्तो वा अयं यज्ञो देवानामिति त्वयैव ग्रहा गृह्यन्तां देवताभ्यो हूयन्तामिति तथेति होवाच तादियं[14] वा उपयाम इयꣳ हीदमाभ्यः प्रजाभ्यो ऽन्नाद्यमुपयच्छत्यनया[15] हीदꣳ सर्वमुपयतमनया तद्ग्रहा गृह्यन्ते स उ अस्याः प्रसुते ऽपि भागः ॥५॥

9.10 अथ यद्योनौ साद्यन्त इयं वा अस्य सर्वस्य योनिरस्या हीदꣳ सर्वं प्रजायते रेत उ वा एतद्भूतꣳ सोमꣳ राजानमृत्विजो बिभ्रति यदु वा अयोनौ रेतः सिच्यते प्रैव तन्म्रियते[16] तदेनमस्यां योनौ दधाति तस्माद्योनौ साद्यन्ते ॥६॥

11.12 स वा उदिते ऽन्यतरमेतयोर्ग्रहयोर्जुहोत्यनुदिते ऽन्यतरं प्राणोदानौ वा अस्यैतौ ग्रहौ स यदुदिते ऽन्यतरं जुहोत्यनुदिते ऽन्यतरं प्राणोदानयोर्व्याकृतये तस्मात्प्राणोदानौ समानमेव सन्नानेवाख्यायेते[17] प्राण इति चोदान इति चाहोरात्रे उ वा एतौ ग्रहौ स यदुदिते ऽन्यतरं जुहोत्यनुदिते ऽन्यतरमहोरात्रयोर्व्याकृतये यद्धोभावेवोदिते[18] जुहुयादहरेव[19] स्यान्न रात्रिर्यदुभावनुदिते रात्रिरेव[20] स्यान्नाहस्तस्मादुदिते ऽन्यतरं जुहोत्यनुदिते ऽन्यतरम् ॥७॥

13.14 स वा अहः सन्तमुपाꣳशुमनुदिते जुहोति तद्रात्रौ रूपꣳ रात्रौ दधाति तस्माद्दिवꣳ रात्रौ तमसि सति निर्ज्ञायत इव किं चिदिव रात्रिꣳ सन्तमन्तर्याममुदिते[21] जुहोति तद्रात्रे रूपमहनि दधाति तस्मादसा उद्यन्नेवेमाः प्रजा न प्रदहति तेनेमाः प्रजा अमुष्मात्त्राताः ॥८॥

15.16 अथ वा अतो गृह्णात्येवोपयामगृहीतो ऽस्यन्तर्यच्छ मघवन्पाहि सोममित्युक्त उपयामस्य बन्धुर्मघवन्नितीद्रो वै मघवानिन्द्रो यज्ञस्य देवता तस्मादाह मघवन्निति पाहि सोममिति गोपाय सोमामित्येवैतदाहोरुष्य राय इति पशवो वै रायो गोपाय[22] पशूनित्येवैतदाह वेषो यजस्वेति प्रजा वा इषः प्रजा एवैतद्यायजूकाः करोति ता इमाः प्रजा अर्चन्त्यो यजमाना आसते[23] ऽन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् । सजूर्देवेभिरवरैः परैश्चेति तदस्य वैश्वदेवं वैश्वदेवो ह्ययमुदानो यदेनेनेमाः प्रजाः प्राणन्ति[24] चोदनन्ति[24] च तेन वैश्वदेवो ऽन्तर्यामे मघवन्मादयस्वेतीन्द्रो वै मघवानिन्द्रो यज्ञस्य देवता तस्मादाह मघवन्मादयस्वेति स यदन्तरन्तरित्येतं गृह्णात्यन्तस्त्वात्मनि[25] दधामीत्येवैतदाह ॥९॥

तं परिमार्ष्टि नेद्यवश्रोतादिति[16] तं न सादयत्युदानो ह्यस्यैष तस्माद्व्यमु- 17.18
दानो ऽसन्नः संचरति यदि तूपाꣳशु[17] सादयेत्सादयेदेतं[18] यदि तं न सादयेन्नैनꣳ[19]
सादयेद्यदि तमपिदध्यादप्येनं दध्याद्यथा तं[20] कुर्यादेवमेनं कुर्यात्तं तेनैव मन्त्रेण
जुहुयाद्येनोपाꣳशुं जुहोति समानꣳ हि तद्यदुपाꣳश्वन्तर्यामौ ॥१०॥

तदु ह चरकाध्वर्यवो ऽन्येन ततो मन्त्रेण जुह्वति येनो चोपाꣳशुं जुह्वति 19.20
नानावीर्यौ प्राणोदानौ कुर्म इति वदन्तस्तदु तथा न कुर्यान्मोहयन्ति ह ते यजमानस्य
प्राणोदानौ ये ऽन्येन ततो मन्त्रेण जुह्वत्यपीद्वा एनं तूष्णीमेव जुहुयाद्यद्धयेवोपाꣳशुं
मन्त्रेण जुहोति तदेवाप्येष मन्त्रेण हुतो भवति तदु किं तूष्णीं जुहुयात्तेनैव[21] मन्त्रेण
जुहुयाद्येनोपाꣳशुं जुहोति ॥११॥

स जुहोति स्वांकृतो ऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः। 21-23
मनस्त्वाष्टु स्वाहा त्वा स्वभवः[22] सूर्यायेत्युक्तो यजुषो बन्धुः परागुन्माष्टुर्युपाꣳशु-
हुत्वा पराञ्चꣳ ह्यस्यꣳस्तत्प्राणं दधाति प्रत्यगत्रोपमृष्टे प्रत्यञ्चꣳ ह्यस्मिन्नत्रोदानं
दधात्युत्तानेन पाणिना तत्र परिधिमुपस्पृशति पराञ्चꣳ ह्यस्यꣳस्तत्प्राणं दधाति नीचात्र
प्रत्यञ्चꣳ ह्यस्मिन्नत्रोदानं दधाति देवेभ्यस्त्वा मरीचिपेभ्य इति तस्योक्तो बन्धुः ॥१२॥

तं दक्षिणार्धे सादयत्युदानाय त्वेत्युदानो ह्यस्यैष तान्त्सꣳस्पृष्टान्त्सादये- 24
त्प्राणोदानावेवास्यैतत्संदधाति ॥१३॥

ते वा एते सन्नाः शेरत आ तृतीयसवनात्तस्माद्विमाः प्रजाः स्वपन्त्यथ 25
यदेनाꣳस्तृतीयसवने प्रयुञ्जते तस्माद्विमाः प्रजाः[23] पुनः प्रबुध्यन्ते ता इमाश्चराचरा[24]
यज्ञस्य ह्येवेदं विधामनु सर्वं वयो ह वा एतद्भूतो यज्ञो विधीयते तस्य पक्षावेवोपाꣳ-
श्वन्तर्यामावात्मोपाꣳशुसवनः[25] ॥१४॥

ते वा एते सन्नाः शेरते ऽनेजन्त[26] आ तृतीयसवनात्तायते[27] यज्ञ एति वै 26.27
तद्यत्तायते तस्माद्व्यायꣳस्यनायुवानानि पक्षाभ्यां पतन्त्यथ यदेनाꣳस्तृतीयसवने
प्रयुञ्जते तस्माद्वायुवानानि पतन्तीयꣳ ह वा उपाꣳशुः प्राणो ह्युपाꣳशुः प्राणो
ह्यमिमाꣳ हि प्राणन्नुपावजिहीते[28] ऽसावेवान्तर्याम उदानो ह्यन्तर्याम उदानो
ह्यसावमूꣳ ह्युदनन्नुपोज्जिहीते[29] ऽन्तरिक्षमेवोपाꣳशुसवनो व्यानो ह्यन्तरिक्षं व्यान
उपाꣳशुसवनः ॥१५॥ द्वितीयं ब्राह्मणम् ॥

1 Thus P, यद्वैनेनेमाः the other MSS.
2 पुरोहितं B C W. 3 जिग्यौ P O My. 4 तान्प्रा°

MSS. 5 कृत्वा B M (orig.). 6 °र्दंदुष्येनः MSS. 7 यदीन्नूनं C O P My, यदिन्नूनं B W. 8 °दधर्ष MSS. 9 पवयंति C. Probably before पव° some words are fallen out. 10 एत B W C My. 11 हविर्भवति O P, हविर्भवति B W C. 12 पवयंते B W. 13 भवति सो MSS. 14 तदिदं B. 15 ब्राह्यमुपयछन्य° MSS. 16 Thus MSS. Read तन्मीयते ? 17 Thus MSS. 18 °भावेवो-दिते B W. 19 °दहरेव MSS. 20 रात्रिरेव MSS. 21 Thus emended, संतमंतर्यामनुदिते MSS. 22 गोपाय the Mādhyandina. 23 Thus accented MSS. 24 Thus accented MSS., cp. IV. 8. 3. 21. 25 गृह्णात्य° MSS. 26 °श्रोतादिति C, °श्च्योतादिति My. 27 नूपा° B W, रूपा° C. 28 सादयेत्सादयेदेतं MSS. 29 सादयेन्नैनं MSS. 30 तं MSS. 31 Thus emended, जुहुयाद्येनैव MSS. 32 See V. 1. 1. 17. 33 प्रजाः MSS. 34 °श्चराचरा B P. 35 °मावात्मोपाꣳशु° B C W, °मावात्मोपाꣳशु° O P. 36 यजंत B W My. 37 °सवनात्तायते MSS. 38 Thus emended, प्राणं-नुपावज्जिहीते B O, प्राणंनुयावज्जिहीते C W, प्राणंनुपावज्जीहीते P, प्राणंनुपाज्जिहीते My. 39 Thus without accent My, ह्युदनंन्नुपोज्जिहीते B W O, °पोज्जिते P, ह्युदानन्नोपोज्जिहीते B.

M. IV. 1. 3 K. V. 1. 3

1 वाग्घ वा अस्यैन्द्रवायव एतन्नः यदध्यात्मिमिन्द्रो ह वै यत्र वृत्राय वज्रं प्रज-हार स ह्याबलीयान्मन्यमानो नास्तृषीति भीषा निलयां चक्रे स ह पराः परावतो जगाम[1] तदु हापि देवाः सह निलयां चक्रिरे ॥१॥

2.3 त उ होचुर्देवाः शश्वद्वै[2] हतो वृत्र इत्यथेदं न्यलेष्महीति त ऊचुरिमं देवं

यो ऽयं पवते त्वमिदं विद्धीति यद्यय॒ हतो वा जीवति वा सयदि जीविष्यति त्वमाशिष्ठमात्मानं॑ पुनः पर्याहरिष्यसीति ॥२॥

स होवाच किं मम ततो भविष्यतीति ते होचुः प्रथमवषट्कार एव ते 4
सोमस्य राज्ञ इति तथेति स ह जगामेद्धतं वृत्रय॒ स ह पुनराजगाम ॥३॥

स होवाच हतो वृत्र इति यद्धते कुर्यात॑ तत्कुरुतेति॑ तं देवा अभ्यसृज्यन्त 5
यथा विर्त्तिं वेत्स्यमाना॒ एवं॒ तं॒ व्यगृह्णत पात्रैस्तद्यमेको ऽगृह्णीत स एकदेवत्यो ऽभवद्यं॑ द्वावगृह्णाता॒य॒ स द्विदेवत्यो ऽभवद्यं बहवो ऽगृह्णत स बहुदेवत्यो ऽभवत्स यदेनमेतैः पात्रैर्व्यगृह्णत तस्माद्ग्रहा इत्याख्यायन्ते ॥४॥

स यो वाव वृत्रः स सोमः स हैनान्पूतिरभिववौ स नालमाहुतय आस न॑ 6
भक्षाय ते देवा ऊचुरिमं देवं यो ऽयं पवत इमं विवाहि स्वदय न इममिति ॥५॥

स होवाच किं मम ततो भविष्यतीति ते होचुस्त्वयैव पात्राण्याख्यायान्ता॑॰ 7-9
इति तथेति होवाच ते वै मे यूयय॒ सच्युपवातेति तस्य ह देवा अर्धं वा यावद्वापजघ्नुस्तत्पशुष्वदधुः स एष कुणपः पशुषु तस्मादेतस्माद्गन्धान्नापिगृह्णीत सोमस्य ह्येष राज्ञो न्यङ्क्तस्मात्य आसक्त इव मन्येतैवैतस्य गन्धस्य जिघ्रासेच्छ्रीर्वै॑॑ सोमः पाप्मा स्रामः स यथा श्रेयाय॒समायन्तं पापीयान्प्रत्यवरोहत्येवय॒ हैतं गन्धय॒ स्रामः प्रत्यवरोहति तस्माद्वेवं विदुषैतस्माद्गन्धान्नापिग्रहीतव्यम् ॥६॥

अथेमय॒ सोमपीथमयं देवो व्यवाट् तमेभ्यो ऽस्वदयत्ततो ऽलमाहुतये॑॑ ऽभव- 10
दलं भक्षाय तस्मादेतानि पात्राणि नानादेवत्यानि सन्ति वायव्यानीत्याख्यायन्ते स वा अस्यैष प्रथमवषट्कारो ग्रहः ॥७॥

स हेन्द्र ईक्षां चक्रे ऽयं वै नो भूयिष्ठमभक्तेति यस्येमानि च पात्राण्ययं 11.12
च प्रथमवषट्कारो हन्ताहमस्मिन्ग्रहे ऽपित्वमिच्छा इति तस्मिन्नपित्वमैच्छतानु मास्मिन्ग्रह आभजस्वेति ॥८॥

स होवाच वायुः किं ततो मम भविष्यतीति स होवाचेन्द्रो निरुक्तैव वाग्वदिष्यतीति तथेति होवाच वाग्वै॑॑ चेद्वदिष्यत्यनु॑॑ त्वाभजामीति तमेतदन्वाभजत्तत एष ऐन्द्रवायवो ग्रहो ऽभवद्वायव्यो हैव ततः पुरा ॥९॥

स होवाचेन्द्रो ऽर्धं ममेति नेति होवाच वायुस्तुरीयमेव त इत्यर्धमेव म 13.14
इति तुरीयमेव त इति तौ हासंपादयन्तौ प्रजापतिं प्रश्नमाजग्मतुरिदं॑॑ नौ विभजेदं

नौ कल्पयेति स ह प्रजापतिर्द्वेधा[15] विबभाज[16] सो[16] ऽर्धमुवाचेदं वायोरित्यथेदमर्धं पुनर्द्वेधा चकार सो ऽर्धमुवाचेदं वायोरित्यथेदमिन्द्रस्येति हैनं तुरीयं भाजयां चकार तत एष ऐन्द्रतुरीयो ग्रहो ऽभवद्ग्रायव्यो हैव ततः पुरा स वा एष ऐन्द्रतुरीयो ग्रहः ॥१०॥

15.16 तस्य द्वे पुरोरुचौ वायव्यैव पूर्वैन्द्रवायव्युत्तरा तथानुवाक्ये तथा[17] प्रैषौ तथा याज्ये तथो एनं तुरीयमेवाभाजयत्स[18] हेन्द्रस्तुरीयं[19] चेन्मावीभजन्निति तुरीयमेव वाचो[20] निर्वादयां[20] चकार तदिदं तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्त्यथ तुरीयमनिरुक्तं यत्पशवो वदन्त्यथ तुरीयमनिरुक्तं यद्व्या[21]ंसि वदन्त्यथ तुरीयमनिरुक्तं यदिदं क्षुद्र[21]ं सरीसृपं वदति ॥११॥

17 तस्मादप्येतदृषिणाभ्यनूक्तं चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति ॥१२॥

18.19 स गृह्णात्या वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार। उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा॥ इन्द्रवायू इमे सुता उप प्रयोभिरागतम्। इन्दवो वामुशन्ति हि॥ उपयामगृहीतो ऽसि वायव इन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वेति सादयति यो वाव वायुः स इन्द्रो य इन्द्रः स वायुस्तस्मात्सादयति[22] सजोषोभ्यां त्वेति ॥१३॥ तृतीयं ब्राह्मणम्॥

1 एतंनु MSS. 2 जगाम MSS. 3 शश्वद्वै MSS. 4 त्वमाशि° MSS. 5 Emended, कुर्यात्तत्तत्कुरुतेति MSS. 6 °मान B W. 7 एवं तं O P. 8 भवद्यद्वावगृ° B W O P, भवद्यद्वावगृ° C. 9 न MSS. 10 °ख्यायंता My, °ख्यायंत B W. 11 जिघ्रासेश्रीवैं MSS. 12 °तये MSS. 13 वाग्वेचेत्वदिष्यनु P, वाग्वै वदिष्यत्यनु O with चेत् in the margin, वाचत्वदिष्यत्यनु C, वाग्वैव वदिष्यत्यनु B W. 14 पृश्निमा° MSS., cp. II. 4. 2. 14. 15 °द्वेधा B. 16 °भाज सो B. 17 तथो B. 18 °यमेवाभाजयंत्स B W O P My, °भाजयंन्स C. 19 हेंद्रतुरीयं C. 20 वाचो निं-वादयां C O P, वाचो निवा° B W. 21 वायवस्त° C.

K. V. 1. 4 M. IV. 1. 4

क्रतूँ ह वा अस्य दक्षौ मैत्रावरुणस्तन्नु यदध्यात्मꣳ स यदभिगच्छति 1-3
मनसादो मे स्यादद्ः कुर्वीयेति स क्रतुर्यदस्मै तत्समृध्यते स दक्षो मित्र एव क्रतुर्व-
रुणो दक्षस्तदस्यैतावात्मनो ब्रह्मैव मित्रः क्षत्रं वरुणो ऽभिगन्तैव ब्रह्म कर्ता क्षत्रियस्तौ
हैतौ नानेवैवाग्र आसतुः स शशाकैव[1] ब्रह्म मित्र ऋते क्षत्राद्वरुणात्स्थातुं न क्षत्रं
वरुण ऋते ब्रह्मणो मित्राद्यद्ध स्म क्षत्रं कुरुते ऽप्रसूतं ब्रह्मणा नꣳ ह स्मास्मै[2]
तत्समृध्यते ॥१॥

तद्धोपमन्त्रयां चक्रे क्षत्रं ब्रह्म सꣳसृजावहै पुरस्तान्म एधि त्वत्प्रसूतः कर्म 4-6
करवा इति तथेति तौ समसृजेतां तत एष मैत्रावरुणो ग्रहो ऽभवत्सो एव पुरोधा
तस्माद्ब्राह्मणेनैव सर्वेणेव राजन्यबन्धुना विपरिददीत[3] सꣳ ह्येतौ सृजेते सुकृतं च
दुष्कृतं च य उ वै भोग्यो राजन्यः स्यान्नो एव स सर्वेणेव ब्राह्मणेन विपरिददीत[4]
सꣳ ह्येतौ सृजेते सुकृतं च दुष्कृतं च तस्मादवकूल्लमेव[5] ब्राह्मणस्य यदराजन्यः
स्यात्समृद्धमु तद्यो राजन्यं लभाते राजन्यस्य तु हैवानवकूल्लं यदब्राह्मणः[6] स्यादस-
मर्धुकꣳ हास्य कर्म भवति यो राजन्यो ऽब्राह्मणो भवति तस्माद्राजन्येन कर्म करि-
ष्यमाणेन ब्राह्मण उपसर्तव्यः सꣳ हास्मै तद्ध्यते यत्काम एनमुपधावति ॥२॥

स गृह्णात्ययं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् ॥ 7
उपयामगृहीतो ऽसि मित्रावरुणाभ्यां त्वेति ॥३॥

तं पयसा श्रीणाति वृत्रो[7] वै सोम आसीत्तं यत्र देवा अन्नꣳस्तद्धोचुर्मि- 8
त्रमपि[8] त्वꣳ हꣳसी३[9] इति[10] नेति[11] होवाच मित्रः सर्वस्य वा अहं मित्रमस्मीति
न मित्रः सन्नमित्रो[12] भविष्यामीति ते होचुस्तं[13] वै त्वा सोमपीथादन्तरेष्याम इति
स होवाचाप्यहꣳ हन्मीति तस्मात्पशवो ऽपाक्रामन्मित्रः सन्नमित्रो[14] ऽभूदिति स
पशुभिर्व्यार्ध्यत तमेतद्देवाः पशुभिः समार्धयन्यत्पयसाश्रीणꣳस्तथो वा एनमेष एतत्प-
शुभिः समर्धयति यत्पयसा श्रीणाति ॥४॥

तदाहुर्नैव सो ऽकामयत हन्तुमिति यदेवात्र पयस्तन्मित्रस्य सोम एव 9
वरुणस्य तावेतत्सꣳसृजेते इति तस्मात्पयसा श्रीणाति ॥५॥

स श्रीणाति राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः । 10
तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् ॥ एष ते योनिर्ऋतायुभ्यां
त्वेति सादयति मित्रो वा ऋतं ब्रह्म हि मित्रो ब्रह्म ह्यृतं वरुण आयुः संवत्सरो हि

वरुणः संवत्सरो ह्यायुस्तस्मात्सादयत्यृतायुभ्यां त्वेति ॥६॥ चतुर्थं ब्राह्मणम् ॥

1 क्रतू B W, क्रतौ C. 2 °स्तंवु MSS. 3 Read शशाकैव ? 4 Thus emended, न ह स्माहस्मै all the MSS. 5 Thus the accented MSS. On this passage see Introd. II sec. 3. f. 10. 6 तस्मादनवक्लृप्तमेव B W. 7 Thus emended, यद्ब्राह्मणः MSS. 8 वृत्रो MSS. 9 °र्मित्रमपि MSS. 10 हिꣳसीꣳ MSS. 11 इति नेति B, इति तेति P. 12 सन्नमित्रो C O P W. 13 होचुस्त्वं MSS. 14 सन्नमित्रो all.

M. IV. 1. 5 K. V. 1. 5

1 श्रोत्रꣳ ह वा अस्याश्विनस्तस्मादेनꣳ सर्वतः परिहारं भक्षयति सर्वत इव हि श्रोत्रेण शृणोति यत्र ह वा अङ्गिरसो वा भृगवो वा स्वर्गं लोकमायꣳस्तद्ध च्यवनो भार्गवो वाङ्गिरसो वेहैवाहीयत जीर्णिः ॥१॥

2.3 शर्यात उ वा इदं मानवो ग्रामेण चचार स ह तत्प्रतिवेशः पार्श्वतो निविविशे[1] यत्र च्यवनः शिश्ये तमु[2] ह कुमाराः क्रीलन्तो दृष्ट्वा जीर्णिꣳ शयानं कृत्यारूपमनर्थं[3] मन्यमाना लोष्टैर्विपिपिषुः स क्रुद्धो ऽसंज्ञाꣳ शर्यातेभ्यश्चकार तांश्छार्यातानसंज्ञा विवेद पितैव पुत्रेण युयुधे भ्राता भ्रात्रा ॥२॥

4 स हेक्षां चक्रे शर्यातो यत्किमकरं तत ईदगापदिति स हैतदेव प्रतिपपात[4] च्यवनो वै भार्गवो वाङ्गिरसो वेहैवाहीयत जीर्णिरिति तं पटु केन चिदहिꣳसिषं तत ईदगापदिति स ह ग्रामꣳ संजुहाव ॥३॥

5.6 स होवाच ग्रामꣳ सꣳहूय क एवेह गोपो वाविपो वा किं चिदभ्यगन्निति ते होचुः पुरुष एवायं जीर्णिः कृत्यारूपो ऽरण्ये शेत इति तमेवाद्य कुमारा लोष्टैर्विपिपिषुस्तदेवादरिष्मेति[5] स ह विदां चकार च्यवन इत्येव स तत एव रथं युक्त्वा सुकन्याꣳ शार्यातीमुपादाय प्रसिष्यन्द स आजगाम यत्र च्यवनः शिश्ये[6] ॥४॥

7-9a स होवाच नमस्ते ऽस्त्वृष इति यन्नावेदिष्म तेन[7] त्वाहिꣳसिष्मानया[8] ते ऽपहुमहे व्येतु ते क्रोध इति ततो ह्यस्य[9] वीयाय क्रोधस्ततः शार्याताः समजानत सो ऽपयुयुजे ग्रामो नेदेनं पुनर्हिंनसाम केन चिदित्यश्विना उ वा इदं मनुष्येषु भिषज्यन्तौ चेरतुस्तौ ह तन्न्याजग्मतुर्यत्र[10] च्यवनः शिश्ये[11] तौ हेमामुपमन्त्रयां चक्रातें

सुकन्यामावयोरेधि कमिमं जीर्णिमनर्थ्यमुपशेष इति ॥५॥

सा होवाच नैवाहं तं जीवन्तꣳ हास्यामि यस्मै मां पितादादिति तदु 9b.10
ह्यमुषिराजौ तासꣳ ह तयोः प्रेतयोरुवाच[11] किं त्वैतावचोचतामितीत्थमित्थमिति तौ त्वं किं प्रत्यवोच इति नैवाहं तं जीवन्तꣳ हास्यामि यस्मै मां पितादादिति ॥६॥

स होवाच तौ वै त्वा यद्येतत्पुनर्ब्रूयात[12] इति तौ त्वं ब्रवसीति होवाच न वाव युवꣳ सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति तौ त्वा यदि ब्रवातः[13] केनासवौं स्व इति ब्रवात[13] इतीमं नु मे पतिं पुनर्युवाणं[14] कुरुतमथ वां वक्ष्यामीति तौ ह पुनरेव न्याजग्मतुस्तासꣳ हैतदेवोचतुः ॥७॥

सा होवाच न वाव युवꣳ सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं 11.12
निन्दथ इति तौ होचतुः केनासवौं स्व इतीमं नु मे पतिं पुनर्युवाणं कुरुतमथ वां वक्ष्यामीति तथेति होचतुस्तं वै परिगृह्यापो[15] ऽभ्यवहरति[15] स येन वयसा कामयते तेन पुनरुदैत्विति तं परिगृह्यापो[15] ऽभ्यवजहार स येन वयसा चकमे तेन पुनरुदेयाय तौ होचतुः केनासवौं स्व इति ॥८॥

स होवाच च्यवन एव देवा वा अमी कुरुक्षेत्रे यज्ञं तन्वत इति ते वां 13
यज्ञादन्तर्यन्ति तेनासवौं स्थ इति तौ ह तदभिप्रेयतुस्तौ हाजग्मतुर्देवान्यज्ञं तन्वानान्स्तुते बहिष्पवमाने ॥९॥

तौ होचतुरुप नौ ह्वयध्वमिति ते होचुर्न वामुपह्वयिष्यामह इति बहु सꣳसृष्टं 14
मनुष्येषु भिषज्यन्तावचारिष्टं तस्माद्वां नोपह्वयिष्यामह[16] इति ॥१०॥

तौ होचतुरपशिरसा[17] वै यज्ञेन यजध्व इति कथमपशिरसेत्यावाभ्यां[17] नु 15
ग्रहं गृह्णीताथ वो वक्ष्याव इति तथेति ताभ्यां ग्रहमगृह्णꣳस्तावध्वर्यू अभवतां तौ शिरः प्रत्यधत्तां तदु तद्विवाकीर्तेषु व्याख्यायते यथा यथा तदश्विनौ शिरः प्रत्यधत्तां तस्मादाभ्यामेतꣳ स्तुते बहिष्पवमाने ग्रहं गृह्णन्ति स्तुते हि बहिष्पवमान आगच्छताम् ॥११॥

तौ होचतुर्मुख्यौ वा आवꣳ[18] स्वो यावध्वर्यू इति पुरस्तान्नाविमं ग्रहं 16
पर्याहरन्त्विति[19] तमाभ्यां पुरस्तात्पर्याहरन्नेतद्वद्विदेवत्यानभि तस्मादेतं दशमं ग्रहं गृह्णाति तृतीयस्य वषट्क्रियते तौ यौ प्रत्यक्षमश्विनाविमे एव तद्यावापृथिव्यावथ[21] यत्पुष्करस्रजावित्यग्नेरेवास्याः पुष्करमादित्यो[21] ऽमुष्याः ॥१२॥

17.18 स गृह्णाति या वां कशा[23] मधुमत्यश्विना सूनृतावती। तया यज्ञं मिमिक्षतम् ॥ उपयामगृहीतो ऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वेति सादयति तं वै मधुमत्यर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति दध्यङ् ह वा आथर्वणो मधु नामाभ्यां ब्राह्मणमुवाच तदेनयोः प्रियं धाम तेनैनावेतत्प्रियेण धाम्नोपगच्छति तस्मान्मधुमत्यर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति ॥१३॥

19 तच्छ्लक्ष्णान्यन्यानि पात्राणि भवन्ति रास्नावमैन्द्रवायवपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यमजकावं मैत्रावरुणं तद्वेव तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यमवौष्ठमाश्विनं तदहैव तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यं मुख्या उ वा आश्विनाववौष्ठमिव[24] वा इदं[25] मुखं[25] तस्मादवौष्ठमाश्विनं[26] भवति ॥१४॥ पञ्चमं ब्राह्मणम् ॥ प्रथमो ऽध्यायः ॥

1 निविवेश B, निविवेशे W. 2 तमू B P O My. 3 °रूपमनर्थ्यं MSS., but cp. section 5. 4 Thus MSS. Read probably °पपाद. 5 लोष्टेविंपिं MSS. Read °स्तदेवादरि °or rather °स्तदेवादश्मेंति. 6 शिष्ये MSS. 7 तेन MSS. 8 °ष्मानया MSS. 9 हास्य MSS. 10 तंन्या° MSS. 11 प्रेतयो° MSS. 12 Thus C originally, °ब्रुवात the other MSS. 13 ब्रुवातः all. 14 °र्युवानं C. 15 परिगृह्यापो MSS. 16 °हरेति MSS. 17 °ष्याम B C. 18 °रपशिरसा and °मपशिरसा MSS. 19 अवाꣳ B. 20 पर्याहर° MSS. 21 °पृथिव्यावथ MSS. 22 °मादित्यो MSS. except O. 23 कशा MSS. 24 °वौष्टमिव B My. 25 इदं मुखं O P My, इदं मुख्यं B, इद मुखं C, इदं मुखं W. 26 तस्मादवौष्ठमा C W O, तस्मादवौष्टमा P, तस्मादौष्टमा B.

M. IV. 2. 1 K. V. 2. 1

1.2 चक्षुषी ह वा अस्यैतौ यच्छुक्रामन्थिनौ स एष एव शुक्रो य एष तपति तद्यदेष एतत्तपति तेनैष शुक्रश्चन्द्रमा एव मन्थ्यथ यत्तꣳ सक्तुभिः श्रीणाति तद्वा

एनं मन्थं करोति तेनो स मन्थी तौ वा एतावेवासाꣳ सर्वासां प्रजानां चक्षुषी यद्वयेतौ[1] नोदियातां[1] नेह[2] स्वौ चन पाणी पश्येयुः ॥१॥

तयोरत्तैवान्यतर[3] आद्यो ऽन्यतरो ऽत्तैव शुक्र आद्यो मन्थ्यत्तैवान्यतरम- 3.4
न्वाद्यो[4] ऽन्यतरमत्तैव[5] शुक्रमन्वाद्यो मन्थिनं तावन्यस्मै गृह्येते अन्यस्मै[6] हूयते शण्डा-
मर्कावित्यसुररक्षसे ताभ्यां गृह्येते देवताभ्यो हूयते ॥२॥

तद्यत्तथा यत्र वै देवा असुररक्षसान्यपाघ्नत तच्छण्डामर्कावित्यसुररक्षसे 5
ते एव न शेकुरपहन्तुं यद्ध स्म कर्म कुर्वते[7] तद्ध स्मालोभ्य मोहयित्वा
क्षिप्रमपद्रवतः ॥३॥

त ऊचुरुपजानीतेति कथं न्विमावपहनीमहीति ग्रहावेवाभ्यां गृह्णामेति 6
होचुस्तावभ्यवैष्यतस्तौ स्वीकृत्यापहनिष्यामह इति तथेति ताभ्यां ग्रहा-
वगृह्णꣳस्तावभ्यवैतां तौ स्वीकृत्यापाघ्नत तस्माच्छण्डामर्काभ्यां गृह्येते देवताभ्यो
हूयते ॥४॥

उत ह स्माह याज्ञवल्क्यो नो स्वित्खलु देवताभ्य एव गृह्णीयामेति विदितꣳ 7
ह्येदमिति तदुर्[8] तन्मीमाꣳसामेव चक्रे नेत्यु[9] तच्चकार[9] ॥५॥

तदु[10] तच्छुक्रस्य[10] पुरोरुचं कुर्वन्त्ययं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्ज- 8
रायू[11] रजसो विमान इत्येतदेतस्य रूपं क्रियते य एष तपति यज्ज्योतिर्जरायुरिति ॥६॥

इमां त्वेव शुक्रस्य पुरोरुचं कुर्यात्तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं 9
बर्हिषदꣳ स्वर्विदमित्यत्ता ह्येतमनु ज्येष्ठतातिर्ह्यत्ता तस्माज्ज्येष्ठतातिं बर्हिषदꣳ
स्वर्विदमिति प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे ॥ उपया-
मगृहीतो ऽसि शण्डाय त्वेति ॥७॥

तं दक्षिणार्धे सादयत्येष ते योनिर्वीरतां पाहीत्यत्ता ह्येतमनु वीरो ह्यत्ता
तस्मात्सादयति वीरतां पाहीत्यथ यदेनं दक्षिणार्धे सादयति दक्षिणाꣳ ह्यसौ दिश-
मन्वावर्तते यो ऽसौ तपति ॥८॥

अथ मन्थिनं गृह्णात्ययं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। 10
इममपाꣳ संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ उपयामगृहीतो ऽसि
मर्काय त्वेति ॥९॥

तꣳ सकुभिः श्रीणाति वरुणो ह वै सोमस्याभीवाक्षि प्रतिजघान तदश्व- 11
यत्ततो ऽश्वः समभवत्तस्मादश्वो नाम तस्याश्रु प्रास्कन्दत्स यवो ऽभवत्तस्मादाहु-

वरुण्या यवा इति स यदेवास्य तच्चक्षुषः प्रास्कन्दत्तेनैवैनमेतत्समर्धयति कृत्स्न करोति तस्मात्सक्तुभिः श्रीणाति ॥१०॥

12 स श्रीणाति मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता । आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ॥ एष ते योनिः प्रजाः पाहीत्युत्तरार्धे सादयत्याद्यो ह्येतमनु प्रजा[12] हीमा विश आद्यास्तस्मात्सादयति[13] प्रजाः पाहीति[14] ॥११॥

13.14 अथ प्रोक्षितौ द्वौ यूपशकलौ भवतो ऽप्रोक्षितौ द्वौ प्रोक्षितयोरन्यतरमध्वर्युरादत्ते ऽप्रोक्षितयोरन्यतरं तथा प्रतिप्रस्थाता शुक्रमध्वर्युरादत्ते मन्थिनं प्रतिप्रस्थाता तावाददानावपमृष्टो ऽपमृष्टः शुण्ड इत्यध्वर्युरपमृष्टो मर्क इति प्रतिप्रस्थाता तावाददानावेवैते असुररक्षसे अपहतो देवास्त्वा शुक्रपाः प्रणयन्त्विति प्रणयति देवास्त्वा मन्थिपाः प्रणयन्त्विति प्रतिप्रस्थाता तदेनौ देवताभ्य एव[15] प्रणयतः[16] ॥१२॥

15 तौ जघनेनाग्निमरत्नी संधत्तः संधाय प्राञ्चौ परीतस्तौ परियन्ता[17] उत्तरवेदौ सादयतो दक्षिणस्याꣳ श्रोणावध्वर्युर्धारयन्नेव सादयत्युत्तरस्यां[18] प्रतिप्रस्थातानाधृष्टासीति रक्षोभिर्न्वैवैतदुत्तरवेदिमनाधृष्टां कुरुतो ऽथो अत्येष्यन्ता[19] उ वा एतदग्निं पर्येष्यन्तौ भवतो[20] ऽग्नय एवैतन्निह्नुवाते[21] तथैनावेषो ऽग्निरतियन्तौ न हिनस्ति ॥१३॥

16 स जपति सुवीरो वीरान्प्रजनयन्परीह्यभि रायस्पोषेण यजमानमित्यध्वर्युरत्ता ह्येतमनु वीरो ह्यत्ता तस्मात्सुवीरो वीरान्प्रजनयन्परीहीत्यभि रायस्पोषेण यजमानमिति यजमानायैतामाशिषमाशास्ते ॥१४॥

17 अथ सुप्रजाः प्रजाः प्रजनयन्परीह्यभि रायस्पोषेण यजमानमिति प्रतिप्रस्थाताद्यो ह्येतमनु प्रजा ह्यमा विश आद्यास्तस्मात्सुप्रजाः प्रजाः प्रजनयन्परीहीत्यभि रायस्पोषेण यजमानमिति यजमानायैतामाशिषमाशास्ते ॥१५॥

18 तौ वा अपिधाय प्राञ्चौ परीतस्तिर इव वा एतत्कुरुतो यदपिधत्तस्तिर[22] इव[23] वै तद्यदपिहितं[24] तस्मादिमौ सूर्याचन्द्रमसौ प्राञ्चौ यन्तौ न कञ्चन पश्यत्यथ यत्पुरस्तात्परीत्यापोर्णुतः पुरस्तात्परीत्य जुहुत[25] आविर्वा एनौ तत्कुरुतस्तस्मादेनौ प्रत्यञ्चौ यन्तौ सर्वा इमाः प्रजाः पश्यन्ति तस्माद्वेव पराङेतः सिक्तं नाविर्भवति प्रत्यक्प्रजायमानमाविर्भवति ॥१६॥

19 अथ पुरस्तात्परीत्य जघनेन यूपमरत्नी संधत्तो यदि ततो ऽग्निर्नोद्राधेत यद्यु ततो ऽग्निरुद्राधेताप्यग्रेण यूपꣳ संदध्यातां तौ संधत्तः संजग्मानो दिवा

पृथिव्या शुक्रः शुक्रशोचिषेत्यध्वर्युः संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषेति प्रतिप्रस्थाता चक्षुषोरेवैतदारमणं[23] कुरुतस्तस्माद्धिमे चक्षुषी अभितो ऽस्थिनी सꣳहिते इत्थाच्चेत्थाच्च[24] ॥१७॥

अथ याविमावप्रोक्षितौ यूपशकलौ भवतस्तौ निरस्यतो निरस्तः शण्ड इत्यध्वर्युर्निरस्तो मर्क इति प्रतिप्रस्थाता तौ पुरैवाहुतेरेते असुररक्षसे अपहतो ऽथ यौ प्रोक्षितौ भवतस्तावग्नौ प्रास्यतः शुक्रस्याधिष्ठानमसीत्यध्वर्युर्मन्थिनो ऽधिष्ठानमसीति प्रतिप्रस्थाता चक्षुषोरेवैते समिधौ चक्षुषी एवैताभ्याꣳ समिन्द्धे तस्माद्धिमे चक्षुषी समिद्धे ॥१८॥ 20.21

अथ जपत्यच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्यामेत्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते ॥१९॥ 22

अथाह प्रातः प्रातःसावस्य[25] शुक्रवतो मधुश्चुत[26] इन्द्राय सोमान्प्रस्थितान्प्रेष्येति वषट्कृते ऽध्वर्युरग्रे जुहोत्यथ प्रतिप्रस्थाताथेतरे जुह्वति तौ यत्पुरस्तात्परीत्य जुहुतश्चक्षुषी[27] ह्यस्यैतौ पुरस्तादेवैतच्चक्षुषी धत्तस्तस्माद्धिमे पुरस्ताच्चक्षुषी अथ यदभितो यूपं तिष्ठन्तौ जुहुतो[28] यथा वै नासिकैवं यूपस्तस्माद्धिमे नासिकाभितश्चक्षुषी अथ यदेतौ वषट्कृतौ मन्त्रेण हूयेते तेन हैतदुदश्नुवाते यदेनावनु सर्वꣳ सवनꣳ हूयते[29] ऽथ यदेतावनु सर्वꣳ सवनꣳ हूयते[30] चक्षुषी ह्यस्यैतौ सत्यं वै चक्षुः सत्यं वै प्रत्यक्षतमं प्रजापतेस्तस्मादेतावनु सर्वꣳ सवनꣳ हूयते ॥२०॥ 23-26

स जुहोति सा प्रथमा सꣳस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः। स प्रथमो बृहस्पतिश्चिकित्वाꣳस्तस्मा इन्द्राय सुतमाजुहोत स्वाहेति स यत्सा प्रथमा स प्रथम इति जुहोति शश्वद्ध वै रेतसः सिक्तस्य संभवतश्चक्षुषी एव प्रथमे संभवतस्तस्माद्धेवं जपति ॥२१॥ 27.28

अथाह प्रैतु होतुश्चमसः प्र ब्रह्मणः[31] प्रोद्गातृणामृत्विजां चमसाध्वर्यव उपावर्तध्वꣳ शुक्रस्याभ्युन्नयध्वमिति पर्येत्य प्रतिप्रस्थाताध्वर्योः पात्रे सꣳस्रवमवनयत्यत्र एवैतदाद्यं बलिꣳ हारयन्ति तमध्वर्युर्होतृचमसे भक्षाय वषट्कर्तुर्हि भक्षः प्राणो वै वषट्कारः सो ऽस्मादेतत्पराङ् भवति यद्वषट्करोति प्राण उ वै भक्षस्तमेवैतत्पुनरात्मनि धत्ते यद्भक्षयति तस्माद्वषट्कर्त्रे भक्षमवनयत्यथ यदेतौ प्रत्यञ्चौ भक्षाय न हरन्ति[32] हरन्तो ऽन्यान्ग्रहाꣳश्चक्षुषी ह्यस्यैतौ तस्मादु सꣳस्रवमेवावनयति ॥२२॥ 29.30

अथ होत्राणां चमसानुपोन्नयन्ति हुतोच्छिष्टा[33] वा एते सꣳस्रवास्ते 31

नालमाहुतये भवन्ति तानेवैतत्पुनराप्याययन्ति तथो अलमाहुतये भवन्ति ॥२३॥

32.33 अथ होत्राः संयाजयन्ति होत्रा वै युक्ता देवेभ्यो यज्ञं वहन्ति ता एवैतत्संतर्पयति तृप्ताः प्रीता देवेभ्यो यज्ञं वहानिति स प्रथमस्यां वा हुतायाꣳ सर्वासु वा जपति तृप्यन्तु होत्रा मधोर्यत्स्विष्टं[33] यत्सुभृतं यत्स्वाहेति ॥२४॥ प्रथमं ब्राह्मणम् ॥

1 यद्येतौ B. 2 °यातां नेह MSS. 3 तयोरेतौ-वान्यतर B. 4 मंथ्यत्तैवा° MSS. (but : मन्थी । अत्ता । एव). 5 न्यतरमत्तैव B. 6 न्यस्मै MSS. 7 कुरुते B W. 8 तदु MSS. 9 Thus MSS. (B only नेत्यु). 10 तदुत शुक्रस्य O P My. 11 °जैरायु B C. 12 प्रजाः पाहीति मा विश आद्यास्तस्मा° B W. 13 पाहीति MSS. 14 एवं प्रणयतः B, एव प्रणयतः C O P. 15 पर्यंता MSS. 16 साद-य° MSS. 17 अत्येष्यंता B, अत्येष्यंता C O W P. 18 भवतो MSS. 19 एवैतंनि° B W C My. 20 °धत्तस्तिर MSS. 21 इवैतद्य° C O P (cp. I. 6. 2. 5); °द्यदपिहितं W B C O (orig.). 22 जुहु-त MSS. 23 °दामरणं B W. 24 इत्थाचेत्थाच C O P, इत्थाचेत्थाच B W My. 25 प्रातः सावनस्य B, प्रातः सवस्य W. 26 मधुश्च्युत C O P My W. 27 जुहु° MSS. 28 हूयते B. 29 हूयेते B. 30 ब्रह्मणः MSS. 31 हरति B (sec. m.), C omits. 32 हुतो° B. 33 मध्वोय° the Saṃhitā in Weber's edition.

M. IV. 2. 2 K. V. 2. 2

1 आत्मा ह वा अस्याग्रयणः स वा एष सर्वमेव ग्रहः सर्वꣳ ह्यात्मा तस्मादनया गृह्णात्यस्या हि स्थाली भवति स्थाल्या ह्येनं गृह्णाति सर्वꣳ ह्येष ग्रहः सर्वमु ह्येयं तस्मादनया गृह्णाति ॥१॥

2-4 तं पूर्णं गृह्णाति सर्वꣳ हि पूर्णꣳ सर्वꣳ ह्येष ग्रहस्तस्मात्पूर्णं गृह्णाति तं

विश्वेभ्यो देवेभ्यो गृह्णाति सर्वꣳ हि विश्वे देवाः सर्वꣳ ह्येष ग्रहस्तस्माद्विश्वेभ्यो देवेभ्यो गृह्णाति सर्वेषु सवनेषु गृह्णाति सर्वꣳ ह्येष ग्रहस्तस्मात्सर्वेषु सवनेषु गृह्णाति ॥२॥

अथ यदि राजोपदस्येदेतस्मादेवैनं[1] प्रभवेयुरेतस्मात्तन्वीरन्नात्मा[2] ह्यस्यैष आत्मनो हि सर्वाण्यङ्गानि प्रभवन्ति तस्मादेनमेतस्मादेव प्रभवेयुरेतस्मात्तन्वीरन्ने-तस्मादेवोत्तमं[3] ग्रहꣳ हारियोजनं[4] गृह्णात्यात्मन्येवैतद्यज्ञो ऽस्यां प्रतिष्ठायामन्ततः प्रतितिष्ठति तस्मादेतस्मादुत्तमं ग्रहꣳ हारियोजनं[5] गृह्णाति ॥३॥ 5

अथ यदाग्रयणो नाम यां वा अमूं वाचं यच्छति ग्रावाणमादायात्र वा अग्रे सा वाग्वदति स यदत्राग्रे सा वाग्वदति तस्मादाग्रयणो नामाथ यदत्राग्रे तां वाचं वाद-यति रक्षोभ्यो वै भीषा तां वाचमयच्छन् ॥४॥ 6

अथातः षट् पूर्वान्ग्रहान्गृह्णात्यथैष सप्तमः षड्वा ऋतवः संवत्सरस्य सर्वमु[6] वै[7] संवत्सरो ऽस्मिन्नेवैतत्सर्वस्मिन्विजिते ऽभये ऽनाष्ट्रे ऽत्राग्रे देवा वाचम-वदꣳस्तथो वा एनमेष एतदस्मिन्त्सर्वस्मिन्विजिते ऽभये ऽनाष्ट्रे ऽत्राग्रे वाचं वाद-यति तस्माद्वा अत्राग्रे वाचं वादयति ॥५॥ 7.8

अथ वा अतो गृह्णात्येव ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ। अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ उपयामगृहीतो ऽस्याग्रयणो ऽसि स्वाग्रयण इति वाचमेवैतदयातयामानं करोति तस्मादुतेदं वाचा समानमेव पुनः पुनर्वदति जामि हि कुर्याद्यदाग्रयणो ऽस्याग्रयण इति वैव[8] गृह्णीया-त्स्वाग्रयणो[9] ऽसि स्वाग्रयण इति वा ॥६॥ 9

पाहि यज्ञं पाहि यज्ञपतिमिति वाचमेवैतदुत्सृष्टामाह गोपाय[10] यज्ञमिति यदाह पाहि यज्ञमिति पाहि यज्ञपतिमिति वाचमेवैतदुत्सृष्टामाह गोपाय यजमान-मिति यजमानो हि यज्ञपतिः ॥७॥ 10

विष्णुस्त्वामिन्द्रियेण पात्विति वाचमेवैतदुत्सृष्टामाह यज्ञो वै विष्णुर्य-ज्ञस्त्वां वीर्येण पात्विति विष्णुं त्वं पाहीति वाचमेवैतदुत्सृष्टामाह यज्ञो वै विष्णुर्यज्ञं त्वं पाहीत्यभि[11] सवनानि[12] पाहीति तदेतं ग्रहमाह सर्वाणि ह्येष सवनानि प्रति ॥८॥

अथ दशामुपनिगृह्य हिंकरोति सा वा एषा वागनुद्यमाना ततामा सा 11
तान्ता[13] न[14] शशाक सꣳहातुं तस्यां तान्तायां देवा एतं[15] प्राणमदधुः प्राणो हि हिंकारः प्राणो हि वै हिंकारस्तस्मान्नैव कश्चन नासिके अपिगृह्य हिंकर्तुꣳ शक्नु-

यात्सैतेन प्राणेन समजिहीत तथो वा अस्यामेष एतत्तान्तायां प्राणं दधाति[15] सैतेन[16] प्राणेन संजिहीते यदा हि तान्तः प्राणं लभते ऽथ हि स संजिहीते तस्मादृशामुपनिगृह्य हिंकरोति स वै त्रिर्हिंकरोति त्रिवृद्धि यज्ञः ॥९॥

12.13 हिंकृत्याह सोमः पवते सोमः पवते सोमः पवत इति यं भीषा रक्षोभ्यो ऽग्रे न प्राह तमेवैतद्विजिते ऽभये ऽनाष्ट्रे प्राह तमाविः करोत्यस्मै ब्रह्मणे पवत इति तद्ब्रह्मण आहास्मै क्षत्राय पवत इति तत्क्षत्रायाहास्मै सुन्वते यजमानाय पवत इति तद्यजमानायाह ॥१०॥

14.15 तदाहुरेतावदेवोक्त्वा सादयेदिति ब्रह्माग्निः क्षत्रमिन्द्र इन्द्राग्नी उ वा इदꣳ सर्वमिति तस्मादेतावदेवोक्त्वा सादयेदिति सैषा मीमाꣳसैवाह[18] त्वेव भूय इष ऊर्जे पवत इति वृष्टये तदाह यदिष इत्यूर्ज इति यद्वृष्टादूर्ग्रसो जायते ऽद्भ्य ओषधीभ्यः पवत इति तदद्भ्यश्चौषधिभ्यश्चाह[19] द्यावापृथिवीभ्यां पवत इति तदाभ्यां द्यावापृथिवीभ्यामाह ययोरिदꣳ सर्वमधि सुभूताय पवत इति साधवे पवत इत्येवैतदाह ॥११॥

16 तदु हैक आहुर्ब्रह्मवर्चसाय पवत इति तदु[24] तथा न ब्रूयाद्यद्वा आहास्मै ब्रह्मण इति तदेव ब्रह्मवर्चसायाह तस्मात्सुभूताय पवत इत्येतावदेवोक्त्वा सादयेत्तꣳ सादयत्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति तं मध्ये सादयेदात्मा ह्यस्यैष दक्षिणोक्थ्यस्थाली[27] भवत्युत्तरादित्यस्थाली ॥१२॥ द्वितीयं ब्राह्मणम् ॥

1 स most of the MSS., but cp. V. 2. 4. 2. 2 Om. B. 3 °वैतं B. 4 प्रभवेयुरेतस्मात्तन्वीरन्नात्मा B, प्रभवेयुरेतस्मात्तन्वीरन्नात्मा C O P. 5 °तस्मात्तन्वीर° MSS. 6 हर्योजनं MSS. 7 हर्योजनं MSS. except B and C (sec. m.). 8 सर्वं वै B. 9 वै B. 10 °ग्रयणो MSS. 11 गोपाय C. 12 पाहीत्यभि सव° B. 13 तांता न MSS. 14 एतं MSS. 15 दधाति सैतेन MSS. 16 मीमाꣳसैवाह C O P W, मीमाꣳसैवाह B (मीमाꣳसा । एव । आह । तु । एव). 17 °षधीभ्य° B My; °श्राह MSS. 18 तदु B. 19 °क्थ्यस्थाली C O W, °क्थ्यस्थाली B, °त्थस्थाली P.

K. V. 2. 3 M. IV. 2. 3

अयꣳ ह वा अस्यैषोऽनिरुक्तः प्राणो यदुक्थ्यः स वा अस्यैष आत्मैवात्मा 1
ह्ययमनिरुक्तः प्राणः सो ऽस्यायुरेव तस्मादनया गृह्णात्यस्या हि स्थाली भवति स्थाल्या
ह्येनं गृह्णात्यजरा हीयममृताजरमु ह्यमृतमायुस्तस्मादनया गृह्णाति ॥१॥

असावेवायुर्यद्ध्रुव आत्मैवास्यैतेन सꣳहितः पर्वाण्येव संततानीदमगृहीत 3-5
एवैतस्मादुत्तमो ग्रहो ऽच्छावाकाय भवत्यथ माध्यंदिनाय सवनाय राजानमुपावहरति
तृतीयं वसतीवरीणामवनयति तत्पर्व समैति प्रथममहोत्तरस्य सवनस्योत्तमं पूर्वस्य
स यदुत्तरस्य तत्पूर्वं करोति यत्पूर्वस्य तदुत्तरं तद्व्यतिषजति तस्मादिमानि पर्वाणि
व्यतिषक्तानीदमित्थमतिहानमिदमित्थं[1] तथो एव माध्यंदिने सवने ऽगृहीत एवैतस्मा-
दुत्तमो ग्रहो ऽच्छावाकाय भवत्यथ तृतीयं वसतीवरीणामवनयति तत्पर्व समैति
प्रथममहोत्तरस्य सवनस्योत्तमं पूर्वस्य स यदुत्तरस्य तत्पूर्वं करोति यत्पूर्वस्य तदुत्तरं
तद्व्यतिषजति तस्मादिमानि पर्वाणि व्यतिषक्तानीदमित्थमतिहानमिदमित्थꣳ[2] स
यदेवमस्यैतेनात्मा सꣳहितः संततस्तेनास्यैष आयुः ॥२॥

सा वा एषा कामदुघैवेन्द्रस्योद्धारस्तिभ्यः प्रातःसवन[3] उक्थेभ्यो[4] 6
विगृह्णाति त्रिभ्यो[5] माध्यंदिने सवने तत्षट् षड्वा ऋतव ऋतवो वा इदꣳ सर्वमन्नं
पचन्ति तेनैषा कामदुघेन्द्रस्योद्धारः ॥३॥

तं वा अपुरोरुक्कं गृह्णात्युक्थं वै पुरोरुगृग्घि पुरोरुगृग्ध्युक्थꣳ[6] साम ग्रहो 7
ऽथ यदन्यद्यजुर्जपति तद्यजुस्ते हैते ऽभ्यर्ध[7] एवग्भ्यं[8] आसुरभ्यर्धे यजुर्भ्यो ऽभ्यर्धे
सामभ्यः ॥४॥

ते ह देवा ऊचुर्हन्तेमान्यजुःषु[9] दधामेति तेनेयं विद्या बहुलतरेव भविष्य- 8.9
तीति तथेति तान्यजुःष्वदधुस्तेनैषा[10] विद्या बहुलतरेवाभवत्तदुक्थं वै पुरोरुगृग्धि[11]
पुरोरुगृग्ध्युक्थꣳ[12] स यदेवैतमुक्थेभ्यो विगृह्णाति तेनैवैष पुरोरुङ्माꣳस्तस्मादेतम-
पुरोरुक्कं[13] गृह्णाति ॥५॥

स गृह्णात्युपयामगृहीतो ऽसीन्द्राय त्वा बृहद्व्रते वयस्वत इति वीर्यवत इत्ये- 10
वैतदाह यदाह बृहद्व्रते वयस्वत इत्युक्थायुवं गृह्णामीत्युक्थेभ्यो ह्येनं गृह्णाति यत्त
इन्द्र बृहद्व्रय इति यत्ते वीर्यमित्येवैतदाह यदाह यत्त इन्द्र बृहद्व्रय इति तस्मै त्वा
विष्णवे त्वेति यज्ञो वै विष्णुर्यज्ञस्य वा एतमायुषे गृह्णाति तस्मादाह तस्मै त्वा विष्णवे
त्वेत्येष ते योनिरुक्थेभ्यस्त्वेति सादयत्युक्थेभ्यो ह्येनं गृह्णाति ॥६॥

11 तं विगृह्णाति देवेभ्यस्त्वा देवायुवं गृह्णामि यज्ञस्यायुष इति तद्धैवं न विगृह्णीयात्प्रशासनꣳ स कुर्याद्य एवं विगृह्णीयाद्यज्ञस्य ह्येतमायुषे गृह्णाति तस्मादननैव विगृह्णीयात् ॥७॥

12 मित्रावरुणाभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुष इत्येव[1] मैत्रावरुणाय मैत्रावरुणीषु हि तस्मै स्तुवते मैत्रावरुणमनुशास्यते[2] मैत्रावरुण्या यजति ॥८॥

13 इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इत्येव ब्राह्मणाच्छꣳसिन ऐन्द्रीषु हि तस्मै स्तुवत ऐन्द्रमनुशास्यत[3] ऐन्द्र्या यजति ॥९॥

14 इन्द्राग्निभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुष इत्येवाच्छावाकायैन्द्राग्नीषु हि तस्मै स्तुवत ऐन्द्राग्नमनुशास्यत[4] ऐन्द्राग्न्या यजति ॥१०॥

इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इत्येव माध्यंदिने सवने सर्वेभ्य ऐन्द्रꣳ हि[5] माध्यंदिनꣳ सवनमेषैव स्थितिस्तदु ह चरकाध्वर्यवो विगृह्णन्ति ॥११॥

15 उपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवं मित्रावरुणाभ्यां त्वा जुष्टं गृह्णाम्येष ते योनिर्मैत्रावरुणाभ्यां त्वेति सादयति पुनर्ह्वविरसीति[6] स्थालीमभिमृशति ॥१२॥

16 उपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवमिन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वेति सादयति पुनर्ह्वविरसीति[7] स्थालीमभिमृशति ॥१३॥

17.18 उपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवमिन्द्राग्निभ्यां त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राग्निभ्यां त्वेति सादयति तूष्णीꣳ स्थालीं निदधाति ॥१४॥

उपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवमिन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वेति सादयति पुनर्ह्वविरसीति[8] द्विः स्थालीमभिमृशति तूष्णीं तृतीयं निदधाति नोपयामेन गृह्णात्यग्रे ह्येव तथा गृहीतो भवति नैष ते योनिरिति सादयत्यग्रे ह्येव तथा सन्नो भवति जामि हि कुर्याद्यदत्रापि तथा कुर्यादथ यत्पुनर्ह्वविरसीत्यभिमृशति[9] पुनर्ह्वस्या ग्रहीष्यन्भवति तदु नाद्रियेत तूष्णीमेव निदध्यात् ॥१५॥ तृतीयं ब्राह्मणम् ॥

1 अस्यैषो B. 2 °दमित्थमितिहान° MSS.
3 प्रातः° B. 4 उक्थ्येभ्यो B W. 5 त्रिभ्यो MSS.

6 °गृह्युक्थꣳ B C W O P (°गृह्युक्थꣳ O the second time, °गृह्यु° P the second time). 7 भ्यर्ध एवगर्भ्य B. 8 Thus MSS. Read °र्हन्तेमा यजुःषु ? 9 Thus MSS. Read ता यजु°. 10 परोरुगृन्वि B W, पुरोरुगृन्वि O P. C omits the accent. 11 पुरोरुग्मा° MSS. except O (sec. m.). 12 इत्येष B W. 13 °मनुशस्यते B W O P, °मनुशस्यतेवै C. 14 °मनुशस्यत MSS. 15 Omitted in B W. 16 पुनर्हविरसीति O P, पुनर्हविरसीति B W, पुनर्हवीरसीति C. 17 Thus C O P, पुनर्हविरसीति B. 18 पुनर्हविरसीति W C O P, पुनर्हविरसीति B. 19 यत्पुनर्हविरसी° O P W, यत्पुनर्हविरसी° B, यत्पुनर्हविरसी° C.

K. V. 2. 4 M. IV. 2. 4

अयꣳ ह वा अस्यैष प्राणो यो ऽयं पुरस्तात्स वैश्वानरो ऽथ यो ऽयं पश्चात्स 1.2
ध्रुवस्तौ ह स्मैतौ नानैव पुरा गृह्णन्ति[1] ध्रुववैश्वानराविति तमु वा एतर्ह्येकमेव गृह्णन्त्यथ[2] यदि तं चरकेभ्यो वानुब्रुवीत[3] यतो वा यजमानस्य तं चमसे ऽवनयेद्धोतृचमस एवैतꣳ स वा[4] अस्यैष[5] यदेवावाङ्[6] नाभेस्तदस्यैष[7] आत्मनः सो ऽस्यायुरेव तस्मादनया गृह्णात्यस्या हि स्थाली भवति स्थाल्या ह्येनं गृह्णात्यजरा ह्यीयमसृताजरमु ह्यमृतमायुस्तस्मादनया गृह्णाति ॥१॥

तं पूर्णं गृह्णाति सर्वꣳ हि पूर्णꣳ सर्वꣳ ह्यायुस्तस्मात्पूर्णं गृह्णाति वैश्वानराय 3.4
गृह्णाति संवत्सरो वै वैश्वानरः संवत्सरो वा आयुस्तस्माद्वैश्वानराय गृह्णाति ॥२॥

स प्रातःसवने गृहीत एतस्मात्कालादुपशेते[8] तत्सर्वमायुः समश्नुते तं[9] 5-7a
न[10] स्तूयमाने ऽवनयेन्न ह संवत्सरं यजमानो ऽतिजीवेद्यत्स्तूयमाने[11] ऽवनयेच्छस्यमाने ऽवनयेत्तदेनं द्वादशꣳ स्तोत्रमतिनयति तथा परं परमायुः समश्नुते यजमानस्तथा ज्योग्जीवति ॥३॥

तस्मादु ह ब्राह्मणो ऽग्निष्टोमसत्स्यादेतस्माद्धोतोर्नि[12] निःसर्पेन्न[13] प्रस्रावयेतायुर्वा अस्यैष स ह सर्वमेवायुरेति य एवं विद्वानग्निष्टोमसद्भवति नेद्ध्रुवमवमेहानीति[14] तस्माद्वा अग्निष्टोमसद्भवति यद्वा[15] अवाङ्[16] नाभेस्तद्वा अस्यैष आत्मनः स यदेत- 7b.8

स्मिन्नहुते निःसर्पेद्यत्प्रस्रावयेत ध्रुवꣳ ह्यवमेहेन्नेद्ध्रुवमवमेहानीति तस्माद्वा अग्निष्टोमसङ्क्रवति तदु तद्यजमानस्यैव[१२] यजमानस्य ह्येष तदात्मनो भवति[१३] ॥४॥

9 अथ यद्वेवाग्निष्टोमसङ्क्रवति यशो वै सोमो यशो हि वै सोमस्तस्माद्ये च सोमे लभन्ते ये च न लभन्त उभय एवैनदागच्छन्ति यश एवैतद्द्रष्टुमागच्छन्ति तदेतद्यशः संप्रसृप्यात्मनि ब्राह्मणा दधते यद्भक्षयति[१४] स यशस्वी ह्वैव[१५] भवति य एवं विद्वान्भक्षयति तस्माद्वा अग्निष्टोमसङ्क्रवति ॥५॥

10 सो ऽग्निष्टोमसङ्क्रवति[१६] तद्यदेतन्निःसर्पन्त्यग्निष्टोमसद्यंतद्यशः[१७] संनिधाय त एतस्मात्पराञ्चो यशसो[१८] भवन्ति तदविक्षोभयन्नेवैतत्पुनरात्मनि[१९] यशो धत्ते य एवं विद्वानग्निष्टोमसङ्क्रवति स यशस्वितमो ह्वैवैषां भूत्वा प्रैति तस्माद्वा अग्निष्टोमसङ्क्रवति ॥६॥

11.12 अथ यद्वेवाग्निष्टोमसङ्क्रवति देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त त एतस्मिन्नेव यज्ञे प्रजापतावस्पर्धन्तास्माकमयꣳ स्यादस्माकमयꣳ स्यादिति ततो देवा एतदग्निष्टोमसद्यं ददृशुस्तेन सर्वं यज्ञꣳ समवृञ्जत निरभजन्नसुरान्सपत्नान्यज्ञादेवꣳ ह वाव द्विषतः सपत्नस्य सर्वं यज्ञꣳ संवृङ्क्त एवं द्विषन्तꣳ सपत्नꣳ सर्वस्माद्यज्ञान्निर्भजति बहिर्धा करोति य एवं विद्वानग्निष्टोमसङ्क्रवति तस्माद्वा अग्निष्टोमसङ्क्रवति ॥७॥

13-15 तं गृहीत्वोत्तरे हविर्धाने सादयति प्राणा वै ग्रहा नेत्प्राणान्त्संलोभयानीति तस्माद्रिमे[२०] ऽसंलुब्धाः[२०] प्राणा उपकीर्ण इतरान्त्सादयति[२१] व्युह्यैतं[२२] न तृणं चनान्तर्धाय यद्वा ऊर्ध्वं नाभेस्तद्वा अस्यैत आत्मनः उपरीव वा एतदात्मनो यदूर्ध्वं नाभेरुपरीव वै तद्यदुपकीर्णं तस्मात्तानुपकीर्णं सादयत्यथ[२३] यदवाङ् नाभेस्तद्वा अस्यैष आत्मनो ऽध इव वा एतदात्मनो यदवाङ् नाभेरध इवैतद्यद्व्युह्य न तृणं चनान्तर्धाय तस्मादेतं व्युह्य न तृणं चनान्तर्धाय सादयति ॥८॥

16 एष उ वै प्रजापतिर्यज्ञो[२४] य[२५] एष तायत एतस्मादेवेमाः प्रजाः प्रजाता एतमेवानु प्रजायन्ते ऽप्येतर्हि तद्यानुपकीर्णं सादयति तानन्विमाः प्रजाः प्रजायन्ते या अन्येनात्मनो ऽस्यां प्रतितिष्ठन्ति या वै शफैः प्रतितिष्ठन्ति ता अन्येनात्मनो ऽस्यां प्रतितिष्ठन्ति पशवो ऽथ या एतमनु प्रजाः प्रजायन्ते ता आत्मनैवास्यां प्रतितिष्ठन्ति मनुष्याश्च श्वापदाश्च ॥९॥

17 तद्वा एतदन्यदस्या[२६] उत्तरं करोति यदुपकिरति तस्माद्या एतानु प्रजाः

प्रजायन्ते ता अन्येनात्मनोऽस्यां प्रतितिष्ठन्ति शफैरथ यदेतं व्युह्य न तृणं चनान्तर्धाय सादयति[२६] तस्माद्या एतमनु प्रजाः प्रजायन्ते ता आत्मनैवास्यां प्रतितिष्ठन्ति मनुष्याश्च श्वापदाश्च ॥१०॥

तद्वा एतज्जुह्वत्याहवनीये पुरोलाशं धानाः करम्भं दधीति स यथा मुख 18
आसिक्तेदेवमेतद्यदाहवनीये जुह्वत्यथैष एकरूप एव[२७] शेत आप इवैव तस्माद्यदनेन[२८] मुखेन नानारूपमशनमश्नात्यथैतेन प्राणेनैकरूपमेव[२९] प्रस्रावयते[३०] ऽप इवैवाथ यद्ध्रुवो नाम ॥११॥

देवा ह वै यज्ञं तन्वाना असुररक्षसानां दक्षिणत आसङ्गाद्भिभयां चक्रुस्तान्हा- 19
सुररक्षसानि दक्षिणत आसेदुस्त एतान्त्सर्वान्ग्रहानुज्जघ्नुरपि दक्षिणꣳ हविर्धान-
मुज्जघ्नुरथैतमेव नोद्धन्तुꣳ शेकुस्तदुत्तरादेव हविर्धानाद्दक्षिणꣳ हविर्धानमदꣳहꣳ-
स्तद्यदेतं[३०] नोद्धन्तुमशक्नुवꣳस्तस्माद्ध्रुवो नाम ॥१२॥

तं वै गोपायन्ति शिरो वा एष एतस्या गायत्र्या यज्ञो वै गायत्री द्वादश 20
स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्विꣳशतिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्या एष[३१]
शिरः श्रीरु वै शिरः श्रीर्हि वै शिरोऽथ योऽर्धस्य श्रेष्ठो भवत्यसौ तस्यार्धस्य शिर
इत्याचक्षते श्रेष्ठो ह व्यथेत यदेष व्यथेत यजमानो वै श्रेष्ठो नेद्यजमानो व्यथाता इति
तस्माद्वा एनं गोपायन्ति ॥१३॥

वत्सो वा एष एतस्या गायत्र्या यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश 21.22
शस्त्राणि तच्चतुर्विꣳशतिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्या एष वत्सस्तान्वा
इमान्वत्सान्गोपायन्त्यस्मै दोहाय यदिदं पयो दुहत[३२] एवमियं गायत्रीति यजमानाय
सर्वान्कामान्दोहाता इति स यदध्वर्युश्च प्रतिप्रस्थाता च निश्च क्रामतः प्र च पद्येते
यथा बद्धवत्स्युपाचरेदेवं[३३] तत् ॥१४॥

तमवनयति प्रस्नुता[३४] वा एता एतत्पयो दुहत एवमियं[३५] प्रस्नुता गाय-
त्रीति यजमानाय सर्वान्कामान्दोहाता इति ॥१५॥

सो ऽवनयति ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामीति वा[३६] गृह्णा- 23
मिति वाथा न इन्द्र इद्दिशो ऽसपत्नाः समनसस्करदित्याशिषमेवैतदाशास्ते यथा
नः श्रिये ऽन्नाद्यायेतीमाः प्रजा असपत्नाः समनसस्करदित्येतदाशिषमाशास्ते ॥१६॥

स गृह्णाति मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्। 24
कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ उपयामगृहीतो ऽसि

ध्रुवो ऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमो ऽच्युतानामच्युतक्षित्तमः ॥ एष ते योनिर्वैश्वानराय त्वेति सादयति वैश्वानराय ह्येनं गृह्णाति व्युह्य न तृणं चनान्तर्धाय ॥१७॥ चतुर्थं ब्राह्मणम् ॥ द्वितीयो ऽध्यायः ॥

1 गृह्णाति P. 2 गृह्णात्यथ B W. 3 °ब्रवीत B W C. 4 वास्यैष B W My. 5 यदेवावाङ् ना° B, यदेवावाङ्ना° C O (orig.), यदेवावाङ् ना° W P O (sec. m.), °वांङ्ना° My. 6 एतस्मा° B W My. 7 तंन्न C P, तन्न B W My. 8 °वेद्यस्तूयमाने B. 9 °नं निःसर्पे° MSS. 10 °मेह्यानीति B. 11 यद्वा अवाङ् MSS. 12 °मानस्यैव B, °मानस्यैव C O P W. 13 Read भवति? 14 Read plural? 15 सैव B. 16 °सद्भवति MSS. 17 Thus emended, तद्यदेतंनिःसर्पत्यग्निष्टोमसदेतद्यशः MSS. 18 यशसो C O P, यशसो B W. 19 तदविक्षो° MSS. 20 °द्विमे संलुब्धाः MSS. 21 °सादयति C O P. 22 व्युह्यैनं C O P, व्यूह्यैतं B, व्युह्यैतं My W. 23 सादयत्यथ B. 24 °यंज्ञो य B C. 25 एतदन्यस्या B W My. 26 सादयति MSS. 27 एक B. 28 °नेन B W C. 29 °मेव प्रस्रावयते B. 30 °देनं C. 31 एव B. 32 दुहत MSS. 33 Thus MSS. except My (बद्धवत्सुप°). 34 प्रस्तुता B W. 35 एवमयं B. 36 Omitted in B W My.

M. IV. 2. 5 K. V. 3. 1

1 स वै यदैतान्ब्रह्मान्गृह्णात्यथ[1] निःसृप्य[2] विप्रुषः[3] होमं जुहोति स यद्विप्रुषः होमं जुहोति या एवास्याभिषूयमाणस्य विप्रुषः स्कन्दन्त्यः शुर्वा कश्चित्ता एवैतदाहवनीये स्वगाकरोत्याहवनीयो ह्याहुतीनां प्रतिष्ठा तस्माद्वाव विप्रुषः होमं जुहोति ॥१॥

2 स जुहोति यस्ते द्रप्सः[3] स्कन्दति यस्ते अंशुरिति स्तोको वै द्रप्सः स

यः कश्चित्स्तोकः स्कन्दति तमेवैतदाहवनीये स्वगाकरोति यस्ते अꣳशुरिति तद्यो ऽꣳशुर्ग्रावच्युतो धिषणयोरुपस्थादिति ग्रावणा हि च्युतो ऽधिषवणाभ्यामधिस्कन्दत्यध्वर्योर्वा[1] परि वा यः पवित्रादित्यध्वर्योर्वा[2] हि[3] पाणिभ्याꣳ स्कन्दति पवित्राद्वा तं ते जुहोमि मनसा वषट्कृतꣳ स्वाहेति तद्यथा वषट्कृतꣳ स्वाहाकृतꣳ हुतमेवं भवति ॥२॥

अथास्याः[4] स्तीर्णायां[5] वेदेर्द्वे तृणे आदत्ते तावध्वर्यू प्रथमावभीतः[6] प्राणोदानौ यज्ञस्याथ प्रस्तोता वाग्यज्ञस्याथोद्गातात्मैव[7] प्रजापतिर्यज्ञस्याथ प्रतिहर्ता भिषग्वा व्यानो वा तान्पञ्चर्त्विजो ऽन्वारभ्यैति यजमान एतावान्हि यज्ञो यावदेते पञ्चर्त्विजः पाङ्क्तो हि यज्ञस्तद्यज्ञमन्वारभ्यैति यजमानः ॥३॥ 3.4

अथानयोस्तृणयोरन्यतरच्चात्वालमभि प्रास्यति देवानामुत्क्रमणमसीति यत्र वै देवा यज्ञेन स्वर्गं लोकꣳ समाश्नुवत त एतस्मादेव चात्वालादूर्ध्वा उच्चक्रमुस्तमेवैतत्पन्थाꣳ स्वर्ग्यं देवयानं यजमानमनुसंख्यापयति ॥४॥ 5

अथ यदा सꣳसीदन्त्युद्गातारस्तेषां पुरस्तादन्यतरदुपास्यति स्तोमो[8] वा एष प्रजापतिर्यदुद्गातारः स इदꣳ सर्वं युते स इदꣳ सर्वꣳ संभवति तस्मा एवैतत्तृणमपिदधाति तथैनमेष न युते तथा न संभवत्यथ यदा[9] मन्यते[10] ऽजापिषुरिति[11] जपन्ति वा अत्रोद्गातारः[12] ॥५॥ 6

अथ स्तोत्रमुपाकरोति सोमः पवत इति स वै पराक् स्तोत्रमुपाकरोति[13] पराञ्चः[14] स्तुवते देवान्वा एतान्यभ्यावृत्तानि स्तोत्राणि यत्पवमानाः पराञ्चो ह्येतैर्देवाः स्वर्गं लोकꣳ समाश्नुवत तस्मात्पराङुपाकरोति पराञ्चः[15] स्तुवत उपावर्तध्वमित्यन्यानि स्तोत्राण्युपाकरोत्यभ्यावर्ते[16] धुर्यै स्तुवत इमा वै प्रजास्तानि स्तोत्राण्यभ्यावृत्तानि तस्माद्विमाः प्रजाः पुनरभ्याकारं प्रजायन्ते ॥६॥ 7.8

अथ यदत्र बहिष्पवमानेन[17] स्तुवते ऽत्र ह वा एषो ऽग्रे सूर्य आस तेनर्तवः परिगृह्योर्ध्वा उच्चक्रमुः स एष ऋतुषु प्रतिष्ठितस्तपति[18] तथो वा एतेनर्त्विजः परिगृह्योर्ध्वा उत्क्रामन्ति[19] तस्मादत्र बहिष्पवमानेन स्तुवते ॥७॥ 9

स बहिष्पवमानान्निन्द्यं पर्येव बिबाधिषेतैषा[20] वै नौः[21] स्वर्ग्या यद्बहिष्पवमानं तस्या एतस्या नावः[22] स्वर्ग्याया अरित्राश्च स्फ्याश्चर्त्विजः स्वर्गस्य लोकस्य संपारणास्तस्या एतस्या नावः[23] स्वर्ग्याया य एव निन्द्यः सः[24] मज्जयिता[25] सः[26] यथा पूर्णां नावमभ्यारुह्य तां मज्जयेदेवꣳ ह यजमानं मज्जयति तद्यत्रापि[27] निन्द्यो भवति तस्मान्निन्द्यं बहिष्पवमानात्पर्येव बिबाधिषेत[28] तदु सर्व एव यज्ञो नौः स्वर्ग्या सर्व- 10

स्मादेव यज्ञान्निन्द्यं परिबिबाधिषेताथ[13] यदा स्तुवते ॥८॥

11 अथ संप्रेष्यत्यग्नीदग्नीन्विहर बर्हिः स्तृणीहि पुरोळाशांश्च अलंकुरु पशुनेहीति सो ऽग्नीदग्नीन्विहरति[14] समिन्द्ध एवैनꣳस्तद्बर्हिः स्तृणाति स्तीर्णे बर्हिषि समिद्धे देवेभ्यो जुहवामेति पुरोळाशांश्च अलंकुर्विति पुरोळाशैर्हि प्रचरिष्यन्तो भवन्ति पशुनेहीति पशुꣳ ह्यालप्स्यमानो[15] भवति ॥९॥

12.13 अथैतमाश्विनं ग्रहं गृहीत्वा परिवीय पशुमालभते रसमेवास्मिꣳस्तद्दधाति खदयत्येवैनं तत्तस्मादेष प्रातःसवन आलब्ध आ तृतीयसवनाच्छूप्यमाण उपशेते सर्वस्मिन्नेवैतद्यज्ञे रसं दधाति सर्वमेव यज्ञꣳ रसेन प्रसजति ॥१०॥

14 तदाग्नेयमेवाग्निष्टोम आलभेत तद्धि सलोम यदाग्नेयमग्निष्टोम आलभेत यद्युक्थ्यः स्यादैन्द्राग्नं द्वितीयमालभेतैन्द्राग्नानि ह्युक्थानि यद्यु षोळशी स्यादैन्द्रं तृतीयमालभेतेन्द्रो हि षोळशी यद्युतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत वाग्वै सरस्वती योषा वै वाग्योषा वै रात्रिस्तस्मात्सारस्वतं चतुर्थमालभेतैवमु यज्ञक्रतून्यथायथं व्याकरोति ॥११॥

15.16 अथैतैः सवनीयैः पुरोळाशैः प्रचरति स यदेतैः सवनीयैः पुरोळाशैः प्रचरति दिवि वै सोमो देवो हि सोमो वृत्रो वै सोमस्तस्यैतच्छरीरं यद्व्रियो यदश्मानस्तदेषौशान्या[16] नामौषधिर्जायत[17] इति होवाच श्वेतकेतुरौद्दालकिस्तामेतदाहृत्याभिषुण्वन्तीति स यत्पशुमालभते रसमेवास्मिꣳस्तद्दधात्यथास्मिन्नेतन्मेधो दधाति यदेतैः सवनीयैः पुरोळाशैः प्रचरति तथो खलु सोमो भवति ॥१२॥

17-19 ते वै सर्व ऐन्द्रा भवन्तीन्द्रो हि यज्ञस्य देवता तस्मात्सर्व ऐन्द्रा भवन्त्यथ यत्पुरोळाशो धानाः करम्भो दधीति भवति सुप्रीता देवता असन्निति या यज्ञस्य देवता इत्येतर्ह्यपूपं खादित्वा कामयते धाना नु खादेयं[18] करम्भमद्यां[19] दधि पिबेयमिति तद्या यज्ञस्य देवतास्ताः सुप्रीता असन्नित्यथ यदेषा प्रातःसवन एव मैत्रावरुणी पयस्यावक्लृप्ता नेतरयोः सवनयोः ॥१३॥

20-22 गायत्री वै प्रातःसवनं वहति त्रिष्टुम्माध्यंदिनꣳ[20] सवनं जगती तृतीयसवनꣳ सानेकाकिन्येव त्रिष्टुम्माध्यंदिनꣳ[21] सवनं वहति गायत्र्या च बृहत्या चानेकाकिन्येव जगती तृतीयसवनं वहति गायत्र्योष्णिक्ककुब्भ्यामनुष्टुभेत्यथ[22] गायत्र्येवैकाकिनी प्रातःसवनं वहति सो एताभ्यां पङ्क्तिभ्यामनेकाकिनी[23] वहति स्तोत्रपङ्क्त्या च हविष्पङ्क्त्या च बहिष्पवमानमह[24] चत्वार्याज्यानि[25] तानि पञ्च स्तोत्राणि

पञ्चपदा वै पङ्क्तिस्तया नु[34] स्तोत्रपङ्क्त्यानेकाकिनी वहतीन्द्रस्य पुरोलाशो हर्योर्धानाः पूष्णः करम्भः सरस्वत्या दधि मित्रावरुणयोः पयस्या तानि पञ्च हवींष्यि पञ्चपदा वै पङ्क्तिस्तया[35] हविष्पङ्क्त्यानेकाकिनी[36] वहत्येतस्याः संपदः कामाय तस्मादेषा प्रातःसवन एव मैत्रावरुणी पयस्यावक्लृप्ता नेतरयोः सवनयोः ॥१४॥ प्रथमं ब्राह्मणम् ॥

1 यदेता° B W. 2 निसृप्य MSS. 3 द्रप्स B W. 4 धिषणाभ्या° B W. 5 °ध्वर्योर्हि वा B. 6 °स्या स्तीर्णाया MSS. 7 Thus emended; प्रथमावभितः MSS. 8 °थोद्वातात्मैव MSS. 9 सोमो B W. 10 यदा मन्यते जापिषु° B W, यदा मन्यते जापिषु° C O, यदा मन्यते जापिषु° P. 11 °तारः MSS. 12 °मुपाकरोति B W O P. 13 परांच C O P (once). 14 Thus the accented MSS. Read स्तोत्राण्युपाकरोत्य° ? 15 बहिःप° some of the MSS. 16 प्रतिष्ठि° MSS. 17 उपक्रा° B. 18 विबा° B C. 19 नौ MSS. 20 नावः MSS. 21 स मज्जयिता स C O P, स मज्जयता सा B W My. 22 यद्यत्रापि C O P. 23 विबा° B W. 24 श्रिदग्नी° B. 25 Thus emended, °लिप्स्यमानो MSS. 26 Thus emended (cp. IV. 4. 3. 11), °स्तदेषौसंज्ञा B W, °स्तदेषौसंज्ञा C O P, °स्तदेषासंज्ञा My. 27 नामोषधि° MSS. 28 खादेय B W. 29 करंभसद्यां B W. 30 त्रिष्टुप्मा° MSS. 31 त्रिष्टुप्मा° B W. 32 °ष्णिक्कुब्भ्या° B, °ष्णिक्कुब्भ्या° C O, °ष्णिक्कुप्भ्या° P W. 33 पंक्तिभ्यामेकाकिनी B My. 34 Thus emended; °वमानमहच्चत्वा° MSS. 35 नु MSS. 36 Thus emended; °स्तयोर्हविःप° MSS.

K. V. 3. 2 M. IV. 3. 1

स वै यदैतदाहुः[1] समुपहूता स्म इत्यथ पुरोलाशवृक्कलमादायाध्वर्युरुपोत्तिष्ठ- 1

त्यथ यत्रैतदासीनो ऽच्छावाको ऽन्वाह तदुपसन्नो भवति तस्मै पुरोलाशवृकलमाधायाह्वाच्छावाक[1] वदस्व यत्ते वाद्यमिति स यदस्मै पुरोलाशवृकलमाद्धात्यह्वीयत[2] वा अच्छावाकः ॥१॥

2 तमिन्द्राग्नी अनुसमतनुतां प्रजानां प्रजातये[3] तस्मादेष ऐन्द्राग्नो ऽच्छावाकः स एतेन चार्षेयेण यदेतदन्वाहैतेन च हविषा समश्नुते यदस्मा एतत्पुरोलाशवृकलमाद्धाति तस्माद्वा अस्मै पुरोलाशवृकलमाद्धाति[4] ॥२॥

3 अथाच्छावाके सन्न ऋतुग्रहैश्चरन्ति[5] स यदच्छावाके सन्न ऋतुग्रहैश्चरन्ति मिथुनं वा अच्छावाक ऐन्द्राग्नो ह्यच्छावाको द्वौ हीन्द्राग्नी द्वन्द्वं[6] हि मिथुनं प्रजननं तन्मिथुनादेवैतत्प्रजननादृतून्त्संवत्सरं प्रजनयति तस्मादच्छावाके सन्न ऋतुग्रहैश्चरन्ति ॥३॥

4 अथ यद्वैवर्तुग्रहैश्चरन्त्यृतूनेवैतत्संवत्सरं प्रजनयति सर्वे वा ऋतवः संवत्सरः सर्वमेवैतत्प्रजनयति ॥४॥

5 तान्द्वादश गृह्णीयाद्द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश गृह्णीयादथो त्रयोदश गृह्णीयादित्याहुरस्ति त्रयोदशो मास इति द्वादश त्वेव गृह्णात्येषैव स्थितिरेषा संपत्[7] ॥५॥

6 द्रोणकलशाद्गृह्णाति प्रजापतिर्वा एष पात्राणां यद्द्रोणकलशस्तत्प्रजापतेरेवैतदृतून्त्संवत्सरं प्रजनयति तस्माद्द्रोणकलशाद्गृह्णाति ॥६॥

7 उभयतोमुखाभ्यां पात्राभ्यां गृह्णाति कुतस्त्योरन्तो ये उभयतोमुखे तस्मादयमनन्तः संवत्सरः परिप्लुवते तान्[8] सादयति तस्माद्वयमसन्नः संवत्सरः परिप्लवते[9] ॥७॥

8.9 नानुवाक्यामन्वाह[10] ह्यति वा अनुवाक्ययागतो ह्येवायमृतुर्यदि दिवा यदि नक्तं नानुयजति नेदृतूनपवृणजा इति सह प्रथमौ सहोत्तमौ गृह्णीतः सर्वमेवैतत्संवत्सरेण परिगृह्णीतस्तदिदं[11] सर्वं[12] संवत्सरेण परिगृहीतं निष्क्रामत्येवान्यतरः[13] प्रान्यतरः[14] पद्यते[15] तस्मादिमे ऽन्वञ्चो मासा यन्ति[16] यद्वोभौ[17] सह निष्क्रामेतां[18] पृथग्घ[19] मासा ईयुस्तस्मान्निष्क्रामत्येवान्यतरः[20] प्रान्यतरः पद्यते[21] ॥८॥

10.11 स वा ऋतुना षट् प्रचरति तद्देवा अहरसृजन्ताथर्तुभिश्चतुस्तद्रात्रिमसृजन्त तद्यदेतावदेवाभविष्यद्रात्रिरेवाभविष्यन्न व्यवत्स्यदथ पुनर्ऋतुना द्विस्तत्पुरस्तादहः[22] पर्यदधुस्तस्माद्येदमहरथ[23] रात्रिर्भविष्यत्यथ श्वो ऽहर्भविता[24] ॥९॥

अथ यद्वेवर्तुना तेन मनुष्यानसृजन्त[10] यदृतुभिस्तेन पशूंत्स यत्तदुभयतो 12
येन मनुष्यानसृजन्त तस्माद्विम उभयतः परिगृहीताः पशवो मनुष्याणां
वशमुपेताः ॥१०॥

स वा ऋतुना चरित्वेतरथा विपर्यस्यत्यृतुभिश्चरित्वेतरथा विपर्यस्यत्यन्यतरत 13
एवैतद्दहः सृजते ऽन्यतरतो रात्रिमन्यतरतो[11] मनुष्यानन्यतरतः पशूꣳस्तस्माद्वि-
पर्यासं गृह्णाति ॥११॥

अथ वा अतो गृह्णात्येवोपयामगृहीतो ऽसि मधवे त्वेत्यध्वर्युरुपयामगृहीतो 14
ऽसि माधवाय त्वेति प्रतिप्रस्थाता तौ वासन्तिकावृतू वसन्ते ह्योषधयो जायन्ते
वनस्पतयः पच्यन्ते तेन तौ मधुश्च माधवश्च ॥१२॥

उपयामगृहीतो ऽसि शुक्राय त्वेत्यध्वर्युरुपयामगृहीतो ऽसि शुचये त्वेति 15
प्रतिप्रस्थाता तौ ग्रैष्मावृतू[12] यत्तयोर्बलवत्तपति तेन तौ शुक्रश्च[13] शुचिश्च ॥१३॥

उपयामगृहीतो ऽसि नभसे त्वेत्येवाध्वर्युरुपयामगृहीतो ऽसि नभस्याय 16
त्वेति प्रतिप्रस्थाता तावेव वार्षिकावमुतो[14] हि दिवो ऽधि वर्षति तेन तौ[15] नभश्च[16]
नभस्यश्च ॥१४॥

उपयामगृहीतो ऽसीषे त्वेत्यध्वर्युरुपयामगृहीतो ऽस्यूर्जे त्वेति प्रतिप्र- 17
स्थाता तौ शारदावृतू शरदि ह्यूर्ग्रस ओषधयः पच्यन्ते तेन ताविषश्चोर्जश्च ॥१५॥

उपयामगृहीतो ऽसि सहसे त्वेत्यध्वर्युरुपयामगृहीतो ऽसि सहस्याय 18
त्वेति प्रतिप्रस्थाता तौ हैमन्तिकावृतू हेमन्तो[17] हीमाः प्रजाः सहसेव स्वं वशमुप-
नयते तेन तौ सहश्च सहस्यश्च ॥१६॥

उपयामगृहीतो ऽसि तपसे त्वेत्यध्वर्युरुपयामगृहीतो ऽसि तपस्याय 19
त्वेति प्रतिप्रस्थाता तौ शैशिरावृतू[18] यत्तयोर्बलवच्छ्वयति[19] तेन तौ तपश्च
तपस्यश्च ॥१७॥

उपयामगृहीतो ऽस्यꣳहसस्पतये त्वेति यदि त्रयोदशं गृह्णात्यथ प्रतिप्र- 20.21
स्थाता वाध्वर्योः पात्रे सꣳस्रवमवनयति[20] प्रतिप्रस्थातुर्वाध्वर्युर्भक्षमध्वर्युर्हरत्यथ[21]
तथैवाभक्षितेन प्रतिप्रस्थातैतमैन्द्राग्नं ग्रहं गृह्णाति स यदभक्षितेनैतमैन्द्राग्नं ग्रहं
गृह्णाति न वा ऋतुग्रहाणामनुवषट्करोति स[22] एतेनैन्द्राग्नेनानुवषट्कृतो[23] भवन्ति[24]
तस्मादभक्षितेन गृह्णाति ॥१८॥

अथ यद्वेवाभक्षितेन गृह्णाति सर्वं वा एतत्प्राजीजनद्यदृतुग्रहानग्रहीत्तत्सर्वं 22

प्रजनय्य प्राणोदानयोः प्रतिष्ठापयतीमे[31] हि[32] द्यावापृथिव्यौ[33] प्राणोदानावनयोर्हीदꣳ सर्वं प्रतिष्ठितं तस्मादभक्षितेन गृह्णाति ॥१९॥

23 अथ यद्वेवाभक्षितेन गृह्णाति सर्वं वा एतत्प्राजीजनद्यदृतुग्रहानग्रहीत्तत्सर्वं प्रजनय्य तस्मिन्त्सर्वस्मिन्प्राणोदानौ दधाति ताविमावस्मिन्त्सर्वस्मिन्प्राणोदानौ हितौ तस्मादभक्षितेन गृह्णाति ॥२०॥

24 स गृह्णातीन्द्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरेण्यम्। अस्य पातं धियेषिता ॥ उपयामगृहीतो ऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वेति सादयति ॥२१॥

25.26a अथैतं वैश्वदेवं ग्रहं गृह्णाति स यदेतं वैश्वदेवं ग्रहं गृह्णाति सर्वं वा एतत्प्राजीजनद्यदृतुग्रहानग्रहीत्तद्यदेतावदेवाभविष्यद्यावत्यो ह्येवाग्रे प्रजाः सृष्टास्तावत्य एवाभविष्यन्न प्राजनिष्यन्त[34] सर्वमु वै विश्वे देवास्तत्सर्वमनुव्यर्जति[35] तस्माद्विमाः प्रजाः पुनरभ्याकारं प्रजायन्ते ॥२२॥

26b शुक्रपात्रेण गृह्णात्येष वाव शुक्रो य एष तपत्यथ ये रश्मयस्ते विश्वे देवास्तस्माच्छुक्रपात्रेण गृह्णाति ॥२३॥

27 स गृह्णात्योमासश्चर्षणीधृतो विश्वे देवास आगत। दाश्वाꣳसो दाशुषः सुतम् ॥ उपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति ॥२४॥ द्वितीयं ब्राह्मणम् ॥

1 °दाहुः MSS. 2 Emended; °मादाया° MSS. 3 पुरोलाशोवृकल° MSS. 4 प्रजायै B, प्रजाये W My. 5 °लमादधाति B, °लमादधाति C W, °लमादध्यति P. 6 °श्नरति B. 7 संपत् B W. 8 तांन्न B C W, ताऩ्न O P My (तंन the Mādhy.). 9 °वते B W. 10 °क्यामन्वाह MSS. 11 निःक्रा° MSS. 12 प्रा° MSS. (but O the second time with correct accent). 13 संपद्यते B W My. 14 यंति MSS. 15 यद्धोभौ B O P W. 16 पृथग्धि MSS. except C. 17 °स्तादहः C. 18 पर्यदधु° MSS. 19 हर्भविता MSS. 20 °ध्यानसृजंत B W

O P, °ध्यानसृजंत C. 21 C adds in margin रात्रिमन्यतरतो. 22 ग्रैष्मा ऋतू B. 23 शुक्रश्च MSS. 24 वार्षिकावमुतो MSS. 25 तौ नभश्च MSS. 26 हैमंतो B W My. 27 Emended; शिशि° MSS. 28 °बलवछायति C, °बलवत्तपति O P, °बलवत्तपति B W My. 29 स॰स्रवमवनयति B W C O. 30 °भैक्षम-ध्वर्युर्हरत्यथ C O (P is incomplete), °भैक्षमध्वर्युरित्यथ B W. 31 Thus MSS. Read probably त एतेनैन्द्राग्नेनानुवषट्कृता भवन्ति. 32 इमे हि omitted in B W O My. 33 °पृथिव्यौ MSS. 34 प्राजनिष्यंत: B W P O (sec. m.), प्रजनिष्यंतः C O (pr. m.) My; cp. IV. 8. 4. 12. 35 °मनुष्यर्जति MSS.

K. V. 3. 3 M. IV. 3. 2

गृणाति ह वा एतद्धोता यच्छ॰सति तस्मा एष एतद्गृणते प्रतिगृणाति 1.2
तस्मात्प्रतिगरो नाम तं वै प्राञ्चमासीनमभ्याह्वयते प्राञ्चो वा अन्य ऋत्विज आर्त्विज्यं
कुर्वन्त्यन्य[1] उद्गातृभ्यस्तथास्यैतत्प्रागार्त्विज्यं[2] कृतं भवति ॥१॥

उपपर्यावृत्य प्रतिगृणाति प्रजापतिर्वा उद्गाता योषग्र्धोता[1] तदेतत्प्रजापति- 3.4
रुद्गाता योषायामृचि होतरि रेतः सिञ्चति यदुद्गायति तदेतद्धोता रेतः सिक्तं प्रजन-
यति यच्छ॰सति तच्छथति[2] यथा स॰शितः[3] पुरुषस्तथा तत्तस्माच्छस्त्रं नाम तदेत-
द्रेतः सिक्तमुपपर्यावृत्याध्वर्युरुपनिवदति यद्ध पराङेव तिष्ठन्प्रतिगृणीयात्परार्ग्धैवै-
तद्यजमानाद्रेतः[4] सिक्तं प्रणश्येत्सम्यञ्चावेवैतद्भूत्वैतद्रेतः सिक्तं प्रजनयतः ॥२॥

अथ यद्वेव प्रतिगृणाति यातयामानि वै देवैश्छन्दा॰सि स्वर्ग॰ ह्येभिर्लोक॰ 5
समाप्नुवत य उ वै मद ऋचि वा सामनि वा रसो वै स[5] मदो[6] वै प्रतिगरश्छन्दः-
स्वेवैतद्रसं दधाति तानि पुनराप्याययत्ययातयामानि करोति तैरयातयामभिर्यज्ञं
तन्वते तस्माद्वाव प्रतिगृणाति ॥३॥

स यत्रार्धर्चशः श॰सत्यर्धर्चे ऽर्धर्चे तत्र प्रतिगृणाति यत्र पच्छः पदे पदे 6
तद्यत्र ह वै होतावानिति[1] तद्ध यज्ञं[2] नाष्ट्रा रक्षा॰स्यन्ववचरन्ति[3] तदध्वर्युः प्रतिगरेण

संदधाति तथो रक्षाꣳसि यज्ञं नान्ववचरन्ति भ्रातृव्यलोकमु[11] चैवैतद्यजमानस्य[12] छिनत्ति ॥४॥

7 चतुरक्षराण्यु ह वा अग्रे छन्दाꣳसि ततो जगती सोममच्छापतत्सा[13] त्रीण्यक्षराणि[14] हित्वैकेनाक्षरेण पुनरागच्छदथ त्रिष्टुबुदपतत्सैकमक्षरꣳ हित्वा त्रिभिरक्षरैः पुनरागच्छदथ गायत्र्युदपतत्सा सर्वाणि च तान्यक्षराण्यादायागच्छत्सोमं[15] च ततो ऽष्टाक्षरा गायत्र्यभवत्तयैव यज्ञियं[16] तन्तुमाप्नियन्त तस्माद्गायत्रं प्रातःसवनं तयैव माध्यंदिनꣳ सवनं तन्तुमाप्नियन्त ॥५॥

8 सा त्रिष्टुबुवाचोप त्वा यानीत्येभिस्त्रिभिरक्षरैर्मा मान्तर्गा उप मा सृजस्वेति तथेति तामुपासृजत सैकादशाक्षरा त्रिष्टुबभवत्तदु त्रैष्टुभं माध्यंदिनꣳ सवनमभवत्तयैव तृतीयसवनं तन्तुमाप्नियन्त ॥६॥

9 सा जगत्युवाचोप त्वा यानीत्यनेनैकेनाक्षरेण मा मान्तर्गा उप मा सृजस्वेति तथेति तामुपासृजत सा द्वादशाक्षरा जगत्यभवत्तदु जागतं तृतीयसवनमभवत्तस्माद्वा आहुर्गायत्र्येवैतानि सर्वाणि सवनानीति सा ह्येतदुपसृजमानैदिति[17] ॥७॥

10-14 स सꣳसिद्धं प्रातःसवने प्रतिगरं प्रतिगृणाति सꣳसिद्धा हि गायत्र्यागच्छत्सकृन्मद्वन्माध्यंदिने[18] सवने प्रतिगृणाति यत्र त्रिष्टुभः शꣳसत्येकं वै साक्षरꣳ हित्वागच्छत्तेनैवैनामेतत्समर्धयति कृत्स्नां करोति त्रिमद्वृतीयसवने त्रीणि वै साक्षराणि हित्वागच्छत्तैरेवैनामेतत्समर्धयति कृत्स्नां करोति द्यावापृथिव्ये[19] मद्वत्प्रतिगृणाति यत्र द्यावापृथिव्यꣳ शꣳसतीमे वै द्यावापृथिव्याविमाः[20] प्रजा उपजीवन्ति तयोरेवैतद्रसं दधाति ते रसवत्या उपजीवनीये इमाः प्रजा उपजीवन्ति स[21] ओ३मिति प्रतिगृणाति[22] ताद्धि सत्यं तद्देवा विदुस्तदु ह्येके[23] वौथामोदैवेतीव[24] प्रतिगृणन्ति वागित्युपेप्सन्तस्तदु तथा न प्रतिगृणीयादनपराद्धा वै वाग्यथा ह्येव कथा च प्रतिगृणाति वाचैव प्रतिगृणाति तस्मादोꣳमित्येव प्रतिगृणीयात्तदु ह्येव सत्यं तद्देवा विदुः ॥८॥ तृतीयं ब्राह्मणम् ॥

1 कुर्वंत्यन्य MSS. 2 °प्रागार्त्वि° B C (orig.) corrected into प्राङार्त्वि°, and thus also O (orig.) corrected into प्रागार्त्वि°, and My; °प्रागार्त्वि° W. 3 योषघोता C O P W My, योषह्योता B. 4 तछयति C. 5 सꣳसितः B W, यꣳसितः C

O P My. 6 तिष्ठन्प्रति° MSS. 7 Thus P, स मदो B C O, स मदो W. 8 °वानिति B O W. 9 Emended; यज्ञस्य MSS. 10 °न्वेवचरंति B. 11 भ्रातृव्यलोकमुवैवैतद्य° B. 12 °मछापपतत्सा C; °तत्सापि B, °तत्सावि My. 13 °क्षराणि MSS. 14 °ण्यादायागछ° MSS. 15 Read यज्ञं? 16 °दुप-सृजमानैदिति C, °दुपसृजमानैरिति the other MSS. 17 °त्सकृन्मर्द्धन्मा° C O (orig.). 18 द्यावापृथिव्ये C O W, द्यावापृथिव्ये B. 19 °पृथिव्या° MSS. 20 स C O. 21 प्रति° B W. 22 वौथामोदेवेतीव B W, वोथामो° My. Read probably हैक ओथा°.

K. V. 3. 4 M. IV. 3. 3

इहा३ इहा३ इत्यभिषुणोतीन्द्रमेव तदाच्यावयति बृहद्बृहदितीन्द्रमेव तदाच्यावयति स शुक्रामन्थिनौ प्रथमौ गृह्णाति शुक्रवद्ध्येतत्सवनम्[1] ॥१॥ 1

अथाग्रयणं गृह्णाति सर्वेषु ह्येष सवनेषु गृह्यते तस्मादाग्रयणं गृह्णात्यथ मरुत्वतीयं गृह्णात्यथोक्थ्यं गृह्णात्युक्थानि[2] ह्यत्रापि भवन्ति तद्वा आहुरुक्थ्यमेव पूर्वं गृह्णीयादित्यथ मरुत्वतीयमिति मरुत्वतीयं[3] त्वेव पूर्वं गृह्णात्यथोक्थ्यम् ॥२॥ 2.3

तान्वा एतान्पञ्च ग्रहान्गृह्णाति स यदेतान्पञ्च ग्रहान्गृह्णात्येष वै वज्रो यदेष माध्यंदिनः पवमानस्तस्मात्पञ्चदशः[4] पञ्चसामा भवति पञ्चदशो हि वज्रस्तमेतैः पञ्चभिर्ग्रहैः पञ्च ह्येमा अङ्गुलयो ऽङ्गुलिभिर्हि[5] प्रहरतीन्द्रो वृत्राय वज्रं प्राहरत्तेन वृत्रमहꣳस्तेन व्यजयन्त ते विजिते ऽभये ऽनाष्ट्रे दक्षिणा अनयन्त[6] तस्मादप्येतर्हि यदैवैतेन[7] माध्यंदिनेन पवमानेन स्तुवते ऽथ दक्षिणा नयन्ते[8] विजित[9] एवैतदभये ऽनाष्ट्रे दक्षिणा नयन्ते[8] तथो[10] वा एष एतैः पञ्चभिर्ग्रहैरेतं वज्रं द्विषते भ्रातृव्याय प्रहरति तेन द्विषन्तं भ्रातृव्यꣳ हन्ति तेन विजयते तस्माद्वा एतान्पञ्च ग्रहान्गृह्णाति ॥३॥ 4.5

अथ यन्मरुत्वतीयान्गृह्णात्येतद्वा इन्द्रस्य निष्केवल्यꣳ सवनं यन्माध्यंदिनꣳ सवनं तेन वृत्रमजिघाꣳसत्तेन व्यजिगीषत क्षत्रमु वा इन्द्रो विशो मरुतो विशा[11] वै क्षत्रियो बलीयान्भवति ॥४॥ 6

7 सा[११] ह्याश्वत्थे तिष्ठत इन्द्रो[१२] मरुत उपमन्त्रयां चक्रे तस्मादाश्वत्थे ऋतुपात्रे स्यातामित्याहुः कार्ष्मर्यमये त्वेव भवत उप मावर्तध्वं युष्माभिर्बलेन वृत्रꣳ हनानीति ॥५॥

ते होचुः किमस्माकं ततः स्यादिति तेभ्य एतौ ग्रहावगृह्णादेतौ मरुत्वतीयौ ॥६॥

8 ते होचुरपनिधायैनमोज[१३] उपावर्तामहा इति तथेति तमपनिधायौज[१४] उपाववृतुस्तदु वा इन्द्रो ऽस्पृणुत तत्प्रत्यबुध्यतापनिधाय[१५] वै मौज[१६] उपावर्त्स्यतेति[१७] ॥७॥

9 स होवाच[१८] मैतदपनिधिध्वमिति सहैव मौजसोपावर्तध्वमिति[१९] ते होचुस्तस्मै[२०] वै नो ऽन्यं भागं कल्पयेति तस्मा[२१] एतमन्यं भागमकल्पयदुपयामगृहीतो ऽसि मरुतामोजसे त्वेति तꣳ सहौजसोपावर्तन्त तेन बलेन वृत्रमहꣳस्तेन व्यजिगीषत क्षत्रमु वा इन्द्रो विशो मरुतो विशा वै क्षत्रियो बलीयान्भवति क्षत्र एवैतद्बलं दधाति ॥८॥

10.11 तान्वा इन्द्रायैव मरुत्वते गृह्णाति न मरुद्भ्यो यद्ध मरुद्भ्य इति गृह्णीयात्प्रत्युद्यामिनीꣳ ह क्षत्रियाय विशं कुर्यात्तदिन्द्रमेवैतदनु मरुत आभजति[२२] प्रत्युद्यामिनीमेवैतत्क्षत्रियाय[२३] विशं करोत्यनुवर्त्मानमपक्रमादु हैवैषां बिभयां चकार यदिमे मन्नापक्रामेयुरिति तानेतदनपक्रमिण एवाकुरुत तस्मादिन्द्रायैव मरुत्वते गृह्णाति[२४] न मरुद्भ्यः ॥९॥

12 ऋतुपात्राभ्यां गृह्णात्यृतवो वै संवत्सरो यज्ञस्तानदः प्रत्यक्षं प्रातःसवने ऽवकल्पयति यद्दतुग्रहान्गृह्णात्यथैनानेतत्परोक्षं माध्यंदिने सवने ऽवकल्प्यन्ते यद्दतुपात्राभ्यां मरुत्वतीयान्गृह्णाति[२५] विशो वै मरुतो ऽन्नमु वै विश ऋतवो वा इदꣳ सर्वमन्नं पचन्ति तस्मादृतुपात्राभ्यां गृह्णाति ॥१०॥

13.14 स गृह्णातीन्द्र मरुत्व इह पाहि सोमं मरुत्वन्तं वृषभं वावृधानं मरुतामोजसे त्वेति[२६] ॥११॥

15-17 अथैतं माहेन्द्रं ग्रहं गृह्णाति स यदेतं माहेन्द्रं ग्रहं गृह्णाति पाप्मना वा इदमिन्द्रः सꣳसृष्टो ऽभूत्संयतो[२७] यद्विशा मरुद्भिर्यथा समाने पात्रे ऽश्नीयाद्विजयस्य कामाय क्षत्रियो वैश्येनैवमेतद्यदस्मै समानमेभिर्ग्रहमग्रहीषुस्तमेतदेवा[२८] विजिते ऽभये ऽनाष्ट्रे यथेषीकां विमुञ्चां[२९] कुर्यादेवं पाप्मनो व्यवृहन्यन्माहेन्द्रं ग्रहमगृह्णꣳस्तथो वा एनमेष एतद्विजिते ऽभये ऽनाष्ट्रे यथेषीकां विमुञ्चां[३०] कुर्यादेवं

पाप्मनो विवृहति[15] यन्माहेन्द्रं ग्रहं गृह्णातीन्द्रो वा एष पुरा वृत्रस्य वधादित्थ वृत्रं जघ्निवान्यथा महाराजो विजिग्यान एवं महेन्द्र[16] इति तस्मान्माहेन्द्रं गृह्णाति ॥१२॥

शुक्रपात्रेण गृह्णात्येष वाव शुक्रो य एष तपत्येष उ वा इन्द्रस्तस्माच्छुक्रपात्रेण गृह्णाति ॥१३॥

स गृह्णाति महां३[17] इन्द्रो नृवदा[18] चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः। 18.19
अस्मद्र्यग्वावृधे वीर्यायोरु:[19] पृथुः सुकृतः कर्तृभिर्भूत् ॥ उपयामगृहीतो ऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वेति सादयति सादयित्वा स्तोत्रमुपाकरोति स्तोत्रमुपाकृत्य संप्रेष्यत्यभिषोतारो[20] ऽभिषुणुतौलूखलानुद्वादयताग्नीदाशिरं[21] विनय सौम्यस्य वित्तादिति ते यथासंप्रेषितं कुर्वन्ति स यदत्रैतत्संप्रेष्यत्यत्रैतत्कर्म क्रियत एते वै रसवती सवने शुक्रवती यत्प्रातःसवनं च माध्यंदिनं च सवनमथैतन्निर्धीतशुक्रं यत्तृतीयसवनं तन्माध्यंदिनादेवैतत्सवनात्तृतीयसवनं निर्मिमीत एतेनो हैतत्सवनꣳ शुक्रवद्रसवद्भवति तस्मादत्रैतत्संप्रेष्यत्यत्रैतत्कर्म क्रियते ॥१४॥ चतुर्थं ब्राह्मणम् ॥ तृतीयो ऽध्यायः ॥

1 शुक्रवद्ध्येतत्सवनं MSS. 2 °क्थानि B W.
3 °त्वतीयं MSS. 4 °त्पंचदशः B, °त्पंचदशः C.
5 °लीभिर्हि B, अंगुलिभिर्हि C O W. 6 आनयंत B W.
7 यदेवैतेन B W. 8 Read नीयन्ते ? 9 विजित MSS. 10 तथा C. 11 Cp. VI. 1. 3. 4.
12 Read either स हाश्वत्थे or साहाश्वत्थे (= स । अह । अश्वत्थे), or °भवति ॥४॥ सो हाश्वत्थे. 13 इंद्रो MSS.
14 Emended; °चैनामोज MSS. 15 तमुपनिधायौज and तमुपानिधायौज MSS. 16 तत्प्रत्यबुध्यता° MSS.
17 मोज MSS. 18 उपावर्त्स्यंथेति MSS. Instead of the 2nd plural future we expect a 3rd plural aorist : उपावृत्सतेति. 19 होवाच MSS.
20 मोज° MSS. 21 We expect तेभ्यो and तेभ्य.
22 आभजति प्रत्युद्यामिनी° B, आभजतिप्रत्युद्यामिनी° W,

आभजत्यग्न्युद्यामिनी° C O P. 23 गृह्णाति MSS. 24 °गृह्णाति B C O P W. 25 त्वेति MSS. 26 भूत्संवतो B W. 27 °ग्रैहमग्रहीषुं B W O; स्तमे-तद्देवा MSS. 28 विमुंजां MSS. (also VI. 1. 2. 16). 29 °हंति C. 30 माहेंद्र MSS. 31 महांऽ B W, महांऽ My. 32 नृषदा B. 33 °योरुं B W, °योरु C O. 34 °त्यभिषोतारो MSS. 35 भिषुणुतौलूं B, भिषुणुतौलूं C W O P.

M. IV. 3. 4 K. V. 4. 1

1.2 घ्नन्ति ह वा एतद्यज्ञं यद्देनं तन्वते यद्राजानमभिषुण्वन्ति तत्तं घ्नन्त्यथ यत्पशुꣳ संज्ञपयन्ति यद्विशासति तत्तं घ्नन्त्युलूखलमुसलेन[1] दृषदुपलेन हविर्यज्ञं घ्नन्ति स एवꣳ हतो यज्ञो न ददक्षे तं देवा दक्षिणाभिर्दक्षयां चक्रुस्तस्माद्दक्षिणा नाम यदाभिरदक्षयꣳस्तस्मादु दक्षिणा दद्यात्स यद्दक्षिणा ददाति यदेव[1] हतस्य यज्ञस्य व्यथते तदेवास्यैतद्दक्षिणाभिर्दक्षयत्यथ[3] समृद्ध एव यज्ञः ॥१॥

3 ताः षड्वा[4] द्वादशेति[5] हविर्यज्ञे दीयन्ते न ह त्वा अशतदक्षिणः सौम्यो ऽध्वरः स्यादेष वै प्रत्यक्षं प्रजापतिर्यत्सोमः पुरुषो वा[6] अयं[6] नेदिष्ठं[6] प्रजापतेः सो ऽयं पुरुषः शतायुः[7] शतदायस्तꣳ[7] शतेनैव दक्षयति नाशतेन तस्माद्वाशतदक्षिणः सौम्यो ऽध्वरः स्यात्तस्माद्वाशतदक्षिणस्यर्त्विक् चन स्यान्नेदस्याध्यक्षो ऽसानीति यमिमꣳ हनिष्यन्त्येव न दक्षयिष्यन्तीति ॥२॥

4 द्वया उ वाव देवा देवा अहैवान्यदेवा अथेमे मनुष्यदेवा य इमे ब्राह्मणाः शुश्रुवाꣳसो ऽनूचानास्तेषां द्वेधाविभक्तो यज्ञ आहुतय एव देवानां दक्षिणा मनुष्य-देवानां ब्राह्मणानाꣳ शुश्रूषामनूचानानाꣳ स आहुतिभिरेव देवान्प्रीणाति दक्षिणा-भिर्मनुष्यदेवान्ब्राह्मणाञ्छुश्रूषो ऽनूचानाꣳस्त एनमुभये देवाः प्रीताः सुधायां दधति ॥३॥

5 तद्वा ऋत्विजामेव दक्षिणा नानृत्विजामेतन्वा[8] अन्यमेवात्मानꣳ सꣳस्कुर्वन्त्यृत्विजो[9] यजमानस्य[10] यमेतद्यज्ञꣳ सꣳस्कुर्वन्त्यृङ्मयं[11] यजुर्मयमाहुतिमयꣳ साममयꣳ सो ऽस्यामुष्मिल्लोक आत्मा भवति तद्यं माजीजनन्तेत्यृत्विज एव दक्षिणाभिः प्रीणाति नानृत्विजस्तस्माद्वृत्विजामेव[12] दक्षिणा नानृत्विजाम्[13] ॥४॥

अथ प्रतिपरेत्य गार्हपत्यं दाक्षिणानि जुहोति चतुर्गृहीतमाज्यं गृहीत्वा 6
दशाहोमीये वाससि हिरण्यं प्रबध्य तत्स्रुच्यवधाय स यद्दाक्षिणानि जुहोत्यतद्वै
यज्ञो ऽग्रे देवानभिप्रैति[14] यज्ञमन्वारभ्य दक्षिणा यां दक्षिणां ददाति दक्षिणामन्वारभ्य
यजमानः ॥५॥

तद्वै चतस्र एव दक्षिणा हिरण्यं गौर्वासो ऽश्वः स नाह तदवकल्पते 7
यद्गोः पादꣳ स्रुच्यवदध्यात्किम्वश्वस्य तस्माद्दशाहोमीय एव वाससि हिरण्यं
प्रबध्य तदेव स्रुच्यवधाय जुहोति ॥६॥

सौरीभ्यामृग्भ्यां तमसा वा असौ लोको[15] ऽन्तर्हितः[15] सूर्यो वै तमसो 8.9
ऽपहन्ता तदेतेनैव तमो ऽपहत्य स्वर्गं लोकमुपसंक्रामति तस्मात्सौरीभ्यामृग्भ्यामुदु
त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यꣳ स्वाहेत्येतया गायत्र्या
गायत्री वा इयं पृथिवी तदस्यां प्रतिष्ठायामेतया प्रतितिष्ठति ॥७॥

अथापरं चतुर्गृहीतमाज्यं गृहीत्वा जुहोति चित्रं देवानामुदगादनीकं 10
चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्त-
स्थुषश्च स्वाहेत्येतया त्रिष्टुभा स्वर्गं लोकमुपप्रैति[16] ॥८॥

अथाग्नय आग्नीध्रे जुहोति द्वे आहुती एकां वा स यदग्नय आग्नीध्रे जुहो- 11.12
त्यग्निर्वै पशूनामीष्टे तमिमे पशव ऽभितः परिनिविष्टास्तमेवैतत्प्रीणाति सो ऽस्मै
प्रीतः पशूननुमन्यते दानाय तेनानुमतां[17] ददाति[17] तस्मादग्नय आग्नीध्रे जुहोत्यग्ने
नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नमउक्तिं विधेम स्वाहेत्यथ यद्यश्वो युक्तो वायुक्तो वा स्यात् ॥९॥

अथ द्वितीयां जुहुयादयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । 13
अयं वाजाञ्जयतु[18] वाजसाता[18] अयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहेति वाजसा ह्यश्व-
स्तस्मादाहायं वाजाञ्जयतु[18] वाजसाताविति[19] ॥१०॥

अथ दक्षिणतो दक्षिणा उपरुद्धा उपतिष्ठन्ते ता अभ्यैति ता अभिमन्त्र- 14.15
यते रूपेण वो रूपमभ्यागामिति न ह वा अग्रे पशवस्तस्मै चक्षमिरे[21] यदेनानदा-
स्यन्नथैनानुतेदं[22] ददति[22] ते ऽपनिधाय स्वानि रूपाणि शरीरैरेव[23] दक्षिणतो
यज्ञस्यार्धादुपातिष्ठन्त ॥११॥

तदु वै देवा अस्पृण्वत ताꣳस्तैरेव रूपैर्दक्षिणतो यज्ञस्यार्धादुपायꣳस्ते

स्वानि रूपाणि जानाना अभ्यवाय[२]स्ते रातमनसो दानायाभव[३]स्तथो वा एनानेष एतत्स्वैरेव[४] रूपैर्दक्षिणतो यज्ञस्यार्धादुपैति ते स्वानि रूपाणि जानाना अभ्यवयन्ति ते रातमनसो दानाय भवन्ति तस्मादाह[५] रूपेण[६] वो रूपमभ्यागामिति तुथो वो विश्ववेदा विभजात्विति ब्रह्म वै तुथो विश्ववेदा ब्रह्म वै[७] वेद यश्च[८] दक्षिणीयो यश्चादक्षिणीयस्तथो हास्य नादक्षिणीयाय का चन दक्षिणा दत्ता भवति ॥१२॥

16 ऋतस्य पथा प्रेतेति यो वै देवानां पथैति स ऋतस्य पथैति[९] तस्मादाहर्तस्य पथा प्रेतेति चन्द्रदक्षिणा इत्येतेन हि चन्द्रेण ज्योतिषा हिरण्येन यन्ति ॥१३॥

17-18 अथ सदः प्रेक्षते वि स्वः पश्य व्यन्तरिक्षमिति लोकं त्वया विख्येषमित्येवैतदाह यदाह वि स्वः पश्य व्यन्तरिक्षमिति यतस्व सदस्यैरिति मा त्वा सदस्यानां कश्चनातिरेचीत्येवैतदाह तथास्यैते सर्वे प्रीता भवन्ति ॥१४॥

19.20 अथाग्नीधमभ्यैति[१०] ब्राह्मणमद्य विदेय पितृमन्तं पैतृमत्यमिति या वै ज्ञातायापि[११] कतिपयीरेव दक्षिणा ददाति ताभिरेव महज्जयति तस्मादाह ब्राह्मणमद्य विदेय पितृमन्तं पैतृमत्यमित्यृषिमार्षेयमिति यो वै ज्ञातो ऽनूचानः स ऋषिरार्षेयः सुधातुदक्षिणमिति स[१२] उ एव[१३] सुधातुदक्षिणस्तस्मा उपसद्य हिरण्यं ददात्यस्मद्राता देवत्रा गच्छ प्रदातारमाविशेति यां[१४] वै रातमना अविचिकित्सन्दक्षिणां[१५] ददाति तया[१६] वै महज्जयति तस्मादाहास्मद्रातेति देवत्रा गच्छेति देवलोके मे ऽपि स्यादिति वै यजते यो यजते तदेनं देवलोके ऽपित्विनं करोति प्रदातारमाविशेति मामाविशेत्येवैतदाह तथास्मादेषा[१७] न पराची भवति तत्र यच्छक्नोति तदुपदधाति स यदग्नीधे प्रथमाय ददात्यतो[१८] हि देवाः पाप्मानमपाघ्नत ॥१५॥

21 अथात्रेयमभ्यैति[१९] क आत्रेयं क आत्रेयं क आत्रेयमिति तस्मा उपसद्य हिरण्यं ददात्यस्मद्राता देवत्रा गच्छ प्रदातारमाविशेत्युक्तो यजुषो बन्धुः स यदात्रेयाय हिरण्यं ददात्यत्रिर्हि वा[२०] ऋषीणा[२१] होतास यत्रो ह वा अद आसीनः प्रातरनुवाकमन्वाह तद्ध स्मैतत्पुरासीनो होता श[२२]सत्यथ पश्चात्तमः सदो ऽभिपुप्लुवे ॥१६॥

ते होचुस्तमो वा इद[२३] सदो[२४] ऽभ्यप्रोष्टेति[२५] प्रत्यङ्[२६] प्रेहीति स प्रत्यङ् प्रैत्स[२७] तत्तमो ऽपाहन्त्स ज्योतिर्वा अयं य इदं तमो ऽपावधीदिति तस्मा एतज्ज्योतिर्हिरण्यं दक्षिणामनय[२८]स्तद्वीर्येण तेजसा तद्दविस्तमो[२९] ऽपाहन्नथैष[३०] आत्रेय

एतेनैव हिरण्येन ज्योतिषैतत्तमो ऽपहन्ति तस्मादात्रेयाय हिरण्यं ददाति ॥१७॥

अथ ब्रह्मणे ददाति ब्रह्मा हि दक्षिणतो यज्ञस्याभिगोप्ताथोद्गात्रे[१२] ऽथ[१३] 22
होत्रे[१३] ऽथाध्वर्युभ्या[१४] हविर्धान आसीनाभ्यामथ प्रस्तोत्रे ऽथ मैत्रावरुणायाथ ब्राह्मणाच्छ[१५]सिन ऽथ पोत्रे ऽथ नेष्ट्रे ऽथाच्छावाकायोन्नेत्रे[१५] ग्रावस्तुते सुब्रह्मण्याया अपि ये प्रसृप्तास्तेभ्यो दत्त्वा प्रतिहर्त्रे एवोत्तमाय ददाति प्रतिहर्ता वा एष सो ऽस्मिन्नेतत्पुनः प्रतिहरति तथास्मादेतन्न पराङ् भवति ॥१८॥

अथाहेन्द्राय मरुत्वते ऽनुब्रूहीति ततो न दद्यात्स यदतो न ददाति यत्र ह 23
वा अग्रे प्रजापतिरयजत यत्राग्रे प्रजापतिरददात्तद्धेन्द्र ईक्षां चक्रे ऽयमु हेद[१६] सर्वमेव निदध्यादिति तस्मा एतं वज्रमुदयच्छन्न दास्यतीति ततो नाददात्स एष वज्र एवोद्यम्यते[१७] यदिन्द्राय मरुत्वते ऽनुवाच[१८] आह तस्मादतो न दद्यात् ॥१९॥

तद्वै चतस्र एव दक्षिणा हिरण्यमायुर्ह तेनात्मनस्त्रायत आयुर्हिरण्यं 24
तदग्नय आग्नीध्रं कुर्वते ऽददात् ॥२०॥

अथ गौः प्राण[१९] ह तेनात्मनस्त्रायते ऽन्न[२०] हि गौरन्न[२०] हि प्राणस्ता[१९] रुद्राय 25
होत्रे ऽददात् ॥२१॥

अथ वासस्त्वच[२१] ह तेनात्मनस्त्रायते त्वग्घि वासस्तद्बृहस्पतय उद्गायते 26
ऽददात् ॥२२॥

अथाश्वो वज्र एव स पुरोगास्तं यमाय ब्रह्मणे ऽददाद्यमलोकमु वा अभि 27
प्रार्थो[२२] भवति[२३] यम[२४] उ वै ब्रह्मा तस्माद्ब्रह्मणे ऽश्वं ददात्यथ यदन्यद्ददाति कामेनैव तद्दीयत इदं मे ऽप्यमुत्रासदिति तेनैव कामेन ॥२३॥

स यद्यस्मै हिरण्यं दद्यात्तत्प्रतीयादग्नये त्वा मह्यं वरुणो ददात्वित्यग्नये 28
हि तददद्दात्सो ऽमृतत्वमश्नुयात्। आयुर्दात्र एधि मयो मह्यं प्रतिग्रहीत्र इति[२५] ॥२४॥

अथ यद्यस्मै गां दद्यात्तां प्रतीयाद्रुद्राय त्वा मह्यं वरुणो ददात्विति रुद्राय 29
हि तामददात्सो ऽमृतत्वमश्नुयात्। प्राणो दात्र एधि मयो मह्यं प्रतिग्रहीत्र इति[२५] ॥२५॥

अथ यद्यस्मै वासो दद्यात्तत्प्रतीयाद्बृहस्पतये त्वा मह्यं वरुणो ददात्विति 30
बृहस्पतये हि तददद्दात्सो ऽमृतत्वमश्नुयात्। त्वग्दात्र एधि मयो मह्यं प्रतिग्रहीत्र इति[२५] ॥२६॥

अथ यद्यस्मा अश्वं दद्यात्तं प्रतीयाद्यमाय त्वा मह्यं वरुणो ददात्विति 31
यमाय हि तमददात्सो ऽमृतत्वमश्नुयात्। वयो दात्र एधि मयो मह्यं प्रतिग्रहीत्र इति[२५] ॥२७॥

32.33 अथ यद्यस्मा अन्यद्द्याक्तप्रतीयात्को ऽदात्कस्मा अदात्कामो ऽदात्कामायादात्कामो दाता कामः प्रतिग्रहीता कामैतत्त इति कामेन वै तददादात्तदु कामेनैव प्रत्येति तद्देवताभ्यो ऽतिदिशति यद्वै किं च देवतायामभ्यादधति[1] भूयो भूयो वै सा तेनोद्दीप्यति यद्धि किं चाग्नावभ्यादधति भूयो भूय एव स तेनोद्दीप्यति स ह श्वः श्व एव श्रेयान्भवति[2] य एवं विद्वान्प्रत्येति तदु होवाचासुरिरप्येतदधीयद्राद्रियेतेति[3] होवाच यथा वै समिद्धे ऽभ्यादध्यात्समिद्धे जुहुयादित्येवं[4] तद्यदधीयते[5] ददातीति ॥२८॥ प्रथमं ब्राह्मणम् ॥

1 ग्नेत्युल्लख° MSS. 2 यदेव MSS. 3 °र्दक्षयत्यथ B W C (orig.) O. 4 षड्वा त्वाद्वादशेवेति My, but ड्वा and वे blotted out. Read perhaps षड्वा द्वादशेति वा. 5 वायं B W C (orig.) O My. 6 नेदिष्ठं or नेदिष्टं MSS. 7 Thus conjecturally; शतायुःस्तदायुस्त° B W, शतायुः शतदायुस्त° C O My. 8 नानृत्विजामेतंवा MSS. 9 Emended; समस्कुर्वन्यृत्विजो or समस्कुर्वंनृत्विजो MSS. except My, which has समस्कुर्वन्त्यृत्विजो. 10 यजमानः स MSS. 11 स°स्कुर्वंत्यृग्म(sec. m. ङ्य)यं C B, स°स्कुर्वन्यृग्मयं O (corrected into न्यृङ्मयं) P. 12 नानृत्विज° C O, नानृत्विज° B. 13 नानृत्विजां C. 14 देवानवभिः प्रैति B W. 15 लोकोंतर्हितः B W C (orig.). 16 °प्रैति B W. 17 Thus also the Mādhy. Read probably °नुमतान्ददाति (sc. पशून्). 18 वाजांजयतु MSS. 19 A difference in the Saṃhitā not noted by Weber (p. 255). 20 °विति MSS. 21 MSS. except C (sec. m.) जक्षमिरे. 22 °दं ददति (ददंति) MSS. 23 MSS. except C (sec. m.) शरीरैव. 24 MSS. except C (sec. m.) एतत्तैरेव. 25 तस्मा-

द्रूपेण B W My. 26 Without accent the MSS. 27 पथैति B. 28 अथाग्नीध्रं B W. 29 ज्ञातायापि MSS. In C the accent beneath ज्ञा is blotted out. 30 स एव B W, स उ एषैव C (orig.). 31 या B W My. 32 °कित्सद्-क्षिणां C My, °कित्मदक्षिणां B, °किस्सदक्षिणां W. 33 या B. 34 तथास्मादेषा B. 35 ददात्युतो B My, ददा-त्युतो O W C (orig.). 36 अथात्रेयम् MSS. 37 Omitted in B. 38 सदोभ्यप्रोष्टेति B W, सदोभ्यः प्रोष्टेति C O My. 39 प्रत्यङ् प्रेहीति प्रत्यङ् प्रै० B W. 40 सदृषिं B. 41 °तमो पाहन्नथैष O P W, °तमो पाहन्नथैष B. 42 अभि omitted in B. 43 थ होत्रे wanting in B. 44 °त्रेत्रे B. 45 एवोद्यमानो MSS. except C (sec. m.). 46 नुवाच C (sec. m.), नूवाच the other MSS. 47 ? प्रोर्थो B W O P My C (pr. m.), प्राक्षो C (sec. m.). 48 भवति B. 49 यम B. 50 इति MSS. 51 देवतायामभ्याद्-धति C (sec. m.). 52 According to Bhâs. sûtra II. 17 भवति ought to be accented. 53 °रुप्येतदधीयं MSS. 54 °यादित्येव दद्यादधीयते B W.

K. V. 4. 2 M. IV. 3. 5

त्रया वै देवा वसवो रुद्रा आदित्या एते वै त्रया देवास्तेषꣳ सवनानि 1
विभक्तानि वसूनां प्रातःसवनꣳ रुद्राणां माध्यंदिनꣳ सवनमादित्यानां तृतीयसवनं
तदिदममिश्रमेव वसूनां प्रातःसवनममिश्रꣳ रुद्राणां माध्यंदिनꣳ सवनमथ मिश्र-
मादित्यानां तृतीयसवनम् ॥१॥

ते हेम आदित्या ऊचुर्यथेदममिश्रं वसूनां प्रातःसवनमित्यमिश्रꣳ रुद्राणां 2
माध्यंदिनꣳ सवनमेवं न इमं पुरा मिश्राद्धꣳ जुहुथेति तथेति ह देवा ऊचुस्तमेभ्यः
सꣳस्थिते माध्यंदिने सवने पुरा तृतीयसवनादजुह्वुस्तस्मादप्येष एतर्हि ग्रहस्त-

थैव हूयते यथैनं[1] देवा अजुहवुः ॥२॥

3-8a ते हेम आदित्या ईक्षां चक्रिरे[2] नेव वा इतरस्मिन्त्सवने स्मो नेवेतरस्मिन्निति यद्वै नो नाष्ट्रा रक्षा[3]ꣳसि न हन्युरिति ते होचुर्द्विदेवत्यान्नक्षोभ्यो वै बिभीम इति युष्मान्प्रविशामेति त उ होचुर्द्विदेवत्याः किमस्माकं ततः स्यादिति ते होचुरस्माभिरेवानुवषट्कृता[4] असथेति[5] तथेति तान्प्राविशन्त्स यत्रादो द्विदेवत्यैः प्रातः प्रचरत्यध्वर्युस्तत्प्रतिप्रस्थातादित्यपात्रेण प्रतिनिगृह्णीत उपयामगृहीतो ऽसीत्येतावतैव स इतरस्यैवानु होमं[6] जुहोत्यादित्येभ्यस्त्वेति स[3]ꣳस्रवमवनयत्येवमेव सर्वेषु स यदत्र प्रतिप्रस्थातादित्यपात्रेण प्रतिनिगृह्णीते द्विदेवत्यान्वै प्राविशन्न वै द्विदेवत्यानामनुवषट्करोत्यस्माभिरनुवषट्कृता असथेत्यु[7] वा एनानादित्या अब्रुवन्त्स्वष्टकृत[8] उ वा अनुवषट्करोति तद्यामेतां द्वितीयामाहुतिं जुहोति ता[3]ꣳ स्विष्टकृते[9] जुहोत्येतेनो ह्वैते ऽनुवषट्कृता इष्टस्विष्टकृतो[10] भवन्ति तस्मादेतामाहुतिमुत्तरतो जुहोत्येषा हि तस्य देवस्य दिगथ यद्वेवात्र प्रतिनिगृह्णीते द्विदेवत्यान्वै प्राविशन्त्स यानेव प्राविश[3]ꣳस्तेभ्य एवैनानेतन्निर्मिमीते[11] ऽथापिदधाति रक्षोभ्यो ह्यबिभयुः ॥३॥

8b.9 सो ऽपिदधाति विष्ण उरुगायैष ते सोमपीथस्त[3]ꣳ रक्षस्व मा त्वा दभन्निति यज्ञो वै विष्णुस्तस्मा एवैतद्गुप्तये[12] परिददाति सुगुप्तमसदिति[13] ॥४॥

अथ खलु स[3]ꣳस्थिते माध्यंदिने सवने पुरा तृतीयसवनादाहाध्वर्युरेहि यजमानेति ते संप्रपद्यन्ते[14] ऽध्वर्युर्यजमानः प्रतिप्रस्थातोन्नेताथ यो ऽन्यः परिचरो भवति स संप्रपद्योभे द्वारावपिधायादित्यग्रहं गृह्णाति रक्षोभ्यो ह्यबिभयुस्तस्मादुभे द्वारावपिधायादित्यग्रहं गृह्णात्युपर्युपरि पूतभृतं नेद्यवश्चोतादिति[15] ॥५॥

10-12 स गृह्णाति कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यत आदित्येभ्यस्त्वेति तं नोपयामेन गृह्णात्यग्रे ह्येव तथा सन्नो भवति जामि हि कुर्याद्यदत्राप्युपयामेन[16] गृह्णीयात्कदा चन प्रयुच्छस्युभे निपासि जन्मनी । तुरीयादित्य सवनं त इन्द्रियमातस्था अमृतं दिव्यादित्येभ्यस्त्वेति[17] ॥६॥

13.14 अथ दधि गृह्णात्यादित्यान्वा अनु पशवः पय[18] उ वा एतद्यद्दधि पशुष्वेवैतत्पयो दधाति तदिदं पशुषु पयो हितं तन्मध्ये[19] गृह्णीयान्मध्यमिव हीदं पशूनां पयो[20] ऽथो[21] पश्चादिवैव[22] गृह्णीयात्पश्चादिव हीदं पशूनां पयो हुतोच्छिष्टा वा एते स[3]ꣳस्रवास्ते[23] नालमाहुतये भवन्ति तानेवैतत्पुनराप्याययति तथो अलमाहुतये

भवन्ति[22] तस्माद्धि[23] गृह्णाति ॥७॥

स गृह्णाति यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः। आ 15
वो ऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वेति[24] ॥८॥

अथोपाꣳशुसवनेन मेक्षयत्यादित्यग्रहो वा एष विवस्वान्वा एष आदित्यो 16.17
निदानेन यदुपाꣳशुसवनः स्व एवैनं तद्भागे प्रीणात्येत उ वै रसवती सवने शुक्रवती यत्प्रातःसवनं च माध्यंदिनं च सवनमथैतन्निर्धीतशुक्रं यत्तृतीयसवनं नो वा एतं दशाभिरुपस्पृशति न पवित्रेण यथा प्रणिक्त एवꣳ हि तत्स्याद्यदेनं दशाभिर्वोपस्पृशेत्पवित्रेण वैतेनो हैतत्सवनꣳ[25] शुक्रवद्रसवद्भवति तस्मादुपाꣳशुसवनेन मेक्षयति ॥९॥

स मेक्षयति विवस्वां२[26] आदित्यैष ते सोमपीथस्तस्मिन्मत्स्वेत्यथ ग्रावण 18.19
आसृजत्याधवनीये वा संभरण्यां[27] वैवोद्धृत्यादित्या वै ग्रावाण एतद्वा आदित्यानाꣳ सवनं यत्तृतीयसवनꣳ स एवैनाꣳस्तद्भागे प्रीणाति ॥१०॥

अथ पाणिना ग्रहमपिदधाति रक्षोभ्यो ह्यबिभयुरपोर्ष्वन्त्युभे[28] द्वारा 20
उपनिष्क्रम्याहादित्येभ्यो ऽनुब्रूहीति प्रियेभ्यः प्रियधामभ्य इति संपश्येद्यदि[29] कामये-
ताश्राव्य[30] त्वेवाहादित्येभ्यः[30] प्रेष्येति प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो मह्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्य[31] इति वषट्कृते जुहोति नानुयजति ॥११॥

आदित्यान्वा अनु पशवो नेत्पशून्नौ प्रवृणजानीति प्रयच्छति प्रतिप्रस्थात्र 21
आदित्यपात्रमथ पुनः संप्रपद्यन्त आग्रयणमध्वर्युरादत्त उपर्युपरि पूतभृतं पवित्रं वितन्वन्ति प्रस्कन्दयत्येवाध्वर्युराग्रयणात्संप्रस्कन्दयति प्रतिप्रस्थातादित्यपात्रयोः सꣳस्रवमानयत्याधवनीयादुन्नेतोद्भ्रुवेन[32] ताभ्यश्चतसृभ्यो धाराभ्य आग्रयणं गृह्णाति ॥१२॥

आदित्यान्वा अनु गावस्तस्माद्विदं गवां चतुर्धाविहितं पयो यच्चतसृभ्यो 22-24
धाराभ्य आग्रयणं गृह्णात्यथ यदप्यत्रादित्यग्रहस्य सꣳस्रवं गृह्णाति न वा आदित्यग्रहस्यानुवषट्कुरोत्येतस्माद्वा आग्रयणात्सावित्रं गृह्णाति स एतेन सावित्रेणानुवषट्कृतो भवति पुरो वै मिथादेभ्य इमं ग्रहमहौषुरेतद्वा आदित्यानाꣳ सवनं यत्तृतीयसवनं[33] तृतीयसवनायो[33] वा एतं ग्रहं गृह्णात्येतेनो हैतत्सवनं पुनः प्रविशन्ति[34] तथैतस्मात्सवनान्न बहिर्धा भवन्ति तस्मादप्यत्रादित्यग्रहस्य सꣳस्रवं गृह्णाति ॥१३॥ द्वितीयं ब्राह्मणम् ॥

1 जुहुतेति B. 2 यथेव B, यथैव W. 3 चक्रिरे

MSS. 4 °भिरेवानुवषट्कृता B, °भिरेवानुवषट्कृता W. 5 अवसथेति B W. 6 होमं B C W. 7 °ष्टकृते B C. 8 स्विष्टकृते B, स्विष्टकृते C O W. 9 इष्टं B W C O. 10 °तंनिर्मिमीते MSS. 11 एवैतद्गुप्तये C W O, एवैतद्गुप्तये B. 12 °दिति MSS. 13 Without accent C. 14 °इत्योतादिति B W O P My, °श्रोतादिति C. 15 कुर्याद्यदन्नाप्युं B W C O. 16 दिव्यादिं B, दिव्यादिं C O W; °त्वेति MSS. 17 पय MSS. 18 तन्मध्ये B. 19 पयोथो C O W. 20 पश्चादिवैव MSS. 21 सꣳस्रवास्ते MSS. 22 भवंति C. 23 तस्मादधि B. 24 °स्त्वेति B O W. 25 हतत्सवनꣳ B. 26 °स्वांऽ B W. 27 संभरिण्यां B W O. 28 Emended; °युरुपोर्णत्युभे MSS. 29 संपइयें MSS. 30 °श्राव्य त्वेवाहा° MSS. without accent. 31 उरोरंतरि° MSS. 32 सꣳस्रवमवनयत्य° C O (sec. m.).; °श्नेतोदंचनेन B W, °श्नेतोदवनेन C O. 33 °सवनं तत्तृतीय° B W. 34 प्र° MSS.

M. IV. 4. 1 K. V. 4. 3

1 मनो ह वा अस्य सविता तस्माद्वाव सावित्रं गृह्णाति प्राणो ह वा अस्य सविता स यदुपाꣳशुं गृह्णाति तत्पुरस्तात्प्राणं दधाति प्राणो ह्युपाꣳशुरथ पश्चात्प्राणं दधाति यदेतं गृह्णाति ताविमा उभयतः प्राणौ हितौ यश्चायमुपरिष्टाद्यश्चाधस्तात्तस्माद्वा एतꣳ सावित्रं ग्रहं गृह्णाति ॥१॥

2 अथ यद्वैवैतꣳ सावित्रं ग्रहं गृह्णात्यृतवो वै संवत्सरो यज्ञस्तानदः प्रत्यक्षं प्रातःसवने ऽवकल्पयति यद्दतुग्रहान्गृह्णात्यथ परोक्षं माध्यंदिने सवने ऽवक्लृप्यन्ते यद्दतुपात्राभ्यां मरुत्वतीयान्गृह्णात्यथात्र नर्तुग्रहान्गृह्णाति नर्तुपात्राभ्यां कं चन ग्रहं गृह्णाति ॥२॥

एष वै सविता य एष तपत्येष उ वै सर्व ऋतव एतेनो ह तृतीयसवन 3.4
ऋतवः संवत्सरो ऽवकल्प्यन्ते[६] तस्माद्वा एतꣳ सावित्रं ग्रहं गृह्णाति ॥३॥

तमुपाꣳशुपात्रेण गृह्णीयात्प्राणो हि सविता प्राणो ह्युपाꣳशुरथो अन्तर्याम-
पात्रेण समानꣳ हि तद्यदुपाꣳश्वन्तर्यामौ तस्मादुपाꣳशुपात्रेण वैनं गृह्णात्यन्त-
र्यामपात्रेण वा ॥४॥

आग्रयणाद्गृह्णाति मनो वै सवितात्माग्रयण आत्मन्येवैतन्मनो दधाति 5
प्राणो वै सवितात्माग्रयण आत्मन्येवैतत्प्राणं दधाति ॥५॥

स गृह्णाति वाममद्य सवितर्वाममु श्वो दिवे दिवे वाममस्मभ्यꣳ सावीः। 6
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥ उपयामगृहीतो ऽसि सावित्रो[७]
ऽसि[८] चनोधाश्चनो[९] मयि धेहि जिन्व यज्ञं[१०] जिन्व[११] यज्ञपतिमिति ॥६॥

तं न सादयति मनो वै सविता तस्माद्दिवमसन्नं मनः संचरति[१०] प्राणो 7.8
वै सविता तस्माद्वयमसन्नः प्राणः संचरत्याश्राव्याह देवाय सवित्रे प्रेष्येति वषट्कृते
जुहोति ॥७॥

नानुयजति मनो वै सविता नेदग्नौ मनः प्रवृणजानीति प्राणो वै सविता
नेदग्नौ प्राणं प्रवृणजानीति तेन तथैवाभक्षितेनैतं वैश्वदेवं ग्रहं गृह्णाति स यदभक्षितेन
वैश्वदेवं ग्रहं गृह्णाति न वै सावित्रस्यानुवषट्करोति स एतेन वैश्वदेवेनानुवषट्कृतो
भवति तस्मादभक्षितेन गृह्णाति[१२] ॥८॥

अथ यद्वेवाभक्षितेन गृह्णाति मनो वै सविता सर्वे विश्वे देवाः सर्वमेवैत- 9.10
न्मनसो[१३] ऽनुवर्त्म[१४] करोति तादिदꣳ सर्वं मनसो[१३] ऽनुवर्त्म प्राणो वै सविता सर्वे
विश्वे देवाः सर्वस्मिन्नेवैतदस्मिन्प्राणं दधाति सो ऽयमस्मिन्त्सर्वस्मिन्प्राणो हितस्त-
स्माद्भाक्षितेन गृह्णाति ॥९॥

अथ यद्वैवैतं वैश्वदेवं ग्रहं गृह्णाति वैश्वदेवं वा एतत्सवनं यत्तृतीयसवनं 11
तदुच्यते सामतो यथा वैश्वदेवं[१५] तथर्क्तो[१५] ऽथैतेनैव ग्रहेण यजुष्टः पुरश्चरणतस्त-
स्माद्वा एतं महावैश्वदेवं ग्रहं गृह्णाति ॥१०॥

पूतभृतो गृह्णाति वैश्वदेवो हि पूतभृद्तो हि देवेभ्य उन्नयन्त्यतः पितृभ्यो 12
ऽतो मनुष्येभ्यस्तस्मात्पूतभृतो गृह्णाति ॥११॥

तं वा अपुरोरुक्कं गृह्णाति सर्वं वा एतद्विश्वे देवा यद्दचो यद्यजूꣳषि यत्सा- 13

मानि स एतेन सर्वेण पुरोरुङ्मान्भवति[15] तस्मादपुरोरुक्कं गृह्णाति ॥१२॥

14.15 स गृह्णात्युपयामगृहीतो ऽसि सुशर्मासि सुप्रतिष्ठान इति प्राणो वा एष ग्रहस्तस्मादाह सुशर्मासि सुप्रतिष्ठान इति बृहदुक्षाय नम इति प्रजापतिर्वै बृहदुक्षः प्रजापतय एवैतन्नमस्करोति विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति सादयित्वा प्राङुपविशत्यभ्याह्वयति शꣳसति स यत्र शꣳसत्येकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विꣳशती च । तिसृभिश्च वहसे त्रिꣳशता च नियुद्भिर्वाय इह ता विमुञ्चेत्येतस्यां वायव्यायामृचि पात्राणि विमुञ्चति स यदेतस्यां वायव्यायामृचि पात्राणि विमुञ्चति वायुर्वै पशूनामीष्टे वायुप्रणेत्रा हि पशवः प्राणो हि वायुः प्राणेन हीमे पशवश्चरन्ति स ह पशुभिर्देवेभ्यो[16] ऽध्यपचक्राम ॥१३॥

16 तं देवाः प्रातःसवन उपमन्त्रयां चक्रिरे स ह नोपावर्तत तं माध्यंदिने सवन उपमन्त्रयां चक्रिरे स[17] ह नैवोपावर्तत[17] तं तृतीयसवन उपमन्त्रयां चक्रिरे ॥१४॥

17 स होवाचोपावर्त्स्यन्किं ततो मम भविष्यतीति यद्युष्मानुपावर्त्स्यामीति ते होचुस्त्वयैव पात्राणि युज्यान्तै त्वया विमुच्यान्ता इति स यदैन्द्रवायवं ग्रहं गृह्णाति[14] तदेनेन पात्राणि युज्यन्ते ऽथ यदेतस्यां वायव्यायामृचि पात्राणि विमुच्यन्ते तदेनेन विमुच्यन्ते स यत्राह नियुद्भिर्वाय[15] इह[15] ता विमुञ्चेति पशवो वै नियुतः पशुभिरित्येवैतदाह ॥१५॥

18 स यद्ध प्रातःसवन उपावर्त्स्यद्गायत्रं वै प्रातःसवनं गायत्रमग्नेश्छन्दो ब्रह्म वा अग्निर्ब्राह्मणेषु हैव पशवो ऽभविष्यन्नथ यद्ध माध्यंदिने सवन उपावर्त्स्यदैन्द्रं वै माध्यंदिनꣳ सवनं क्षत्रमु वा इन्द्रः क्षत्रियेषु हैव पशवो ऽभविष्यन्नथ यत्तृतीयसवन उपावर्तत[10] वैश्वदेवं वै तृतीयसवनꣳ सर्वमु[11] वै विश्वे देवास्तस्माद्विमे सर्वत्रैव पशव उपतिष्ठन्ते ॥१६॥ तृतीयं ब्राह्मणम् ॥

1 °शु C. 2 गृह्णाति B W C. 3 यत्पश्चा° B W. 4 °कल्पयति B. 5 Thus conjecturally, °गृह्णात्यथार्त्ता MSS. 6 वक्ष्यन्ते MSS. 7 सावित्रोसि B W O, without accent C. 8 चनोधाश्चनो B W C O. 9 यज्ञं जिन्व B C, यज्ञं जिन्व O W. 10 सं° MSS. 11 गृह्णाति O. 12 तन्मनो नुवर्त्म

B. 13 मनसो C. 14 वैश्वदेवं त°B, वैश्वदेवं त° C O W. 15 पुरोरुग्मा° MSS. 16 दैवेभ्यो MSS. 17 स ह नैवोषां° C. 18 गृह्णाति MSS. 19 Thus O (sec. m.) and My, °वांयविह W C P O (orig.), °वांयविह B. 20 उपावर्तत B W. 21 सर्वं B W My.

K. V. 4. 4 M. IV. 4. 2

स वा एतेन सौम्येन चरुणा प्रचरति स यदेतेन सौम्येन चरुणा प्रचरति 1
सोमो वै देवानाꣳ हविरथैतत्सोमाय हविष्करोति[1] तथातो ऽनिर्भक्तः सोमो भवति
स यच्चरुर्भवत्यन्न[2] वै सोम एतद्वै प्रत्यक्षमन्नं यच्चरुरोदनो ह्येष ओदनो हि प्रत्यक्षमन्नं
तस्माच्चरुर्भवति ॥१॥

तेन तृतीयसवने प्रचरन्ति पितृदेवत्यो वै सोम एते वै निष्केवल्ये देवानाꣳ 2.3
सवने यत्प्रातःसवनं च माध्यंदिनं च सवनꣳ स यद्वैनेन[3] प्रातःसवने वा प्रचरेयुर्मा-
ध्यंदिने वा सवने समदꣳ ह कुर्यादेवेभ्यश्च पितृभ्यश्चाथैतन्मिश्रं यत्तृतीयसवनं
तथासमद्धवति तस्मादेनेन तृतीयसवने प्रचरन्ति ॥२॥

तस्य नानुवाक्यामन्वाह सकृद्धयेव पराञ्चः पितरः स चतुर्गृहीतमाज्यं 4-6
गृहीत्वाश्राव्याह घृतस्य यजति वषट्कृते जुहोति तद्या अतः प्राचीराहुतीर्जुहोति
ताभ्यो ऽन्तर्दधाति तथासमद्धवत्यथैतेन सौम्येन चरुणा प्रचरत्यथापरं चतुर्गृहीतमाज्यं
गृहीत्वाश्राव्याह घृतस्य यजति वषट्कृते जुहोति तद्या अत ऊर्ध्वा आहुतीर्होष्यन्भवति
ताभ्यो ऽन्तर्दधाति तथासमद्धवत्येवमुभयतो घृतस्य परियजति ॥३॥

तद्वा आहुरन्यतरत एव परियजेत्पुरस्तादेवेत्यथ प्रचरणीति[4] स्रुग्भवति 7
तस्यां चतुर्गृहीतमाज्यं गृहीत्वा शालाकैर्धिष्ण्यान्व्याघारयति स यच्छालाकैर्धिष्ण्या-
न्व्याघारयति यदेवैनानदो[5] देवा अब्रुवꣳस्तृतीयसवन एव वो घृत्याहुतिः प्राप्स्यति
न सौम्यापहृतो हि युष्मत्सोमपीथ इति सैनानेषा तृतीयसवने घृत्याहुतिः प्राप्नोति
न सौम्यापहृतो ह्येतेभ्यः सोमपीथस्तान्यैरेव यजुर्भिरुपकिरति तैरेव व्याघारयति
यथापूर्वꣳ स्वाहाकारम् ॥४॥

तदाहुस्तूष्णीमुत्तममाज्ञीध्र आघारयेदित्युदग्नः कर्मानुसंतिष्ठाता इति तदु 8.9
पराङेवाघारयेन्मार्जालीयमेवान्तमꣳ[6] स यावदेष एतच्छालाकैर्धिष्ण्यान्व्याघारयति

तावत्प्रतिप्रस्थातैतं पात्नीवतं ग्रहं गृह्णाति स यदेतं पात्नीवतं ग्रहं गृह्णाति यज्ञाद्वै प्रजाः प्रजायन्ते यज्ञात्प्रजायमानान्[1] मिथुनात्प्रजायन्ते मिथुनात्प्रजायमाना अन्ततो यज्ञस्य मिथुनात्प्रजायन्ते तदेतदन्ततो यज्ञस्य मिथुनं प्रजननं क्रियते तस्मान्मिथुनात्प्रजननादन्ततो यज्ञस्येमाः प्रजाः प्रजायन्ते ॥५॥

10 स यदि सावित्रमुपाꣳशुपात्रेण गृह्णीयादन्तर्यामपात्रेणैतं[2] यदि तमन्तर्यामपात्रेणोपाꣳशुपात्रेणैतꣳ समानꣳ हि तद्यदुपाꣳश्वन्तर्यामौ प्राणोदानौ ह्येतौ प्राण उ ह्येवैष योषा वै पत्नी वृषा प्राणो मिथुनमेवैतत्प्रजननं क्रियते तस्मादुपाꣳशुपात्रेण[3] वैनं[4] गृह्णात्यन्तर्यामपात्रेण वा ॥६॥

11 तं वा अपुरोरुक्कं गृह्णाति वीर्यं वै पुरोरुङ्[5] नेत्स्त्रीषु[6] वीर्यं दधानीति तस्मादपुरोरुक्कं गृह्णाति ॥७॥

12 स गृह्णात्युपयामगृहीतोऽसि बृहस्पतिसुतस्य ते देव सोमेति ब्रह्मप्रसूतस्येत्येवैतदाह यदाह बृहस्पतिसुतस्य ते देव सोमेतीन्द इन्द्रियावत इति वीर्यवत इत्येवैतदाह यदाहेन्द इन्द्रियावत इति पत्नीवतो ग्रहा३[7] ऋध्यासमिति न प्रत्यक्षं पत्नीभ्यो गृह्णाति नेत्स्त्रीषु वीर्यं दधानीति तस्मान्न प्रत्यक्षं पत्नीभ्यो गृह्णाति ॥८॥

13 अथ यः प्रचरण्याꣳ सꣳस्रवः परिशिष्टो भवति तेनैनꣳ श्रीणाति यान्वा अन्यान्ग्रहाञ्छ्रीणाति समर्धयति वै तानथैतं व्यर्धयति वज्रं आज्यं तद्वज्रेणाज्येनैतद्देवा अग्नेवं[8] स्त्रीर्निरक्षणुवꣳस्ता हता निरष्टा न दायस्य चनैशत नात्मनश्चनैशत तथो वा एष एतेन वज्रेणाज्येन हन्त्येव स्त्रीर्निरक्षणोति ता हता निरष्टा न दायस्य चनेशते नात्मनश्चनेशते तस्मादेतेन सꣳस्रवेण श्रीणाति ॥९॥

14.15a स श्रीणात्यहं परस्तादहमवस्ताद्यदन्तरिक्षं तदु मे पितास[9] । अहꣳ सूर्यमुभयतो ददर्शाहं देवानां परमं गुह्या यदिति स यदहमहमिति श्रीणाति पुꣳस्त्वेवैतद्वीर्यं[10] दधाति तदिदं पुꣳसु[11] वीर्यꣳ हितमाश्राव्याहाग्नीत्पात्नीवतस्य[12] यजेत्यग्निर्वा एष निदानेन यदग्नीद्योषा वै पत्नी वृषाग्निर्मिथुनमेवैतत्प्रजननं क्रियते तस्मादग्नीत्पात्नीवतस्य यजेति ॥१०॥

15b.16a स जुहोत्यग्ने वाक्पत्नीति[13] योषा वै पत्नी वृषाग्निर्मिथुनमेवैतत्प्रजननं क्रियते सजूर्देवेन त्वष्ट्रेति त्वष्टा वै रेतः सिक्तं विकरोति तदेतद्रेतः सिक्तं तत्त्वष्टा विकरोति सोमं पिब स्वाहेति वषट्कृत उत्तरार्धे जुहोति या वा अन्या आहुतीर्जुहोति ते देवा अथैताः पत्न्य एवꣳ[14] हि मिथुनं[15] कल्पमुत्तरतो हि स्त्री पुमाꣳ-

समुपशेते तस्मादुत्तरार्धे जुहोति ॥११॥

अथाग्नीधे भक्षमाहरति वषट्कर्तुर्हि भक्षः स[14] आहाध्वर्यः[15] उपह्वयस्वेति 16b
तं न प्रत्युपह्वयेत नेदस्य हुतस्य निरृष्टस्य प्रत्युपह्वया इति तदु प्रत्येवोपह्वयेत किं तस्य[16] न प्रत्युपह्वयेत[17] यस्याग्नौ जुह्वति यस्य वषट्कुर्वन्ति तस्मात्प्रत्येवोपह्वयेत स यदा भक्षयति ॥१२॥

अथाहाग्नीन्नेष्टुरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा[18] संख्यापयोन्नेत- 17.18
र्होतुश्चमसमनून्नय सोमं[19] मातिरीरिच इति ब्रूयाद्यद्यग्निष्टोमः स्याद्यद्युक्थ्यो वा षोलशी वातिरात्रो वा वाजपेयो वा स्यात्सोमं प्रभावयेत्येव ब्रूयात्सो ऽग्नीद्विभ्रदेव तत्पात्रं नेष्टुरुपस्थमासीदत्यग्निर्वा एष निदानेन यदग्नीन्नेष्टो[20] वै पत्नी निदानेन योषा वै पत्नी वृषाग्निर्मिथुनमेवैतत्प्रजननं क्रियते ऽथ नेष्टा पत्नीमुदानयति तामुद्गात्रा संख्यापयति प्रजापतिर्वा उद्गाता योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते स संख्यापयति प्रजापतिर्वृषासि रेतोधा[21] रेतो मयि धेहीति ॥१३॥ चतुर्थं ब्राह्मणम् ॥

चतुर्थो ऽध्यायः ॥

1 हविःक° C O My. 2 °भवत्यन्नं B W, °भवत्यन्नं C. 3 यद्धैनेन B, यद्धैनेन C O W. 4 See IV. 6. 2. 9. 5 °लीयमेवातमᳬ B W. 6 यज्ञात्प्रजाय° C, पत्न्याज्ञाप्रजाय° B. 7 गृह्णीया° MSS. 8 °पात्रेणैवैनं B W. 9 °रोरुक्षे° C, °रोरुक् ने° P O (orig.). 10 ग्रहांs B W. 11 अन्नेनेव B W O. 12 पितास B C O W. 13 पुᳬसुवैतद्वीर्यं B. 14 पुᳬसो or पुᳬसौ MSS. (cp. IV. 3. 4. 4). 15 हितमा° MSS. 16 वाक्पत्नीति C O. 17 एवैनᳬ मिथुनं B. 18 स आहाध्व° B W O, स आहाध्व° C. 19 Thus, obviously corrupt, the MSS. 20 पत्नी° B C W. 21 सोमं MSS. 22 °नेष्टा B. 23 रेतोधा B W.

K. V. 5. 1 M. IV. 4. 3

स वै हारियोजनं[1] गृह्णाति स यद्धारियोजनं[1] गृह्णाति पशवो वै देवानां 1.2

छन्दाꣳसि तद्यथा हेदं पशवो युक्ता मनुष्येभ्यो वहन्त्येवꣳ ह छन्दाꣳसि युक्तानि देवेभ्यो यज्ञं वहन्ति स यदैतच्छन्दाꣳसि देवान्त्समतर्पयन्नथैतच्छन्दाꣳसि देवाः समतर्पयन्नेतस्मिन्ग्रहे तदतः प्राक्तदभूद्यच्छन्दाꣳसि देवेभ्यो यज्ञमवाक्षुर्यदेनान्त्समतीतृपन्नथैतच्छन्दाꣳस्येव संतर्पयति यदेतं ग्रहं गृह्णाति तस्माद्वाव हारियोजनं गृह्णाति ॥१॥

3 तं वा एतमतिरिक्तं ग्रहं गृह्णाति यदा हि शंयोराहाथैतं गृह्णाति स यदेतमतिरिक्तं ग्रहं गृह्णातीदं वै देवा अथ छन्दाꣳस्यतिरिक्तानि मनुष्या अथ पशवो ऽतिरिक्तास्तस्मादेभ्य एतमतिरिक्तं ग्रहं गृह्णाति ॥२॥

4 द्रोणकलशे वृत्रो वै सोम आसीत्तं यत्र देवाः पात्रेषु व्यगृह्णत तस्य मूर्धोद्वर्त स द्रोणकलशो ऽभवत्तत्र यावान्वा यावान्वा रसः स ꣳसुस्रावातिरिक्तो वै स आसीदतिरिक्त एवैतदतिरिक्तं दधाति ॥३॥

5 तं वा अपुरोरुक्तं गृह्णाति छन्दोभ्यो वा एतं गृह्णाति तेनैवैष पुरोरुङ्मान्यदेनं छन्दोभ्यो गृह्णाति तस्मादपुरोरुक्तं गृह्णाति ॥४॥

6 स गृह्णात्युपयामगृहीतो ऽसि हरिरसि हारियोजनो हरिभ्यां त्वेत्यृक्सामनी वै हरी तदेनमृक्सामभ्यामेव गृह्णाति ॥५॥

7 अथ धाना आवपति हर्योर्धाना स्थ सहसोमा इन्द्रायेति यदेवेदं मितं चामितं च छन्दस्तदेवैतद्भक्षयति ॥६॥

8.9 अथोन्नेताश्रावयत्यतिरिक्तो वा एष ग्रहो ऽतिरिक्त उ वा उन्नेता न ह्येषो ऽन्यत्र क्व चनाश्रावयत्यतिरिक्त एवैतदतिरिक्तं दधाति मूर्धन्यधिनिधत्ते मूर्धा ह्यस्यैषः ॥७॥

अथाह धानासोमेभ्यो ऽनुब्रूहीत्याश्राव्याह धानासोमान्प्रस्थितान्प्रेष्येति वषट्कृते जुहोत्यनुवषट्कृते जुहोति ॥८॥

10 अथ धाना विलिप्सन्ते भक्षाय यथाचमसं वा अन्यान्भक्षान्भक्षयत्यथैषो ऽतिरिक्तो ग्रहस्तत्र सर्वेषां भक्षस्तस्माद्धाना विलिप्सन्ते ॥९॥

11.12 तदुत होता द्रोणकलशं याचति तमवजिघ्रति वषट्कर्तुर्हि भक्ष इति तदु नाद्रियेत धानानामेव लिप्सेत ताः प्राणैरेव भक्षयन्ति न दद्भिः खादन्ति पशवो वा एते नेत्पशून्प्रम्रदी करवामहा इति तस्मात्प्राणैरेव भक्षयन्ति न दद्भिः खादन्ति ॥१०॥

सो ऽवजिघ्रति यस्ते देव सोमाश्वसनिर्भक्षो यो गोसनिरिति पशवो वा एते तस्मादाह यस्ते देव सोमाश्वसनिर्भक्षो यो गोसनिरिति तस्य त इष्टयजुष स्तुतस्तोमस्येतीष्टानि हि यजूंषि भवन्ति स्तुता स्तोमाः शस्तोक्थस्येति शस्तानि ह्युक्थानि भवन्त्युपहूत उपहूतस्य भक्षयामीति तदुपहूत एवैतं भक्षं भक्षयति ता नाग्नौ प्रास्येदग्नौ हैके प्रास्यन्ति यथा वा उच्छिष्टा एवं वा एता भवन्ति या भक्षिताः[11] स यथोच्छिष्टमग्नौ प्रास्येदेवꣳ ह[12] तत्तस्मादुत्तरवेदावेव निवपेत् ॥११॥

अथ पूर्णपात्रान्त्समवमृशन्ति यानप्सुषोमा इत्यन्य आचक्षते यथा वै युक्ता वहेयुरेवं वा एते वहन्ति य आर्त्विज्यं कुर्वन्त्युतो[13] वै युक्तो विलिशत आपो वै भेषजꣳ शान्तिस्तदद्भिः शान्त्या शमयति तदद्भिः संदधाति ॥१२॥ 13

ते समवमृशन्ति सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन। त्वष्टा सुदत्रो विदधातु रायो ऽनुमार्ष्टु तन्वो यद्विलिष्टमिति तद्यद्विलिष्टं तत्संदधात्यथ मुखमुपस्पृशति ॥१३॥ प्रथमं ब्राह्मणम् ॥ 14.15

1 MSS. except C (sec. m.) हार्योजनं. 2 हेदं MSS. 3 समतर्पयं B, समतर्पयं C. 4 Read °थैनं ? 5 Emended, मूम्नोव्यवर्त MSS. 6 सꣳसुश्रावा° MSS. 7 पुरोरुमा° MSS. 8 Without accent the MSS. 9 ह्येषो B. 10 °जिघ्रंति B. 11 भक्षिताः MSS. 12 हि B My. 13 कुर्वंत्युत B.

K. V. 5. 2 M. IV. 4. 4

तानि वा एतानि नव समिष्टयजूंषि जुहोति स यदेतानि नव समिष्टयजूंषि जुहोति नव वा अमूर्बहिष्पवमाने स्तोत्रिया भवन्ति[1] नवैतानि तदुभयत एवैतद्विराजं न्यूनां करोति प्रजननाय न्यूनाद्धीमाः प्रजाः प्रजायन्त उभयतो ह वै न्यूनात्प्रजापतिः प्रजाः ससृज इतश्चोर्ध्वा इतश्चावाचीस्तथो वा एष एतदुभयतो न्यूनात्प्रजाः सृजत इतश्चोर्ध्वा इतश्चावाचीस्तस्मादेतानि नव समिष्टयजूंषि जुहोति ॥१॥ 1

तद्धिंकारो दशमः[2] स्तोत्रियाणाꣳ स्वाहाकार एतेषां दशमस्तदन्यूना विराड् दशदशिनी[3] भवति या उ वा एतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायते सर्वा 2.3

वै ता एतत्समिष्टा भवन्ति स यत्तासु सर्वासु समिष्टास्वथ जुहोति तस्मात्समिष्टयजूꣳषीत्याख्यायन्ते ॥२॥

4-6 अथ यद्वेव समिष्टयजूꣳषि जुहोति रिरिचान इव वा एष एतद्भवति यदीजानो यद्धयस्य स्वं भवति ततो हि ददाति[1] स यानि त्रीणि प्रथमानि जुहोति यजमानमेवैतै रिरिचानं पुनराप्याययत्यथ यान्युत्तराणि त्रीणि जुहोति या वा एतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायत उपासते ह न्वै ता इमानि न्वै नः समिष्टयजूꣳषि न[2] जुह्वतीमानि[3] नो ह्योष्यन्तीति ता एवैतैर्व्यवर्जयति यत्रासां चरणं तदन्वथ यान्युत्तराणि त्रीणि जुहोति यमेवैतद्यज्ञमतत[4] यमजीजनत[5] तमेवैतैः[6] प्रतिष्ठापयति यत्रास्य प्रतिष्ठा तत्तस्माद्वाव समिष्टयजूꣳषि जुहोति ॥३॥

7 स जुहोति समिन्द्र णो मनसा नेषि गोभिरिति तन्मनसा रिरिचानमाप्याययति यदाह समिन्द्र णो मनसा नेषीति गोभिरिति तद्गोभी रिरिचानमाप्याययति सꣳ सूरिभिर्मघवन्त्सꣳ स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्तीति तद्ब्रह्मणा रिरिचानमाप्याययति सं देवानाꣳ सुमतौ यज्ञियानाम् ॥४॥

8 सं वर्चसा पयसा सं तनूभिरिति तद्वर्चसा रिरिचानमाप्याययति पयसेति रसो वै पयस्तद्रसेन रिरिचानमाप्याययत्यगन्महि मनसा सꣳ शिवेन । त्वष्टा सुदत्रो विदधातु रायो ऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥५॥

9 धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवो अग्निः । त्वष्टा विष्णुः प्रजया सꣳरराणो यजमानाय द्रविणं दधात्वित्येतदाप्याययति यदाह यजमानाय द्रविणं दधात्विति ॥६॥

10 सुगा वो देवाः सदना अकर्म य आजग्मेदꣳ सवनं जुषाणा इति सुगानि वः सदनान्यकर्म य आगन्तेदꣳ सवनं जुषाणा इत्येवैतदाह यदाह य आजग्मेदꣳ सवनं जुषाणा इति भरमाणा वहमाना हवीꣳषीति भरमाणा अह ते यन्ति[7] ये[8] ऽवाहना[9] वहमानास्ते ये वाहनवन्त इत्येवैतदाह यदाह भरमाणा वहमाना हवीꣳषीत्यस्मे धत्त वसवो[10] वसूनीति तदेना[11] व्यवर्जयति यत्रासां चरणं तदनु ॥७॥

11 यां३[12] आवह उशतो देव देवाꣳस्तान्प्रेरय स्वे अग्ने सधस्थ इत्यग्निं वा आहामूं देवतामावहामूमावहेति ता व्यवर्ज स्वां प्रतिष्ठामन्वित्येवैतदाह यदाह तान्प्रेरय स्वे अग्ने सधस्थ इति जक्षिवाꣳसः पपिवाꣳसश्च विश्व इति जक्षिवाꣳसो हि पशुं त्वत्पुरोलाशं त्वद्भवन्ति[13] पपिवाꣳसः सोमं तस्मादाह जक्षिवाꣳसः

पपिवाꣳसश्च विश्व इत्यसुं घर्मꣳ स्वरातिष्ठतान्विति तदेना व्यवर्जयति यत्रासां चरणं तदनु ॥८॥

वयꣳ हि त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह । ऋधगया ऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वानित्यग्निमेवैतेन व्यवर्जयति[11] यत्रास्य[12] चरणं तदनु ॥९॥ 12

देवा गातुविदो[13] गातुमित्वा गातुमितेति व्यवर्जयत्येवैतेनार्त्तेन[14] मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धा इत्यवरꣳ स्वाहाकारं करोति परां देवतामयं वाव यज्ञो यो ऽयं पवते तदेतं यज्ञꣳ संभृत्यैतस्मिन्यज्ञे प्रतिष्ठापयति तस्मादवरꣳ स्वाहाकारं करोति परां देवताम् ॥१०॥ 13

अथ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छेति यजमानो वै यज्ञपतिस्तदेनं यजमाने प्रतिष्ठापयति स्वां योनिं गच्छ स्वाहेति तदेनꣳ स्वायां योनौ प्रतिष्ठापयत्येष ते यज्ञो यज्ञपते सहसूक्तवाकः[15] सर्ववीरस्तं जुषस्व स्वाहेति तदेनं प्रतिष्ठितमेव सन्तꣳ सवीर्यमन्ततो[16] यजमाने प्रतिष्ठापयति ॥११॥ द्वितीयं ब्राह्मणम् ॥ 14

1 Read भवन्ति ? 2 दशम C O. 3 दशद्-शिनी C O. 4 ददति B. 5 न जुह्वतीमानि B, न जुह्वतिमानि C. 6 °द्यज्ञमतन्वत B W. 7 यमजीजनत्तमेवैतैः C W O My, यमजीजनतमेवैतैः B. 8 यंतीयेवाहना MSS. 9 वसवो B W. 10 तदेनां C. 11 याऽ B W, याꣳ C O, योꣳ My. 12 °ऋवति MSS. 13 विवर्जति B. 14 यत्रास्य B W O C (orig.), यत्रासां C (sec. m.). 15 गातु° MSS. 16 व्यवर्जत्येवैतेनार्त्तेन (sic) C W, व्यवर्ज्जत्येवैतेनार्त्तेन O, व्यर्जत्येवैतेनार्त्तेन P, ववर्जत्येवैतेनार्त्तेन B. 17 सह° B. 18 Thus O My, सर्ववीर्यमंततो C W, सर्ववीर्यमततो B.

K. V. 5. 3 M. IV. 4. 5

स वा अवभृथमभ्यवैति स यदवभृथमभ्यवैति यो वा अस्य रसो ऽभूदाहुतिभ्यो वा अस्य तमजीजनदयैतच्छरीरमेवास्य तत्र न रसो ऽस्ति तदनु[1] परास्यं[2] तदपो[3] ऽभ्यवहरत्यापो वा अस्य रसस्तदेनमेतेन रसेन संगमयति तदेनमतो जनयति

स उ जात[3] एनं[3] जनयति तस्माद्वा अवभृथमभ्यवैति स यदपो ऽभ्यवैति तस्मादवभृथो नाम ॥१॥

2.3 तद्यदा समिष्टयजूꣳषि जुह्वति समिष्टयजूꣳषि वा अन्तो यज्ञस्याथ यदेतमभितो भवति तत्सꣳसादयन्ति तत्समादाय चात्वालमुपसमायन्ति स मेखले च कृष्णविषाणे च चात्वाले प्रास्यति माहिर्भूर्मा पृदाकुरित्यसावहर्जीषस्य स्वगाकारो यदेनदपो ऽभ्यवहरत्यथैष एतासाꣳ स्वगाकारो यदेनाश्चात्वाले प्रास्यति रज्जुरिव हि सर्पः कूपो हि सर्पाणां गृहा[4] अथ यदाह माहिर्भूर्मा पृदाकुरित्यास्ति वै विभ्रातृव्यं मनुष्याणां च सर्पाणां च नेदितस्तत्संभवादिति[5] ॥२॥

4.5 अथ वाचयत्युरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ इति यथासा उरुरभयो ऽनाष्ट्रः सूर्याय पन्था एवमयमस्मा उरुरभयो ऽनाष्ट्रः पन्था अस्त्वित्येवैतदाहापदे पादा प्रतिधातवे ऽकरिति तथा यद्यप्यपाद्भवति प्रति हैव दधाति[6] तदेनꣳ सर्वस्मादेनसो वरुण्यात्प्रमुञ्चत्युतापवक्ता हृदयाविधश्चिदिति तद्यदपि[7] हृदयस्थमेनस्तस्मादेनꣳ[8] सर्वस्मात्प्रमुञ्चति ॥३॥

6-9 अथाह साम गायेति साम ब्रूहीति वा गायेति त्वेव ब्रूयाद्वायन्ति हि साम स यत्साम गायति नेदस्येदꣳ शरीरं बहिर्धा यज्ञान्नाष्ट्रा रक्षाꣳसि हिनसन्निति तत्साम्ना नाष्ट्रा रक्षाꣳस्यपसेधति तस्मादाग्नेय्यां गायत्यग्निर्हि[9] रक्षसामपहन्तातिच्छन्दसि गायत्येषा वै सर्वमति यदतिच्छन्दास्तस्मादतिच्छन्दसि गायत्यहावो ह्याव इति गायति[10] नाष्ट्रा एवैतद्रक्षाꣳस्यपसेधति ते ऽग्रेणाग्नीध्रं[11] जघनेन चात्वालमेतेनोदञ्चो यन्त्येषा हि यज्ञस्य द्वाः ॥४॥

10.11 ते यां दिशमापो भवन्ति तद्यन्ति स यः स्यन्दमानानाꣳ स्थावरो ह्रदस्तमभ्यवेयादेता वै वरुणगृहीता आपो याः स्यन्दमानानां[12] न स्यन्दन्ते वरुण्यो वा अवभृथस्तस्मात्ता अभ्यवेयाद्यद्यु[13] ता न विन्देदपि या[14] एव काश्चापो[15] ऽभ्यवेयात्तमपो ऽभ्यवक्रमयति नमो वरुणायाभिष्ठितो वरुणस्य पाश इति तथैनं वरुणपाशो न गृह्णाति ॥५॥

12.13 अथ खलु समिधं प्रास्य चतुर्गृहीतमाज्यं गृहीत्वा जुहोत्यग्नेरनीकमप आविवेशापां नपात्प्रतिरक्षन्नसुर्यम्[16] । दमे दमे समिधं यक्ष्यग्ने प्रति ते जिह्वा[17] घृतमुच्चरण्यत्स्वाहेत्यग्नेर्ह वै यावद्वा[18] यावद्वा[18] देवा अप्सु प्रवेशयां चक्रुर्नेदितो नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानिति तदेवैतया च समिधा यामेतां प्रास्यत्येतया चाहुत्या

समिन्द्धे समिद्धे देवेभ्यो जुहवामेति[१५] ॥६॥

अथापरं चतुर्गृहीतमाज्यं गृहीत्वाश्राव्याह समिधो यजेति सो ऽपबर्हिः 14
षश्चतुरः प्रयाजान्यजति प्रजा वै बर्हिर्वरुण्यो ऽवभृथो नेत्प्रजा वरुणो गृह्णादिति तस्मादपबर्हिषश्चतुरः प्रयाजान्यजति ॥७॥

अथाह वरुणायानुब्रूहीति स एष वारुण एककपालः पुरोलाशो भवति 15
स यदेष वारुण एककपालः पुरोलाशो भवति यो वा अस्य रसो ऽभूदाहुतिभ्यो वा अस्य तमजीजनदथैतच्छरीरमेवास्य तत्र न रसो ऽस्ति रस उ वा एष यत्पुरोलाशस्तदस्मिन्नेतꣳ रसं दधाति तदेनमतो जनयति स उ जात[१०] एनं[१०] जनयति तस्मादेष वारुण एककपालः पुरोलाशो भवति ॥८॥

उपस्तृणीत आज्यमथास्य पुरोलाशस्य द्विरवद्यति तत्र ह्याप्येक ऋजीषस्य 16
द्विरवद्यन्ति तदु तथा न कुर्यान्न वा एतदलमाहुतये न ह्यत्र रसो ऽस्ति तस्मादृजीषस्य नावद्येदभिघार्य प्रत्यनक्त्यवदाने आश्राव्याह वरुणं यजेति वषट्कृते जुहोति ॥९॥

अथाहाग्नीवरुणाभ्यामनुब्रूहीति तस्त्विष्टकृद्भाजनꣳ स यदग्नय इत्येव नाह 17
वरुण्यो वा अवभृथो नेदग्निं वरुणो गृह्णादिति तस्मादग्नय इत्येव[११] नाह[११] ॥१०॥

उपस्तृणीत आज्यमथेमꣳ सकृदेव सर्वमवदधाति स यदीतरत्रर्जीषस्य[१२] द्विरवद्येत्सकृदत्रावद्येद्यदु न किम्वाद्रियेत द्विरभिघार्याश्राव्याहाग्नीवरुणौ यजेति वषट्कृते जुहोति ॥११॥

ता वा एताः षलाहुतीर्जुहोति षड्वा ऋतवः संवत्सरस्य संवत्सरो वै 18.19
वरुणस्तस्मादेताः षलाहुतीर्जुहोति तदेकमेव जुहुयाद्यावदस्य वशः स्यादादित्यानाꣳ ह्येतदयनमादित्यानीमानि यजूꣳषीति ह्याहुर्यदि त्वेनं यजमानो ब्रूयादथेतरथा जुहुयादेतानेवापबर्हिषश्चतुरः प्रयाजानथाज्यभागावथ वरुणायाथाग्नीवरुणाभ्यामथापबर्हिषौ द्वावनुयाजौ तदु दश दशाक्षरा वै विराड्विराळु वै यज्ञो विराजमेवैतद्यज्ञमभिसंपादयत्येतद्वङ्गिरसामयनम् ॥१२॥

अतो[१३] ऽन्यतरथा हुत्वा यस्मिन्कलश[१४] ऋजीषं भवति तदादाय तदभि- 20
पद्योपमारयति समुद्रे ते हृदयमप्स्वन्तरित्यापो वै समुद्र आपो वा अस्य रसस्तस्मादाह समुद्रे ते हृदयमप्स्वन्तरिति सं त्वा विशन्त्वोषधीरुताप इति तदेनमद्भ्यश्चौषधिभ्यश्च[१५] सꣳसृजत्येतेनोभयेन रसेन यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके

विधेम यत्स्वाहेति तद्यदेव यज्ञस्य साधु तेनैनꣳ संगमयति ॥१३॥

21 अथानुसृज्योपतिष्ठते देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृतेत्यद्भ्य एवैनमेतत्परिददाति देव सोमैष ते लोक इत्यापो वा अस्य रसस्तस्मादाह देव सोमैष ते लोक इति परि च वक्षि शं च वक्षीति परि च नो गोपाय शं च न एधीत्येवैतदाह ॥१४॥

22.23 अथ पुनरभिमृश्य जपत्यवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः[26] । अव देवैर्देवकृतमेनो ऽयासिषमित्यव[27] ह्येतद्देवैर्देवकृतमेनो याति सोमेन राज्ञाव मर्त्यैर्मर्त्यकृतमित्यव[28] ह्येतन्मर्त्यैर्मर्त्यकृतमेनो[29] याति पशुना त्वत्पुरोळाशेन त्वत्पुरुराव्णो[30] देव रिषस्पाहीति सर्वाभ्यो मार्तिभ्यो गोपायत्येवैतदाह स्नात्वान्ये वाससी परिधायोदेतः स यथाहिस्त्वचो निर्मुच्येतैवं वरुण्यात्सर्वस्मात्पाप्मनो निर्मुच्योदैति[31] तस्मिन्ह नैनः परिशिष्यते यावच्चन कुमारे[32] ऽदति तस्मिन्वै न[33] किं चनैनो यः कुमारो ऽदन्नथ गृहानेत्य समिधमभ्यादधाति देवानाꣳ समिदसीति[34] यजमानमेवैतया समिन्द्धे स उ यजमानो देवानामनु समिद्धिꣳ समिध्यते ॥१५॥ तृतीयं ब्राह्मणम् ॥

1 Thus MSS. Read either तदनुपरास्यं or rather तदु न परास्यं. 2 तदपो B, तदपो W. 3 जात एनं B W. 4 ग्रहा MSS. 5 ॰दिति MSS. 6 Emended; ददाति MSS. 7 तद्यदपि MSS. 8 हृदय॰ MSS. 9 गायंत्य॰ B. 10 गायति MSS. 11 ॰भ्रं B. 12 ॰माना B W. 13 ॰याद्यद्यु C O W, ॰याद्यद्यु B, ॰याद्यदु My. 14 या MSS. 15 काश्चापो B. 16 ॰सूर्यं B C. 17 जुह्वा B W My. 18 यावद्वा यावद्वा B W O, यावद्वा यावद्वा C. 19 ॰मेति MSS. 20 जात एनं B O, जात एनं C, जात एनं W. 21 इत्येव नाह B, इत्येव नाह W. 22 यदीतर ऋजीषस्य B W, यदीतरत्रऋजीषस्य My. 23 अथो W B My. 24 ॰कलश MSS. 25 ॰धीभ्यश्च B W. 26 ॰ण C O My W. 27 याशिषमि॰ C O; ॰त्येव B W. 28 ॰त्येव B W. 29 ह्येतंतन्मर्त्यै॰ B W My. 30 त्व-

पुरुराज्ञो B, त्वत्पु° W. 31 Thus accented MSS.
Read निर्मुच्योदैति ? 32 कुमारो MSS. 33 नः
MSS. 34 समिदसीति MSS.

K. V. 5. 4 M. IV. 5. 1

स वा एतेनोदयनीयेनादित्येन चरुणा प्रचरति स यदेतेनोदयनीयेनादित्येन 1.2
चरुणा प्रचरति यदेवैनामदो[1] देवा अब्रुवꣳस्तवैव प्रायणीयं तवोदयनीयमिति
तमेवास्या एतद्भागं कल्पयति स यत्तत्रोपप्रैष्यन्नाजानं[2] क्रेष्यन्नेनं[3] यजते तस्मात्तत्र[4]
प्रायणीयो नामाथ यदत्रावभृथादुदेत्यैनेन यजते तस्मादुदयनीयो नाम तदेत-
त्समानमेव ॥१॥

स पथ्याꣳ स्वस्तिं तत्र प्रथमां यजति वाग्वै पथ्या स्वस्तिस्तद्प्रज्ञायमाने[5] 3.4
वाचा प्रत्यपद्यन्ताथात्र[6] प्रज्ञाते[7] यथापूर्वं करोत्यग्निमेव प्रथमं यजत्यग्निर्हि देवतानां
मुखमथ सोममथ सवितारमथ पथ्याꣳ स्वस्तिमथादितिं वाग्वै पथ्या स्वस्तिरियम-
दितिरस्यामेवैनमेतत्प्रतिष्ठायां वाचं प्रतिष्ठापयति सेयमस्यां प्रतिष्ठिता वाग्वदति ॥२॥

अथैतामनुबन्ध्यां मैत्रावरुणीं वशामालभते स एषोऽन्य एव यज्ञस्तायते 5-7
पशुबन्धः समिष्टयजूꣳषि ह्येवान्तो यज्ञस्य स यदेतां मैत्रावरुणीं वशामालभते यद्ध
वै खिष्टमीजानस्य मित्रोऽहास्य[8] तद्गृह्णात्यथ यद्दुरिष्टं तद्वरुणोऽथ केजानोऽभूदि-
त्याहुः स यदस्य खिष्टं मित्रो गृह्णाति तदस्मा एतेन प्रीतः पुनः प्रत्यवर्जत्यथ[9] यद्दुरिष्टं
वरुणस्तदेतेन च खिष्टं कुरुते प्रीतश्चास्मै प्रत्यवर्जति तथास्यैष ख एव यज्ञः समृद्धो
भवति खꣳ सुकृतम् ॥३॥

स यदत्र वशैवावक्लृप्ततमा[10] यत्र वा अदो[11] देवा रेतः सिक्तं प्राजनयꣳ- 8-10
स्तद्यदङ्गारा[12] अभवꣳस्ततोऽङ्गिरसः समभवꣳस्तदनु पशवः प्राजायन्त तद्यदासाः
पाꣳसवोऽभवꣳस्ततो गर्दभः समभवत्तस्माद्यत्रासाः पाꣳसवो गर्दभस्थानमिति[13]
तदाचक्षते[14] ऽथ यदा नैव कश्चन रसः पर्यशिष्यत[15] ततो वशा समभवत्तस्माद्वशा[16]
न प्रजायते[17] रसाद्धि रेतः संभवति[18] रेतसो ह्येमाः प्रजाः प्रजायन्ते सा यदन्ततः
समभवत्तस्मादन्तं यज्ञस्यानुवर्तते तस्मादत्र वशैवावक्लृप्ततमा[19] यदि वशां न
विन्देदप्युक्षवशमालभेत तदु विश्वे देवा मरीमृशां चक्रिरे ततो द्वितीया वैश्वदेवी
समभवदथ बार्हस्पत्या सो[20]ऽन्तो[20]ऽन्तो[20] हि बृहस्पतिः ॥४॥

स यः सहस्रं वा दद्याद्भूयो वा स एताः सर्वा आलभेत सर्वं वै तस्यास्तं 11

भवति यो बहु ददाति सहस्रं वा भूयो वा तस्मादेताः सर्वाः[1] स आलभेत[2] ॥५॥

12 अथो ये दीर्घसत्त्रमासीरन्त्संवत्सरं वा भूयो वा त एताः सर्वा आलभेरन्त्सर्वं वै तेषामाप्तं भवति ये दीर्घसत्त्रमासते संवत्सरं वा भूयो वा तस्मादेताः सर्वास्त आलभेरन् ॥६॥

13-16 अथैतयोदवसानीययाग्नेय्येष्ट्या यजते तत्पञ्चकपालं पुरोलाशं निर्वपति तस्य पञ्चपदाः पङ्क्तयो याज्यानुवाक्या भवन्ति ॥७॥

स यदेतयोदवसानीययाग्नेय्येष्ट्या यजते यातयामैव वा एतस्य यज्ञो भवति यदीजानस्य सो ऽस्मात्पराङिव भवत्यग्निरु[10] वै यज्ञो ऽग्नौ हि सर्वान्यज्ञाꣳस्तन्वते तत्पुनर्यज्ञमारभते[11] तथास्यायातयामा यज्ञो भवति तथास्मान्न[12] पराङ्[13] भवत्यथ यत्पञ्चकपालः पुरोलाशः पञ्चपदाः पङ्क्तयो याज्यानुवाक्याः पाङ्क्तो हि यज्ञस्तद्वेव[14] यज्ञमारभते तथास्यायातयामा यज्ञो भवति तथास्मान्न[15] पराङ् भवति तस्य हिरण्यं दक्षिणाग्नेयो ह्येष यज्ञो ऽग्नेर्हि रेतो हिरण्यमनड्वान्वानड्वान्हि वहसाग्नेयो[16] ऽग्न्यवदग्धमिव[17] ह्यनलुहो वहो भवत्यथो अप्याहुतिमेव जुहुयाच्चतुर्गृहीतमाज्यं गृहीत्वा वैष्णव्यर्चोरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेति यज्ञो वै विष्णुस्तत्पुनर्यज्ञमारभते[18] तथास्यायातयामा यज्ञो भवति तथास्मान्न पराङ् भवति तत्र यच्छक्नुयात्तद्ब्रूयादथ यावद्रात्र एव कियद्रात्रे[19] चोद्वस्येत्तर्ह्येवाग्निहोत्रं जुहुयात्स सायꣳहोमः काल उ एव प्रातर्होमः ॥८॥ चतुर्थं ब्राह्मणम् ॥ पञ्चमो ऽध्यायः ॥

1 See IV. 2. 3. 3. 2 °प्रेष्य° B W. 3 प्रैष्यन्नैनेन B W, क्रैष्यन्नैनेन C O My. 4 तस्मादत्र B W. 5 स्वस्तिस्तदयप्रजायमाने B. 6 Thus O C (sec. m.) My; प्रत्यपदंताथात B, प्रत्यपत्यंताथात्र C (pr. m.). 7 प्रज्ञायते B My W. 8 हास्य B. 9 प्रत्यवर्जयत्यथ B. 10 वशैवाव° MSS. 11 See II. 7. 2. 2. 12 °द्यदांगारा MSS. 13 °नमित्याचक्षते B. 14 °शिष्येत MSS. 15 °द्वशानुप्रजायंते MSS. 16 संभवति MSS. 17 वशैवाव° MSS. 18 सोंततो C. 19 सर्वां स आलभते B. 20 भवत्य° MSS. 21 तत्पुन-

र्यज्ञमा° B W. 22 तथास्मान्न पराङ् C O My, तथोस्मान्न पराङ् B. 23 यज्ञस्तेष्वेव B. 24 तथोस्मान्न B W. 25 °ग्नेयोग्न्यवदग्धं° MSS. Cp. I. 2. 3. 23, II. 1. 2. 9. 26 Thus accented MSS. 27 कियद्रात्रे B, कियद्रात्रे C O W.

K. V. 6. 1 M. IV. 5. 3

इन्द्रो ह वाव षोळशी तं नु सकृदिन्द्रं भूतान्यत्यरिच्यन्तेत्याहुः[1] प्रजा वै 1
भूतानि तानि हैनेन सदृग्भावमिवासुः ॥१॥

स ह्येन्द्र ईक्षां चक्रे कथं न्वहमिदꣳ सर्वमतितिष्ठेयमित्यर्वागेव मदन्यत्सर्वꣳ 2
स्यादिति[2] स एतं ग्रहमपश्यत्तमगृह्णीत[3] तत इदꣳ सर्वमत्यतिष्ठदर्वागेवास्मादन्यत्सर्वमभवन्न हास्मा अन्यत्स्फ्यं द्यौः परिबभूव तथेन्नूनं तदास ॥२॥

अथाप्येतदृषिणाभ्यनूक्तं न ते महित्वमनुभूदधꣳ द्यौर्यदन्यया स्फ्यया 3
क्षामवस्था इत्येवꣳ ह वा इदꣳ सर्वमतितिष्ठत्यर्वागेवास्मादन्यत्सर्वं भवति यस्यैवं विदुष एतं गृह्णन्ति[4] ॥३॥

तं वै हरिवत्या गृह्णाति हरिवतीषु स्तुवते हरिवत्यो ऽनुशस्यन्ते[5] वीर्यं वै 4
हर एतेनेन्द्रः सपत्नानाꣳ समवृञ्जत्तथो[6] वा एष एतद्वीर्यꣳ हर एतेनेद्धा सपत्नानाꣳ संवृङ्क्ते तस्मादेनꣳ हरिवत्या गृह्णाति हरिवतीषु स्तुवते हरिवत्यो ऽनुशस्यन्ते ॥४॥

अनुष्टुभा गृह्णाति गायत्रं वै प्रातःसवनं त्रैष्टुभं माध्यंदिनꣳ सवनं जागतं 5
तृतीयसवनमथातिरिक्तानुष्टुबतिरेचयत्येवैनं तया ॥५॥

चतुःस्रक्तिना पात्रेण गृह्णाति त्रयो वा इमे लोकास्ताꣳस्तिसृभिः स्रक्तिभि- 6
राप्नोत्यथ या चतुर्थ्यतिरेचयत्येवैनं[7] तया ॥६॥

स प्रातःसवने गृहीत[8] एतस्मात्कालादुपशेते[9] तत्सर्वाणि सवनान्यतिरिच्यते 7.8
ऽतिरेचयत्येवैनं तेनाथो अप्याहुस्तृतीयसवन एवैनं गृह्णीयादित्याग्रयणमेव गृहीत्वाथैतमथोक्थ्यमित्युक्थान्यु[10] तर्ह्यभ्यतिरिच्यत इत्युपाकरिष्यन्नेव पूतभृतो गृह्णीयादित्यप्याहुः[11] सैषा मीमाꣳसैव प्रातःसवने त्वेवैनं गृह्णाति ॥७॥

स गृह्णाति युक्ष्वा हि केशिना हरी[12] इति वातिष्ठ वृत्रहन्त्रथमिति वोपयाम- 9-11
गृहीतो ऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिन इति सादयति

सादयित्वा स्तोत्रमुपाकरोत्युपावर्तध्वꣳ सोमो ऽत्यरेचीत्यतिरेचयत्येवैनं तेन ॥८॥ प्रथमं ब्राह्मणम् ॥

1 भूताꣳय° MSS. 2 Emended; स्यामिति MSS. 3 MSS. except Or °मगृह्णत. 4 महित्वमनुभूदथ B W C My, महित्वमनुभूदध O (in the margin ध is changed into थ), °भूदध्व P; Or reads° दध. 5 गृह्णाति C (orig.), गृह्णाति B My W. 6 नुशस्यते B, नुशुष्यते C O. 7 Thus B W O (pr. m.) Or, समवृंजततथो C O (sec. m.) My. 8 चतुर्थ्यंति° MSS. 9 गृहीत एत° B W My. 10 गृहीत्वाथैत° C (sec. m.) Or, °थैन° the other MSS.; °त्युक्थान्यु My, °त्युत्कान्यु B W, °त्युक्थ्यान्यु C O Or. 11 Thus O Or, °दित्यय्याहुः C, °त्यथाहुः W, °त्यथाहुः B My. 12 Thus MSS.

M. IV. 5. 4 K. V. 6. 2

1.2 सर्वे ह वा अग्रे सदृशा एव देवा आसुस्तेषाꣳ सर्वेषाꣳ सदृशानाꣳ सतामिमे[1] ऽकामयन्ताग्निरिन्द्रो यो ऽसौ तपत्यतिष्ठावान इव स्यामेति त एतान्ग्रहानपश्यꣳस्तानत्यगृह्णत[2] तद्यदेनानत्यगृह्णत[3] तस्मादतिग्राह्या नाम ते सर्वेषाꣳ सदृशानां पुण्यानाꣳ सतां देवानामतिष्ठावान इवाभवन्नतिष्ठावेव ह वै भवति यस्यैवं विदुष एतान्गृह्णन्ति[4] ॥१॥

3 नो ह वा इदमग्नावासाग्रे वर्चो यदस्मिन्निदं वर्चः[5] सो[6] ऽकामयतेदं[7] मयि[8] वर्चः स्यादिति स एतं ग्रहमपश्यत्तमत्यगृह्णीत[9] ततो ऽस्मिन्नेतद्वर्चो ऽभवत्[10] ॥२॥

4 नो ह्वैवैतदिन्द्र ओज आस यदस्मिन्नेतदोजः सो ऽकामयतेदं मय्योजः स्यादिति स एतं ग्रहमपश्यत्तमत्यगृह्णीत[11] ततो ऽस्मिन्नेतदोजो ऽभवत्[12] ॥३॥

5 नो ह्वैवैतत्सूर्ये भ्राज आस यदस्मिन्नेतद्भ्राजो येनैतत्तपति सो ऽकामयतेदं[13] मयि[14] भ्राजः स्यादिति स एतं ग्रहमपश्यत्तमत्यगृह्णीत[15] ततो ऽस्मिन्नेतद्भ्राजो ऽभवदेतानि ह्वै वीर्याण्यात्मनि धत्ते यस्यैवं विदुष एतान्गृह्णन्ति ॥४॥

6.7 तान्वा आग्रयणमेव गृहीत्वाथैतान्गृह्णात्यात्मा वा आग्रयण आत्मनि वा

इदं बह्वतिरिक्तं क्लोमहृदयं त्वद्यत्त्वत्तस्मादाग्रयणमेव गृहीत्वाथैतान्गृह्णात्यथो अप्युक्थ्यमेव[1] गृहीत्वाथैतान्गृह्णीयादित्याहुरयꣳ ह्यनिरुक्तः प्राण उक्थ्य इत्यात्मा ह्ययमनिरुक्तः प्राण इति तस्मादुक्थ्यमेव गृहीत्वाथैतान्गृह्णीयादित्याग्रयणं[2] त्वेव[3] गृहीत्वाथैतान्गृह्णाति ॥५॥

ते माहेन्द्रस्यैवानु होमꣳ हूयन्त एष वा इन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रो ऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यꣳ शस्त्रमिन्द्रो वै यजमानो यजमानस्य वा एते कामाय गृह्यन्ते तस्मान्माहेन्द्रस्यैवानु होमꣳ हूयन्ते ॥६॥ 8

स गृह्णात्यग्न आयूꣳषि पवस आसुवोर्जमिषं च नः। आरे बाधस्व[4] दुच्छुनाम् ॥ उपयामगृहीतो ऽस्यग्नये त्वा वर्चस एष ते योनिरग्नये त्वा वर्चस इति सादयति[5] ॥७॥ 9

उत्तिष्ठन्नोजसा[6] सह पीत्वी शिप्रे अवेपयः। सोममिन्द्र चमू सुतम् ॥ उपयामगृहीतो ऽसीन्द्राय त्वौजस एष ते योनिरिन्द्राय त्वौजस इति सादयति ॥८॥ 10

अदब्धस्य केतवो वि रश्मयो जनाꣳ[7] अनु। भ्राजन्तो अग्नयो यथा ॥ उपयामगृहीतो ऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राज इति सादयति ॥९॥ 11

तान्भक्षयत्यग्ने वर्चस्वन्निति वर्चस्वाꣳस्त्वं देवेष्वसि[8]। वर्चस्वानहं मनुष्येषु भूयासमिति[9] ॥१०॥ 12

अथैन्द्रमिन्द्रौजस्वन्नित्योजस्वाꣳस्त्वं देवेष्वसि[8] । ओजस्वानहं मनुष्येषु भूयासमिति[9] ॥११॥

अथ सौर्यꣳ सूर्य भ्राजस्वन्निति[10] भ्राजस्वाꣳस्त्वं देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासमिति ॥१२॥

ते वा एते पृष्ठ्ये षळहे गृह्यन्ते तान्पूर्वस्मिꣳस्त्र्यहे गृह्णीयादाग्नेयमेव[11] प्रथमे ऽहन्यैन्द्रं द्वितीये ऽहनि सौर्यं तृतीये ऽहन्येवं त्र्यहमन्वहं तानु ह चरका उत्तरे त्र्यहे गृह्णन्ति पूर्वस्मिꣳस्त्वेव[12] त्र्यहे[13] गृह्णीयाद्यदु कामयेताप्युत्तरे त्र्यहे गृह्णीयाद्विश्वजित्यु सर्वपृष्ठे सर्व एकाहं गृह्यन्ते ॥१३॥ द्वितीयं ब्राह्मणम् ॥ 13.14

1 सतामिमे B W Or, समानिमे C O My.
2 °ग्रहानपश्च्य° B. 3 तद्यदेता° MSS. except Or.
4 एतान्गृह्णंति C (sec. m.) O, एतान्गृह्णाति W,

एतान्गृह्णाति C (orig.), एतान्गृह्णाति B, एतान् गृह्णन्ति Or. 5 वर्चः सो कामयतेदं मयि MSS. 6 ग्रहमपश्य° B. 7 भवत् MSS. 8 कामयतेदं मयि B, कामयतेदं मयि C O. 9 ग्रहमपश्य° B C. 10 अप्युक्थ्य° MSS. 11 °ग्रयणमेव B W. 12 वा° B. 13 °यति C. 14 उत्तिष्ठ° B C. 15 जनांऽ B W. 16 °ष्वसि B C. 17 °समिति MSS. 18 भ्राज° MSS. 19 गृह्णीया° C O B. 20 पूर्वस्मिꣳस्व्यहे B W, पूर्वस्मिꣳस्वेव व्यहे C O My Or.

M. IV. 5. 6 K. V. 6. 3

1 स[1] वै[2] यदैतमाश्विनं[3] ग्रहं गृह्णात्यथावकाशान्वाचयति प्राणा वा अवकाशाः प्राणानेवास्मिन्नेतद्दधात्येष वाव प्रजापतिर्यज्ञो य एष तायत एतस्मादेवेमाः प्रजाः प्रजाता एतमेवानु प्रजायन्ते ऽप्येतर्हि तदेतं प्रजापतिं यज्ञं कृत्स्नꣳ सꣳस्कृत्य तं परिगृह्य तमात्मनि कुरुते तमात्मनि धत्ते तस्माद्वा अवकाशान्वाचयति ॥१॥

2.3 स वाचयति प्राणाय मे वर्चोदा[1] वर्चसे[2] पवस्वेत्युपाꣳशु[3] व्यानाय मे वर्चोदा[1] वर्चसे[2] पवस्वेत्युपाꣳशुसवनमुदानाय मे वर्चोदा[1] वर्चसे[2] पवस्वेत्यन्तर्यामं वाचे मे वर्चोदा[1] वर्चसे[2] पवस्वेत्यैन्द्रवायवं क्रतूदक्षाभ्यां मे वर्चोदा[1] वर्चसे[2] पवस्वेति मैत्रावरुणꣳ श्रोत्राय मे वर्चोदा[1] वर्चसे[2] पवस्वेत्याश्विनं चक्षुभ्यां मे वर्चोदसौ[3] वर्चसे पवेथामिति शुक्रामन्थिनावात्मने मे वर्चोदा[1] वर्चसे[2] पवस्वेत्याग्रयणमोजसे मे वर्चोदा[1] वर्चसे[2] पवस्वेत्युक्थ्यमायुषे मे वर्चोदा वर्चसे पवस्वेति ध्रुवं विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ[4] वर्चसे पवेथामित्याधवनीयं च पूतभृतं च ॥२॥

4.5 अथ द्रोणकलशमुपतिष्ठते को ऽसि कतमो ऽसीति प्रजापतिर्वै कः प्रजापतिर्वै द्रोणकलशस्तस्मादाह को ऽसि कतमो ऽसीति कस्यासि को नामासीति प्रजापतिर्वै कः प्रजापतिर्वै द्रोणकलशस्तस्मादाह कस्यासि को नामासीति यस्य ते नामामन्महि यं त्वा सोमेनातीतृपामेति नाम ह्यस्य मनुते[5] सोमेन ह्येनं तर्पयति सुप्रजाः प्रजया भूयासमिति तत्प्रजामाशास्ते सुवीरो[6] वीरैरिति[7] तद्वीरानाशास्ते

सुपोषः पोषैरिति[1] तत्पुष्टिमाशास्ते एवमेतं प्रजापतिं यज्ञं कृत्स्नꣳ सꣳस्कृत्य तं परिगृह्य तमात्मनि कुरुते तमात्मनि धत्ते तान्वा एतान्न सर्वमिव वाचयेत्सर्वꣳ ह्येत आशिषो नेत्सर्वस्येव सर्वं करवाणीति यो न्वेव ज्ञातस्तं वाचयेद्थ यो ऽनूचानः स्यादथो यो ऽस्य प्रियः स्यान्न[10] त्वेव सर्वमिव ॥३॥ तृतीयं ब्राह्मणम् ॥

1 स वै यदेत° B W C. 2 वर्चोदा वर्चसे B, वर्चोदा वर्चसे C. 3 °ञ्जु C. 4 वर्चोदसौ B. 5 वर्चोदा वर्चसे B. 6 वर्चोदसौ B. 7 Thus accented MSS. 8 सुवीरो वीरैरिति C, सुवीरो वीरैरिति B. 9 पोषैरिति C. 10 स्यान्न MSS.

K. V. 6. 4 M. IV. 5. 2[1]

स वै यदैतां वपामुत्खिदन्त्यथ[1] शमितारमाह योनिं प्रतिमृश्येक्षस्वेति सा यद्यष्टापदी भवत्यथैतत्कर्म क्रियत एषा प्रायश्चित्तिः स परिवृत्य[3] सक्थिनी अवच्छाय जनयत्येजतु दशमास्यो गर्भो जरायुणा सहेत्यनाशमास्यो वा एष भवति यो ऽविज्ञातो गर्भो दशमास्यो वै गर्भो जायते[5] तदेनमेतद्दशमास्यमेव कृत्वा जनयति यदाहैजतु दशमास्य इति गर्भो जरायुणा सहेति गर्भो हि जरायुणा सहैति[7] यथायं वायुरेजति यथा समुद्र एजत्येवायं दशमास्यो अस्रज्जरायुणा सहेति तदेनमेतद्दशमास्यमेव कृत्वा जनयति ॥१॥

तस्य शिरश्छित्त्वा[1] रसं प्रस्राव्य[2] प्रतिवेशमवदानानाꣳ श्रपयति स यत्र हविषा प्रचरन्ति तदुपस्तीर्याज्यं द्विरस्य रसस्यावदायाभिघार्य प्रत्यनक्त्यवदाने ॥२॥

स हविषो ऽनु होमं[6] जुहोति यस्यास्ते यज्ञियो गर्भो यस्या योनिर्हिरण्ययीत्यज्ञियो वै गर्भो न हि गर्भेण कश्चन यजते तदस्या एतं यज्ञियं करोति यस्या योनिर्हिरण्ययीति तदस्या अप्येतमाशयꣳ समर्धयत्यज्ञान्यहुता यस्येति हुताङ्ग इव वा एष भवति यो ऽनाशमास्यो ऽविज्ञातो गर्भस्तदेनमेतदहुताङ्गमेव करोति तं मात्रा समजीगमꣳ स्वाहेति यावद्वै माता च वत्सश्च नाना भवतो नानैवैवाख्यायेते अथ यदा संपद्येते ऽकैवैवाख्यायते धेनुरिति वैव तथास्यैषो ऽतिरिक्तः सन्ननतिरिक्तो भवति ॥३॥

अथ यत्र वनस्पतिं यजति तदुपस्तीर्याज्यꣳ सकृदस्य रसस्यावदाय द्विरभिघार्य[1] प्रत्यनक्त्यवदानम् ॥४॥

स स्विष्टकृतो ऽनु होमं जुहोति पुरुदस्मो विषुरूप इन्दुरन्तर्महिमानमानञ्ज धीरः । एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानु प्रथन्ताꣳ स्वाहेति ॥५॥

स यदेवमेतेन प्रचरन्त्येकां वा इदं मन्यमाना आप्रीणन्ति ते द्वे भवतः स नाह तदवकल्पते यदाप्रीतमपास्येदेष उ वै सर्वेषामङ्गानाꣳ रसः संप्रसृतो भवति तथास्याप्येतैरवदानैः प्रचरितं भवत्येतावानु वै यज्ञो यावद्धविश्च स्विष्टकृच्च तत्सर्वमेवैनमेतद्यज्ञमन्वायातयति तथास्यैषो ऽतिरिक्तः सन्ननतिरिक्तो भवति ॥६॥

अष्टापदीं भुवनानु प्रथन्ताꣳ स्वाहेति व्यथते वा एतद्यज्ञो यदतिरिच्यते यज्ञस्य व्यथामनु यजमानो यजमानमनु प्रजा तद्यजमानायैवैतामाशिषमाशास्ते तथा न व्यथते यदाहाष्टापदीं भुवनानु प्रथन्ताꣳ स्वाहेत्यथास्योष्णीषेण वा वल्कलेन[10] वा शिरः प्रतिनह्य व्युह्य पशुश्रपणं तदेनमुपसमादधाति मरुतो[11] यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जन इत्यामादो वै विशो विशो वै मरुतस्तदेनं मरुत्स्वेव प्रतिष्ठापयत्युतो द्यावापृथिव्यया महो द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिरित्यतिरिक्तो वा एष न वा इमे द्यावापृथिव्यौ[12] किं चनातिरिच्यते तदेनमनयोर्द्यावापृथिव्योः प्रतिष्ठापयति तथास्यैषो ऽतिरिक्तः सन्ननतिरिक्तो भवति ॥७॥ चतुर्थं ब्राह्मणम् ॥

1 It is impossible to indicate accurately the correspondence of the Kaṇḍikās of the Mādhy. rec. to this Brāhmaṇa. 2 वपामुत्खिदत्यथ MSS. except Or. 3 °वृत्य MSS. B could be read also °वृह्य or °वृज्य; Or probably has °वृह्य. 4 जायते MSS. 5 सहेति B O My W. 6 शिरः छि° B C W O. 7 Thus accented MSS. 8 होमं C O. 9 C O P W My Or insert न. 10 वकलेन C O My, वकलेन Or, वल्कलेन W. 11 मरुतः MSS. 12 °पृथिव्यौ MSS.

M. IV. 5. 8 K. V. 6. 5

1 स वै यत्र त्रिरात्रे सहस्रेण यजते तदप्येताꣳ साहस्रीं कुर्वन्ति[1] तत्प्रथमे ऽहनि त्रीणि च शतानि दक्षिणानां नयन्ति त्रयस्त्रिꣳशतं च तथा द्वितीये ऽहनि

तथा तृतीये ऽह्न्यथैकातिशिष्यते[२] सा या सैकातिशिष्यते ताꣳ साहस्रीं कुर्वन्ति ॥१॥

सा त्रिरूपा स्यात्त्रिरात्रो हि भवति तदु[३] यैव रोहिण्युपध्वस्ता[४] सा 2.3
स्यात्साप्रवीता स्याद्वाग्वा एषा निदानेन यत्साहस्रयायातयामा वै वागयातयामो वा एषा भवति याप्रवीतानुपार्श्वकर्णाकाणाकूटावण्डाश्रोणासक्थशफा[५] सा ह्ययातयामा भवति ॥२॥

तां प्रथमे ऽहनि नयेदेतस्या वा एतद्व्राचः प्रजातꣳ सहस्रं यैषा साहस्री 4
तत्पूर्वाहैषैत्यन्वगस्याः प्रजातमथोत्तमे ऽहनि तत्पूर्वमहास्याः प्रजातमेत्यनूच्येषा[६] यदि त्वेनामपि प्रथमे ऽहनि नयेदथास्या[७] उत्तम एवाहनि कर्म ॥३॥

तां द्रोणकलशमवघ्रापयत्यग्नेणाग्नीध्रं जघनेन चात्वालमुत्तरेण हविर्धानं 5
यज्ञो वै द्रोणकलशो यज्ञमेवैनां तदर्शयत्यथो रिरिचान इव वा एष एतद्भवति यत्सहस्रं ददिवान्यजमानमेवैतद्रिरिचानं[८] पुनराप्याययति ॥४॥

तां नाभिदधति वरुण्या हि रज्जुर्वरुणो हैनां गृह्णीयाद्यदभिहिता[९] स्यात्पा- 6-9
णिनैवाभिपद्यानीयावघ्रापयत्याजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्वेत्येतदाप्याययति यदाह पुनरूर्जा निवर्तस्वेति सा नः सहस्रं धुक्ष्वेत्येतदाप्याययति यदाह सा नः सहस्रं धुक्ष्वेत्युरुधारा पयस्वती पुनर्मा विशताद्रयिरित्येतदाप्याययति यदाह पुनर्मा विशताद्रयिरिति[१०] ॥५॥

अथास्या दक्षिणं कर्णमाजपति हव्ये काम्य इळे रन्ते चन्द्रे ज्योते ऽदिते 10
सरस्वति महि विश्रुति। एता ते अघ्न्ये नामानि देवेषु मा सुकृतं ब्रूतादित्येतानि वा अस्या देवत्रा नामानि तैरेवैनामेतदाहैतानि ते नामानीति देवेषु मा सुकृतं ब्रूतादिति[११] ॥६॥

अथैनां प्राजन्ति[१२] सा यदि स्वयं प्राची म्रियेत तद्विद्यात्कल्याणं देवलोकं 11
यजमानो ऽजैषीदिति यद्युदीची भोग्यो हैवास्मिन्मानुषे लोके[१३] भवति[१४] यदि प्रतीचीभ्यतिब्विलो ह भवति यदि दक्षिणा क्षिप्रꣳ ह्यमुं लोकमेति[१५] यजमान एतदु विज्ञानम् ॥७॥

तद्वा इमास्तिस्रस्तिस्रो[१६] ऽतिशिष्यन्ते ताखेनामुपसंपाद्य मध्ये दशतं[१७] 12
दद्याद्दशाक्षरा वै विराड्वाग्वै विराट् तामेतद्विवृहति[१८] विलिशति यदेनां त्रेधा व्यूहति तामेवैतत्संदधाति ॥८॥

13 तां॰ होत्रे दद्याद्धोता हि[14] साहस्रो ऽथो द्वा उन्नेतारौ कुर्वीत स यतरो नाश्नावयेत्तस्मा एनां दद्याद् व्यृद्धा वा एषा विराड् या विच्छिन्नापुनःस॰हिता[15] व्यृद्ध[16] उ वा एष ऋत्विग्य ऋत्विक्सन्नार्त्विज्यं न करोति व्यृद्ध[16] एवैतद्यद्धृं[17] दधाति ॥९॥

16.14 तदु होत्र एव दद्याद्धोता हि साहस्रो ऽथेतरासां न दशतं[18] विच्छिनत्ति ददद्येभ्य[19] एकैकां दास्यन्त्स्याद्दशभ्यस्तेभ्यो दश दद्याद्येभ्यो द्वे द्वे पञ्चभ्यस्तेभ्यो दशैवमनुसमीक्षं दशाक्षरा वै विराड्विराड्वै विराट् साहस्रैषा विराट् समृद्धा कामदुघामुष्मिल्लोके[20] भवति स न दशां चनाधि सहस्रे दद्यात्साहस्री हि भवति तदु काममेव दद्यात्सहस्रेणाह तं काममाप्नोति[21] यस्तत्र कामो यद्धि ददाति तद्वस्य भवति ॥१०॥ पञ्चमं ब्राह्मणम् ॥

1 कुर्वंति B W O. 2 °शिष्यते MSS. 3 तदू MSS. except B W Or (तदु). 4 °ण्युपध्वस्ता MSS. 5 See IV. 3. 1. 14. 6 °नूच्यैषा MSS. except Or. 7 नये° MSS. 8 ददिवान्यं° C O W My Or, ददिवाद्यं° B. 9 °दभिहिता MSS. 10 °रिति B W C. 11 °दिति B W. 12 प्रावर्जंति B W, प्रावर्जन्ति My, 13 °के भवति C O W. 14 लोकमेति MSS. 15 °स्तिस्रस्तिस्रो MSS. 16 दशशतं B, दशशतं W, थशतं Or. 17 बृंहति C. 18 हि B W O. 19 ? विछिन्नापुनःसंहिता MSS. 20 व्यृद्ध MSS. 21 °तद्वयृद्धं C (sec. m.), °तद्वयृद्धिं the other MSS. 22 दशशतं B W. 23 ददं° MSS. 24 कामदुधा° B W O. 25 Read काममाप्नोति ?

M. IV. 5. 9 K. V. 6. 6

1 स वै यत्रैतेन व्यूल्हच्छन्दसा द्वादशाहेन याजयन्ति तदप्येतान्यहान्व्यूहति तत्प्रथमे व्यह ऐन्द्रवायवाग्रानेव[1] ग्रहान्गृह्णाति प्रज्ञातानेव ॥१॥

2.3 अथ चतुर्थे ऽहन्याग्रयणाग्रान्गृह्णाति प्राजापत्यं वा एतदहर्यच्चतुर्थमात्मा वा

आग्रयण आत्मो वै प्रजापतिस्तस्मादाग्रयणाग्रान्गृह्णाति तं न सादयत्यन्यस्मा एव प्रदायाथेतरान्ग्रहान्गृहीत्वा यैवास्य वेला भवति तदेनꣳ हिंकृत्य सादयति ॥२॥

अथ पञ्चमे ऽहन्यैन्द्रवायवाग्रानेवꣳ ग्रहान्गृह्णाति प्रज्ञातानेव ॥३॥ 4.5

अथ षष्ठे ऽहनि शुक्राग्रान्गृह्णात्यैन्द्रं वा एतद्दहर्यत्षष्ठमेष वाव शुक्रो य एष तपत्येष उ वा इन्द्रस्तस्माच्छुक्राग्रान्गृह्णाति तं न सादयत्यन्यस्मा एव प्रदायाथेतरान्ग्रहान्गृहीत्वा यैवास्य वेला भवति तदेनꣳ सादयति ॥४॥

अथ सप्तमे ऽहनि शुक्राग्रानेव गृह्णाति बार्हतं[3] वा एतद्दहर्यत्सप्तममेष 6.7 वाव शुक्रो य एष तपत्येतदु वाव बृहत्तस्माच्छुक्राग्रान्गृह्णाति तं न सादयत्यन्यस्मा एव प्रदायाथेतरान्ग्रहान्गृहीत्वा यैवास्य वेला भवति तदेनꣳ सादयति ॥५॥

अथाष्टमे ऽहन्यैन्द्रवायवाग्रानेवꣳ ग्रहान्गृह्णाति प्रज्ञातानेव ॥६॥

अथ नवमे ऽहन्याग्रयणाग्रान्गृह्णाति वैश्वदेवं वा एतद्दहर्यन्नवममात्मा 8.9 वा आग्रयण आत्मो वै प्रजापतिः सर्वमु वा आत्मा सर्वमु वै विश्वे देवास्तस्मादाग्रयणाग्रान्गृह्णाति तं न सादयत्यन्यस्मा एव प्रदायाथेतरान्ग्रहान्गृहीत्वा यैवास्य वेला भवति तदेनꣳ हिंकृत्य सादयति ॥७॥

अथोत्तमे ऽह ऽहन्ऐन्द्रवायवाग्रानेवꣳ ग्रहान्गृह्णाति प्रज्ञातानेवैवमेतान्ग्रहान्व्यूहति ॥८॥

तदाहुर्न व्यूहेद्ग्रहानिति प्राणा वै ग्रहा नेत्प्राणान्त्संलोभयानीति तदु 10-13 व्यूहेदेवाङ्गानि वा अस्यैते यद्ग्रहा व्यत्यासं वा अयं पुरुषो ऽङ्गानि शेते तस्माद्व्यूहेदेव तदु[5] नैवꣳ व्यूहेत्प्राणा वै ग्रहा नेत्प्राणान्त्संलोभयानीत्यत्र वा एते व्यूल्हा यद्वा ऐन्द्रवायवाग्रान्प्रातःसवने गृह्णाति शुक्राग्रान्माध्यंदिने सवन आग्रयणाग्राꣳस्तृतीयसवने तदेवैते व्यूल्हा भवन्ति[6] तस्मान्नैव व्यूहेत् ॥९॥ षष्ठं ब्राह्मणम् ॥

1 ऐंद्रवा° B. 2 °वायवाग्रा° B C. 3 बार्हतं MSS. 4 °वायवाग्रा° C. 5 तदू नैव B My, तदू नैव C O W. 6 भवंति MSS.

K. V. 6. 7 M. IV. 5. 5

एष वाव प्रजापतिर्यज्ञो य एष तायत एतस्मादेवेमाः प्रजाः प्रजाता एत- 1.2 मेवानु प्रजायन्ते ऽप्येतर्हि तदुपाꣳशुपात्रमेवान्वजाः प्रजायन्ते तद्वा एतत्पुनर्यज्ञे प्रयुज्यते तस्माद्विमाः प्रजाः पुनरभ्याकारं प्रजायन्ते ता वा एता नेदिष्ठं प्रजापतेः प्रजा

अनु प्रजायन्ते यदुपाꣳशुपात्रं तस्मात्लिः संवत्सरस्य विजायन्त उत त्रीꣳस्त्रीञ्जनयन्ति नेदिष्ठꣳ ह्येताः प्रजापतेः प्रजा अनु प्रजायन्ते[1] ॥१॥

3.4 अथान्तर्यामपात्रमेवान्ववयः प्रजायन्ते तद्वा एतत्पुनर्यज्ञे प्रयुज्यते तस्माद्विमाः प्रजाः पुनरभ्याकारं प्रजायन्ते स यदुपाꣳशुं पूर्वं जुहोत्यन्तर्यामात्तस्माद्यदजावयः[2] सꣳसृष्टा[3] यन्त्यजा एव पूर्वाः प्रतिपद्यन्ते तꣳ हि पूर्वं जुहोति यमेता अनु प्रजायन्ते ॥२॥

7 अथ शुक्रपात्रमेवानु मनुष्याः प्रजायन्ते तद्वा एतत्पुनर्यज्ञे प्रयुज्यते तस्माद्विमाः प्रजाः पुनरभ्याकारं प्रजायन्त एष वाव शुक्रो य एष तपत्येष उ वा इन्द्रस्तस्मात्पशूनामैन्द्रा मनुष्यास्तस्मादेषाꣳ सर्वेषामधिपतयः सर्वेषामीशत[4] ऐन्द्रा हि ॥३॥

8.10 अथर्तुपात्रमेवान्वेकशफं प्रजायते तद्वा एतत्पुनर्यज्ञे प्रयुज्यते तस्माद्विमाः प्रजाः पुनरभ्याकारं प्रजायन्ते तद्वा इदमितीवर्तुपात्रं[5] तस्मादेकशफस्येतीव शिरः[6] ॥४॥

अथाग्रयणमुक्थ्यमादित्यपात्रमित्येतान्यनु गावः प्रजायन्ते तानि वा एतानि पुनर्यज्ञे प्रयुज्यन्ते तस्माद्विमाः प्रजाः पुनरभ्याकारं प्रजायन्ते ता वा एता भूयिष्ठानि पात्राण्यनु प्रजायन्ते[7] यद्वावस्तस्मादेकैकꣳ संवत्सरे संवत्सरे जनयन्ति[8] भूयिष्ठाः पशूनां भूयिष्ठानि ह्येता पात्राण्यनु प्रजायन्ते ॥५॥

11 अथ द्रोणकलशे हारियोजनं[9] गृह्णाति प्रजापतिर्वै द्रोणकलशः प्रजापतिरेवैतदिमाः[10] प्रजाः सृष्ट्वा[11] ता अभ्यावर्तते ता अभिजिघ्रति ता अवति तस्माद्द्रोणकलशे हारियोजनं[12] गृह्णाति ॥६॥

तानि वा एतानि पात्राण्यन्विमाः प्रजाः प्रजायन्ते स यदेतानि पात्राण्यन्विमाः प्रजाः[13] प्रजायन्ते[14] तस्मात्पाङ्क्त्यः[15] प्रजापतिरित्याख्यायते ॥७॥

12 तानि वा एतानि पञ्च पात्राण्यन्विमाः प्रजाः प्रजायन्ते समानं तद्यदुपाꣳश्वन्तर्यामयोः शुक्रपात्रमृतुपात्रमाग्रयणमुक्थ्यं[16] पाङ्क्तो वै यज्ञः पाङ्क्ताः पशवः पञ्चर्तवः संवत्सरस्य तस्मादेतानि पञ्च पात्राण्यन्विमाः प्रजाः प्रजायन्ते ॥८॥

तदाहुः षड्वा ऋतवः संवत्सरस्येति यदि वै षळृतवः संवत्सरस्यादित्यपात्रमेवैषाꣳ षष्ठं भवति तेनैव[17] तं[18] काममाप्नोति यस्तत्र कामस्तद्वा एतदेकमेव[19] पात्रमन्विमाः प्रजाः प्रजायन्त उपाꣳशुपात्रमेव प्राणो ह्युपाꣳशुः प्राणो हि प्रजापतिः प्राणꣳ ह्येवान्विमाः प्रजाः प्रजायन्ते तस्मादुपाꣳशुपात्रमेवान्विमाः प्रजाः प्रजायन्ते ॥९॥ सप्तमं ब्राह्मणम् ॥ षष्ठोऽध्यायः ॥

1 प्रजायंते MSS. 2 जुहोत्यंतर्यामा° B C; °जावयः MSS. 3 सःसृष्टा MSS. 4 °मीशत MSS. 5 इद-मितीव° MSS. 6 शिरः MSS. 7 प्रजायंते MSS. 8 जनयंति C O Or My, जनयंति W, जयंति B. Read probably जनयन्त्यः. 9 MSS. except C and Or, हार्योजनं. 10 Thus Or only, प्रजापतेरेवै° the other MSS. 11 सृष्टा B. 12 प्रजाः प्रजा° MSS. 13 तस्मात्पाञ्यः B. 14 °मुक्थं B, °मुक्थ्यं W. 15 तेनैतं B W. 16 एतदेकमेव B C.

K. V. 7. 1 M. IV. 6. 5

प्राणो ह वाव ग्रहः प्राणेन हीदꣳ सर्वं गृहीतं प्राणो वास्य सर्वस्य गृहीतस्त-स्माद्ध प्राण एव ग्रहः ॥१॥

तस्य प्राणस्यान्नमेव ग्रहो ऽन्नेन ह्ययं प्राणो गृहीतो ऽन्नाद्धि प्राणो जायते तस्माद्धान्नमेव ग्रहः ॥२॥

तस्यान्नस्याप एव ग्रहो ऽद्भिर्हीदमन्नं गृहीतमद्भ्यो ह्यन्नं जायते तस्माद्धा-प एव ग्रहः ॥३॥

तासामपामग्निरेव ग्रहो ऽग्निना हीमा आपो गृहीता अग्नेर्ह्यापो जायन्ते तस्माद्धाग्निरेव ग्रहः ॥४॥

तस्याग्नेः प्राण एव ग्रहः प्राणेन ह्ययमग्निर्गृहीतः प्राणाद्ध्यग्निर्जायते तस्माद्ध प्राण एव ग्रह एवमेता देवता अन्यो ऽन्यस्य गृहीता एवꣳ ह वा एतासां देवतानां गृहीतो[1] भवत्येवं वास्यैता देवता गृहीता भवन्त्येतासां देवतानाꣳ सायुज्यꣳ सलोकतां जयति ॥५॥ प्रथमं ब्राह्मणम् ॥

1 गृहीतो MSS.

K. V. 7. 2 M. IV. 6. 3

ऐन्द्राग्नेनैतव्यमित्याहुरग्निर्वै सर्वा देवता इन्द्रो वै यज्ञस्य देवता तत्सर्वाश्च 2 देवता आप्नोति यो यज्ञस्य देवता[1] ॥१॥

अथो अप्याग्नेयमेवाग्निष्टोम आलभेत तद्धि सलोम यदाग्नेयमग्निष्टोम 3 आलभेत यद्युक्थ्यः स्यादैन्द्राग्नं द्वितीयमालभेतैन्द्राग्नानि[2] ह्युक्थानि[3] यद्यु षोळशी

1 देवता MSS. 2 °ग्नानि B C. 3 °क्थानि B C.

स्यादैन्द्रं तृतीयमालभेतेन्द्रो हि षोळशी यद्युवतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत[3] वाग्वै सरस्वती योषा वै वाग्योषो वै रात्रिस्तस्मात्सारस्वतं चतुर्थमालभेतैवमु यज्ञक्रतून्यथायथं व्याकरोति ॥२॥

1 अथो अप्येकादशिन्यैवेयादित्याहुस्तदाग्नेयं[4] प्रथममालभते वारुणमुत्तममेवं पुनरभ्याकारं तद्य उदयनीये ऽतिरात्रे ऽतिरिच्येरꣳस्तानत्र सर्वानालभत तथास्यैते ऽतिरिक्ताः सन्तो ऽनतिरिक्ता भवन्ति ॥३॥ द्वितीयं ब्राह्मणम् ॥

1 देवता MSS. 2 ग्नानि ह्युक्थ्यानि C.
3 चतुर्थं B W O. 4 अप्यैकादशिं MSS. except Or.

M. IV. 6. 2 K. V. 7. 3

एतं वा एते गच्छन्ति य एष तपति ये सत्त्रमासत एष उ वाव सत्रेष उ वाव स्वर्गो लोकस्तस्मादासीनान्त्स्वपतो[1] व्रजत[2] आहुरासत इत्या[3] हि सतो यन्ति ॥१॥

त एतꣳ षड्भिर्मासैर्यन्ति तस्मात्पराञ्चो ग्रहा गृह्यन्ते पराञ्चि स्तोत्राणि पराञ्चि शस्त्राणि ॥२॥

त एतꣳ षष्ठे मासे गच्छन्ति तदेतस्य रूपं क्रियते[5] य एष तपत्यृक्तः सामतो यजुष्टस्तस्मात्सौर्यं पशुमुपालम्भ्यमालभते सौर्यं ग्रहं गृह्णात्युदु त्यं जातवेदसमिति वादश्रमस्य केतव इति वा त एतस्मिन्त्स्वर्गे लोके प्रतितिष्ठन्ति त एतस्मिन्त्स्वर्गे लोके प्रतिष्ठाय पुनरावर्तन्ते तस्मात्पुनर्ग्रहा[6] आवर्तन्ते[6] पुनः स्तोत्राणि पुनः शस्त्राणि[7] ते ऽस्मिन्मानुषे लोके प्रतितिष्ठन्ति यावदेषामिह मानुषमायुस्तस्मै ते यदामुं लोकं यन्त्यथैतमेव स्वर्गं लोकं यन्ति य एषामेष जितः स्वर्गो लोकः ॥३॥ तृतीयं ब्राह्मणम् ॥

1 Thus accented MSS. Read ˚स्वपतो ?
2 व्रजत MSS. 3 इत्या MSS. 4 एषाꣳ B.
5 क्रियते B C O. 6 Read ˚ग्रहा आवर्तन्ते ? 7 ˚णि B W O.

M. IV. 6. 4 K. V. 7. 4

1-3 प्रजापतेर्ह वै प्रजाः ससृजानस्य पर्वाणि विसस्रꣳसुः स वै संवत्सर एव प्रजापतिस्तस्याहोरात्राण्येव पर्वाणि स एतैर्विस्रस्तैः[1] पर्वभिर्न सꣳहातुꣳ शशाक ॥१॥

तमु वै देवा अभिषज्यन्नेत꣡ꣳ संवत्सरं꣢ तस्य꣣ पर्वाणि꣣ समदधुस्तस्य पर्वाणि संधायाथास्मा एतदन्नाद्यं प्रायच्छन्यदेतं महाव्रतीयं ग्रहमगृह्णꣳस्तदिममधिनोद्यद्वै मनुष्याणामशनं तद्देवानां व्रतम् ॥२॥

ते होचुर्मह्यद्वा इदं व्रतमभूद्यदिममधिन्वीदिति꣣ तस्मान्महाव्रतीयो नाम स एतैः सꣳहितैः पर्वभिरिदमन्नाद्यमभ्युदतिष्ठद्यदिदं प्रजापतेरन्नाद्यꣳ स एवमन्नादो꣣ऽभवत्तथो वा एत आत्मानं भिषज्यन्ति ये सत्त्रमासते तेभ्य एतदन्नाद्यं प्रयच्छन्ति यदेतं꣣ महाव्रतीयं ग्रहं गृह्णन्ति स एवमन्नादो भवति यथैषोऽन्नादः प्रजापतेः सायुज्यꣳ सलोकतां जयति ॥३॥

तं वै वैमृध्या गृह्णाति मृधो वा एतेषाꣳ सर्वा नाष्ट्रा हता भवन्ति ये 4-6
सत्त्रमासते ऽथो वैश्वकर्मण्या꣣ विश्वं वा एतेषाꣳ सर्वं कर्म कृतं भवति ये सत्त्रमासते वि न इन्द्र मृधो जहीति वा वाचस्पतिं विश्वकर्माणमूतय इति वा यद्यु ऐन्द्रीं वैश्वकर्मणीं विन्देत्तयो गृह्णीयात् ॥४॥ M. IV. 5. 7

ता वा एताश्चतुस्त्रिꣳशद्याहुतयो भवन्त्येताः प्रायश्चित्तयः स यदेता- 1-3
श्चतुस्त्रिꣳशद्याहुतयो भवन्त्येष वाव प्रजापतिर्यज्ञो य एष तायत एतस्मादेवेमाः प्रजाः प्रजाता एतमेवानु प्रजायन्ते ऽप्येतर्हि तदष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिꣳशदिमे द्यावापृथिव्यौ꣣ त्रयस्त्रिꣳश एते꣣ वै ते देवा यानाहुस्त्रयस्त्रिꣳशद्देवा इति प्रजापतिरेव चतुस्त्रिꣳश एतवद्वा इदमस्त्येतद्धयमृत꣣ यद्धयमृत꣣꣯ तदस्ति प्रजापतिर्ह्येष सर्वꣳ हि प्रजापतिस्तस्माद्वा एताश्चतुस्त्रिꣳशद्याहुतयो भवन्ति ता हैता यज्ञतन्व꣣ इत्येक आचक्षत एताः प्रायश्चित्तीस्तान्येतानि यज्ञस्यैव पर्वाणि स एष यज्ञस्तायमान एता देवता भवन्नेति ॥५॥

स यदि नु घर्मदुघा ह्वलेदथान्यामुपसंक्रामेयुस्तद्यामुपसंक्रामेयुस्तामग्रेण 4.5
वा दीक्षितशालां यत्र वैनामेतत्पिन्वयन्ति तदेनां प्राचीं वोदीचीं वा स्थापयितवै꣣ ब्रूयात्तद्ये एते पुच्छकाण्डमभितः शिखण्डास्थिनी उच्यते꣣ तयोर्यद्दक्षिणꣳ स्यात्तस्मिन् जुहुयादेताश्चतुस्त्रिꣳशतमाहुतीरेताभिर्व्याहृतिभिः ॥६॥

स यदेवं जुहोति घर्मदुघा वै यज्ञं बिभर्ति स आह्वलत्येतावानु꣣ वै यज्ञो यावदेताश्चतुस्त्रिꣳशदाहुतय एतावन्तो हि देवा यावन्तो हि देवास्तावान्यज्ञस्तदस्यामेतं यज्ञं दधाति तथैता꣣ यज्ञतन्व एषा न्वत्र प्रायश्चित्तिः꣣ ॥७॥

अथ यत्रान्यत्र यज्ञस्य ह्वलेत्तदनुसमीक्ष्य यां देवतां मन्येतेयं देवतैतर्ह्यय꣣ 6

यज्ञ इति तस्यै[17] जुहुयाद्यद्यहः[18] प्रसुत आग्नीध्रे यदि दीक्षोपसत्स्वाहवनीये स यैव देवता भवत्येष यज्ञस्तर्हि तयैवैतत्पर्व[19] भिषज्यति[20] तया संदधाति तया शमयति ॥८॥

7 अथ यदि पृषदाज्यꣳ स्कन्देत्तद्धिरनुनिनेतवै ब्रूयाद्धिर्वा इदꣳ सर्वमाप्तमद्भिरेवैनमेतदाप्नोत्यापो वै शान्तिः शान्तय एव[21] वैष्णववारुण्यर्चा[22] वरुणो[23] वा अपायिता वरुणो वै तदपर्यति यदिदं किं चर्च्छति[24] यज्ञो वै विष्णुस्तस्य वा एतदपर्यति स यश्चैवार्पयति[25] यस्य चार्पयति ताभ्यामेवैतत्पर्व भिषज्यति ताभ्याꣳ संदधाति ताभ्याꣳ शमयति तस्माद्वैष्णववारुण्यर्चा[26] ययोरोजसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येते अप्रतीता सहोभिर्विष्णू अगन्वरुणा पूर्वहूताविति ॥९॥

8.9 अथाभिमृशति देवान्दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु पितॄन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्ट्विति यद्वै किं च स्कन्दत्येष्वेव तल्लोकेषु[27] प्रतितिष्ठति यतमं कतमं चैषां लोकानां यज्ञो ऽगꣳस्ततो मे भद्रमभूदित्येवैतदाशिषमाशास्त उत ह स्माहारुणिः किꣳ स यज्ञेन यजेतेति यो यज्ञस्यार्त्तेन[28] व्यृद्धेन श्रेयो नाभिगच्छेदित्येतेन[29] ह स्म तदाह[30] यदाशिषमुपगच्छति॥१०॥ चतुर्थं ब्राह्मणम् ॥

1 एवतैर्विंस्रस्तैः B. 2 संवत्सरस्य पर्वाणि B W (B corrected into °रतस्य प°). 3 °दिममाधिन्वीदिति B. 4 °ग्नादो B O. 5 तदेतं B W My. 6 वैश्व° W. 7 °पृथिव्यौ B, °पृथिव्यौ the other MSS. 8 एते MSS. 9 इदमस्ये° MSS.; °भृतं C. 10 यद्धयभृतं B O W, यद्धयमृतं C. 11 Emended; यज्ञंतन्व Or, यज्ञंतन्वत the other MSS. 12 Thus accented MSS. 13 Read probably उच्छ्याते like the Mādhy. rec.; उत्शयाते Or. 14 आह्वलयत्ये° C. 15 Emended; तथैषा यज्ञंतन्वत एतान्वत्र प्रा° the MSS. 16 °तर्ह्यसुं B W. 17 तस्मै B W C My. 18 Thus (without accent however) Or, °द्यहः B C O My W. 19 °त्पर्वभिर्भिषज्यति B. 20 एव B C O, एव W. 21 वैष्णवारुण्यर्चा MSS.

22 वरुणो B W C O. 23 See VII. 5. 1. 24.
24 यश्चैवा° B. 25 तंलो° MSS. except Or.
26 यज्ञस्यात्तेन C O (orig.) My Or, यज्ञःस्यात्तेन W, यज्ञ: स्यात्तेन B O (sec. m.). 27 °तेन सहस्मात्त-दाह B W.

K. V. 7. 5

बृहस्पतिरकामयत तेजस्वी ब्रह्मवर्चसी स्यां प्र पुरोधां देवानामाप्नुयामिति स एतꣳ स्तोममपश्यदेतꣳ सवं तेनायजत[1] स तेजस्वी ब्रह्मवर्चस्यभवत्प्र पुरोधां देवानामाप्नोत् ॥१॥

स यः कामयेत तेजस्वी ब्रह्मवर्चसी स्यां प्र पुरोधामाप्नुयामिति स एतेन यजेत तेजस्वी हैव ब्रह्मवर्चसी भवति प्र पुरोधामाप्नोति ॥२॥

त्रिवृत्स्तोमो भवति तेजो वै ब्रह्मवर्चसं त्रिवृत्स्तोमस्तेज एवैतद्ब्रह्मवर्चसमवरुन्द्धे तेजस्येव ब्रह्मवर्चसे प्रतितिष्ठति ॥३॥

रथंतरं पृष्ठं भवति तेजो वै ब्रह्मवर्चसꣳ रथंतरं तेज एवैतद्ब्रह्मवर्चसमवरुन्द्धे तेजस्येव ब्रह्मवर्चसे प्रतितिष्ठति ॥४॥

अष्टाशतं[2] स्तोत्रिया भवन्ति शतायुर्वा अयं पुरुषः शतवीर्यः शततेजाः पुरुषमेवैतत्सꣳस्करोति ॥५॥

अष्टा उ वा इमा स्तोत्रिया भवन्त्यष्टाक्षरा वै गायत्री तेजो वै ब्रह्मवर्चसं गायत्री पुरुषमेवैतत्सꣳस्कृत्याथास्मिन्नेतत्तेजो ब्रह्मवर्चसं दधाति ॥६॥

बृहत्या संपद्यते बृहत्या वै देवाः स्वर्गं लोकꣳ समाश्नुवत तथो वा एष एतद्बृहत्यैव स्वर्गं लोकꣳ समश्नुते ॥७॥

आज्येनाभिषिञ्चति तेजो वा आज्यं तेज एवास्मिꣳस्तद्दधाति तद्वा आहुस्तेजो वा आज्यं नाज्येनाभिषिञ्चेदीश्वर एनं प्रदहेत्सोमेनैवाभिषिञ्चेदित्येष ह वा अभिषिक्तो[3] यत्सोमाभिषेकस्तद्वा आहुर्वज्रो वै सोमो न सोमेनाभिषिञ्चेन्नेदेतं वज्रेण हिनसानीति तदु सोमेनैवाभिषिञ्चेद्यथास्मै शिवः शान्तो भवति ग्रहोच्छिष्टेनैवाभिषिञ्चेत्स हि शान्त उपाह तं काममाप्नोति[4] यत्सोमाभिषेके शिव उ अस्मै शान्तो भवति ॥८॥

शुक्रामन्थिनोः सꣳस्रवेणाभिषिञ्चत्येतौ वा अनु सर्वꣳ सवनꣳ हूयते सर्वꣳ

ह्येतौ ग्रहौ सर्वत्वायैव कृत्स्नताया अथो प्रजननमु वा एतौ ग्रहौ प्रजायते ह[1] प्रजया पशुभिस्तस्माच्छुक्रामन्थिनोः स[2]स्रवेणाभिषिञ्चति ॥९॥

कृष्णाजिने ऽध्यभिषिञ्चत्यृक्सामनोर्वा एतद्ब्रह्मण आयतनं यत्कृष्णाजिनमृक्सामनोरेवैनं ब्रह्मण्यध्यभिषिञ्चति ॥१०॥

देवस्रो भवन्त्येतावन्तो वै देवाना[3] सवा यद्देवस्रस्तैरेवैनमेतत्प्रसूतं त[4] सवेनाभिषिञ्चति ॥११॥

त्रयस्त्रि[5]शद्दक्षिणा भवन्ति त्रयस्त्रि[6]शद्वै सर्वा देवताः सर्वासां देवतानामाप्तये ऽश्वश्चतुस्त्रि[7]शो दक्षिणानां भवति[8] प्रजापतिर्वै चतुस्त्रि[9]शो देवतानां प्राजापत्य उ वा अश्वस्तेन प्रजापतिमाप्नोति बार्हस्पत्यो ग्रहो ऽतिग्राह्यो भवति बार्हस्पत्यः पशुरुपालम्भ्यो भवति सवस्य समृद्धये[10] ऽथो सवमेवैतद्याकरोति तथास्यैष सवः समृद्धो भवति[11] ॥१२॥ पञ्चमं ब्राह्मणम् ॥

1 तेनायजते B W, तेनायजते C. 2 अष्टशतं B. 3 अभि° MSS. 4 Read either काममाप्नोति or उप ह instead of उपाह. See XII. 4. 3. 3 (Mādhy.). 5 ह MSS. 6 Probably त[7] is an interpolation. 7 भवति MSS. 8 समृद्धये C. 9 भवति C O.

M. IV. 6. 6 K. V. 7. 6

1.2 देवा ह वै यज्ञं तन्वाना असुररक्षसानां दक्षिणत आसङ्गाद्भिभयां चक्रुस्ते होचुरसुररक्षसानां दक्षिणत आसङ्गाद्भिभ्यतो हन्त[1] यो नो वीर्यवत्तम इति स न इदं दक्षिणतो गोपायत्वथ वयमुत्तरतो ऽभये ऽनाष्ट्रे निवाते यज्ञं तनवामहा इति तथेति होचुः ॥१॥

4 ते हेन्द्रमूचुस्त्वं वै नो वीर्यवत्तमो ऽसीति त्वं न इदं दक्षिणतो गोपायाथ वयमुत्तरतो ऽभये ऽनाष्ट्रे निवाते यज्ञं तनवामहा इति ॥२॥

5 स होवाचेन्द्रः किं मम ततः स्यादिति ते होचुरेतद्ह ते ब्रह्मत्वमित्येषो[1] ते ब्राह्मणाच्छ[2]सीयेति तस्माद्ब्रह्मण एव ब्राह्मणाच्छ[3]सीया[4] तस्माद्ब्राह्मणाच्छ[5]सिनं[6] प्रवृणत इन्द्रो ब्रह्मा ब्राह्मणादित्यैन्द्री ह्येषा होत्रा तस्माद्य एव ब्राह्मणानां वीर्यवत्तमः स ब्रह्मा स्याद्यो वा एषामनूचानतमः स एषां वीर्यवत्तमस्तदेषो

ह दक्षिणतो गोपायत्यथैत उत्तरतो ऽभये ऽनाष्ट्रे निवाते यज्ञं तन्वते ॥३॥

स यत्रैष आह ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा जपत्येतत्ते देव 6
सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव । मनो ज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु । अरिष्टं यज्ञꣳ समिमं दधातु विश्वे देवास इह मादयन्ताꣳ स्तुत सवितुः प्रसव इत्यसौ न्वेवैतस्य यजुषो बन्धुर्य एवासौ दर्शपूर्णमासयोरथ यदाह स्तुत सवितुः प्रसव इति सविता वै देवानां प्रसविता स्तुत सवितृप्रसूता इत्येवैतदाहैतावदेव ब्रह्मा जपेदित्याहुः ॥४॥

तद्वा आहुर्देव सवितरेतद्बृहस्पते प्रेत्येतावदेव ब्रह्मा जपेदिति सविता 7
वै देवानां प्रसविता सवितारमेवैतत्प्रसवायोपधावति यदाह देव सवितरेतदिति बृहस्पते प्रेति बृहस्पतिर्वै देवानां ब्रह्मा तद्य एव देवानां ब्रह्मा तस्मा एवैतत्प्राह तस्मै निवेदयति तस्य नार्तिर्न ह्वला भवति तस्मादाह बृहस्पते प्रेत्येतावदेव ब्रह्मा जपेत् ॥५॥

अथ मैत्रावरुणः प्रसूतो देवेन सवित्रा जुष्टं मित्रावरुणाभ्यामिति मैत्रा- 8
वरुणो वा एष मित्रावरुणौ वा अस्य स्वे देवते ताभ्यामेवैतज्जुष्टं करोति ताभ्यां निवेदयति तस्मादाह जुष्टं मित्रावरुणाभ्यामिति ॥६॥ षष्ठं ब्राह्मणम् ॥ सप्तमो ऽध्यायः॥

1 हंत MSS. 2 °त्येषो B W O C (orig.) Or My, °त्येषा C (sec. m.). 3 °सीयात्तस्मा° MSS. except C and Or. 4 ब्रह्मणे C. 5 Emended; सवितुः प्रसूता MSS. 6 यद्वा C (orig.). 7 तस्या B C (orig.).

K. V. 8. 1 M. IV. 6. 1

प्रजापतिर्ह वा अꣳशुः स वा अस्यैष आत्मैवात्मा हि प्रजापतिः स यदꣳशुं 1
गृह्णन्त्यात्मानमेवास्यैतत्सꣳस्कुर्वन्ति तमस्यात्मानꣳ सꣳस्कृत्य तस्मिन्नेतान्प्राणान्दधति यथा यथास्यैते प्राणा ग्रहाः ॥१॥

स यस्यैतं गृह्णन्ति तस्यारम्भणवन्त इव प्रतिष्ठिता इव प्राणा भवन्त्यथ 2
यस्यैतं न गृह्णन्त्यनारम्भणतरा इवास्यायततरा इव प्राणा भवन्ति स यस्यैतं गृह्णन्ति स ह कृत्स्न एव सर्वतनूरमुष्मिंल्लोके संभवति तस्माद्वा अꣳशुर्ग्रहीतव्यः ॥२॥

स यस्याहैतं गृह्णन्त्येष एवास्य तर्ह्यात्मा भवत्यथ यस्यैतं न गृह्णन्त्येष एवास्य तर्हि सोम आत्मा भवति सोमो हि प्रजापतिः स यदेतस्यैतान्ग्रहान्गृह्णन्ति

तदस्यैतास्मिन्नात्मन्येतान्प्राणान्दधाति यथा यथास्यैते प्राणा ग्रहाः स उ कृत्स्न एव सर्वतनूरमुष्मिंल्लोके संभवति ॥३॥

3 तमौदुम्बरेण पात्रेण गृह्णाति प्रजापतिर्वा एष प्राजापत्यो यदुदुम्बरः प्रजापतिर्वा अश्शुस्तस्मादौदुम्बरेण गृह्णाति ॥४॥

4 चतुःस्रक्तिना गृह्णाति त्रय इमे लोकाः प्रजापतिमेवाति चतुर्थी[3] तस्माच्चतुःस्रक्तिना गृह्णाति ॥५॥

अथ यद्वेव चतुःस्रक्तिना गृह्णाति प्रजापतिर्वा एष दिशः स्रक्तयः सर्वास्वेवैतद्दिक्षु प्रजापतिं दधाति तस्माद्दिमाः प्रजा दिशि दिश्येव[4] प्रजायन्ते ॥६॥

अथ यद्वेव चतुःस्रक्तिना गृह्णाति प्रजापतिर्वा एष दिशः स्रक्तयः सर्वाभ्य एवास्मा एतद्दिग्भ्यो[5] ऽन्नाद्यमिन्द्रियं[6] वीर्यं दधाति तस्माच्चतुःस्रक्तिना गृह्णाति ॥७॥

5.6 स वै तूष्णीमेवाश्शून्निवपति[7] तूष्णीं ग्रावाणमादत्ते तूष्णीमुपसृजति तूष्णीꣳ सकृदभिषुत्यानवानं जुहोति तदेनं प्रजापतिं करोत्यथ हिरण्यमभिव्यनित्यायुर्वा अमृतꣳ हिरण्यꣳ स यदेतस्य प्राणस्य प्रजापतेः प्राणन्वोदनन्वा वि वा लिशति क्षिणोति वायुर्वा अमृतꣳ हिरण्यं तदेवास्यायुषामृतेन संदधाति तच्छमयति तस्माद्धिरण्यमभिव्यनिति ॥८॥

7.8 तदु होवाच राम औपतस्विनिरुरुगा इतरं मह्यमाचार्यो ऽब्रवीदिति होवाच काममेव[8] प्राण्याच्चोदन्याच्चेति[9] यद्वाव[10] तूष्णीमꣳशून्निवपति तूष्णीं ग्रावाणमादत्ते[11] तूष्णीमुपसृजति तूष्णीꣳ सकृदभिषुत्य जुहोति[12] तदेवैनं प्रजापतिं करोतीति होवाच तूष्णीं कर्मणैवैत्यथ हिरण्यमभिव्यनिति तस्योक्तो बन्धुः ॥९॥

9 तदु होवाच बुळिल आश्वतराश्विर्नैतमभिषुणुयादिति होवाचाभिषुणोति वा अन्याभ्यो देवताभ्यः स यदेनमभिषुणुयादित्यन्याभिरेनं[13] देवताभिरभ्यारोहयेदुद्यत्यैव[14] गृह्णीयात्तदेवाभिषुतभाजनमिति[15] ॥१०॥

10 तदु होवाच याज्ञवल्क्यो ऽभिषुणुयादेवैतमिति होवाच न सोम इन्द्रमसुतो ममाद नाब्रह्माणो मघवानꣳसुतास इति वा ऋषिणाभ्यनूक्तमस्ति[16] यावद्वा एनं[17] नाभिषुण्वन्तीति नैवास्मिꣳस्तावद्रसं[18] दधति न तावदलमाहुतये भवत्यथ यदैवैनमभिषुण्वन्तीत्यथैवास्मिन्रसं दधत्यथालमाहुतये भवति तस्मादेनमभिषुणुयादेवेति तं वा अभिषुण्वन्त्सकृदभिषुणोति स यद्हैनमभिषुणोति[19] तदा ह्यस्मिन्रसं दधाति तथो अलमाहुतये भवति यद्वभिषुण्वन्त्सकृदभिषुणोति तथो एनम-

न्याभिर्देवताभिर्नाभ्यारोहयति तस्मादेनमभिषुणुयादेवेति ॥११॥

तस्य द्वादश प्रथमगर्भाः[14] षष्ठौह्यो दक्षिणा द्वादश वै मासाः संवत्सरस्य 11
संवत्सरो वै प्रजापतिः प्रजापतिर्वा अꣳशुस्तस्माद्द्वादश प्रथमगर्भाः[14] षष्ठौह्यो दक्षिणाः ॥१२॥

ता गर्भैः सह चतुर्विꣳशतिर्भवन्ति चतुर्विꣳशतिर्वा अर्धमासाः संवत्स- 12.13
रस्य संवत्सरो वै प्रजापतिः प्रजापतिर्वा अꣳशुस्तस्माद्गर्भैः सह चतुर्विꣳशतिर्भवन्ति चतुर्विꣳशतिꣳ ह त्वा एता ददौ प्रथमगर्भाः कौकुस्त[15] ऋषभमाङ्गिरण्यम्[16] ॥१३॥

स वा एष नैव सर्वस्येव ग्रहीतव्य आत्मा ह्यस्यैष सर्वꣳ ह्यात्मा नेत्सर्व- 14
स्येव सर्वं करवाणीति यो न्वेव ज्ञातस्तस्य ग्रहीतव्यो ऽथ यो ऽनूचानो ऽनूक्तेन हि तस्य प्राप्तो भवति ॥१४॥

सहस्रे ग्रहीतव्यः सर्वꣳ हि सहस्रꣳ सर्वꣳ ह्येष सर्ववेदसे ग्रहीतव्यः सर्वꣳ 15
हि सर्ववेदसꣳ सर्वꣳ ह्येष सत्त्रे ग्रहीतव्यः सर्वꣳ हि सत्त्रꣳ सर्वꣳ ह्येष वाजपेये राजसूये विश्वजिति सर्वपृष्ठे ॥१५॥ प्रथमं ब्राह्मणम् ॥

1 Thus C O My Or; तस्यारंभणवत्तरा B W. 2 गृह्णंति B W C O. 3 Thus MSS. See III. 2. 1. 7. 4 दिश्येव MSS. 5 एतद्दिग्भ्योन्नाद्यामि° B. 6 Thus Or (without accent) only; तूष्णीमेवोपाꣳशुन्नि° B C, तूष्णीमेवोपाꣳशून्नि° O My. 7 Thus (without accent) Or only; काममेव प्राणाच्चो° the other MSS. 8 तद्वाव C My. 9 °मादत्ते MSS. 10 जुहोति MSS. 11 यदेनमभिषुणु° MSS. 12 °हयेदुद्यत्यैव MSS. 13 °वाभिषुत° B W O. 14 °क्तमस्ति MSS. 15 एतं B O Or. 16 नैवास्मि° B W O. 17 यदहै° MSS. 18 प्रथमगर्भाः MSS. 19 कौकुस्थ Or, कउक्थस्त the other MSS., and C originally. In C क्थ is corrected on the margin into कु (कउकुस्त). Probably the correct reading

is कौकुस्त. 20 ऋ° W. See Introduction III, section 39 b.

M. XI. 5. 9 K. V. 8. 2

1 प्रजापतिर्ह वा अꣳशुः स वा अस्यैष आत्मैवात्मा हि प्रजापतिर्वागेवादाभ्यः स यदꣳशुं गृहीत्वादाभ्यं[1] गृह्णात्यात्मानमेवास्यैतत्सꣳस्कृत्य तस्मिन्नेतां वाचं दधाति ॥१॥

2 अथ मनो ह वा अꣳशुर्वागदाभ्यः प्राण एवाꣳशुरुदानो[2] ऽदाभ्यश्चक्षुरेवाꣳशुः श्रोत्रमदाभ्यः स यदेतौ ग्रहौ गृह्णाति सर्वत्वायैव कृत्स्नतायै ॥२॥

3.4 अथ देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त[3] त एतस्मिन्नेव[3] यज्ञे प्रजापतावस्पर्धन्तास्माकमयꣳ स्यादस्माकमयꣳ स्यादिति ततो देवा एतं ग्रहं ददृशुरेतमदाभ्यं ते सवनानि प्रावृहन्त[4] ते सर्वं यज्ञꣳ समवृञ्जत निरभजन्नसुरान्त्सपत्नान्यज्ञात् ॥३॥

5.6 ते होचुरदभाम वा एनानिति तस्माददाभ्यो न वै नो ऽदभान्निति तस्माद्वेवादाभ्यो वागु वा अदाभ्यः सेयमदब्धा[5] वाक्तस्माददाभ्य एवꣳ ह वाव द्विषतः सपत्नस्य सर्वं यज्ञꣳ संवृङ्क्ते एवं द्विषन्तꣳ सपत्नꣳ सर्वस्माद्यज्ञान्निर्भजति बहिर्धा करोति यस्यैवं विदुष एतं गृह्णन्ति स येनैव पात्रेणाꣳशुं गृह्णाति तस्मिन्नेव पात्रे निग्राभ्याभ्यो ऽप आनीय तस्मिन्नेतानꣳशून्गृह्णाति ॥४॥

7 उपयामगृहीतो ऽस्यग्नये त्वा गायत्रच्छन्दसं गृह्णामीति गायत्रं प्रातःसवनं तत्प्रातःसवनं प्रवृहतीन्द्राय[6] त्वा त्रिष्टुप्छन्दसं गृह्णामीति त्रैष्टुभं माध्यंदिनꣳ सवनं तन्माध्यंदिनꣳ सवनं प्रवृहति[6] विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णामीति जागतं तृतीयसवनं तत्तृतीयसवनं[7] प्रवृहत्यनुष्टुप्ते[8] ऽभिगर इति यद्वा ऊर्ध्वꣳ सवनेभ्यस्तदानुष्टुभं तदेवैतत्प्रवृहति[6] तं नाभिषुणोति वज्रो वै ग्रावा वागदाभ्यो नेद्वज्रेण वाचꣳ हिनसानीति ॥५॥

8-10 अꣳशूनेवाधूनोति व्रेशीनां त्वा पत्मन्नाधूनोमि कुकूननानां[9] त्वा पत्मन्नाधूनोमि भन्दनानां त्वा पत्मन्नाधूनोमि मध्वन्तमानां त्वा पत्मन्नाधूनोमीत्येता वै दैव्या आपः स याश्चैव दैव्या आपो याश्चेमा मानुष्यस्ताभिरेवास्मिन्नेतदुभयीभी रसं दधाति शुक्रं त्वा शुक्र आधूनोमीति शुक्रꣳ ह्येनमेतच्छुक्र आधूनोत्यह्नो[10] रूपे सूर्यस्य रश्मिष्विति तदह्नश्चैवैतद्रूपे सूर्यस्य च[10] रश्मिष्वाधूनोति ककुहꣳ रूपं वृषभस्य रोचते

बृहत्सोमः[11] सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगा इति तत्सोममेवैतत्सोमस्य पुरोगां करोति[12] शुक्रꣳ शुक्रस्य पुरोगां यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामीत्येतद्ध वा अस्यादाभ्यं नाम जागृवि यद्वाक् तद्वाचमेवैतद्वाचे गृह्णाति[13] तस्मादाह तस्मै त्वा गृह्णामीति[14] ॥६॥

अथोपनिष्क्रम्य जुहोति तस्मै ते सोम सोमाय स्वाहेति तत्सोमायैवैतत्सोमं 11
जुहोति तथा वाचमशौ न प्रवृणक्त्यथ हिरण्यमभिव्यनिति तस्योक्त एव बन्धुस्तस्य तावत्य एव दक्षिणाः ॥७॥

अथाꣳशून्पुनरप्यर्जत्युशिक् त्वं देव सोमाग्नेः प्रियं पाथो ऽपीहि वशी त्वं देव 12
सोमेन्द्रस्य प्रियं पाथो ऽपीहि। अस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथो ऽपीहीति सवनानि वा अदः प्रवृहति[15] तान्येवैतत्पुनराप्याययत्ययातयामानि करोति तैरयातयामभिर्यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तन्वते[16] ॥८॥ द्वितीयं ब्राह्मणम् ॥

1 ग्रहीत्वा° MSS. except Or. 2 °दानो B O W. 3 अस्पर्धंत त एत° B W O. 4 प्राबृ° My. 5 सेयमदब्धा MSS. 6 प्रबृ° C My. 7 तत्तृतीय-सवनं B W. 8 MSS. except My ककूननां. 9 Emended; आधूनोम्य° MSS. 10 Om. in C. 11 Thus MSS. differently from Weber's edition (बृहन्सोमः). 12 Read करोति ? 13 गृह्णाति MSS. 14 °मीति MSS. 15 प्रबृ° My. 16 तत्तन्वते MSS.

K. V. 8. 3 M. IV. 6. 9

देवा ह वै सत्त्रं निषेदुः श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तेषाꣳ 1
ह्यान्नाद्यमभिजितं तद्भ्यो[1] ऽपचिक्रमिषां[2] चकार पशवो वा अन्नाद्यं पशवो ऽन्नं ते हैभ्यो[3] ऽपचिक्रमिषां चक्रुर्यद्वै न इमे श्रान्ता न क्षिꣳस्युः कथꣳ स्विन्नः सक्ष्यन्त इति ॥१॥

तदु वै देवा अस्पृण्वत तद्गृहेषु न्ययच्छन्त[4] तथैभ्य एतदन्नाद्यं नापा- 2.3
क्रामत्तथो वा एत आसते सत्त्रं य आसते सत्त्रꣳ श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तेषाꣳ ह्यान्नाद्यमभिजितं तद्भ्यो ऽपचिक्रमिषति पशवो वा अन्नाद्यं

पशवो ऽन्नं ते हैभ्यो ऽपचिक्रमिषति यद्वै न इमे श्रान्ता न हिꣳस्युः कथꣳ स्विन्नः सक्ष्यन्त इति ॥२॥

4.5 स गार्हपत्ये द्वे आहुती जुहोति गृहा वै गार्हपत्यस्तद्गृहेष्वेतदन्नाद्यं नियच्छन्ते तथैभ्य एतदन्नाद्यं नापक्रामति तथो वा अस्मादशनमुपनिहितं तद्धास्मादपचिक्रमिषति यद्वै मायं न हिꣳस्यात्कथꣳ स्विन्मा सक्ष्यत इति ॥३॥

6 स परस्तादग्र आददीत द्विर्वा त्रिर्वा तदिदमशनं परस्तादर्वागुपनिवदति तद्वेद न वै मा हिनस्तीति तमुपनिःश्रयते स प्रियो ऽन्नस्य भवत्यन्नादो य एवं विद्वानेतद्व्रतं चरति ॥४॥

7 तद्धा एतदृशमे ऽहनि क्रियत एतत्सत्त्वोत्थानं तदेको हैषां वाचंयमो भवत्यथेतरे वितिष्ठन्ते वि स तिष्ठते यो वितिष्ठासते ऽश्नाति स यो जिघत्सति ॥५॥

8 ते ऽपराह्णे गार्हपत्यमुपसमायन्ति तेष्वन्वारब्धेष्वध्वर्युर्जुहोति तदध्वर्योरेव होमो यद्यध्वर्युर्न विद्याद्गृहपतिर्जुहुयाद्यदि गृहपतिर्न विद्यादपि य एव कश्च विद्यात्स जुहुयात् ॥६॥

स जुहोतीह रतिरिह रमध्वमिति पशूनेवैतदाहेह धृतिरिह स्वधृतिः स्वाहेति पशूनेवैतदाह ॥७॥

9 अथ द्वितीयां जुहोत्युपसृजन्धरुणं मात्र इत्यग्निमेवैतदस्यै पृथिव्या उपसृजन्नाह धरुणो मातरं धयन्नित्यग्निमेवैतादिमां पृथिवीं धयन्तमाह रायस्पोषमस्मासु दीधरत्स्वाहेति पशवो वै रायस्पोषः पशूनस्मासु दीधरदित्येवैतदाह ॥८॥

10 ते प्राञ्चो निःसृप्योत्तरेण परीत्य पश्चात्प्राञ्चो हविर्धानं प्रपद्यन्ते पुरस्ताद्वै प्रत्यञ्चस्तꣳस्यमाना अथैवꣳ सत्त्वोत्थाने ॥९॥

11 स उत्तरस्य हविर्धानस्य दक्षिणां कूबरीमभिपद्य सत्त्वस्यर्द्धिरिति तत्सामाभिगायत्युत्तरवेदेर्वोत्तरस्याꣳ श्रोणा उत्तरस्य त्वेव हविर्धानस्य दक्षिणां कूबरीमभिपद्य तदेव सत्त्वस्यर्द्धिमभिगायति ॥१०॥

12 अगन्म ज्योतिरमृता अभूमेति ज्योतिर्ह्येते यन्ति ये सत्त्वमासते ऽमृता ह्येते भवन्ति दिवं पृथिव्या अध्यारुहामेति दिवꣳ ह्येते पृथिव्या आरोहन्ति ये सत्त्वमासते ऽविदाम देवानिति देवान्ह्येते विन्दन्ति ये सत्त्वमासते स्वर्ज्योतिरिति निधन-

मुपावयन्ति स्वर्ह्येते यन्ति ये सत्त्रमासते ज्योतिर्ह्येते भवन्ति तस्मात्स्वर्ज्योतिरिति निधनमुपावयन्ति स यः सत्त्रस्यर्द्धिमभिगायति राद्धिमेवैभ्य एतदाशास्ते राध्नुवन्त्येवैतत्त्रिरभिगीय[16] साम ॥११॥

अथ दक्षिणस्य हविर्धानस्याधो ऽधो ऽक्षं प्राञ्चो निःसर्पन्ति युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तं तमिद्धतं वज्रेण तं तमिद्धतम्। दूरे चत्ताय छन्त्सद्वहनं यदिनक्षदस्माकꣳ शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट[17] विश्वत इत्येतयातिच्छन्दसा[18] सर्वे वा अत्यतिच्छन्दाः सर्वेणैवैतत्पाप्मानमपघ्नते[19] तथैनान्पाप्मा[20] नाभ्यत्येत्यथ यदधो[21] ऽधो ऽक्षं[22] वज्रो वा अक्षो वज्रेणैवैतत्पाप्मानमपघ्नते[23] तथैतान्पाप्मा[24] नाभ्यत्येति[25] स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्य प्राञ्चो निःसर्पन्ति प्राञ्चो निःसृप्योत्तरेण परीत्य पुरस्तात्प्रत्यञ्चः सदः प्रसर्पन्ति पश्चाद्वै प्राञ्चस्त्ꣳस्यमाना अथैवꣳ सत्त्रोत्थाने[26] ॥१२॥ 14.13.15

ते यथाधिष्ण्यं व्युपविशन्ति तदुद्गाता सामाभिगायति सर्पराज्ञ्या[27] ऋक्षु स्वयंप्रस्तुतमनुपगीतं यथान्यो नोपश्रृणुयादिति ह रेचयेद्यदन्यः प्रस्तुयादिति ह रेचयेद्यदन्य उपगायेदिति ह रेचयेद्यदन्य उपश्रृणुयात्तस्मात्स्वयंप्रस्तुतमनुपगीतं यथान्यो नोपश्रृणुयात् ॥१३॥ 17.16a

स यदुद्गाता[28] सामाभिगायति[29] वाचो[30] ह वै रसो ऽभिजितो देवानाꣳ स इमां पृथिवीं पराङतिसिसृप्सां[31] चकारेयं वै पृथिवी वाक्तस्या अस्या रस ओषधयो वनस्पतयो यदिदमस्यामन्नाद्यꣳ स इमां पृथिवीं पराङतिसिसृप्सां[32] चकार तमेतेन साम्नाप्नुवन्त्स आप्त आवर्तत ता इमा अस्या ऊर्ध्वा ओषधयो वर्धन्त ऊर्ध्वा वनस्पतयः ॥१४॥

तथो वा एतेषां वाचो रसो ऽभिजितः स इमां पृथिवीं पराङतिसिसृप्सतीयं[33] वै पृथिवी वाक्तस्या अस्या रस ओषधयो वनस्पतयो यदिदमस्यामन्नाद्यꣳ स इमां पृथिवीं पराङतिसिसृप्सति तमेतेन साम्नाप्नवन्ति स आप्त आवर्तते ता इमा अस्या ऊर्ध्वा ओषधयो वर्धन्त ऊर्ध्वा वनस्पतयः स यत्सर्पराज्ञ्या[34] ऋक्षिवयं[35] वै सर्पराज्ञ्यनयैवैतत्सर्वमाप्नवन्ति[36] ॥१५॥ 16b

अथ चतुर्होतॄन्होता व्याचष्टे तद्धोतुरेव व्याख्यानꣳ होता हि स्तुतमनुशꣳसति यदि होता न विद्याद्गृहपतिर्व्याचक्षीत यदि गृहपतिर्न विद्यादपि य एव कश्च विद्यात्स व्याचक्षीतैतदेवैतत्स्तुतमनुशꣳसति ॥१६॥ 18

19 अथ वाकोवाक्यं[34] ब्रह्मोद्यं वदन्त्यध्वर्युमामन्त्र्य तदध्वर्योः प्रतिगरो ऽरात्सुरिमे[35] यजमाना भद्रमेभ्यो यजमानेभ्यो ऽभूदिति राद्धिमेवैभ्य एतदाशास्ते राध्नुवन्त्येवैतत् ॥१७॥

20 स यद्वाकोवाक्यं ब्रह्मोद्यं वदन्ति सर्वं वा एत[36] आप्नुवन्ति[37] सर्वमवरुन्धते ये सत्त्रमासते ऽस्तोषत सामभिस्तत्तान्यापꣳस्तान्यवारुत्साताशꣳसिषुर्ऋक्चस्तत्ता आपꣳस्ता अवारुत्सत प्राचारिषुर्यजुर्भिस्तत्तान्यापꣳस्तान्यवारुत्सतातैषामेतदनाप्तं[38] भवत्यनवरुद्धं[39] यद्वाकोवाक्यं ब्रह्म तदेवैतदाप्नुवन्ति तदवरुन्धत[40] एतदु[41] चैवैतत्स्तुतमनुशꣳसति[42] तस्माद्वाकोवाक्यं ब्रह्मोद्यं वदन्ति[43] ॥१८॥

21 अथौदुम्बरीꣳ समारभ्य सर्वे वाचंयमा आसत आस्तमेतोरादित्याद्वाग्वै यज्ञस्तदेतद्यज्ञं निर्धयन्ति[44] विदुहन्ति[45] यदेनया यज्ञं तन्वते तमेषामदः पुरैकैक उत्तरस्मा अह्न आप्याययति सो ऽत्राज्ञो यज्ञो भवत्यपवृक्तस्तमेवैतत्सर्वमाप्याययति तयापीनया[46] वाचायातयामया[47] यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तन्वते[48] ॥१९॥

22,23 स[49] यदौदुम्बरीꣳ[50] समारभ्योर्ग्वा[51] उदुम्बर ऊर्जैवैतद्यज्ञमाप्याययन्त्यथास्तमित आदित्ये प्राञ्चो निःसृप्याग्रेण हविर्धानमासते तान्वाचंयमानेव वाचंयमः प्रतिप्रस्थाता वसतीवरीभिः परिहरति स यस्मै कामाय दीक्षत[52] कामाय ह स्म वै पुर ऋषयो दीक्षन्त ऽमुं कामं कामये[53] स मे ऽस्तु स मे समृध्यतामिति स ह्यस्मै कामः समृध्यत उतो अनेककामो दीक्षते ॥२०॥

24 तस्यो[54] तस्य[55] जपो भूर्भुवः स्वरिति तद्वाचꣳ सत्येन समर्धयति तया समृद्धयाशिष आशास्ते सुप्रजाः प्रजया भूयासमिति तत्प्रजामाशास्ते सुवीरो वीरैरिति तद्वीरानाशास्ते सुपोषः पोषैरिति तत्पुष्टिमाशास्त एवमस्मा एता आशिषः समृध्यन्ते ॥२१॥

25 अथ गृहपतिः सुब्रह्मण्यामाह्वयति यं वा गृहपतिर्ब्रूयात्सर्वे ह त्वेक आह्वयन्ति गृहपतिस्त्वेवाह्वयेद्यं वा गृहपतिर्ब्रूयात्तस्मिन्नुपहवमिच्छन्ते ऽथ समिधो ऽभ्यादधत्येतदेवैतत्कर्मान्ततः समिन्धते ॥२२॥ तृतीयं ब्राह्मणम् ॥

1 °भ्यो पचिक्रमिषां O W Or, °भ्यो परिचक्रमिषां C W My, °भ्यो परिचक्रमिवां B. 2 हैभ्यो MSS. 3 Thus (without accent however) Or only; नियछंत C O, नियछंत My, नियछंते B W (the accent

of the preceding गृहेषु has been emended accordingly). 4 अस्मादशनमुपनिहितं C, अस्मादशनमुपनिहितं B W O. 5 MSS. except Or insert न. 6 Emended; आदधीत MSS. 7 वतिष्ठंतेवतिष्ठते B. 8 यो वितिष्ठासते MSS. 9 तदध्वर्योन्वेव C O My. 10 होमो यद्य° B W C O. 11 धय° MSS. 12 निःसृप्योत्तरेण B W C O. 13 कुबरी° B. 14 सत्रस्यद्धिरिति B. 15 तदेव MSS. 16 °भि° MSS. 17 दिवष् MSS. 18 °गीय MSS. 19 MSS. except O and Or दर्शिष्ट. 20 इत्येतयातिछंदसा MSS. 21 °नमपद्मते MSS. 22 Thus (without accent) Or only; °पाप्मनोभ्यत्येत्यथ the other MSS. (C °पाप्मानो°). 23 यदधो धोक्षं MSS. 24 Thus Or and C (sec. m.), पाप्मनोभ्यत्येति the other MSS. 25 °त्थानं B. 26 Thus Or only, °राज्ञा the other MSS. 27 य उद्गाता B W. 28 °भिगायति MSS. 29 वाचो B W. 30 पराङतिसि° MSS. 31 Thus (without accent) Or only; पराङतिसिसृप्सयंतीयं C O W My, पराङतिसिसृप्सयंतीयं B. 32 Thus (यत्) Or only; यः all the other MSS. 33 Thus Or; °रज्ञा ऋक्षीयं the other MSS. 34 Thus Or and C (sec. m.), सर्पराज्ञ्यनयैवैत° O C (orig.) My, सर्पराज्यमनयैत° B W. 35 वाको° MSS. except Or. 36 रास्सुरिमे MSS. 37 एत आप्नुवंति C O Or, एतमाप्नुवंति B W My. 38 °मेतदनासं भव° MSS. 39 °रुंधत एतदु MSS. 40 °शष्सति C O W, °शष्सति B. 41 वदति C. 42 Thus Or

only; निर्दहंति the other MSS. 43 विदूहंति MSS. 44 त्वनाप्यनया B, तयाप्यनया W. 45 वाचाया° MSS. 46 तत्तन्वते MSS. 47 स यदौ° B W, स यदौ° O C. 48 समारम्भो° MSS. 49 दीक्षते B W. 50 कामये MSS. 51 तस्यातस्य My.

M. IV. 6. 7 K. V. 8. 4

1.2 त्रयी वै विद्यर्चः सामानि यजूꣳष्येषा वै त्रयी विद्या तत इयमेवग्वागृग्वाचा ह्यर्चन्तीयमु हि वाक् तेनेयमृग्य उ वै कश्चार्चत्यस्यामेव सो ऽर्चति तेनेयमृगन्तरिक्षमेव यजुर्द्यौरेव साम ताः सर्वा विद्याः सौम्ये ऽध्वरे ऽवक्लृप्यन्ते स य एवं विद्वान्त्सौम्येनाध्वरेण यजत इममेव लोकमृग्भिर्जयति यजुर्भिरन्तरिक्षꣳ सामभिर्द्यंवं[1] यो वैवं विद्वानतो ऽप्येकतमं वेदमधीयन्नथापीतरयोर्वेदयोर्निर्मितमनुब्रूत एताम्वेव स जितिं जयति ॥१॥

3.4 अथैतद्वै तद्वाचः प्रजातꣳ सहस्रं यदिन्द्राविष्णू त्रेधा व्यैरयतां यदेषां त्रयी विद्या ततो द्वौ भागाविन्द्रो ऽभजतैकं[2] विष्णुर्ऋचश्च सामानि[3] चेन्द्रो ऽभजत यजूꣳषि विष्णुस्तस्माद्दक्सामभ्याꣳ सदसि कुर्वन्तीन्द्रो हि ते अभजतैन्द्रꣳ सदस्तस्माद्वेतꣳ सोमं विष्णुं यजुर्भिर्विभ्रत्येतानि हि सो ऽभजत तद्वा एतेन यज्ञेन विष्णुना पुर इव चरन्ति तस्मात्पुरश्चरणं नाम ॥२॥

5 मनो ह वाव यजुर्वागेवर्क् च साम च तदिदं मन ऋते वाचो न प्राज्ञायत न हि तूष्णीं ध्यायतः कश्चनाजानाति[4] ॥३॥

6 ते ह देवा ऊचुर्वाचꣳ सदसो न वा इदं त्वदृते मनः प्रज्ञायत इति प्राची प्रेहीदं प्रज्ञपयेति ॥४॥

सा होवाच किं मम ततः स्यादिति ते होचुर्यर्तिं च सौम्ये ऽध्वरे ऽवषट्कृतꣳ स्वाहाक्रियाता इति तत्त भाजनेनेति तस्माद्यर्तिं च सौम्ये ऽध्वरे ऽवषट्कृतꣳ स्वाहाक्रियते तद्वाचो भाजनेन ॥५॥

7 सा प्राची प्रैत्सा तत्प्राज्ञपयदित्थमिदं कुरुतेत्थमिदं कुरुतेति वाचा हि प्रज्ञायते ततो मनश्च वाक् च सयुजावभवताम् ॥६॥

तस्मादपि वाचा हविर्धाने कुर्वन्ति यद्वा ऋचा कुर्वन्ति[5] तद्वाचा कुर्वन्ति यत्प्रातरनुवाकमन्वाहुर्यत्सामिधेनीर्यद्ब्राह्मणो ऽभिष्टुवन्त्येवꣳ हि सयुजावभवताम् ॥७॥

तस्मादपि यजुषा सदसि कुर्वन्ति[6] यद्धिष्ण्यानुपकिरन्ति[7] यत्सदो ऽभित 8
एव[8] हि सयुजावभवताम् ॥८॥

तद्वै परिश्रयन्ति हविर्धानं मिथुनाय तिरो मिथुनं चर्याता इति योषा वा 10
आपो वृषाश्वुः सोम एतस्मै तन्मिथुनाय परिश्रयन्त्येतन्मिथुनं तिरश्चर्याता इति ॥९॥

परिश्रयन्त्यु[9] वाव[10] सदो मिथुनाय तिरो मिथुनं चर्याता इति योषा वा 9
ऋग्वृषा सामैवैतस्मै[11] तन्मिथुनाय परिश्रयन्त्येतन्मिथुनं[12] तिरश्चर्याता इति व्यृद्धं वै तन्मिथुनं येनाविश्चरन्ति तस्माद्यद्यपि पश्यन्ति स्वया जायया मिथुनीभवन्तमाग[13] इवैवास्य भवति तस्माद्यो ऽन्यत्र द्वारः प्रेक्षेत हविर्धानस्य वा सदसो वा मा प्रेक्षथा इत्येव तं प्रतिषेधेयुर्यथा मिथुनं चर्यमाणं[14] पश्येदेवं तत्कामं तु द्वारा प्रेक्षेत देवकृत[15] हि तत् ॥१०॥

स इमा योषा अपो वृषाश्वुः सोमो ऽधिद्रवति हविर्धाने तस्मान्मिथुनात्त- 11.12
स्माद्रेतसश्चन्द्रमा जायते ऽथेमां योषामूचं वृषा सामाधिद्रवति सदसि तस्मान्मिथुनात्तस्माद्रेतसः सूर्यो जायते तेजो वा ऋक्तेजः सूर्यस्तेजस एवैतत्तेजो जायते यदृक्सामभ्या[16] सूर्य इन्द्र इति ह्येनमाहुरन्नमु वा आपो ऽन्नम[17]श्वुः सोमो ऽन्नादेवास्मा एतदन्नं जनयति यच्चन्द्रमसं चन्द्रमा उ ह्येतस्यान्नं तद्वा ऋक्सामभ्यामेव यजमानं जनयत्यथाश्वोश्च सोमादद्ध्यश्वास्मा[18] अन्नाद्यं[19] जनयत्येतद्वा एतज्जनयति[20] ॥११॥

मनो ह वाव यजुर्यज्ञो ह वाव यजुर्यजो ह नामैतद्यजुरित्याहुर्यजुषा ह वा अग्रे 13.14
देवा यज्ञमतन्वताथर्ग्भिरथ सामभिस्तस्मादप्येतर्ह्येवमेव यज्ञं तन्वते यजुर्भिरेवाग्रे ऽथर्ग्भिरथ सामभिः सैषा देवैर्निधीततमा[21] विद्या यद्यजू[22]षि तस्मादस्या आशीः पदृतमानि निरुक्तानि निधीता ह्येषा देवैर्विद्या ॥१२॥

ते ह देवा ऊचुर्हन्तेमां विद्यां पुनराप्याययामेति तेनेयं विद्येतरे विद्ये प्रति- 15-18
प्रति भविष्यति तेनायं लोक इतरौ लोकौ प्रतिप्रति[23] भविष्यतीति तथेति होचुस्तां वा उपाश्वु जपामेति तामुपाश्वजप[24]स्तेनैषा विद्येतरे विद्ये प्रतिप्रत्यभवत्तेनायं लोक इतरौ लोकौ प्रतिप्रत्यभवत्तस्मादयमन्तरिक्षलोको निरुक्तः सन्पुनरनिरुक्तो निरुक्तानि हि यजू[25]षि सन्ति पुनरनिरुक्तानि निरुक्तानि वै तेन यजू[26]षि यदेनानि[27] वाचाभिव्याहरति निरुक्ता[28] हि वागनिरुक्तानि वै तेन यदेनानि[29] वाचाभिव्याहरन्नुपाश्वु[30] जपत्यनिरुक्त[31] हि तद्यदुपाश्वु स यो हैतां विद्यामुपाश्वु जपति स हैनामाप्याययति तमु हैषाप्यायिता[32] पुनराप्याययत्यथ यो हैनामुच्चैर्जपति न हैना[33] स आप्या-

ययति तमु हैषानाप्यायिता[21] परुषं[23] करोति तस्मादुपाꣳश्वेव जपेत् ॥१३॥

मनो ह वाव यजुस्तद्वा इदमनिरुक्तं मनो ऽनिरुक्तꣳ हि तद्यदुपाꣳशु तस्मादुपाꣳश्वेव जपेत् ॥१४॥

19.20 मनो ह वाव यजुर्वागेवर्क् च साम च स य एषो ऽत्राध्वर्युर्यजुर्भिश्चरति[27] सो ऽत्र मनो भवत्यथ यदृक्सामभ्यां चरन्ति ते[28] वाग्भवन्त्येवꣳ[29] ह वा एतद्भवति तस्माद्यदैवाध्वर्युराहानुब्रूहीत्यथान्वाह[30] यदाह यजेत्यथ यजति[31] यदाहोपावर्तध्वमित्यथ स्तुवते न किं चनानभिगतमध्वर्युणा क्रियते न हि मनसानभिगतं[32] वाग्वदति तद्वा इदं मनः पुर इव चरति तस्मात्पुरश्चरणं नाम पुर इव ह वै श्रिया यशसा भवति य एवमेतद्वेद ॥१५॥

21 सूर्यो ह वाव पुरश्चरणं तस्मात्प्राङ् तिष्ठन्नुत्वैतस्यैवावृतमन्वावर्तते प्रतिगीर्यैतस्यैवावृतमन्वावर्तते स एष एवैतद्रूपं भूतः संचरति तस्य नार्तिर्न ह्वला भवति स यो हैताꣳ शक्नोत्यावृतꣳ शक्नोति हैव भार्यां भर्तुमथो एतस्य सायुज्यꣳ सलोकतां जयति ॥१६॥ चतुर्थं ब्राह्मणम् ॥ अष्टमो ऽध्यायः ॥ अहकाण्डं समाप्तम् ॥

1 °र्दिवं MSS. 2 भजतैकं MSS. 3 सामानि MSS. 4 कश्चनजानाति W. 5 कुर्वंति MSS. 6 कुर्वंति MSS. 7 यद्धि° MSS. 8 Thus (without accent) Or; परिश्रयन्त्युवाव B W My, परिश्रयंत्युव C. 9 सामैवैतस्मै B W, सामैतस्मै O Or. 10 परिश्रयंतेतन्मिथुनं W. 11 °वंतमागृ B. 12 चर्यमाणं B W. 13 ऋमꣳशुः MSS. 14 Thus Or only, सोमादद्भिश्चास्मान्नाधं the other MSS. 15 °जनयंति C O My W Or (rightly ?). 16 °निर्धीततमा B W C. 17 प्रतिप्रति C. 18 यदेनानि B. 19 निरुक्तानि B. 20 °पाꣳशु जपत्य° MSS. 21 Thus Or only, हैषाप्यायता the other MSS. 22 हैषानाप्यायता MSS. except Or. 23 पुरुषं B W. 24 त्राध्वर्यु° B. 25 ते वाग्भवत्येवꣳ C, ते वाभवतोवꣳ B,

ये वाग्भवंत्येवꣳ Or, तं वाग्भवन्त्येवꣳ My. 26 Thus Or only; तस्माद्यदिवाध्वर्युं C O W My, तस्माद्यदिवाध्वर्युं B. 27 जयति B, जपति My W. 28 मनसा MSS.

M. V. 1. 1 K. VI. 1. 1

1 देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त ततो हासुरा अतिमानेन कस्मिन्नु[1] वयं जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्ते ह तथा जुह्वतः पराबभूवुस्तस्माद्ध नातिमानी स्यादित्याहुः पराभूतेरेतन्मुखं यो ऽतिमान इति[1] ॥१॥

2 अथ ह देवा अनतिमानिन इवासुस्ते ऽन्यो ऽन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्यस्तथा जुह्वद्भ्यः प्रजापतिरात्मानं प्रददौ यज्ञो वै प्रजापतिः स एषामन्नमभवद्यज्ञो हि देवानामन्नम् ॥२॥

3 ते ह देवा ममायं भविष्यति ममायं भविष्यतीति ह्यस्मिन्न संपादयां चक्रुस्ते होचुरसंपादयन्तो हन्तास्मिन्नाजिमजामहा इति स य उज्जेष्यति तस्य नो ऽयं भविष्यतीति तथेति तस्मिन्नाजिमाजन्त ॥३॥

4.5 स ह बृहस्पतिः सवितारमेव प्रसवायोपससारेमं मे प्रसुवेति त्वत्प्रसूत इममुज्जयानीति तथेति तमस्मै सविता प्रासुवत्त[2] सवितृप्रसूत उदजयत्तेनायजत[3] तेनेष्ट्वैतामेवोर्ध्वां दिशमुच्चक्राम तस्माद्यश्चैतद्वेद यश्च[4] नैषोर्ध्वा[4] दिग्बृहस्पतेरित्येवाहुरेता[5] ह वा ऊर्ध्वां दिशमुत्क्रामति यो वाजपेयेन यजते ॥४॥

6 तेनो ह वै तत इन्द्र ईजे तेनेष्ट्वैतामेवोर्ध्वां दिशमुच्चक्रामैता[6] ह वा ऊर्ध्वां दिशमुत्क्रामति यो वाजपेयेन यजत एव[6] ह स्म य एतेन यज्ञेन यजन्त एता[6] ह स्मैवोर्ध्वां दिशमुत्क्रामन्ति ॥५॥

7-9 तेनो ह वै तत ईज औपाविर्जानश्रुतेयः[1] स ह प्रत्यवरुरोहोर्ध्वा ह स्मैव पुरा यन्ति स सर्वमभवत्सर्वमुदजयत्प्रजापति[2] ह्युदजयत्सर्व[2] हि प्रजापतिः सर्व[2] ह वाव भवति सर्वमुज्जयति प्रजापति[2] ह्युज्जयति सर्व[2] हि प्रजापतिर्यो वाजपेयेन यजते तस्मादाहुर्नैतेन यज्ञेन यजेतेति सर्वं भवति सर्वमुज्जयति तस्य[3] नैवेह किं चन परिशिष्यते पापीयसी प्रजा भवतीति ॥६॥

10 तदु यजेतैव य एतं क्लृप्तं यज्ञं विद्युर्ऋक्तः सामतो यजुष्टो ये ऽनूचानाः प्रजज्ञयः[1] स्युस्ते हैतस्य यज्ञस्यर्त्विजः स्युः सैतस्य यज्ञस्य समृद्धिः स भोग्यो ह्यैवास्मिन्मानुषे लोके भवति श्रेयस्यस्यात्मनः प्रजा भवति य एवं विद्वान्यजते तस्मादु यजेतैव ॥७॥

11 तद्यदेतेन बृहस्पतिरयजत तस्मादेष ब्राह्मणस्य यज्ञो ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणो ऽथ यदेनेनेन्द्रो ऽयजत तस्मादेष क्षत्रियस्य यज्ञः क्षत्रं हीन्द्रः

क्षत्रमु हि क्षत्रियः ॥८॥

तद्ब्राह्म एव राजसूयꣳ राजा हि राजसूयेनेष्ट्वा भवति न ब्राह्मणो राज्यायावरं 12.13
वै राजसूयं परं वाजपेयꣳ राजा वै राजसूयेनेष्ट्वा भवति सम्राड् वाजपेयेनावरं वै राज्यं परꣳ साम्राज्यं कामयेत[1] वै राजा सम्राड् भवितुं परꣳ हि तन्न[2] सम्राड् राजा भवितुं कामयेतावरꣳ[3] हि तत्तस्माद्वरꣳ राजसूयं परं वाजपेयꣳ स यदेतेन यज्ञेनेष्ट्वा सर्वꣳ संवृङ्क्ते[4] तस्मात्सम्राण्नाम[5] ॥९॥

स एताꣳ सावित्रीमाहुतिं जुहोति कर्मणः कर्मणः पुरस्ताद्देव सवितः प्रसुव 14-16
यज्ञं प्रसुवेमं भगाय । दिव्यो गन्धर्वः केतपाः केतं नः पुनातु वाचस्पतिर्नो अद्य वाजꣳ स्वदत्विति स यथैवादो बृहस्पतिः सवितारं प्रसवायोपससारैवमेवैष एतत्सवितारं प्रसवायोपधावति तमस्मै[6] सविता प्रसौति तꣳ[7] सवितृप्रसूत उज्जयति वाचस्पतिर्नो अद्य वाजꣳ स्वदत्विति प्रजापतिर्वै वाचस्पतिरन्नं वाजः प्रजापतिर्न इदमन्नꣳ स्वदयत्वन्नꣳ[8] समर्धयत्वित्येवैतदाहाथाग्नीषोमीयेण पशुना चरित्वैतामाहुतिमुत्सृजत[9] एतद्धवेतं यज्ञमन्वारब्धो भवत्येतत्प्रसन्नः ॥१०॥ प्रथमं ब्राह्मणम् ॥

1 Thus Or only, कस्मै नु all the other MSS. (as III. 2. 7. 1). 2 इति MSS. 3 °त्तेनाय-जत O P. 4 यश्च नैषोर्ध्वा C P, यश्च नैषोर्ध्वा O. 5 दिग्बृहस्पतिरित्यं° O P (orig.). 6 औपाविर्जानं° MSS. 7 °मुदजयत्तत्प्रजा° O P. 8 तस्य MSS. 9 प्रजज्ञय O P, प्रजज्ञिय My. 10 कामयेत B C W. 11 तंन् O P My. 12 काम-येता° B W. 13 संवृङ्क्ते B W, संवृङ्क्ते O P Or. 14 सम्राड् नाम B, सम्राड् नाम O P. 15 Thus also VI. 2. 1. 8. Read तद् instead of तम्. 16 स्वदय-त्यन्नꣳ O P Or. 17 °त्सृजत B.

K. VI. 1. 2 M. V. 1. 2

स वा अꣳशुं गृह्णाति स यदꣳशुं गृह्णाति सर्वत्वायैव कृत्स्नतायै तस्मादꣳ- 1
शुं गृह्णात्यथैतान्प्रज्ञातानाग्निष्टोमिकान्ग्रहान्गृह्णात्याग्रयणात् ॥१॥

2 अथ पृष्ठ्यान्गृह्णाति स यदेव देवाः[1] पृष्ठ्यैरुदजयꣳस्तदेवैतैर्यजमान उज्जयति ॥२॥

3 अथ षोलशिनं गृह्णाति स यदेवेन्द्रः षोलशिनोदजयत्तदेवैतेन यजमान उज्जयति ॥३॥

4 अथैतान्वाजपेयग्रहान्गृह्णाति ध्रुवसदं त्वा नृषदं[2] मनःसदम् ॥ उपयामगृहीतो ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्ययं वै लोको ध्रुवो ध्रुवसदिममेवैतेन लोकमुज्जयति ॥४॥

5 अथाप्सुषदं त्वा घृतसदं व्योमसदम् ॥ उपयामगृहीतो ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्ययं वै लोको व्योमेदमन्तरिक्षमेतमेवैतेन लोकमुज्जयति ॥५॥

6 अथ पृथिविसदं[3] त्वान्तरिक्षसदं दिविसदं[4] देवसदं नाकसदम् ॥ उपयामगृहीतो ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्यसौ वै लोको देवसन्नाकसदसावेव[5] देवलोक एतमेवैतेन लोकमुज्जयति ॥६॥

7 अथापाꣳरसमुद्वयसꣳसूर्ये सन्तꣳसमाहितम् । अपाꣳरसस्य यो रसस्तं वो गृह्णाम्युत्तमम् ॥ उपयामगृहीतो ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्ययं वा अपाꣳरस[6] उद्व्या[7] यो ऽयं पवते स वा एष सूर्ये समाहितः स सूर्यात्पवत एतमेवैतेन रसमुज्जयति ॥७॥

8 अथ ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिम् ॥ तेषां विशिप्रियाणां वो ऽहमिषमूर्जꣳसमग्रभम् ॥ उपयामगृहीतो ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्यूर्ग्वै रस ऊर्जमेवैतेन रसमुज्जयति ॥८॥

9 तान्वा एतान्पञ्च वाजपेयग्रहान्गृह्णाति प्रजापतिं वा एष उज्जयति यो वाजपेयेन यजते पञ्च वा ऋतवः संवत्सरस्य संवत्सरो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥९॥

10 अथ खलु सप्तदश सोमग्रहान्गृह्णाति[8] सप्तदश सुराग्रहानुभे वा एते प्रजापतेरन्धसी यत्सोमश्च सुरा च ततः श्रीः सत्यं ज्योतिः सोमो ऽनृतं[9] पाप्मा तमः सुरा ते एवास्यैतेनोभे अन्धसी उज्जयति ॥१०॥

11.12 स सप्तदश सोमग्रहान्गृह्णाति सप्तदशो वै प्रजापतिः स यावानेव प्रजापति-

र्यावत्यस्य मात्रा तावतैवास्यैतच्छ्रियꣳ सत्यं ज्योतिरुज्जयति सप्तदश सुराग्रहान्त्सप्तदशो वै प्रजापतिः स यावानेव प्रजापतिर्यावत्यस्य मात्रा तावतैवास्यैतदनृतं पाप्मानं तम उज्जयति ॥११॥

त उभये चतुस्त्रिꣳशद्भवन्ति त्रयस्त्रिꣳशद्वै सर्वे देवाः प्रजापतिश्चतुस्त्रिꣳ- 13
शस्तत्सर्वाश्च देवता उज्जयति प्रजापतिं च ॥१२॥

अथ यत्रादः सोमं क्रीणन्ति तदप्येतां परिस्रुतं क्रीणाति केशवात्पुरुषान्न 14
वा एष स्त्री न पुमान्यत्केशवो यदह पुमाꣳस्तेन न स्त्री यद्वस्य केशास्तेन न पुमान् ॥१३॥

सीसेन क्रीणाति न वा एतद्धिरण्यं नायो यत्सीसं तस्मात्सीसेन क्रीणाति ॥१४॥

अथ द्वौ खरौ कुर्वन्ति पश्चादक्षमन्यं नेत्सोमग्रहाꣳश्च सुराग्रहाꣳश्च 15-17
सह सादयामेत्यथ यत्रादः प्रातः पूर्वया द्वारापः[10] प्रपादयन्ति तज्जघनेनाहृत्यापरया द्वारैतां[11] परिस्रुतं प्रपादयति[12] स पुरस्तादासीनो ऽध्वर्युर्गृह्णाति पश्चात्प्राङ् प्रतिप्रस्थाता स सोमग्रहमेवाग्रे गृह्णात्यथ सुराग्रहमेवं व्यत्यासं[13] गृह्णीतः सहोत्तमौ गृह्णीतः स उपर्युपर्यक्षमध्वर्युर्धारयत्यधो ऽधः[14] प्रतिप्रस्थाता[15] स नाहैव प्रत्यङ्ङक्षमध्वर्युरतिहरन्न प्राङ् प्रतिप्रस्थाता ॥१५॥

स जपति संपृच स्थ सं मा भद्रेण पृङ्क्तेति नेत्पापेनेति ब्रवामेत्यथ पुन- 18.19
र्विहरतो विपृच स्थ वि मा पापेन पृङ्क्तेति स यथेषीकां विमुञ्चां[16] कुर्यादेवमेवैतद्यजमानꣳ सर्वस्मात्पाप्मनो विवृहतो ऽथ हिरण्मयेन पात्रेण मधुग्रहं गृह्णात्यथोक्थ्यमथ ध्रुवꣳ स यत्राद उत्तमꣳ सप्तदशꣳ स्तोत्रं तदेतान्त्सोमग्रहान्ऋत्विजां चमसेषु व्यानीय भक्षयन्त्यथ माध्यंदिने सवने मधुग्रहस्य चोच्यते सुराग्रहाणां च ॥१६॥ द्वितीयं ब्राह्मणम् ॥

1 देवाः O (but the accent is pṛ́ṣṭhya, not pṛṣṭhyà, as Weber has it). 2 नृषदं O.
3 पृथिवीषदं O P, पृथिविषदं Or. 4 दिविषदं O P Or.
5 देवसदंन्नाकदसदसावेव O P, देवसन्नाकसदसावेव B.
6 रस उद्वया B Or, रसमुद्वया O P, रसमद्यया My.
7 ˚गृह्णाति O P C. 8 नृतं O P C (sec. m.).

9 पश्चाद° B O P W, 10 द्वारापः MSS. 11 द्वारैतां MSS. 12 °दयन्ति MSS. except O Or, 13 विलासं O P My. 14 धः MSS. 15 °स्थाता B W. 16 विमुंजां B W O P (see also V. 3. 4. 13).

M. V. 1. 3 K. VI. 1. 3

1 स वा आग्नेयमेवाग्निष्टोमायालभते[1] ऽग्निष्टोममेव तेनोज्जयत्यैन्द्राग्नमुक्थेभ्य आलभत ऐन्द्राग्नानि ह्युक्थान्युक्थान्येव[2] तेनोज्जयत्यैन्द्रꣳ षोलशिन आलभत इन्द्रो हि षोलशी षोलशिनमेव तेनोज्जयति ॥१॥

2 अथैतꣳ सारस्वतमेतस्मा उत्तमाय सप्तदशाय स्तोत्रायालभते तदेतदनतिरात्रे सति रात्रे रूपं क्रियते सर्वं वा एष उज्जयति यो वाजपेयेन यजते ऽहोरात्रे उ वै संवत्सरꣳ एते हि परिप्लवमाने संवत्सरं कुरुतः सर्वमु वै संवत्सरस्तत्सर्वमुज्जयति स यदहानतिरात्रो[3] भवति तेनाहरुज्जयति यद्वनतिरात्रे सति रात्रे रूपं क्रियते[4] तेनो रात्रिमुज्जयत्येवमुभे अहोरात्रे उज्जयति ॥२॥

3 अथैतां वशां पृश्निं मरुद्भ्य उज्जेषेभ्य आलभत इयं वै पृश्निर्यदस्यां मूलि चामूलं चोभयं तेनेयं पृश्निरस्यामु वा इदमन्नमस्याꣳ हीदमन्नाद्यमन्नाद्यमेवैतयोज्जयति स यन्मरुद्भ्यो विशो वै मरुतो देवविशमन्नमु वै विशस्तस्मान्मरुद्भ्य उज्जेषेभ्य उज्जितये स यद्यह मरुद्भ्य उज्जेषेभ्यो याज्यानुवाक्ये विन्देत्ते एव स्यातां यदि मरुद्भ्य उज्जेषेभ्यो याज्यानुवाक्ये न विन्देदपि मारुत्यावेव स्यातां दुर्वेदो वै वशा पृश्निर्यदि पृश्निं न विन्देदपि यैव का च वशा स्यात् ॥३॥

4 तस्या आवृद्यत्र होता माहेन्द्रं ग्रहमनुशꣳसति तदस्या वपया प्रचरेयुरेष वा इन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रो ऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यꣳ शस्त्रं क्षत्रमु वा इन्द्रो विशो[5] मरुतो[6] विशा[7] वै क्षत्रियो बलीयान्भवति क्षत्र एवैतद्बलं दधाति ॥४॥

5 अथ द्वेधावदानानि कृत्वा श्रपयति[8] स यदर्धस्यावदानं तस्योपस्तीर्य द्विर्द्विरवदायाभिघार्य प्रत्यनक्त्यवदानान्यथोपभृत्युपस्तीर्य सकृत्सकृदवदाय द्विरभिघारयति[9] स यदर्धानाꣳ सतां द्विरवद्यति तेनैषा कृत्स्ना भवति तेन प्रचरन्ति तेन देवविशमुज्जयत्यथ यदिदमर्धं तन्मानुष्यै विशं[10] उपहरन्ति[11] तेन मनुष्यविशमुज्जयति[12] ॥५॥

तदु तथा न कुर्याद्ध्वलति वै स यो यज्ञपथादेत्येत्यु वा एष यज्ञपथाद्य एवं 6
करोति तस्माद्यत्रैवेतरेषां पशूनां वपाभिः प्रचरेयुस्तदेवास्या वपया प्रचरेयुर्यत्रैवेतरेषां
पशूनाꣳ हविर्भिः प्रचरेयुस्तदेवास्या हविषा प्रचरेयुर्न मानुष्यै विश उपहरेत्[११] ॥६॥

अथैतान्त्सप्तदश प्राजापत्यान्पशूनालभते ते सर्वे तूपरा भवन्ति सर्वे श्यामाः 7
सर्वे मुष्करा एतद्वै प्रत्यक्षं प्रजापतिमुज्जयति यदेतानालभते ऽन्नं वै प्रजापतिर्यदि
वा अन्नं प्रजापतिरेतद्वै प्रत्यक्षमन्नं यत्पशुर्यदि वै सोमः प्रजापतिरेष वै प्रत्यक्षꣳ
सोमो यत्पशुस्तत्प्रत्यक्षं प्रजापतिमुज्जयति ॥७॥

ते वै सप्तदश भवन्ति सप्तदशो[१२] हि प्रजापतिः सर्वे तूपरा भवन्ति पुरुषो 8-10
वा अयं नेदिष्ठं प्रजापतेः सो ऽयं तूपरो ऽविषाणस्तूपरो वा अविषाणः प्रजापतिस्त-
स्मात्सर्वे तूपराः सर्वे श्यामा द्वे वै श्यामस्य रूपे[१३] शुक्लं[१४] चैव कृष्णं च द्वन्द्वमु वै
मिथुनं प्रजननं प्रजाननमु वै प्रजापतिस्तस्मात्सर्वे श्यामाः सर्वे मुष्कराः प्रजननꣳ
हि मुष्करः प्रजननꣳ हि प्रजापतिस्तस्मात्सर्वे मुष्करास्तान्यद्यवꣳसमृद्धानेतान्पशू-
न्विन्देदेत[१५] एव स्युर्यद्येवꣳसमृद्धान्न विन्देदपि य एव के च पशवः स्युः सर्वꣳ हि
प्रजापतिः ॥८॥

अथैतेषामेवोत्तमं वाच आलभते यदि वै प्रजापतेः परमस्ति वागेव तत्तेनो 11
वाचमुज्जयति[१५] तदु तथा न कुर्यात्सर्वे वा इदं प्रजापतिर्यदिमे लोका एषो वा इयं
लोकेषु वाग्वदति[१६] तेनो एव वाचमुज्जयति तस्मात्प्राजापत्या एव स्युः ॥९॥

तेषामावृद्यत्र मैत्रावरुणो वामदेव्यमनुशꣳसति तदेषां वपाभिः प्रचरेयुः 12
प्रजापतिर्वै वामदेव्यं प्राजापत्या उ वा एते तस्मादेषां तत्र वपाभिः प्रचरेयुः ॥१०॥

अथेष्टा अनुयाजाः[१७] स्युरव्यूढे स्रुचावथैषाꣳ हविर्भिः प्रचरेयुरेतद्वै प्रत्यक्षं 13
प्रजापतिमुज्जयति यदेतैः प्रचरन्त्यन्तो[१८] वा एष यज्ञस्यान्तत एवैतत्प्रजापतिमुज्ज-
यत्यथ यद्धातः पुरा प्रचरेयुर्यथा यमध्वानमियात्तं[१९] गत्वा क्व ततः[२०] स्यात्तस्मादेव
प्रचरेयुः ॥११॥

तदु तथा न कुर्याद्ध्वलति वै स यो यज्ञपथादेत्येत्यु वा एष यज्ञपथाद्य एवं 14
करोति तस्माद्यत्रैवेतरेषां पशूनां वपाभिः प्रचरेयुस्तदेवैषां वपाभिः प्रचरेयुर्यत्रैवेतरेषां
पशूनाꣳ हविर्भिः प्रचरेयुस्तदेवैषां हविर्भिः प्रचरेयुरेकानुवाक्यैका[२१] याज्येकदेवत्या
हि प्रजापतय इत्युपाꣳशूक्त्वा छागानाꣳ हविषामनुब्रूहीत्युच्चैः प्रजापतय इत्युपाꣳ-
शूक्त्वा छागानाꣳ हविषां प्रस्थितं प्रेष्येत्युच्चैः ॥१२॥ तृतीयं ब्राह्मणम् ॥

1 आग्नेयमेववावाग्निष्टो° O P. 2 °क्थान्येव B, ह्युक्थ्यान्युक्थ्यान्येव W. 3 यदाहानति° B O P (sec. m.). 4 क्रियते B W C P, क्रिय O. 5 विशो वै मरुतो O, विशा वै मरुतो P. 6 Thus O P Or, विशो B W C (see V. 3. 4. 4). 7 अपयति B. 8 द्विरभिधारयति B. 9 विश उपहरंति MSS. 10 मनुष्य-विश° O P C. 11 उपहरेत् O P C. 12 सप्तदशो O P C (orig.). 13 रूपे शुक्लं B W. 14 मुष्करा° B W; °वꣳसमृद्धानेता° MSS. 15 वाचमु° O P. 16 वाग्वदति MSS. 17 अनुयाजाः B W. 18 प्रच-रत्यंतो O P C My Or. 19 °ध्वानमीयात्तं MSS. except Or. 20 Thus Or, चततः C (sec. m.), चत the other MSS. 21 प्रचरेयुरेकानु° B.

M. V. 1. 4 K. VI. 1. 4

1 तं वै माध्यंदिने सवने ऽभिषिञ्चति माध्यंदिने सवन आर्जि धावन्त्येष वाव प्रजापतिर्यज्ञो य एष तायत एतमेवैतत्प्रजापतिं[1] यज्ञं[2] मध्यत उज्जयति ॥१॥

2 अगृहीते माहेन्द्रे ग्रह एष वा इन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रो ऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यꣳ शस्त्रमिन्दो वै यजमानः स्व एवैनं तदायतन उज्जयति तस्मादगृहीते माहेन्द्रे ग्रहे[3] ॥२॥

3 अथास्मै रथमुपावहरन्तीन्द्रस्य वज्रो ऽसीति वज्रो वा एष यद्रथ इन्द्रो वै यजमानो यजमानस्यासीत्येवैतदाह यदाहेन्द्रस्य वज्रो ऽसीति वाजसा इत्यन्नं वै वाजो[1] ऽन्नसा[2] इत्येवैतदाह त्वयायं वाजꣳ सेदिति त्वयायमन्नमुज्जयत्वित्येवैतदाह यदाह त्वयायं वाजꣳ सेदिति[3] ॥३॥

4 अथैनं धूर्गृहीतमन्तर्वेद्यभ्यवर्तयति[1] वाजस्य नु प्रसवे मातरं महीमिति अन्नं वै वाजो ऽन्नस्य नु प्रसवे मातरं महीमित्येवैतदाहादितिं नाम वचसा करामह इतीयं वा अदितिस्तस्मादाहादितिं नाम वचसा करामह इति यस्यामिदं विश्वं भुवनमाविवेशेत्यस्याꣳ हीदꣳ सर्वं भुवनमाविष्टं तस्यां नो देवः सविता धर्म साविषगिति तस्यां देवः सविता यजमानꣳ साम्राज्याय सुवतामित्येवैतदाह यजमानो हि धर्मो यदाह तस्यां नो देवः सविता धर्म साविषगिति[2] ॥४॥

अथैतान्श्वान्त्स्रपयन्ति स यत्र वैवैनानेतत्स्रपयन्ति[6] तद्वैनानेतेन यजुषाभ्युक्षति स्रपितान्वोदानीतान्त्स[7] यदेनानद्भिरभ्युक्षत्यद्भ्यो[8] ह वा अग्रे ऽश्वः संबभूव सो ऽद्भ्यः[9] संभवन्नकृत्स्नः[10] संबभूवाकृत्स्नो हि वै संबभूव तस्मान्नैव कदा चन सर्वैः पद्भिः प्रतितिष्ठति स यदेवास्य तत्राप्स्वहीयत तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादद्भिरभ्युक्षति[11] ॥५॥ 5

सो ऽभ्युक्षति देवीरापो अपां नपाद्यो व ऊर्मिः प्रतूर्तिः ककुन्मान्वाजसास्तेनायं वाज[12] सेदिति वाप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिभिः । अश्वा भवत वाजिन इति वा ॥६॥ 6

अथ प्रतिहृत्य युनक्ति स दक्षिणायुग्यमेवाग्रे युनक्त्यथ सव्यायुग्य[13] सव्यायुग्यं वा अग्रे मानुषे युनक्त्यथैवं देवत्रा ॥७॥ 7

स युनक्ति वातो वा वो मनो वेति वाताद्वै नाशीयो ऽस्ति मनसो नाशीयो ऽस्ति तस्मादाह वातो वा वो मनो वेति गन्धर्वाः सप्तविंशतिः । ते[14] अग्रे[15] ऽश्वमयुञ्जन्नित्येते[13] वा[16] अग्रे[17] ऽश्वमयुञ्जन्यद्गन्धर्वाः सप्तविंशतिस्तद्ये ऽग्रे ऽश्वमयुञ्जंस्ते त्वा युञ्जन्त्वित्येवैतदाह ते अस्मिन्जवमादधुरित्येते वा[18] अग्रे[19] ऽश्वे जवमादधुर्यद्गन्धर्वाः सप्तविंशतिस्तद्ये ऽग्रे ऽश्वे जवमादधुस्ते[15] त्वयि जवमादधत्वित्येवैतदाह ॥८॥ 8

अथ सव्यायुग्यं युनक्ति वातरंहा भव वाजिन्युज्यमान इति वातजवसमेवैनमेतन्मनोजवसं[16] करोतीन्द्रस्येव दक्षिणः श्रियैधीति यथायमिन्द्रस्य दक्षिणः श्रियैवं त्वं यजमानस्य श्रियैधीत्येवैतदाह युञ्जन्तु त्वा मरुतो विश्ववेदस इति युञ्जन्तु त्वा देवा इत्येवैतदाह यदाह युञ्जन्तु त्वा मरुतो विश्ववेदस इत्या ते त्वष्टा पत्सु जवं दधात्विति त्वाष्ट्रा हि पशवः स यस्यैव पशवो यः पशूनामीष्टे स ते त्वष्टा पत्सु जवमादधात्वित्येवैतदाहाथ दक्षिणाप्रार्ष्टिं युनक्ति सव्याप्रार्ष्टिं[20] वा अग्रे मानुषे[20] युनक्त्यथैवं देवत्रा ॥९॥ 9

स युनक्ति जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तो[21] अचरच्च वात इति यस्ते जवो ऽप्यपनिहितो[15] यः श्येने परीत्तो[21] यो वात इत्येवैतदाह तेन नो वाजिन्बलवान्बलेनेति तेन नो वीर्येणेत्येवैतदाह यदाह तेन नो वाजिन्बलवान्बलेनेति वाजजिच्चैधि समने च पारयिष्णुरित्यन्नं वै वाजो ऽन्नजिच्च न एध्यस्मि[22]श्च नः[23] समने 10

देवसमन[24] इमं यज्ञं प्रजापतिमुज्जयेत्येवैतदाह यदाह वाजजिद्धेधि समने च पारयिष्णुरिति ॥१०॥

11 त एत एव त्रयो युक्ताः स्युर्मानुषꣳ ह कुर्याद्यद्यतुर्थमुपयुञ्ज्याद्व्यृद्धं[23] वै तद्यज्ञस्य यन्मानुषं त्रिर्वै देवत्रा त्रिर्वृद्धयज्ञस्त्रय इमे लोकास्तस्मादेत एव त्रयो युक्ताः स्युः प्रतिहृताधान[25] एवाभिप्रष्ठियुगश्चतुर्थ[26] उपतिष्ठेत स यत्र दद्यात्तत्तं चतुर्थमुपयुज्य दद्यात् ॥११॥

12-14 अथैतꣳ सप्तदशशरावं[27] नैवारं चरुमाहरन्ति बार्हस्पत्यमन्नं वा एष उज्जयति यो वाजपेयेन यजत एतद्वै प्रत्यक्षमन्नं यच्चरुरोदनो ह्येष ओदनो हि प्रत्यक्षमन्नं तस्माच्चरुर्भवति सप्तदशशरावो[28] भवति[29] सप्तदशो हि प्रजापतिर्नैवारो भवत्येते वै ब्रह्मणा पच्यन्ते[30] यन्नीवारास्तस्मान्नैवारो भवति बार्हस्पत्यो भवति बृहस्पतिर्ह्येतमग्रे यज्ञमुदजयत्तस्माद्बार्हस्पत्यो भवति ॥१२॥

15 तमश्वानवघ्रापयति वाजिनो वाजजित[31] इति वाजिनो ह्येते वाजजित[32] इत्यन्नं वै वाजोऽन्नजित इत्येवैतदाह वाजꣳ सरिष्यन्त इति सरिष्यन्तो हि भवन्ति बृहस्पतेर्भागमवजिघ्रतेति बार्हस्पत्यो ह्येष चरुर्भवति स यदश्वानवघ्रापयति वीर्यमेवैष्वेतद्दधात्यथो इदमन्नमिमं यज्ञं प्रजापतिमुज्जयानीति तथा हैतदन्नमेतं यज्ञ प्रजापतिमुज्जयति ॥१३॥ चतुर्थं ब्राह्मणम् ॥ प्रथमोऽध्यायः ॥

1 °प्रजापतिर्यज्ञं MSS. except Or. 2 ग्रहे MSS. 3 Thus C (वाजोंनसा) and Or (वाजोन्नसा) only, वाजोंजसा B W O P, वाजोज्ञसा My, वाजोजसा T. 4 सेदिति MSS. 5 °भ्यवर्तयति O P. 6 °गिति W B O P C (orig.). 7 Thus Or (without accent); वेवैनानेत° B C W, वैनानेत° O P My, वैनामेत° T. 8 स्रपितान्वो° MSS. 9 °रभ्युक्षत्य° O P C. 10 ऋः संभवक्रु° P (orig.), ऋः संभवत्यक्रु° P (sec. m.), ऋः संभवत्यक्रु° O T My, ऋः संभवन्नक्रु° C, ऋः संबभूवंनक्रु° Or. 11 °द्भिरभ्युक्षति B W C O P. 12 तेग्रे O P. 13 श्वमयु° O P. 14 वाग्रे MSS. except Or. 15 जवमादधु° MSS. 16 °मनोजवसं

O P C. 17 Emended (see VII. 3. 3. 6), °प्रष्टिं वै मामानुषे B, °प्रष्टिं वै मानुषे the other MSS. (Or युनक्ति न सव्याप्रष्टिꣳ सव्याप्रष्टि वै मानुषे). 18 परीतो B C P My W Or. 19 Emended; प्युपनिं MSS. 20 परीतो B W C T Or My, परित्तो O, परितो P. 21 न B W C T My Or, न । O P. 22 Thus accented MSS. 23 °सुपयुज्या° MSS. except Or. 24 ? Thus MSS. (प्रतिहधान My) except Or, which has प्रतिहिताधाना. 25 एवाभिः-प्रष्टियुगश्चतु° O P, एवाभिः प्रष्टियुगश्चतु° B W, एवाभिः प्रष्टि-युगश्चतु° C My, एवाध्वप्रष्टियुगश्च° Or. Read एवाधिप्रष्टि° ? 26 सप्तदशशरावं O P C. 27 °शरावो वै भवति B. 28 पच्यंते B W. 29 वाजजित O P, वाजजित B (first time).

K. VI. 2. 1 M. V. 1. 5

यदार्जिं[1] धावन्तीममेव तेन लोकमुज्जयत्यथ यदन्तरिक्षे रथचक्रमुद्धितं 1
नाभिदघ्ने[2] तद्ब्रह्मारोहति[3] तत्सामाभिगायत्यन्तरिक्षलोकमेव तेनोज्जयत्यथ यद्यूपꣳ
रोहति दिवमेव तेनोज्जयति देवलोकमेव तस्माद्वा एतानि क्रियन्ते ॥१॥

स ब्रह्मारोहति रथचक्रं देवस्य वयꣳ सवितुः सवे सत्यसवसः । बृहस्प- 2.3
तेरुत्तमं नाकꣳ रुहेमेति यदि ब्राह्मणो यजेत ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणो
यद्यु क्षत्रियो यजेत देवस्य वयꣳ सवितुः सवे सत्यसवसः । इन्द्रस्योत्तमं नाकꣳ
रुहेमेति क्षत्रꣳ ह्येन्द्रः क्षत्रमु हि क्षत्रियः[3] ॥२॥

अथ त्रिरभिगायति साम त्रिरभिगीय[4] साम प्रत्यवरोहति देवस्य वयꣳ 4.5
सवितुः सवे सत्यसवसः । बृहस्पतेरुत्तमं नाकमरुहामेति वेन्द्रस्योत्तमं नाकमरु-
हामेति वा ॥३॥

अथैतान्त्सप्तदश दुन्दुभीनुद्धघ्नन्ति[5] प्रतीच आग्नीध्रादनूचो[6] वेद्यन्तं 6
प्रजापतिं वा एष उज्जयति यो वाजपेयेन यजते वागु वै प्रजापतिरेषा वै परमा
वाग्या सप्तदशानां दुन्दुभीनां परमामेवैतद्वाचं परमं प्रजापतिमुज्जयति ते वै सप्तदश
भवन्ति सप्तदशो हि प्रजापतिः ॥४॥

7-9 स यत्राद आर्जि धावन्ति तदेषामेकमाहन्ति बृहस्पते[7] वाजं जय बृहस्पतये वाचं वदत। बृहस्पतिं वाजं जापयतेति यदि ब्राह्मणो यजेत ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणो यदु क्षत्रियो यजेतेन्द्र वाजं जयेन्द्राय वाचं वदत। इन्द्रं वाजं जापयतेति क्षत्रꣳ हीन्द्रः क्षत्रमु हि क्षत्रियः ॥५॥

10-12 स यत्राद आजिसृतो[8] रथा विमुच्यन्ते तदेषामेकमवमुञ्चत्येषा[9] वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपत। अजीजपत बृहस्पतिं वाचं वनस्पतयो विमुच्यध्वमिति तदेकमवमुञ्चन्त्सर्वान्विमुञ्चति[10] ॥६॥

13.14 अथ यत्राद आजिमवख्याप्य[11] रथाः पुनरायन्ति तद्राजन्यः प्रविध्यति सप्तदश प्रव्याधान्प्रजापतिं वा एष उज्जयति यो वाजपेयेन यजते यावान्वा एकः प्रव्याधस्तावाꣳस्तिर्यङ् पुरुषो ऽथ यावन्तः सप्तदश प्रव्याधास्तावाꣳस्तिर्यङ् प्रजापतिस्तस्मात्सप्तदश प्रविध्यति सप्तदशो हि प्रजापती राजन्यः प्रविध्यत्येष वै प्रजापतेर्नेदिष्ठो यद्राजन्य एष ह वा अस्य नेदिष्ठस्तस्मादेको बहूनामीष्टे तस्माद्राजन्यः प्रविध्यति तत्सप्तदशे प्रव्याधे काष्ठां निमिन्वन्ति सो ऽवगमो भवति ॥७॥

15.16 अथ यजमान आतिष्ठति रथं देवस्य वयꣳ सवितुः सवे सत्यसवसः। बृहस्पतेर्वाजजितो वाजं जेष्मेति स यथैवादो बृहस्पतिः सवितारं प्रसवायोपससारैवमेवैष एतत्सवितारं प्रसवायोपधावति तमस्मै[12] सविता प्रसौति तꣳ[13] सवितृप्रसूत उज्जयत्यथ य एतद्यजुर्वेद[14] सो ऽन्वातिष्ठति यदि वात्मना यजमानः ॥८॥

17 स दक्षिणायुग्यमुपस्पृशति वाजिनो वाजं जयतेति वाजिनो ह्येते वाजं जयतेत्यन्नं वै वाजो ऽन्नं जयतेत्येवैतदाहाध्वन स्कभ्नन्त इत्यध्वनो ह्येते स्कभ्नन्तो धावन्ति योजना मिमाना इति योजनशो[15] ह्यध्वानं मिमते काष्ठां गच्छतेत्यवगमं गच्छतेत्येवैतदाह यदाह काष्ठां गच्छतेति[16] ॥९॥

18-20 अथ खलु धावन्त्याजिमाप्नन्ति[17] दुन्दुभीनभिगायति ब्रह्मा साम महान्घोषो भवत्यथैताभ्यां जगतीभ्यामध्वर्युरनु[18] वा मन्त्रयते जुहोति वा समान एव बन्धुर्यदि चानुमन्त्रयते यदि च जुहोत्येतानेवैतद्भावत[19] उपवाजयत्येतेषु वीर्यं दधाति यथो चैनानन्तरा नाष्ट्रा रक्षाꣳसि न विन्देयुरेवमु चैवैषो ऽनु वा मन्त्रयते जुहोति वैष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि। क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्काꣳस्यन्वापनीफणत् ॥ उत स्मास्य द्रवतस्तुरण्यतः

पर्ण न वेरनुवाति प्रगर्धिनः । इयेनस्येव भ्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रत इति[15] ॥१०॥

अथैतेन तृचेनान्वेव मन्त्रयते न जुहोत्येतानेवैतद्धावत[16] उपवाजयत्येतेषु 21-24
वीर्यं दधाति तिस्र उ वा इमाः पृथिव्य इयमेका परे द्वे ता उ चैवैतदुज्जयति[17] शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः । जम्भयन्तो ऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥ ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः । सहस्रसा मेधसाता इव त्मना महो ये धनꣳ समिथेषु जभ्रिरे ॥ वाजे वाजे ऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैरित्यवगमं[18] प्राप्य दक्षिणानन्वायामयति[19] ॥११॥

अथैतेन बार्हस्पत्येन चरुणा चात्वाले प्रत्युपतिष्ठन्ते ऽन्नं वा एष उज्जयति 25
यो वाजपेयेन यजत एतद्वै प्रत्यक्षमन्नं यच्चरुरोदनो ह्येष ओदनो हि प्रत्यक्षमन्नं तस्माच्चरुर्भवति ॥१२॥

तमागत्याभिमृशति स यदेवैतदन्नमुज्जयति तेनैवैतत्सꣳस्पृशते तदात्मनि कुरुते तदात्मनि धत्ते[13] ॥१३॥

सो ऽभिमृशत्या मा वाजस्य प्रसवो जगम्यादित्यन्नं वै वाज आ मान्नस्य 26
प्रसवो जगम्यादित्येवैतदाहेमे द्यावापृथिवी विश्वरूपे इतीमे हि द्यावापृथिव्यौ[20] प्रजापतिरा मा गन्तं पितरा मातरा युवमिति पिता च हि माता च प्रजापतिरा मा सोमो अमृतत्वाय गम्यादिति सोमो हि प्रजापतिस्तेनोदरमुपस्पृशत्यत्र ह्यन्नं प्रतितिष्ठति ॥१४॥

अथाश्वानवघ्रापयति वाजिनो वाजजित[15] इति वाजिनो ह्येते वाजजित 27
इत्यन्नं वै वाजो ऽन्नजित इत्येवैतदाह वाजꣳ ससृवाꣳस इति सरिष्यन्त इति वा अग्र आह सरिष्यन्तो हि तद्वन्त्यथात्राह ससृवाꣳस इति ससृवाꣳसो ह्यत्र भवन्ति बृहस्पतेर्भागमवजिघ्रतेति बार्हस्पत्यो ह्येष चरुर्भवति निमृजाना इति स यदग्रे ऽश्वानवघ्रापयतीदमन्नमिमं यज्ञं प्रजापतिमुज्जयानीत्यथ यदत्रावघ्रापयतीदमन्नमिमं यज्ञं प्रजापतिमुदजैषमित्यथ यदाह निमृजाना इति यजमान एवैतदन्नाद्यमिन्द्रियं वीर्यं दधाति ॥१५॥

अथ पूर्वया द्वारा मधुग्रहं निष्क्रमयन्ति प्रतीच्या सुराग्रहानथैषामाजि- 28

सूताꣳ[15] रथानामेकमन्वास्थितो भवति[26] राजन्यो वा[27] वैश्यो वा तस्मा इमं मधुग्रहं प्रयच्छति[28] हन्त ते ऽयमित्यथैषाꣳ सुराग्रहाणामेकमन्वारभ्याहैभिस्ते[29] ऽयमेतं[30] निष्क्रीणामीति[31] तद्यजमान एवैतच्छूयꣳ सत्यं ज्योतिर्दधात्यथैतस्मिन्राजन्ये वा वैश्ये वानृतं पाप्मानं तमो दधाति तैः स भुङ्क्ते यथा स्वैः सद्भिरेवं यदि कामयते पिबति यदि कामयते परासिञ्चति यथा स्वान्त्सत एवमुपचरत्यथायं[32] यजमान इमं मधुग्रहं ब्रह्मणे ददाति ब्रह्मणे ददात्यायुरेवामृतमात्मनि धत्ते ॥१६॥ प्रथमं ब्राह्मणम् ॥

1 यदार्जि B P, यदार्जि W C (pr. m.), यदार्जि (sec. m.) यदार्जि or यदार्जि O. 2 नाभिदग्ने तद्ब्रह्मा° C (sec. m.), and Or, °दग्ने ब्रह्मा° O, °दग्ने (then follows one akṣara which is blotted out and replaced on the margin by स) ब्रह्मा° P. 3 क्षत्रियः B W O P C (orig.). 4 त्रिरभिगीय MSS. 5 °नुद्विघ्नंति O P, °नुद्विघ्नन्ति My. 6 °दनूचो B W C, °दनूचो O P. 7 बृहस्पते MSS. 8 आजिश्रितो O P C My, आजिश्रतो Or. 9 °मवमुंचंत्यै° O P. 10 तदेकमव-मुंचंत्सर्वा° P C (sec. m.), तदेकमवमुंचत्सर्वा° B, तदेक-मवमुंचत्स° W, तदेकत्मबमुंचंत्सर्वा° O, °मुञ्चत्सर्वा° T My. 11 °ख्याद्य B. 12 See on VI. 1. 1. 10. 13 °जुर्वेद MSS. 14 योजनशो C P. 15 °तेति B W O P C (orig.). 16 धावंत्या° B W C (sec. m.). 17 °ध्वर्युरनु MSS. 18 °तद्धावत MSS. 19 इति B W O P C (orig.). 20 वैवैत° O P, चैवैत° C (orig.) Or. 21 Thus the accent in C (sec. m.),° रित्यवगमं the other MSS. 22 °यामयति T, °यामयंति the other MSS. 23 धत्ते B W O P C (orig.). 24 °पृथिव्यौ MSS. 25 वाजजित O P. 26 °जिश्रताꣳ O P C Or. 27 भवति C (sec. m.). 28 Omitted in B W. 29 प्रयछति O P,

प्रयछंति B W C My Or. 30 °हैभिस्ते यमेतं नि° O P C, °हैभिस्त यमेत नि° B W. Read °हैभिस्ते ?
31 एवमुपचरत्य° B W C, एवमुपवरत्य° O P.

K. VI. 2. 2 M. V. 2. 1

स वा आहवनीयमित्वा स्रुवेणैवाज्यस्थाल्या एता आहुतीर्जुहोत्यापये 1.2
स्वाहा स्वापये स्वाहापिजाय[1] स्वाहा क्रतवे स्वाहा। वसवे स्वाहाहर्पतये स्वाहा। अह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन आन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहेत्येता द्वादशाहुतीर्जुहोति प्रजापतिं वा एष उज्जयति यो वाजपेयेन यजते द्वादश वै मासाः संवत्सरस्य संवत्सरो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥१॥

अथैनमेताः षट् क्लृप्तीर्वाचयति वा जुहोति वा समान एव बन्धुर्यदि 3.4
च वाचयति यदि च जुहोत्यायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतामिति प्रजापतिं वा एष उज्जयति यो वाजपेयेन यजते षड्वा ऋतवः संवत्सरस्य संवत्सरो वै प्रजापतिस्तत्प्रजापतिमुज्जयत्यथ यदेनं क्लृप्तीर्वाचयति कल्पयित्वैवैनं[2] तदुज्जयति ॥२॥

स वा एषोऽष्टाश्रिर्यूपो भवत्यष्टाक्षरा वै गायत्र्यग्निरु वै गायत्री गायत्र- 5-7
च्छन्दा[3] ह्यग्निरग्निरु वै सर्वा देवतास्तेन देवलोकमुज्जयति ॥३॥

अथातीक्ष्णाग्रो यूपो भवति गर्तस्य रूपं पितृदेवत्यो वै गर्तस्तेन पितृलोकमुज्जयति ॥४॥

अथ गोधूमाश्चषालभाजनं[4] भवति पुरुषो वा अयं नेदिष्ठं प्रजापतेः सोऽयमत्वक् पुरुष एत[5] उ वा ओषधीनां नेदिष्ठाः पुरुषस्य यद्गोधूमा न ह्येतेषां त्वगस्ति न पुरुषस्य तेन मनुष्यलोकमुज्जयति ॥५॥

स सप्तदशभिर्वासोभिर्वेष्टितो[6] वा विनद्धो[7] वा भवति सप्तदशो वै प्रजापतिस्तस्मात्सप्तदशभिर्वासोभिर्वेष्टितो[6] वा विनद्धो[7] वा भवति सप्तदशारत्निर्वाव भवति सप्तदशो हि प्रजापतिस्तत्प्रजापतिमुज्जयति ॥६॥

अथ यत्र यूप[8] रोक्ष्यन्भवति तत्पत्नीमुदानयन्ति[9] तामुदानेष्यन्तः कौशं 8
वा चण्डातकमभिपरिधापयन्ति[10] कौशं वा वासोऽस्ति वा अमेध्यं पत्न्या यद्वाड्

नाभेः[10] सेदं प्राची यज्ञं प्रसत्स्यन्ती[11] भवति पवित्रमु वै मेधः कुशास्तथो पवित्र-पूतैतन्मेध्या प्राची यज्ञं प्रसजति[12] ॥७॥

9 अथ निश्रयणी[13] कृता भवति तया यूपꣳ रोहति स इत्युदङ् रोहेत्तद्वैक इति दक्षिणा रोहयन्ति[14] तदु तथा न कुर्यादुदगेव रोहयेदुदीची वै मनुष्याणां दिक् सा यजमानस्य तस्मादुदगेव रोहयेत् ॥८॥

10 स यूपꣳ रोक्ष्यन्जायामामन्त्रयते जाय एहि[15] स्वो[16] रोहावेति[17] रोहावेति जाया प्रत्याह स यदेवं जायामामन्त्रयते ऽर्धो वा अस्यैष आत्मनो यज्जायार्धो हि वा अस्यैष आत्मनस्तस्माद्यावदेकाकी भवति[18] नैव तावद्बहुर्भवति न प्रजायते ऽकृत्स्नो हि भवत्यसर्वो ऽथ यदैव जायां विन्दते ऽथैव बहुर्भवत्यथ प्रजायते[19] कृत्स्नो हि भवति सर्वः स्वर्गमु वा इदं लोकꣳ रोक्ष्यन्भवति यो ऽस्यैष जितः स्वर्गो लोकस्तद्य-दिदमस्यार्धमात्मनस्तेन संपद्यते तेन संपद्यतां जितिमभ्युत्क्रामति[20] यो[21] ऽस्यैष[22] जितः स्वर्गो लोकस्तथास्येह नात्मनः किं चन हीयते ॥९॥

11-13 स रोहति प्रजापतेः प्रजा अभूमेति प्रजापतेर्ह्येष प्रजा भवति यो वाजपेयेन यजते तस्मादाह प्रजापतेः प्रजा अभूमेति स्वर्देवा अगन्मेति गोधूमानभिमृशति[23] स्वर्ह्येष देवानेति[24] यो वाजपेयेन यजते स यद्गोधूमानभिमृशत्यन्नं[25] वा एष उज्जयति यो वाजपेयेन यजत एतद्वै प्रत्यक्षमन्नं यद्गोधूमास्तदेतां गतिं गत्वा यो ऽस्यैष जितः स्वर्गो लोको यदेतदन्नमुज्जयति तेन सꣳस्पृशते तदात्मनि कुरुते तदात्मनि धत्ते तेनोदरमुपस्पृशत्यत्र ह्यन्नं प्रतितिष्ठति ॥१०॥

14.15 अथ यूपाग्रꣳ शिरो ऽतिहरति[26] तेन देवलोकमुज्जयति तथास्याः[27] प्रत्यवरूढं भवति यूपाग्रꣳ शिरो ऽतिहृत्य जपत्यस्मे वो अस्त्विन्द्रियमस्मे नृम्णमुत क्रतुः। अस्मे वर्चाꣳसि सन्तु व इति प्रजापतिं वा एष उज्जयति यो वाजपेयेन यजते सर्वं वा इदं प्रजापतिर्यदिमे लोका यदिमा दिशस्तत्प्रजापतिमुज्जित्यास्य[28] सर्वस्येन्द्रियं वीर्यꣳ संवृङ्क्ते स यः संवृङ्क्ते तस्मात्सम्राणाम[29] ॥११॥

16 अथैनमूषपुटैरनूदस्यन्त्यन्नं वा एष उज्जयति यो वाजपेयेन यजते ऽस्यामु वा इदमन्नमस्याꣳ हीदमन्नाद्यं पशवो वा ऊषा एतद्वै प्रत्यक्षमन्नं यत्पशवस्तस्मादू-षपुटा भवन्ति ॥१२॥

17 अश्वत्थपलाशैरुपनद्धा[30] भवन्ति मारुतो वा अश्वत्थो यदश्वत्थे तिष्ठत इन्द्रो

मरुत उपामन्त्रयत तेन मारुतो ऽश्वत्थो विशो वै मरुतो[१९] ऽन्नमु वै विशस्तस्मादश्वत्थपलाशैरुपनद्धा[२०] भवन्ति ॥१३॥

विश्या अनूदस्यन्त्यन्नꣳ हि विशः सप्तदश भवन्ति सप्तदशो हि प्रजापतिः स यदेवैतदन्नमुज्जयति तेनैवैनमेतत्सꣳस्पर्शयति तेन समर्धयति तदस्मिन्दधाति ॥१४॥

अथ पृथिवीं प्रत्यवेक्षमाणो जपति नमो मात्रे पृथिव्या इति यत्र ह वा अग्रे 18
बृहस्पतिरेतं यज्ञं प्रजापतिमुद्जयत्तद्धास्याः पृथिव्या बिभयां चकार[२१] प्रेव वा अहमस्या[२२] अच्योषीति[२३] य इमं यज्ञं प्रजापतिमुदजैषं यद्वै मेयं नावधून्वीतेतीयमु ह वै पृथिव्येतस्माद्बिभयां[२३] चकार महद्वा अयं प्रापदिति य इमं यज्ञं प्रजापतिमुदजैषीद्यद्वै मायं नावदणीयादिति तयैवैतत्संज्ञामकुरुत न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥१५॥

तथो वा एष एतदस्याः पृथिव्या बिभेति प्रेव वा अहमस्या[२४] अच्योषीति[२५] 19
य इमं यज्ञं प्रजापतिमुदजैषं यद्वै मेयं नावधून्वीतेतीयमु ह वै पृथिव्येतस्माद्बिभेति[२३] महद्वा अयं प्रापदिति य इमं यज्ञं प्रजापतिमुदजैषीद्यद्वै मायं नावदणीयादिति तयैवैतत्संज्ञां कुरुते न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥१६॥

अथ हिरण्यमभ्यवरोहत्यायुर्वा अमृतꣳ हिरण्यमायुष्येवैनमेतदमृते ऽन्ततः 20-23
प्रतितिष्ठति ॥१७॥

अथास्या एतामौदुम्बरीमासन्दीं निदधत्यग्रेण हविर्धानं जघनेनाहवनीयमुपरिषद्यं वा एष जयत्यन्तरिक्षसद्यं यो वाजपेयेन यजते स यदेव जयत्युपरिषद्यमन्तरिक्षसद्यं तदेवैनमेतत्प्रापयति तदेनमुपर्यासीनमधस्ताद्विश इमाः प्रजा उपासत औदुम्बरी भवत्यन्नं वा ऊर्गुदुम्बरस्तस्मादौदुम्बरी भवति ॥१८॥

तां बस्ताजिनेनास्तृणाति प्रजापतिं वा एष उज्जयति यो वाजपेयेन 24
यजत ऋषभो वै पशूनां प्रजापतिरत्र[२५] वै प्रजापतिर्नेदिष्ठो यदजासु[२६] यदजर्षभे[२६] स यमेवैतत्प्रजापतिमुज्जयति[२७] तेनैवैनमेतत्सꣳस्पर्शयति तेन समर्धयति तस्माद्बस्ताजिनेनास्तृणाति ॥१९॥

स आस्तृणातीयं ते राळिति राज्यमेवास्मा एतत्करोति राज्यमेनं प्रापय- 25
त्यथैनं बाहुगृहीतमधिनयति यन्तासि यमन इति यन्तारमेवैनं यमनमासां प्रजानां करोत्यथोपवेशयति ध्रुवो ऽसि धरुण इति ध्रुवमेवैनं धरुणमेषु लोकेषु करोति

कृष्यै क्षेमाय रय्यै पोषायेति साधव इत्येवैतदाह ॥२०॥ द्वितीयं ब्राह्मणम् ॥

1 प्रजायै (instead of °विजाय) My. 2 कल्पयित्वै-वैनं B W C (orig.), कल्पयत्वेवैनं C (sec. m.), कल्पयत्वेवैनं O P. 3 गायत्रीछन्दो T, गायत्रछंदो the other MSS. 4 °चषाल° B W My, °चषाळ° O P Or, O has also the sign answering to ळ. 5 एता B W C T. 6 °र्वासोभिर्वेष्टितो MSS. 7 विनद्धो MSS. 8 Emended; °नयति MSS, 9 °चंडातकम° MSS. 10 नाभे O P. 11 Thus Or only (cp. IV. 8. 2. 1), प्रसस्यंती B W C, प्रसस्यंती O P My. 12 ? प्रसजति B W O P C, प्रसजति T My; for प्रसजति cp. VII. 2. 1. 1. 13 निःश्रय° B W C (sec. m.) Or. 14 रोहयति O, रोहंति B Or 15 एहि स्वो O, एहि स्वो P. 16 रोहा-वेति B W. 17 भवति B O P W. 18 प्रजापते O P C. 19 जितिमभ्युत्क्रामति B C My Or, जिति-मप्युत्क्रामति O P. 20 यास्यैष O P. 21 °मृशति O. 22 Thus Or only, देवानिति the other MSS.; this points to a Saṃhitā reading (as the Taitt.): स्वर्देवाꣳ अगन्म. 23 °भिमृशत्य° B W O P C. 24 तिहरति O. 25 तथास्योः O. Read तथास्य or तथास्या-? 26 °मुज्जित्यास्य O P C (orig.). 27 °त्सम्राण्नाम B W C My Or, °त्सम्राट् नाम O P. 28 अश्वत्थ° B W O P. 29 मरुतो O P C (orig.). 30 °स्तस्मादश्वत्थ° B W. 31 चकार B W. 32 Thus C (sec. m.) and Or only; cp. also VII. 3. 3. 18; अहमस्याच्योषीति the other MSS. 33 पृथिव्येत° MSS. 34 Thus

C (sec. m.) and without accent T and Or; अहमस्याच्योषीति the other MSS. 35 °पतिरन्न O, °पतिरन्नं P. 36 Thus C My, यदजासु यदबभे O, यदजासुर्यदषभे P, यदजासु यदज ऋषभे B W Or. 37 °मुज्जयति B W O P C (orig.).

K. VI. 2. 3 M. V. 2. 2

स वै यदैतेन[1] बार्हस्पत्येन चरुणा प्रचरति तदिष्ट्वा देवता भवत्यनिष्ट्वः[2] 1
स्विष्टकृदथास्मा एतदन्नꣳ संभरत्येतत्सर्वौषधꣳ[3] स यदस्मा एतदन्नꣳ संभरत्यन्नं वा एष उज्जयति यो वाजपेयेन यजते[4] ऽन्नपेयꣳ[5] ह वै नामैतद्यद्वाजपेयमित्याहुः स यदेवैतदन्नमुज्जयति तदेवास्मा एतत्संभरति तेनैनमभिषिञ्चति तेन समर्धयति तदस्मिन्दधाति तस्मादस्मा एतदन्नꣳ संभरति ॥१॥

औदुम्बरे चमसे ऽन्नं वा ऊर्गुदुम्बरो ऽन्नमु वा एतत्संभरति तस्मादौ- 2
दुम्बरे चमसे[6] ॥२॥

सो ऽप एवाग्रे संभरत्यथ पयो ऽथ यथोपस्मारमन्नान्यन्नानि[7] तानि 3.4
सप्तदश संभरेदित्याहुः सप्तदशो हि प्रजापतिरिति तदु यावन्त्येवोपस्मरेद्यावन्ति वा विन्देत्तावन्ति संभरेत् ॥३॥

तस्यास्यान्नस्य संभृतस्यैकमन्नमुद्धरेत्तदुदब्रवीत[8] तन्नाश्नीयाद्यावज्जीवे- 4
त्तावदपि वै प्रजापतेः सर्वमन्नमनवरुद्धमर्थं कस्तस्मै मनुष्यो यत्सर्वमन्नमवरु- न्धीत[9] तथा ह नान्तं गच्छति तथा ज्योग्जीवति तदिह प्रजायै परिशिनष्टि ॥४॥

तस्यास्यान्नस्य संभृतस्यैता आहुतीर्जुहोति वाजप्रसव्या[10] अन्नं वा एष 5
उज्जयति यो वाजपेयेन यजते स याभ्यो देवताभ्य एता आहुतीर्जुहोति ता अस्मै देवताः प्रीता एतदन्नं प्रसुवन्ति ताभिः प्रसूत उज्जयति तस्माद्वा एता आहुतीर्जुहोति ॥५॥

स जुहोति वाजस्येमं प्रसवः सुषुवे ऽग्र इत्येताः सप्ताहुतीर्जुहोत्यथ 5-12
यदिदमन्नं परिशिष्टं भवति तेनैनमभिषिञ्चत्यन्नं वा एष उज्जयति यो वाजपेयेन यजते स यदेवैतदन्नमुज्जयति तेनैवैनमेतदभिषिञ्चति तेन समर्धयति तदस्मिन्दधाति तस्मादनमाभिषिञ्चति[11] ॥६॥

सो ऽभिषिञ्चति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ता- 13.14

भ्याम् । सरस्वत्यै वाचो[11] यन्तुर्यं तुर्यं[12] दधामीति वाग्वै सरस्वती तदेनं वाच एव तुर्यं[13] तुर्यं[13] दधातीति[14] तदु हैक आहुर्विश्वेषां त्वा देवानां तुर्यं तुर्यं दधामीति सर्वे वै विश्वे देवा इति तदेनमस्य सर्वस्य तुर्यं तुर्यं दधातीति[15] तदु तथा न ब्रूयात्सरस्वत्या इत्येव ब्रूयाद्वाग्वै सरस्वती वाग्वै प्रजापतिः सर्वं प्रजापतिस्तदेनमस्य सर्वस्य तुर्यं तुर्यं दधाति तस्मात्सरस्वत्या इत्येव ब्रूयात् ॥७॥

बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चामीति ब्रूयाद्यदि ब्राह्मणो यजेत ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मण इन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामीति ब्रूयाद्यदि क्षत्रियो यजेत क्षत्रꣳ हीन्द्रः क्षत्रमु हि क्षत्रियः[15] ॥८॥

15 अथ सम्राळयमभूदिति त्रिरुद्गदति निवेदितमेवैनमेतत्सन्तं देवेभ्यो भूयो निवेदयत्ययं यौष्माक इतीमं गोपायतेमं वित्तेति देवान्ह्येष उपावर्तते यो वाजपेयेन यजते स देवतानामेवैको भवति ॥९॥

16 अथैनमेता उज्जितीर्वाचयति वा जुहोति वा समान एव बन्धुर्यदि च वाचयति यदि च जुहोति यदेवैताभिरुज्जितिभिरेता देवता उदजयꣳस्तदेवैताभिर्यजमान उज्जयति ॥१०॥

17 अग्नेरेकाक्षरेण प्राणमुदजयत्तमुज्जेषं प्रजापतेः सप्तदशाक्षरेण सप्तदशꣳ स्तोत्रमुदजयत्तमुज्जेषमिति स यदेवैताभिरुज्जितिभिरेता देवता उदजयꣳस्तदेवैताभिर्यजमान उज्जयति ॥११॥

18,19,21 अथाहाग्नये स्विष्टकृते ऽनुब्रूहीत्यग्निꣳ स्विष्टकृतं यजेति वषट्कृते जुहोति स यदुभे आहुती अन्तरेणैतत्कर्म क्रियत एष वाव प्रजापतिर्यज्ञो य एष तायत एतस्यैवैनमेतत्प्रजापतेर्यज्ञस्य मध्यत आदधाति मध्यतो ऽभिषिञ्चत्यथेळामुपह्वय मार्जयन्ते मार्जयित्वा माहेन्द्रं ग्रहं गृह्णाति माहेन्द्रं ग्रहं गृहीत्वा स्तोत्राय प्रमीवति स स्तोत्रमुपावहरति सो ऽन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्यात्मा वै स्तोत्रं प्रजा शस्त्रं तयोरेवैतदुभयोरन्ते भवति ॥१२॥

20 तद्धैके स्तोत्रमुपाकृत्याथैतत्कर्म[16] कुर्वन्ति तदु तथा न कुर्यादात्मा वै स्तोत्रं प्रजा शस्त्रं ताभ्याꣳ हैनं त उभाभ्यां प्रनाशयन्ति प्रधमन्ति[17] स पापीयानिष्ट्वा भवति तस्मात्पुरस्तादेवैतत्कर्म कृत्वान्त एव स्तोत्रस्य स्यादन्ते शस्त्रस्यात्मा वै स्तोत्रं प्रजा शस्त्रं तयोरेवैतदुभयोरन्ते भवति स श्रेयानिष्ट्वा भवति ॥१३॥ तृतीयं ब्राह्मणम् ॥ द्वितीयो ऽध्यायः ॥ वाजपेयकाण्डं समाप्तम् ॥

1 यदेतेन O. 2 भवत्यनिष्ट O P, भवत्यनिष्टः B W C. Read भवत्यनिष्टः. 3 °भरत्येतत्सर्वौषधꣳ C O P. 4 यजतेन्नपेयꣳ O P C. 5 चमसे B W 6 यथोपस्मारमन्नान्यंन्नानि B W C My, यथोपस्मावमन्नान्यन्नानि O P, °रमन्यान्यन्यानि Or. 7 °त्तदुद्ब्रवीत B W C My, °तदुब्रवीत O P. 8 °न्नमनवं B W O P. 9 °न्नमवरुंधीत MSS. 10 Accent corrected; वाजप्रसव्या MSS., in C the accent blotted out. वाजप्रसव्या MSS.; in C the accent blotted out. 11 °षिंचति MSS. 12 वाचो यंतुर्यें तुर्यं O P, वाचो यंतुर्यें तुर्यं B W, वाचो यंतुर्यें तुर्यं C, °यन्तुर्ये तुर्यं T My. 13 Thus C B T, यंतुर्यें तुर्यं O P. 14 MSS. except C (sec. m.) Or and My: दधामीति. 15 क्षत्रियः B W O P C (orig.). 16 °मुपाकृत्यार्थं° MSS. 17 प्रथमति P Or, प्रथमंति O.

M. V. 2. 3 K. VII. 1. 1

1 स वै पूर्णाहुतिं जुहोति स यत्पूर्णाहुतिं जुहोति सर्वं वै पूर्णꣳ सर्वं परिगृह्य सूया इति स्वाहाकारेण जुहोत्यनिरुक्तो वै स्वाहाकारः सर्वं वा अनिरुक्तं तस्मात्स्वाहाकारेण जुहोति तस्यां वरं ददाति सर्वं वै वरः सर्वं परिगृह्य सूया इति स यदि कामयेत जुहुयादेतां यद्यु[1] कामयेतापि नैवाद्रियेत ॥१॥

2 अथ श्वो भूते ऽनुमतये हविरष्टाकपालं पुरोळाशं निर्वपति तेन यथेष्टयैवं चरन्ति ते ये प्रत्यञ्चः शम्यायाः पिष्यमाणानां तण्डुलानामवशीयन्ते तान्त्सार्धꣳ स्रुवे संवपत्यथ ये प्राञ्चस्ताननुमतये हविरष्टाकपालं पुरोळाशꣳ श्रपयति[2] तद्यानिमान्त्स्रुवे संवपति तानादायान्वाहार्यपचनादुल्मुकमादाय दक्षिणा परेत्य यदि तत्र स्वकृतं वेरिणं विन्देच्छ्वभ्रप्रदरं वा ॥२॥

3 तदग्निꣳ समाधाय जुहोत्येष ते निर्ऋते भागस्तं जुषस्व स्वाहेतीयं वै निर्ऋतिरियꣳ ह वै तं[3] निर्ऋत्या[4] पाप्मना गृह्णाति यं निर्ऋतिः पाप्मा विन्दति तामेवैतच्छमयति तथैनꣳ सूयमानं निर्ऋतिः पाप्मा[5] न[6] विन्दत्यथ यत्स्वकृते वेरिणे जुहोति श्वभ्रप्रदरे वा तद्धयस्या निर्ऋतिगृहीतम् ॥३॥

4.5 अथानपेक्षमाणा[7] आयन्त्यथानेनानुमतेर्हविषाष्टाकपालेन पुरोळाशेन प्रचरन्तीयं[8] वा अनुमतिरियꣳ ह वै तस्या अनुमन्यते यस्तच्छक्नोति कर्म कर्तुं यच्चिकीर्षति[9] तामेवैतत्प्रीणात्यनयानुमत्यानुमतः[10] सूया इति स यदष्टाकपालो भवत्यष्टाक्षरा वै गायत्री गायत्र्यु[11] वा इयं निदानेन तस्मादष्टाकपालो भवति स यत्समानस्यैव हविषो द्वेधा जुहोति यत्तदजामि[12] भवतीयꣳ ह्येवैतदुभयं तस्य वासो दक्षिणा यद्वै[13] सवासा[14] अध्वानं[15] नोपधूष्णोति[16] निधाय वै तद्वासो[17] ऽतिमुच्यते तथैनꣳ सूयमानमासङ्गः पाप्मा न विन्दति ॥४॥

6 अथ श्वो भूत आग्नावैष्णवमेकादशकपालं पुरोळाशं निर्वपति तेन यथेष्टयैवं चरन्ति[18] स यदाग्नावैष्णवेन यजते[19] ऽग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वत्यग्निरु वा अवरार्धो[20] यज्ञस्य विष्णुः परार्धस्तत्सर्वाꣳश्च देवता इति सर्वं च यज्ञं परिगृह्य सूया इति तस्मादाग्नावैष्णवेन यजते तस्य हिरण्यं दक्षिणाग्नेयो ह्येष यज्ञो ऽग्नेर्हि रेतो हिरण्यं य उ वै विष्णुर्यज्ञो वै सो ऽग्निरु वै यज्ञस्तद्यस्य तदाग्नेयमेव तस्मादस्य हिरण्यं दक्षिणा ॥५॥

7 अथ श्वो भूते ऽग्नीषोमीयमेकादशकपालं पुरोळाशं निर्वपति तेन यथेष्टयैवं

चरन्ति स यदग्नीषोमीयेण यजत एतेन वा इन्द्रो वृत्रमहन्नेतेनो एव व्यजयत येयमस्य विजितिस्तथो वा एष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथो एव विजयते विजिते ऽभये ऽनाष्ट्रे सूया इति तस्योत्सृष्टो गौर्दक्षिणोत्सर्गꣳ[1] ह्येतं घ्नन्ति चन्द्रमसं पौर्णमासेन ह्येतं घ्नन्त्यामावास्येनोत्सृजन्ति तस्मादस्योत्सृष्टो[2] गौर्दक्षिणा ॥६॥

अथ श्वो भूत ऐन्द्राग्नं द्वादशकपालं पुरोळाशं निर्वपति तेन यथेष्टयैवं 8
चरन्ति स यदैन्द्राग्नेन यजते यत्र ह वा इन्द्रो वृत्राय वज्रं प्रजहार तस्माद्ध वृत्रं जघ्नुषस्तेज इन्द्रियं वीर्यमपचक्राम स एतेन तेजो वा अग्निरिन्द्रियं वीर्यमिन्द्र एते उभे वीर्ये परिगृह्य ते आत्मन्यकुरुत ते आत्मन्यधत्त तथो वा एष एतेन तेजो वा अग्निरिन्द्रियं वीर्यमिन्द्र एते उभे वीर्ये परिगृह्य ते आत्मनि कुरुते ते आत्मनि धत्ते ते आत्मनि कृत्वा सूया इति तस्य ऋषभो ऽनड्वान्दक्षिणा स हि वहसाग्नेय आण्डाभ्यामैन्द्रः ॥७॥

अथ श्वो भूत आग्रयणेष्ट्या यजते सर्वान्वा एष यज्ञक्रतूनवरुन्द्धे सर्वा 9
इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्ट[3] उ वा एष यज्ञो देवकृतो यदाग्रयणेष्टिरनया मे ऽपीष्टमसदनयापि[4] सूया इत्योषधिभ्यो वा एष सूयमानः सूयत इमा उवेवोभयीरोषधीरनमीवा[5] अकिल्बिषाः कुरुते ऽनमीवा अकिल्बिषा ओषधीरभि सूया इति तस्य प्रथमजो गौर्दक्षिणाऽयमिव हीदमिति[6] ॥८॥

अथ श्वो भूते चातुर्मास्यैर्यजते सर्वान्वा एष यज्ञक्रतूनवरुन्द्धे सर्वा 10
इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्ट[7] उ वा एष यज्ञो देवकृतो यच्चातुर्मास्यान्येभिर्मे ऽपीष्टमसदेभिरपि[8] सूया इति तस्माच्चातुर्मास्यैर्यजते ॥९॥

प्रथमं ब्राह्मणम् ॥

1 यद्यू O P. 2 अपयति MSS. 3 तन्निर्ऋत्या B W, तन्नि° My. 4 पाप्मान W O P My, पाप्मानं B C. 5 अथानवेक्ष° My. 6 प्रचरंतीयं O P C, प्रचरतीयं B W My, प्रचरन्तीयं T. 7 यत् Omitted in B W. 8 °श्रीणात्यनयानु° B W. 9 गायन्यु B W. 10 यत्तदजामि MSS. 11 Emended; यंवै MSS. 12 Emended; सवासाध्वानं B W O P C, सवाससा-

ध्वानं T. 13 Emended; नोपधिष्णोति O P C, नोपधिष्णेति B W, नोपधिष्णोति T, नोपदिष्टोति My. 14 Emended; तंवासो MSS. 15 चरति B W. 16 यजते MSS. 17 अवराद्धो O P C, अवरार्द्धो T (cp. IV. 1. 3. 1). 18 Thus MSS. Read °णोत्सर्गꣳ ? 19 तस्माद° O P. 20 देवसृष्ट MSS. 21 Thus accented MSS. here, but cp. section 9. 22 Conjecturally; इमा उ चैवो° B W O P C, इमा उवैवो° T My. 23 °मिति MSS. 24 Thus the accent in W O C, देवसृष्ट P, देवसृष्ट B. 25 पीष्टमस° O P.

M. V. 2. 4 K. VII. 1. 2

1 स वै वैश्वदेवेन यजते स यद्वैश्वदेवेन यजते वैश्वदेवेन ह वै प्रजापतिः प्रजानां भूमानꣳ ससृजे तथो वा एष एतद्वैश्वदेवेनैव प्रजानां भूमानꣳ सृजते भूमानं प्रजानाꣳ सृष्ट्वा सूया इति[1] ॥१॥

2 अथ वरुणप्रघासैर्यजते वरुणप्रघासैर्ह वै प्रजापतिः प्रजा वरुणपाशात्प्रामुञ्चत्ता अस्यानमीवा अकिल्बिषाः प्रजाः[2] प्राजायन्त[3] तथो वा एष एतद्वरुणप्रघासैरेव वरुणपाशात्प्रजाः प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायन्ते ऽनमीवा अकिल्बिषाः प्रजा अभि[3] सूया इति[4] ॥२॥

3 अथ साकमेधैर्यजते साकमेधैर्ह वै देवा वृत्रं जघ्नुस्तैर्वेव व्यजयन्त येयमेषां विजितिस्तथो वा एष एतैः पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथो एव विजयते विजिते ऽभये ऽनाष्ट्रे सूया इति[5] ॥३॥

4 अथ शुनासीरीयेण यजत[1] उभावेतौ[2] रसौ[2] परिगृह्य सूया इत्यथ पञ्चवातीयं जुह्वोति तत्पञ्चधाहवनीयं व्यूहन्ति प्राञ्चमुदञ्चं प्रत्यञ्चं दक्षिणा मध्ये ॥४॥

5 तज्जुहोत्यग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहेति पुरस्ताद्यमनेत्रेभ्यो देवेभ्यो दक्षिणसद्भ्यः[6] स्वाहेति दक्षिणतो विश्वदेवनेत्रेभ्यो देवेभ्य पश्चात्सद्भ्यः स्वाहेति पश्चान्मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरसद्भ्यः स्वाहेत्युत्तरतः सोमनेत्रेभ्यो देवेभ्य उपरिषद्भ्यो[7] दुवस्वद्भ्यः स्वाहेति मध्ये ॥५॥

अथ पुनः सार्धꣳ समुह्य जुहोति ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा 6
ये देवा यमनेत्रा दक्षिणसदस्तेभ्यः स्वाहा ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः
स्वाहा ये देवा मित्रावरुणनेत्रा इति वा मरुन्नेत्रा इति वोत्तरसदस्तेभ्यः स्वाहा ये
देवाः सोमनेत्रा उपरिषदो[1] दुवस्वन्तस्तेभ्यः स्वाहेति ॥६॥

स यदेवं जुहोति यत्र वै देवाः साकमेधैर्व्यजयन्त येयमेषां विजितिस्तद्धो- 7
चुरुत्पिपते[2] वा इमानि दिक्षु रक्षाꣳसीति तेभ्यो वै प्रहरामेति तद्वज्रो वा आज्यं
तद्वज्रेणाज्येनैतद्देवा दिक्षु नाष्ट्रा रक्षाꣳस्यवाघ्नꣳस्तेन व्यजयन्त येयमेषां विजिति-
स्तथो वा एष एतेन वज्रेणाज्येन दिक्षु नाष्ट्रा रक्षाꣳस्यवहन्ति विजिते ऽभये ऽनाष्ट्रे
सूया इति तस्मादेताः पूर्वाः पञ्च जुहोति ॥७॥

अथ यदपराः पञ्च जुहोति विवृहन्तीव वा एतदग्निं वीव[11] लिशन्ति[11] 8
यदेनं[13] पञ्चधा व्यूहन्ति स यदेव तत्राग्नेर्विं वा लिशति क्षिणोति वा तदेवास्यै-
ताभिराहुतिभिर्भिषज्यति तत्संदधाति तच्छमयति तस्मादेता अपराः पञ्च जुहोति ॥८॥

तस्य प्रष्टिवाहनो ऽश्वरथो दक्षिणा ते वै पञ्च वातास्त्रयो ऽश्वा द्वौ 9
सव्यस्थसारथी यो वै प्राणः स वातः स यदेते पञ्च प्राणन्तो दक्षिणा तस्मात्प-
ञ्चवातीयं नाम ॥९॥

तेन[14] ह्याप्येतेन[14] विष्टाव्राजे[15] भिषज्येदयं वाव प्राणो यो ऽयं पवते स[16] 10
वा[16] अयमेक[16] इवैव पवते सो ऽयं पुरुषे ऽन्तः प्रविष्टो दशधाविहितो दश वा एता
आहुतीर्जुहोति तदस्मिन्नेतान्दश प्राणान्क्लृप्तान्त्सर्वमायुर्दधाति स ह सर्वमेवायुरेति
स यदि ह्यपि[17] गतासुरिव[17] भवत्या ह्यैवैनेन हरति ॥१०॥

अथ श्वो भूत एन्द्रतुरीयेण यजते तदाग्नेयमष्टाकपालं पुरोळाशं निर्वपति 11.12
वारुणं यवमयं चरुꣳ रौद्रं गावेधुकमनळुह्या वहलाया एन्द्रं पयो भवति[18] ॥११॥

स यदेतेन यजत इन्द्राग्नी उ ह्यैवैतत्समूदाते[19] उत्पिपते[20] वा इमानि
दिक्षु रक्षाꣳसीति तेभ्यो वै प्रहरावेति ताविन्द्राग्नी एतेन हविषा दिक्षु नाष्ट्रा रक्षाꣳ-
स्यवाहतां तेन व्यजयेतां यैनयोरियं विजितिस्तथो वा एष एतेन हविषा दिक्षु नाष्ट्रा
रक्षाꣳस्यवहन्ति विजिते ऽभये ऽनाष्ट्रे सूया इति ॥१२॥

स होवाचाग्निस्त्रयो मम भागा अस्य हविषस्तुरीयं[21] तवेति[21] तथेति 13
होवाचेन्द्रः स यदाग्नेयो ऽष्टाकपालो भवति[22] सो ऽग्नेरको भागो ऽथ यद्वारुणो
यवमयश्चरुर्भवति यो वै वरुणो ऽग्निर्वै स[23] स[23] उ एवास्यैको भागः स यद्यवमयो

भवति वरुण्या हि यवा अथ यद्रौद्रो गवेधुको भवति यो वै रुद्रो ऽग्निर्वै स[२३] स[२३] उ एवास्यैको भागः स यद्गवेधुको भवति वास्तव्यो हि स देवो वास्तव्या हि गवेधुका अथ यदनड्वाहा वहलाया ऐन्द्रं पयो भवति स इन्द्रस्य चतुर्थो भागः स यो वै चतुर्थो भागस्तत्तुरीयꣳ स यत्तुरीयभागीन्द्र[२४] एतस्य हविषस्तस्मादैन्द्रतुरीयं नाम तस्य सैव वहला दक्षिणा सा वै वहसाग्नेयी यत्स्त्री सती वहति वरुणगृहीता वै सा तद्भवति तदस्या वारुणमथ[२५] यद्रौस्तेन रौद्र्यथ[२६] यदस्या एतदैन्द्रं पयो भवति तेनैन्द्र्येषा ह्येतत्सर्वं व्यश्नुते तस्मादस्यैषा दक्षिणा ॥१३॥

14 अथ श्वो भूते[२७] ऽपामार्गहोमं जुहोत्यपामार्गैर्ह वै देवा नाष्ट्रा रक्षाꣳस्यपामृजत तस्मादपामार्गा नाम तथो वा एष एतदपामार्गैरेव नाष्ट्रा रक्षाꣳस्यपमृष्टे विजिते ऽभये ऽनाष्ट्रे सूया इति ॥१४॥

15 स पालाशे[२८] वा स्रुवे वैकङ्कते वापामार्गतण्डुलानोप्यान्वाहार्यपचनादुल्मुकमादाय प्राञ्चो वोदञ्चो वेत्वा जुह्वति ॥१५॥

16 स उल्मुकमादत्ते[२९] ऽग्ने सहस्व पृतना इति युधो वै पृतना युधः सहस्वेत्येवैतदाहाभिमातीरपास्येति सपत्नो वा अभिमातिः सपत्नमपजहीत्येवैतदाह दुष्टरस्तरन्नरातीरिति दुष्टरो[३०] ह्येष रक्षोभिर्नाष्ट्राभिस्तरन्नरातीरिति सर्वान्ह्येष[३१] पाप्मनस्तरति वर्चो धा यज्ञवाहसीति साधु यजमाने[३२] धा[३३] इत्येवैतदाह[३४] ॥१६॥

17 अथ जुहोति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामित्युक्तो यजुषो बन्धुरुपाꣳशोर्वीर्येण जुहोमीति यज्ञमुखं वा उपाꣳशुर्यज्ञमुखेनैवैतन्नाष्ट्रा रक्षाꣳसि हन्ति[३३] हत रक्षः स्वाहेति तदेनेन नाष्ट्रा रक्षाꣳसि[३४] हन्ति स यां दिशमित्वा जुहोति तां दिशꣳस्रुवं[३५] प्रहरति रक्षसां त्वा वधायेति[३६] रक्षाꣳसि ह्येतद्धन्ति ॥१७॥

18.19 स यद्येष पालाशः[३७] स्रुवो भवति ब्रह्म वै पलाशो ब्रह्मणैवैतन्नाष्ट्रा रक्षाꣳसि हन्ति यद्यु वैकङ्कतो वज्रो वै विकङ्कतो वज्रेणैवैतन्नाष्ट्रा रक्षाꣳसि हन्त्यवधिष्म रक्ष इति पुनरावर्तन्ते[३८] रक्षाꣳसि ह्येतद्घ्नन्ति[३९] ॥१८॥

20 तेन ह्याप्येतेन[४०] विष्ठाव्राजे[४१] प्रतिसरं कुर्वीत स यस्याꣳ स दिशि भवति यस्मै जुहोति तां दिशं प्रतिपरेत्य[४२] जुहोत्यमुष्य त्वा वधायामुमवधिष्मेति तमादिशति प्रत्यक्फलो वा एष वृक्षः स ह तमेव तत्प्रत्यग्धूर्वति यदस्मै स किं च[४३] करोति ॥१९॥ द्वितीयं ब्राह्मणम् ॥

1 इति MSS. 2 प्रजाः प्राजायंत O P, प्रजाः प्रजायंते B W. 3 अभि O P. 4 इति MSS. 5 इति B W O. 6 यजत MSS. 7 उभावेवैतसौ O, उभावेवैतौसौ P. 8 दक्षिणास° C (orig.). 9 उपरिस° B W (both times), C (second time). 10 °रुत्पिबते T. 11 विवा B W, विव T. 12 Read लिशन्ति ? 13 यदेव O P (orig.), यदेवं P (sec. m.). 14 तेनाप्येतेन O P, तेनहाप्येतेन B W C. 15 विष्टाव्राजे O P B W, विष्टाव्राजे C (cp. VII. 1. 2. 19, VII. 2. 1. 11). 16 स अयमेक O. 17 हाप्यमातासु° O P. 18 भवति O P C. 19 हैवैत° B W. 20 उत्पिबते B (sec. m.), उत्पवते T. 21 °स्तुरीयं तवेति B W O P C My, °स्तुरीयंभवेति T. Read °स्तुरीयस्तवेति ? 22 भवति B C W, भवति O P. 23 सस MSS. 24 Read यत्तुरीयभागीन्द्र ? 25 वरुणमथ B W O, वारुण्यमथ C My, वारणमथ T. 26 रौद्री अथ B W C, रौद्रा अथ O P, रौद्री अथ T, तादी अथ My. 27 भूते MSS. 28 पलाशे B W (pr. m.), पलाशे T. 29 °मादत्ते MSS. 30 दुष्टरो B. 31 सर्वा° B C. 32 °माने वा इत्ये° B, °मान इत्ये° O, °माना इत्ये° T. 33 हंति B O C W. 34 रक्षाꣳसि B W O C. 35 खुवं B C W. 36 वधायेति B W O C. 37 पलाशः B W (orig.). 38 °वर्तते B O P W. 39 ह्येतद्धंति B W, ह्येतद्धंति O, ह्येतद्धंन्ति P (orig.) but न्ं blotted out. 40 हाप्येतेन B W. 41 विष्टा° MSS. except W. 42 प्रतिपरेत्य MSS. 43 चन O.

M. V. 2. 5 K. VII. 1. 3

1-4 स वा एतमाग्नावैष्णवमेकादशकपालं पुरोळाशं निर्वपत्यैन्द्रावैष्णवं चरुं वैष्णवं त्रिकपालं वा चरुं वैतेन श्वो भूते त्रिषंयुक्तेन यजते[1] स यदेतेन यजते पुरुषान्हैवैतेन देवा उपेयुस्तथो वा एष एतेन पुरुषानेवोपैति पुरुषवान्त्सूया इति पुरुषवान्हि तच्छक्नोति कर्म कर्तुं यच्चिकीर्षति पुरुषैर्हि स[2] तच्छक्नोति स यदाग्नावैष्णवो भवत्यग्निर्वै दाता तं दातारमिमाः प्रजा उपनिविष्टा वैष्णवा उ वै पुरुषास्तद्य एव दाता यं दातारमिमाः प्रजा उपनिविष्टास्तमेवैतत्प्रीणाति सो ऽस्मै प्रीतः पुरुषान्ददाति पुरुषान्त्संप्रयच्छति स[3] पुरुषवान्त्सूयते[3] ऽथ यदैन्द्रावैष्णवश्चरुर्भवतीन्द्रो वै यजमानो वैष्णवाः पुरुषाः स यानेवास्मा अग्निर्दाता पुरुषान्ददाति तैरेवैतत्स ँस्पृशते तानात्मनि कुरुते ऽथ यद्वैष्णवस्त्रिकपालो वा चरुर्वा भवति यानेवास्मा अग्निर्दाता पुरुषान्ददाति तेष्वेवैतदन्ततः प्रतितिष्ठति तस्य वामनो गौर्दक्षिणा तद्धि पशुषु वैष्णव ँ रूपं यद्वामनस्य गोः ॥१॥

5-8 अथ श्वो भूत आग्रापौष्णमेकादशकपालं पुरोळाशं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुमेतेन श्वो भूते त्रिषंयुक्तेन यजते स यदेतेन यजते पशून्हैवैतेन[4] देवा उपेयुस्तथो वा एष एतेन पशूनेवोपैति पशुमान्त्सूया इति पशुमान्हि[5] तच्छक्नोति कर्म कर्तुं यच्चिकीर्षति पशुभिर्हि स तच्छक्नोति स यदाग्नापौष्णो भवत्यग्निर्वै दाता तं दातारमिमाः प्रजा उपनिविष्टाः पौष्णा उ वै पशवस्तद्य एव दाता यं दातारमिमाः प्रजा उपनिविष्टास्तमेवैतत्प्रीणाति सो ऽस्मै प्रीतः पशून्ददाति पशून्त्संप्रयच्छति स पशुमान्त्सूयते ऽथ यदैन्द्रापौष्णश्चरुर्भवतीन्द्रो वै यजमानः पौष्णाः पशवः स यानेवास्मा अग्निर्दाता पशून्ददाति तैरेवैतत्स ँस्पृशते तानात्मनि कुरुते ऽथ यत्पौष्णश्चरुर्भवति यानेवास्मा अग्निर्दाता पशून्ददाति तेष्वेवैतदन्ततः प्रतितिष्ठति तस्य श्यामो गौर्दक्षिणा द्वै वै श्यामस्य रूपे शुक्लं चैव कृष्णं च द्वन्द्वमु वै मिथुनं प्रजननं प्रजननमु वै पूषा पशवो हि पूषा प्रजनन ँ हि पशवस्तस्मादस्य श्यामो गौर्दक्षिणा ॥२॥

9-12 अथ श्वो भूते[6] ऽग्नीषोमीयमेकादशकपालं पुरोळाशं निर्वपत्यैन्द्रासौम्यं चरु ँ सौम्यं चरुमेतेन श्वो भूते त्रिषंयुक्तेन यजते स यदेतेन यजते वर्चो ह्येवैतेन देवा उपेयुस्तथो वा एष एतेन वर्च एवोपैति वर्चस्वी सूया इति न ह्यवर्चसो[7] व्याप्त्या चनार्थो ऽस्ति स यदग्नीषोमीयो भवत्यग्निर्वै दाता तं दातारमिमाः प्रजा उपनिविष्टा वर्चो वै सोमस्तद्य एव दाता यं दातारमिमाः प्रजा उपनिविष्टास्तमेवैत-

त्प्रीणाति सो ऽस्मै प्रीतो[1] वर्चो ददाति वर्चः संप्रयच्छति स वर्चस्वी[2] सूयते ऽथ यदैन्द्रासौम्यश्चरुर्भवतीन्द्रो वै यजमानो वर्चः सोमः स यदेवास्मा अग्निर्दाता वर्चो ददाति तेनैवैतत्सꣳस्पृणुते तदात्मनि कुरुते ऽथ यत्सौम्यश्चरुर्भवति यदेवास्मा अग्निर्दाता वर्चो ददाति तस्मिन्नेवैतदन्ततः प्रतितिष्ठति तस्य बभ्रुगौर्दक्षिणा तद्धि पशुषु सौम्यꣳ रूपं यद्बभ्रोर्गोः ॥३॥

अथ श्वो भूते वैश्वानरं द्वादशकपालं पुरोळाशं निर्वपति वारुणं यवमयं 13-17
चरुं ताभ्यामन्वहं वा यजते समानबर्हिषी वैव भवतः स यद्वैश्वानरो भवति संवत्सरो वै वैश्वानरः प्रजापतिः सो ऽयमासां प्रजानां भूमानꣳ ससृजे तथो वा एष एतदासां प्रजानां भूमानꣳ सृजते[10] भूमानं प्रजानाꣳ सृष्ट्वा सूया इत्यथ यद्द्वादशकपालो भवति द्वादश वै मासाः संवत्सरस्य संवत्सरो वै वैश्वानरः प्रजापतिस्तस्माद्द्वादशकपालो भवति[11] तस्यर्षभो दक्षिणर्षभो वै पशूनां प्रजापतिः संवत्सरो वै वैश्वानरः प्रजापतिस्तस्मादस्यर्षभो दक्षिणाथ यद्वारुणो यवमयश्चरुर्भवति वरुण्यादेवैतत्सर्वस्मात्किल्बिषादेनसो ऽन्ततो वरुणपाशात्प्रजाः प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायन्ते[12] ऽनमीवा अकिल्बिषाः प्रजा अभि सूया इति स यद्यवमयो भवति वरुण्या हि यवास्तस्य कृष्णं[13] वासो दक्षिणा तद्धि वारुणं यत्कृष्णं वासो यदि कृष्णं न विन्देदपि यदेव किं च वासः स्याद्ग्रन्थिभिर्हि[14] वासो वारुणं वारुणो हि ग्रन्थिः ॥४॥ तृतीयं ब्राह्मणम् ॥

1 यजते MSS. 2 Omitted in B W. 3 स पुरुषं MSS. 4 पशून्हैतेन O. 5 पशुमान्हि MSS. 6 भूते B O, भूते W. 7 ह्यवर्चसो B W. 8 प्रीतो B W O C. 9 वर्चस्वी MSS. 10 ससृजे O P. 11 भवति B W O C. 12 प्रजायंते B W O C. 13 कृष्णं B W O C. 14 स्याद्ग्र° MSS.

K. VII. 1. 4 M. V. 3. 1

स वै रत्निनाꣳ हविर्भिर्यजते स यद्रत्निनाꣳ हविर्भिर्यजत एतेभ्यो वा एष सूयमानः सूयते यान्यस्यैतानि रत्नानि तानेवैतत्स्वाननपक्रमिनः[1] कुरुते ॥१॥

सो ऽग्नी समारोह्य सेनान्यो गृहानित्वाग्नये ऽनीकवते ऽष्टाकपालं पुरोळाशं 1
निर्वपत्यनीकं वा अग्निर्देवतानामनीकं वै सेनायाः सेनानीरेतद्वा अस्यैकꣳ रत्नं

यत्सेनानीस्तस्मा एवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य हिरण्यं दक्षिणाग्नेयो ह्येष यज्ञो ऽग्नेर्हि रेतो हिरण्यं तस्मादस्य हिरण्यं दक्षिणा ॥२॥

2 अथ श्वो भूते पुरोहितस्य गृहेषु बार्हस्पत्यं चरुं निर्वपति बृहस्पतिर्वै देवानां पुरोहित एवमु वा एष एतस्य पुरोहित एतद्वा अस्यैकꣳ रूपं यत्पुरोहितस्तस्मा एवैतेन सूयते[1] तꣳ स्वमनपक्रमिणं कुरुते तस्य शितिपृष्ठो[2] गौर्दक्षिणैषा ह्यूर्ध्वा[3] दिग्बृहस्पतेस्तदेष उपरिष्टादर्यम्णः[4] पन्थास्तस्मादस्य शितिपृष्ठो[2] गौर्दक्षिणा ॥३॥

3 अथ श्वो भूते सूयमानस्य गृहेष्वैन्द्रमेकादशकपालं पुरोळाशं निर्वपति क्षत्रं वा इन्द्रः क्षत्रं वै सूयमानः क्षत्रमेवैतद्भवति तस्यर्षभो दक्षिणा तद्धि पशुष्वैन्द्रꣳ रुपं यदृषभस्य[5] ॥४॥

4 अथ श्वो भूते[6] महिष्या[6] गृहेष्वादित्यं चरुं निर्वपतीयं वा अदितिः सा देवानां पत्न्येवमु वा एषैतस्य पत्न्येतद्वा अस्यैकꣳ रूपं यन्महिषी तस्या एवैतेन सूयते तांꣳ स्वामनपक्रमिणीं कुरुते तस्य धनुर्दक्षिणा धेनुरिव वा इयं मनुष्येभ्यः सर्वान्कामान्दुग्धे सर्वान्वै कामान्धेनुर्दुग्धे मातेव वा इयं मनुष्याणां च पशूनां मातेव धेनुस्तस्मादस्य धेनुर्दक्षिणा ॥५॥

5 अथ श्वो भूते सूतस्य गृहेषु वारुणं यवमयं चरुं निर्वपति सवो वै देवतानां वरुणः सवो वै मनुष्याणाꣳ सूतः[7] स यद्यवमयो भवति वरुण्या हि यवा एतद्वा अस्यैकꣳ रूपं यत्सूतस्तस्मा एवैतेन सूयते[8] तꣳ स्वमनपक्रमिणं[9] कुरुते तस्याश्वो दक्षिणा स हि वारुणो यदश्वः ॥६॥

6 अथ श्वो भूते ग्रामण्यो[10] गृहेषु मारुतꣳ सप्तकपालं पुरोळाशं निर्वपति विशो वै मरुतो देवविशं वैश्यो वै ग्रामणीः स यत्सप्तकपालो[11] भवति सप्त सप्त हि मारुतो गण[12] एतद्वा अस्यैकꣳ रूपं यद्ग्रामणीस्तस्मा एवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य पृषन्गौर्दक्षिणा भूमा वा एतद्रूपाणां यत्पृषतो गोर्विशो वै मरुतो भूमो[13] वै विट् तस्मादस्य पृषन्गौर्दक्षिणा ॥७॥

8 अथ श्वो भूते संग्रहीतुर्गृहेष्वाश्विनं[14] द्विकपालं पुरोळाशं निर्वपति समानयोनी वा अश्विनौ समानयोनी वै सव्यस्थसारथी एतद्वा अस्यैकꣳ रूपं यत्संग्रहीता तस्मा एवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य यमौ गावौ दक्षिणा तौ हि

समानयोनी भवतो यदि यमौ न विन्देदप्यन्वग्जावेव स्यातां ता उ हि समानयोनी भवतः ॥८॥

अथ श्वो भूते क्षत्तुर्गृहेषु सावित्रं द्वादशकपालं वाष्ट्राकपलं वा पुरोळाशं 7
निर्वपति सविता वै देवानां प्रसविता प्रसविता वै क्षत्तैतद्वा अस्यैकꣳ रत्नं यत्क्षत्ता तस्मा एवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य इयेतो ऽनड्वान्दक्षिणैष वै सविता य एष तपति इयेत[१६] इव ह्येष उद्यꣳश्च भवत्यस्तं च यन्वहत्यु[१७] वा अनड्वानेत्यादित्यस्तस्मादस्य इयेतो ऽनड्वान्दक्षिणा ॥९॥

अथ श्वो भूते भागदुघस्य गृहेषु पौष्णं चरुं निर्वपति पूषा वै देवानां भाग- 9
दुघो ऽशनं पाणिभ्यामुपनिधातैवमु[१८] वा एष एतस्य भागदुघ एतद्वा अस्यैकꣳ रत्नं यद्भागदुघस्तस्मा एवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य श्यामो गौर्दक्षिणा द्वे वै श्यामस्य रूपे शुक्लं चैव कृष्णं च द्वन्द्वमु वै मिथुनं प्रजननं प्रजननमु वै पूषा पशवो हि पूषा प्रजननꣳ हि पशवस्तस्मादस्य श्यामो गौर्दक्षिणा ॥१०॥

अथ श्वो भूते ऽक्षावापस्य च गृहेभ्यो गोविकर्त्तस्य च गवेधुकाः समाहृत्य 10
सूयमानस्यैव गृहेषु रौद्रं गावेधुकं चरुं निर्वपति ते वा एते द्वे नाना रत्ने सती सार्धꣳ[१९] समस्यति[२०] संपदः कामाय तथा हि संपत्संपद्यते स यद्गावेधुको भवति वास्तव्यो हि स देवो वास्तव्या हि गवेधुकाः स यदेतेन यजत रुद्रो ह वा एतामभिमन्यते यामेताꣳ सभायां दीव्यन्ते ऽग्निरु वै रुद्र एष उ वा अग्निर्यदधिदेवनं तस्यैते ऽङ्गारा यदक्षा[२१] एष हैतामभिमन्यते तमेवैतत्प्रीणाति सो ऽस्मै प्रीत एतामनुमन्यते तस्य ह वा एतामनुमताꣳ सभायां घ्नन्ति[२२] यो वा राजसूयेन यजते यो वैतदेवं वेदैते वा अस्य द्वे नाना रत्ने यदक्षावापश्च गोविकर्त्तश्च ताभ्यामेवैतेन सूयते तौ स्वावनपक्रमिणौ कुरुते तस्य दक्षिणास्निनखरः कैसरेण दाम्नाक्षावपणं[२३] प्रबद्धं[२४] द्विरूपो गौस्तद्धि तयोर्भवति ॥११॥

अथ श्वो भूते पालागलस्य गृहेष्वध्वन आज्यस्य जुहोति जुषाणो ऽध्वाज्य- 11
स्य वेतु स्वाहेति प्रहेयो[२५] वै पालागलो ऽध्वानं वै प्रहित एत्येतद्वा अस्यैकꣳ रत्नं यत्पालागलस्तस्मा एवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य दक्षिणा प्युष्णोत्स्यूतं[२६] धनुश्चर्ममया बाणवन्तो[२७] लोहित उष्णीषस्तद्धि तस्य भवति ॥१२॥

तानि वा एतान्येकादश रत्नान्येकादशाक्षरा वै त्रिष्टुबिन्द्रियमु वै वीर्यं 12
त्रिष्टुबिन्द्रियमेवैतद्वीर्यꣳ रत्नान्यभिसंपादयत्येतेभ्यो वा एष सूयतानः सूयते

यान्यस्यैतानि रत्नानि तानेवैतत्स्वाननपक्रमिणः कुरुते ॥१३॥

13 अथ श्वो भूते परिवृत्ताया गृहेषु कृष्णानां व्रीहीणां नैर्ऋतं चरुं निर्वपति या वा असूरपतिः[26] सा परिवृत्ता स नखैरेव निर्भिद्य श्रपयित्वा जुहोत्येष ते निर्ऋते भाग इति तं जुषस्व स्वाहेति निर्ऋतिमेवैतेन शमयति तथैनꣳ सूयमानं निर्ऋतिः पाप्मा न विन्दति स यत्परिवृत्ताया गृहेषु सा हि निर्ऋतिगृहीता तस्य दक्षिणा कृष्णा गौः पर्यायिणी परिमूर्णा त्रिस्तना[27] चरति[28] सा हि निर्ऋतगृहीताथाह मा मे ऽद्येशायां वात्सीदिति ताꣳ सर्वस्या[29] ईशाया बाधते[30] पाप्मानमेवैतदपहते सो ऽपहतपाप्मा सूयते ॥१४॥ चतुर्थं ब्राह्मणम् ॥ प्रथमो ऽध्यायः ।

1 तानेवैत° B W. 2 सूयते MSS. 3 शिति° MSS. 4 ह्यूर्ध्वा MSS. 5 उपरिष्टादूर्यमणः MSS. (cp. VII. 4. 2. 12). 6 °भस्य MSS. 7 भूतेम-हिष्या MSS. 8 सूतः MSS. 9 सूयते C. 10 क्रमिनं B O C (orig.). 11 ग्रामण्यो MSS. 12 Thus My only, यः instead of यत् the other MSS. 13 गण MSS. 14 भूमो O. 15 °गृहेष्वाश्विनं MSS. 16 श्येत MSS. 17 यन्वहत्यु MSS. 18 पाणिभ्या-मुपनिधातेवमु MSS. 19 सार्द्धꣳसमस्यति B W C, सार्द्धꣳसस्यति O. 20 यदक्षा MSS. 21 तन्नंति B, न्नंति O W C (cp. VII. 3. 4. 22). 22 °वपणं प्रबद्धं O, °वपणं प्रबद्धं B W, °वपणं प्रबद्धं C. 23 प्रहेयो C O W, प्रहेयो B. 24 प्युक्ष्णोत्स्यूतं B, प्युक्ष्णोत्स्यूतं W, प्युक्ष्णोत्सूतं O C (orig.) My, प्युक्ष्णोत्सूवं O. 25 बाण° O C My, वाण° B T W. 26 ? असूरपतिः B W C My, असूरयति or °पति O P, असुरवतीः T. The word असूः (childless) seems to be contained in these words. Read perhaps या वा असूरयति. 27 ? Thus MSS. (only चरति B W). 28 सर्वस्य B W. 29 वाधते B W.

K. VII. 2. 1 M. V. 3. 2

स वा उपरिष्टाद्ब्रह्मणाꣳ सौमारौद्रेण यजते स यत्सौमारौद्रेण यजते 1.2
स्वर्भानुर्ह्यासुरः[1] सूर्यं तमसा विव्याध स तमसा विद्धो न व्यरोचत तस्य सोमारुद्रौ तत्तमो ऽपजघ्नतुः स एषो ऽपहतपाप्मा तपति[2] तम उ वा एतं प्रविशति तमो वैष प्रविशति[3] यो[4] ऽयज्ञियान्यज्ञेन प्रसजत्ययज्ञियानु वा एष एतद्यज्ञेन प्रसजति विशं त्वच्छूद्राꣳस्त्वत्स[5] यदेवैनं तत्र तमः प्रविशति यद्वैष तत्र तमः प्रविशति तस्य सोमारुद्रौ तत्तमो ऽपहतः सो ऽपहतपाप्मा सूयते ॥१॥

स वै श्वेतायाः श्वेतवत्सायाः पयसि श्रुतो भवति कृष्णमिव वै तमस्तथा[6] ह्यपहतस्तस्य[7] सैव दक्षिणा श्वेता श्वेतवत्सा ॥२॥

तेन ह्याप्येतेन[8] विष्टाव्राजे[9] स यजेत यो ऽलं यशसे सन्न यशः स्याद्यो वा 3
अनूचानः स वा अलं यशसे सन्न यशो भवति यदि स यशो न भवति तदस्य सोमारुद्रौ तत्तमो ऽपहतः स ह ज्योतिरेव[10] श्रिया यशसा भवति ॥३॥

स वै श्वेतायाः श्वेतवत्सायाः पयसि श्रुतो भवति कृष्णमिव वै तमस्तथा ह्यपहतस्तस्य सैव दक्षिणा श्वेता श्वेतवत्सा ॥४॥

अथ श्वो भूते मैत्राबार्हस्पत्येन यजते ह्वलति वै स यज्ञपथाद्यो ऽयज्ञियान्य- 4
ज्ञेन प्रसजत्ययज्ञियानु वा एष एतद्यज्ञेन प्रसजति विशं त्वच्छूद्राꣳस्त्वन्मित्राबृहस्पती[11] उ वै यज्ञपथो[12] ब्रह्म वै मित्रो ब्रह्म यज्ञो ब्रह्म वै बृहस्पतिर्ब्रह्मयज्ञस्त त्पुनर्यज्ञपथम- पिपद्यते[13] स यज्ञपथमपिपद्य[14] सूयते ॥५॥

तस्याबृद्या स्वयंप्रशीर्णा प्राची वोदीची वाश्वत्थी शाखा तस्या मैत्रं पात्रꣳ 5
स्याद्धरुण्यं वा एतत्पात्रं यत्परशुवृक्णमथैतन्मैत्रं यत्स्वयंप्रशीर्णायाः ॥६॥

अथ दध्यातच्य हृतावासिच्य रथे निवध्य ब्रूयादेतेन देदीयध्वमिति[15] स 6
यत्तत्र नवनीतमुदियात्तदाज्यꣳ[16] स्याद्धरुण्यं वा एतदाज्यं यन्मथा मथितमथैतन्मैत्रं यत्स्वयमुदितम् ॥७॥

अथ द्वेधा तण्डुलान्व्यूहेद्ये[17] परिभिन्नास्तान्साधे[18] तद्ये[19] ऽपरिभिन्नास्ते 7
मैत्राः स्युर्न ह वै मित्रः कं चन हिनस्ति[20] नो[21] ह मित्रं कश्चन हिनस्ति न हैनं कुशो न कण्टको विभिनत्ति सर्वस्य ह्येव मित्रो मित्रं तस्माद्ये ऽपरिभिन्नास्ते मैत्राः स्युः ॥८॥

अथास्मिन्मैत्रे पात्र आज्यमानीय तदेतान्मैत्राꣳस्तण्डुलानावपति ते नैतं 8
बार्हस्पत्यं चरुꣳ श्रुतमपिदधाति चरुण्यो वा एष चरुर्यो ऽग्निपक्वो ऽथैष मैत्रो

यत्स्वयꣳश्रुतस्तद्वेवोष्मणा श्रुतो भवति ॥९॥

तयोः समवद्यन्नाह मित्रावृहस्पतिभ्यामनुब्रूहीत्याश्राव्याह मित्रावृहस्पती यजेति वषट्कृते जुहोति तस्य गौरेव दक्षिणा ॥१०॥

तेन हाप्येतेन विष्टाव्राजे[17] स यजेत यो ऽप्रतिगृह्यस्य वा प्रतिगृह्णीयादयाज्यं वा याजयेद्ध्वलति[18] वै स यो ऽप्रतिगृह्यस्य वा प्रतिगृह्णात्ययाज्यं वा याजपति[19] मित्रावृहस्पती उ वै यज्ञपथो ब्रह्म वै मित्रो ब्रह्म यज्ञो ब्रह्म वै वृहस्पतिर्ब्रह्म यज्ञस्तत्पुनः पन्थानमपिपद्यते[20] तथा न ह्वलति ॥११॥ प्रथमं ब्राह्मणम् ॥

1 °हासुरः MSS. 2 तपति B O. 3 °शति यो MSS. 4 See Introduction II section 1 b. 5 °स्तथापहतस्त° O. 6 हाप्येतेन B W. 7 विष्टाव्राजे MSS. 8 °रेव B W O. 9 °पथो O, °पथी B. 10 °मभिपद्यते O P My T. 11 °मभिपद्य MSS. (cp. infra K. 11). 12 देदी° MSS. except C. 13 °नीतमुदिय° MSS. 14 °द्धे MSS. 15 परिभिन्नास्तात्साद्धं तद्धे O P, परिभिन्नास्तांत्साद्धं तद्धे C, परिभिन्नास्तांत्साद्धीद्धे B (pr. m.), प्ररिभिन्नास्तांत्साद्धतद्धे B (sec. m.), °भिन्नास्तांत्साद्धंद्धे W, परिभिन्नास्तान्साद्धंतद्धे T. 16 °स्ति नो MSS. 17 विष्टाव्राजे MSS. except W. 18 याजये° and याजयति MSS. 19 °मभिपद्यते T.

M. V. 3. 4 K. VII. 2. 2

1 स वा अपः संभरति स यदपः संभरति वीर्यमेवैतद्वसमपाꣳ संभरति तेनैनं वीर्येण रसेनापाꣳ संभृतेनाभिषिञ्चति तस्माद्वा अपः संभरति ॥१॥

2 औदुम्बरे चमसे ऽन्न वा ऊर्गुदुम्बरो[1] ऽन्नमु वा आपस्तस्मादौदुम्बरे चमसे ॥२॥

3 स सारस्वतीरेव प्रथमाः संभरत्यपो देवा मधुमतीरगृभ्णन्नित्यपो देवा रसवतीरगृभ्णन्नित्येवैतदाहोर्जस्वती राजस्वश्चिताना इति रसवतीरित्येवैतदाह यदाहोर्जस्वतीरिति राजस्वाश्चिताना इति याः प्रज्ञाता राजस्व[2] इत्येवैतदाह याभिर्मित्रावरुणा अभ्यषिञ्चन्नित्येताभिर्हि मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीरित्ये-

ताभिर्हीन्द्रमनयन्नत्यरातीस्ताभिरेनमभिषिञ्चति[3] वाग्वै सरस्वती वाचैवैनं तदाभ-
षिञ्चति वाचमेवास्मिन्नेताभिर्दधात्येता[4] उ वा एका आपस्ता एवैतत्संभरति ॥३॥

अथ चतुर्गृहीतमाज्यं गृहीत्वापो ऽभ्यवैति तौ यावेता ऊर्मी व्यदर्तस्तयो- 4-6
र्जुहोति स यः प्राङुदर्दति तास्मिन्जुहोति वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा
वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहीत्यथ यः प्रत्यङ्डुदर्दति तस्मिन्जुहोति[5] वृषसेनो
ऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनो ऽसि राष्ट्रदा राष्ट्रममुष्मै देहीति वीर्यं वा
एतदपां व्यर्दति पशौ वाभ्यवेते पुरुषे वा वीर्यमेवासामेतद्गृह्णाति वीर्येणैवैनमेतदभि-
षिञ्चति वीर्यमेवास्मिन्नेताभिर्दधात्येता उ वा एका आपस्ता एवैतत्संभरति ॥४॥

अथ जुहोति स्यन्दमानास्त्वर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थेत स्थ 7
राष्ट्रदा राष्ट्रममुष्मै दत्तेति वीर्येण वा एता एतत्स्यन्दन्ते तस्मादेनाः स्यन्दमाना न
किं चन प्रतिधारयति वीर्यमेवासामेतद्गृह्णाति वीर्येणैवैनमेतदभिषिञ्चति वीर्यमेवा-
स्मिन्नेताभिर्दधात्येता उ वा एका आपस्ता एवैतत्संभरति ॥५॥

अथ याः स्यन्दमानानां[6] न्यतीरेण[7] प्रतीपꣳ स्यन्दन्ते तासु जुहोत्योजस्वती 8
स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति वीर्येण वा एता
ओजसा स्यन्दमाना[8] न्यतीरेण[9] प्रतीपꣳ स्यन्दन्ते वीर्यमेवासामोज एतद्गृह्णाति
वीर्येणैवैनमेतदोजसाभिषिञ्चति वीर्यमेवास्मिन्नोज एताभिर्दधात्येता उ वा एका आपस्ता
एवैतत्संभरति ॥६॥

अथ जुहोत्यपायत्यामापः[10] परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहापः 9
परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति भूमा वा एषो ऽपामिति ह्येष भूमापामि-
दमत एवापच्छिद्य पुनरन्यामवाप्यावयन्त्यपि[11] ह्यस्यान्यराष्ट्रीयो[12] राष्ट्रे भवत्यथो
अस्यान्यराष्ट्रमवहृतं[13] भवति तथास्मिन्भूमानं दधाति भूम्नैवैनमेतदभिषिञ्चति भूमा-
नमेवास्मिन्नेताभिर्दधात्येता उ वा एका आपस्ता एवैतत्संभरति ॥७॥

अथ जुहोति नदीपतावपां पतिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां पतिरसि 10
राष्ट्रदा राष्ट्रममुष्मै देहीत्यपां वा एष पतिर्विशः[14] एवैनमेताभिः पतिं करोति विशः[15]
एवैताभिः पतिर्भवत्येता उ वा एका आपस्ता एवैतत्संभरति ॥८॥

अथ जुहोति निवेष्ये[16]ऽपां गर्भो ऽसि राष्ट्रदा राष्ट्रं मे देही स्वाहापां गर्भो 11
ऽसि राष्ट्रदा राष्ट्रममुष्मै देहीत्यपां वा एष गर्भो विश एवैनमेताभिर्गर्भं करोति विशः[17]
एवैताभिर्गर्भो भवत्येता उ वा एका आपस्ता एवैतत्संभरति ॥९॥

13 अथ यदातपति[17] वर्षति तत्पिशीलैर्वोपगृह्णन्ति पात्रीभिर्वा तासु जुहोति सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति सूर्यवर्चसमेवैनमेताभिः करोति सूर्यवर्चा एवैताभिर्भवति ता वा एता असꣳश्लिष्टा आपो ऽप्राप्ता ह्येमां पृथिवीं भवन्त्यस्ति वा अस्याꣳ सꣳश्लिष्टं यदस्यामनृतं वदति मेध्यमेवैनमेताभिः करोत्येता उ वा एका आपस्ता एवैतत्संभरति ॥१०॥

12 अथ यः[18] स्यन्दमानानꣳ स्थावरो ह्रदः[19] प्रत्यातापे[20] तस्मिन्जुहोति सूर्यत्वच स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वच स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति सूर्यत्वचमेवैनमेताभिः[21] करोति सूर्यत्वगेवैताभिर्भवति[22] वरुणसवो[23] वा एष यद्राजसूयमेता वै वरुणगृहीता आपो याः स्यन्दमानानां न स्यन्दन्त एता उ वा एका आपस्ता एवैतत्संभरति ॥११॥

15 अथोदपानादुदाहृत्य तासु जुहोति व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति या वा इमां परेणापस्ता वा एता अपामु चैवैताः[24] सर्वत्वाय कृत्स्नतायै संभरत्येता उ वा एका आपस्ता एवैतत्संभरति ॥१२॥

16 अथ जुहोति प्रुष्वासु वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेत्यन्नं वा एता आप इति ह्येता अन्नमाप इदं[25] यदसावादित्यो ऽग्निर्भूत इमा ओषधीरिदमन्नाद्यं निर्दहति[26] तदेता अभ्यवयत्यः[27] शमयन्ति यद्येता नाभ्यवेयुः पराङेवासावादित्यो ऽग्निर्भूत इमा ओषधीरिदमन्नाद्यं निर्दहेत्तेनैता अन्नमापो ऽन्नेनैवैनमेतदभिषिञ्चत्यन्नमेवास्मिन्नेताभिर्दधात्येता उ वा एका आपस्ता एवैतत्संभरति ॥१३॥

14 अथ जुहोति वैशन्तासु मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति विशमेवास्मा एताभिः[28] स्थावरामनपक्रमिणीं करोति सा वै समृद्धा विड्या स्थावरानपक्रमिण्येता उ वा एका आपस्ता एवैतत्संभरति ॥१४॥

18 अथ जुहोत्युल्ब्यासु[29] शकरो स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शकरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति पशवो वा एता आपः पशुभिरेवैनमेतदभिषिञ्चति पशूनेवास्मिन्नेताभिर्दधात्येता उ वा एका आपस्ता एवैतत्संभरति ॥१५॥

19 अथ जुहोति पयसि जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति पशवो वा एता आपः पशुभिरेवैनमेतदभिषिञ्चति पशूनेवास्मिन्नेताभिर्दधात्येता उ वा एका आपस्ता एवैतत्संभरति ॥१६॥

20 अथ जुहोति घृते विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ

राष्ट्रदा राष्ट्रममुष्मै दत्तांत पशूनां वा एष रसः पशूनामेवैनमेतद्रसेनाभिषिञ्चति पशूनामेवास्मिन्रसमेताभिर्दधात्येता उ वा एका आपस्ता एवैतत्संभरति ॥१७॥

अथ जुहोति मधुनि शैष्ठा[15] स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शैष्ठा[15] स्थ राष्ट्रदा 17
राष्ट्रममुष्मै दत्तेत्यपां च वा एष रस ओषधीनां चापां चैवैनमेतद्रसेनाभिषिञ्चत्योषधीनां चापां चैवास्मिन्रसमेताभिर्दधात्योषधीनां चैता उ वा एका आपस्ता एवैतत्संभरति ॥१८॥

अथाञ्जलिना मरीचीरप्यर्जत्यापः स्वाराज्ञी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेत्येता 21
वा आपः स्वाराज्यो यत्मरीचयस्ता एता अन्यो ऽन्यस्य श्रेष्ठ्यायातिष्ठमाना उत्तराधरा भवन्त्यो यन्ति स्वाराज्यमेवास्मिन्नेताभिर्दधाति स्वाराजैवैताभिर्भवति[16] तद्वै स्वाराज्यं यस्यान्यो[17] न[18] व्यथेष्टिनिविन्न[19] प्रतिराजा तत्स्वाराज्यमेवास्मिन्नेताभिर्दधाति स्वाराजैवैताभिर्भवत्येता[11] उ वा एका आपस्ता एवैतत्संभरति ॥१९॥

ता वा एताः सप्तदशापः संभरति सप्तदशो वै प्रजापतिः प्रजापतिर्वा एष 22.23
तत्प्रजापतिमेवैनं तत्करोति षोळशस्वप्सु जुहोति षोळशाहुतीर्जुहोति तद्द्वात्रिंशदथ द्वयीषु न जुहोति[14] सारस्वतीषु च मरीचिषु च तच्चतुस्त्रिंशत्सम्पद्यते चतुस्त्रिंशद्वै सर्वे देवाः प्रजापतिश्चतुस्त्रिंशस्तत्प्रजापतिमेवैनं[15] तत्करोति ॥२०॥

स यद्धुत्वा हुत्वा गृह्णाति वज्रो वा आज्यं स्तृत्वा[16] स्तृत्वैवैना[16] एतत्स्त्रीकृत्य ताः स्वाः सतीर्गृह्णाति स यत्सारस्वतीषु न जुहोति वज्रो वा आज्यं वाक् सरस्वती नेद्वज्रेण वाचं हिनसानीत्यथ यन्मरीचिषु न जुहोत्यनद्धेव वा एतद्यन्मरीचयो नेदनद्धाहुतिं[17] जुहवानीति[17] ॥२१॥

ताः समवनयति सं मधुमतीर्मधुमतीभिः पृच्यन्तामिति सं रसवत्यो 27
रसवतीभिः पृच्यन्तामित्येवैतदाह महि क्षत्रं क्षत्रियाय वन्वाना इति क्षत्रियायैवैतत्क्षत्रमाशास्ते यदाह[12] महि क्षत्रं क्षत्रियाय वन्वाना इति[13] ॥२२॥

अथ सादयत्यग्नेय मैत्रावरुणस्य धिष्ण्यमनाधृष्टाः सीदत सहौजसेत्यना- 28
धृष्टाः सीदत रक्षोभिर्नाष्टाभिरित्येवैतदाह सहौजसेति सवीर्या इत्येवैतदाह महि क्षत्रं क्षत्रियाय दधतीरिति क्षत्रियायैवैतत्क्षत्रमाशास्ते यदाह[12] महि क्षत्रं क्षत्रियाय दधतीरिति ॥२३॥ द्वितीयं ब्राह्मणम् ॥

1 ऊर्गुदुंबरो O. 2 राजस्व MSS. 3 °षिंचंति B O. 4 वाचमे° MSS. 5 °जुहोति B W. 6 स्यंद-

मानानां न्यतीरेण C O P, स्यंदमानानां प्रतीरेण B, स्यंदमानानां न्प्रतोरेण W, स्यन्दमानानान्न्यतीरेण T, स्यंदमानानान्यतीरे My. 7 Thus C O P W (orig.), स्यंदमाना न्युतीरेण B, स्यंदमानान्प्रतीरेण W (sec. m.), स्यंदमानानां न्यतीरेण My; T broken off. 8 Thus MSS. 9 Conjecturally; पुनरन्यायवाप्यवयंत्यपी C, पुनरन्यायवाप्यवयंत्यपि B W O and without accent My, पुनरन्न्यायवाप्यवयन्त्यपि T. 10 Emended conjecturally, हास्यांनूराष्ट्रीयो O C, हास्यान्नराष्ट्रीयो B W My, हास्यान्नाराष्ट्रीयो T. 11 Conjectural reading; अस्यान (sec. m. अस्यांन B) राष्ट्रमवहृतं B W, अस्यातराष्ट्रमवहृतं O, अस्यांनराष्ट्रमवहृतं My, अस्यांनराष्ट्रमवहृतं C. 12 Read विश instead of विश ? 13 निवेष्व B. 14 यदातपति MSS. except C (orig.). 15 या O (sec. m. याः), या C (orig.) My. 16 हृदः प्रत्यातापे B W O C. 17 सूर्यत्वच° and सूर्यत्वगे° MSS. 18 वरुणसवो B W O C (cp. VII. 3. 3. 2). 19 अपामुवैवैताः O (read perhaps अपामुवेवैताः i. e. अपाम् । उ । एव । एताः). 20 इदं B W O C. 21 निर्दहति MSS. 22 °वर्यत्यः MSS. 23 एताभि C. 24 °व्युल्वासु O. 25 शैष्टाः B, शैष्टा O P My. 26 Thus (only °र्भवति) MSS. Read perhaps स्वराजैवै°. 27 Uncertain reading; °न्यो न व्यवेष्टिनिवन्न with a curve above व (meaning °वेष्टिनिविन्न) B, °न्यो न व्यवेष्टिनिविन्न W, °न्यरोव्यवेष्टीनिवन्न O, °न्परोव्यवेष्टिनिविन्न P, °न्यो न व्यवेष्टि-(or ष्टी)निविनि T. 28 जुहोति B. Read जुहोति ? 29 प्रजापतिश्चतु° MSS. 30 स्तित्वा स्तित्वैवैना O C T, स्तृत्वा स्तृत्वैवैना B W. 31 नेदनद्धादुतिर्जुहवानीति O P,

नेदनद्धावर्तिं जुहवानीति B W C, नेदनद्धाहुतीर्जु॰ T.

32 यदाह supplied by me. 33 इति MSS.

K. VII. 2. 3 M. V. 3. 3

स वै यदैतस्याग्नीषोमीयस्य पशोर्वपया प्रचरन्त्यथैतमग्नीषोमीयं पुरोळाश- 1
मनुनिर्वपति तमनु पुरोळाशमेतानि हवीꣳषि निर्वपति यान्येतानि देवस्वाम् ॥१॥

स वै सवित्रे सत्यप्रसवायाष्टाकपालं वा द्वादशकपालं वा पुरोळाशं निर्व- 2
पति प्लुशुकानाꣳ सविता वै देवानां प्रसविता तमेवैतत्प्रीणाति स एनं प्रीतः प्रसौति
तेन प्रसूतः[1] सूयते स यत्प्लुशुकानां भवति क्षिप्रं मा प्रसुवादिति[2] ॥२॥

अथाग्नये गृहपतये ऽष्टाकपालं पुरोळाशं निर्वपत्याशूनामग्निर्वै गृहपतिः 3
स गार्हपत्यस्येष्टे श्रीरु वै गार्हपत्यं यावतो यावत ईष्टे तद्य एव गृहपतिर्यो गार्हपत्य-
स्येष्टे[3] तमेवैतत्प्रीणाति स एनं प्रीतः श्रियै[4] गार्हपत्याय सुवति गार्हपत्यं प्रापयति स
यदाशूनां भवति क्षिप्रं मा गार्हपत्याय सुवात्क्षिप्रं[5] गार्हपत्यं प्रापयादिति तस्मादा-
शूनां भवति ॥३॥

अथ सोमाय वनस्पतये श्यामाकं चरुं निर्वपति द्व्यानि वै वानस्पत्यानि 4
चक्राण्यनस्यानि च रथ्यानि च तेभ्यो न्वेवैतदुभयेभ्यो ऽरिष्टं[6] करोति सोमो वै
वनस्पतिः स ओषधीनां वनस्पतीनामीष्टे तमेवैतत्प्रीणाति स एनं प्रीत ओषधिभ्यो
वनस्पतिभ्यः सुवति स यच्छ्यामको भवत्येता वै प्रत्यक्षतमाꣳ[7] सोमस्यौषधयो
यच्छ्यामाकास्तस्माच्छ्यामाको भवति ॥४॥

अथ बृहस्पतये वाचे[8] नैवारं चरुं निर्वपति बृहस्पतिर्वै वाच ईष्टे तमेवै- 5
तत्प्रीणाति स एनं प्रीतो वाचे सुवति स यन्नैवारो भवति ब्रह्म वै बृहस्पतिरेते
वै ब्रह्मणा पच्यन्ते यन्नीवारास्तस्मान्नैवारो भवति ॥५॥

अथेन्द्राय ज्येष्ठाय ह्यनानामेकादशकपालं[9] पुरोळाशं निर्वपतीन्द्रो वै 6
ज्येष्ठः[10] सः[10] ज्यैष्ठ्यस्येष्टे[11] तद्य एव ज्येष्ठो यो ज्यैष्ठ्यस्येष्टे तमेवैतत्प्रीणाति स
एनं प्रीतः श्रिये ज्यैष्ठ्याय सुवति ज्यैष्ठ्यं प्रापयति स यद्धायनानां भवत्यतिष्ठा[12]
वा इन्द्रो देवतानामतिष्ठा[13] ओषधीनाꣳ[13] ह्यनास्तस्माद्धायनानां भवति ॥६॥

अथ रुद्राय पशुपतये रौद्रं गावेधुकं चरुं निर्वपति रुद्रो वै पशुपतिः स 7
पशूनामीष्टे तमेवैतत्प्रीणाति स एनं प्रीतः पशुभ्यः सुवति स यद्गावेधुको भवति
वास्तव्यो हि स देवो वास्तव्या हि गवेधुकाः ॥७॥

8 अथ मित्राय सत्यायाम्बानां चरुं निर्वपति ब्रह्म वै मित्रः सत्यस्तमेवैतत्प्रीणाति स एनं प्रीतो ब्रह्मणे सुवति स यदाम्बानां भवति वरुण्या वा एता ओषधयो याः कृष्टाज्जाता अथैते मैत्रा यदाम्बास्तस्मादाम्बानां भवति ॥८॥

9 अथ वरुणाय धर्मपतये वारुणं यवमयं चरुं निर्वपति वरुणो वै धर्मपतिः स धर्मस्येष्टे श्रीरु वै धार्मपत्यं यो हि श्रेष्ठस्तं धर्म उपयन्ति तद्य एव धर्मपतिर्यो धर्मस्येष्टे[14] तमेवैतत्प्रीणाति स एनं प्रीतः श्रिये धार्मपत्याय सुवति धार्मपत्यं प्रापयति स यद्यवमयो भवति वरुण्या हि यवाः ॥९॥

10 तानि नानैव गृह्णाति नानावघ्नन्ति[15] नाना पिंषन्ति नानाधान्यानि[16] हि भवन्ति होतो एवान्वाह होता यजति सर्वाण्युपांशु तदिष्टा देवता भवत्यनिष्टः[17] स्विष्टकृत् ॥१०॥

11 अथैनं दक्षिणं पाणिमभिपद्य वाचयति सविता त्वा प्रसवानां सुवतामश्विर्गृहपतीनां सोमो वनस्पतीनाम् । बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशूनां मित्रः सत्याय वरुणो धर्मपतीनाम् ॥११॥

12 इमं देवा असपत्नं सुवध्वमितीमं देवा अभ्रातृव्यं सुवध्वमित्येवैतदाह महते क्षत्राय महते ज्यैष्ठ्यायेति नात्र तिरोहितमिवास्तीममुममुष्य[18] पुत्रममुष्याः पुत्रमिति यतश्चैव संभवति यतश्च जायते तत एवैनमेतत्सुवत्यस्यै विश इति यस्या विशो भवत्येष वः कुरवो राजेति यदि कौरव्य[19] एष वः पञ्चाला राजेति यदि पाञ्चालः सोमो ऽस्माकं ब्राह्मणानां राजेति तदस्या इदं सर्वमाद्यं करोति ब्राह्मणमेवापोद्धरति तस्माद्ब्राह्मणो नाद्यः[20] सोमराजा हि सः ॥१२॥

14.13 ता वा एताः सर्वा द्विनामानो[21] देवता भवन्ति द्वन्द्वं वै वीर्यं यदा हि द्वितीयमुपयुते ऽथ वीर्यवत्तरो भवति सवीर्या[22] एनमिति वीर्यवत्यो देवताः सुवतामित्येता उ वै देवताः सवस्येशते[23] या एतत्प्रीणाति ता[24] एनं प्रीताः सुवते स यदेनमेता देवताः सुवत[25] एताभिः प्रसूतः सूयते तस्माद्देवस्व[26] इत्याख्यायन्त एष ह्यस्य पूर्वाभिषेकस्तदेनमेताभिः[27] प्रसूतं श्वो भूते ऽभिषिञ्चति ॥१३॥

15 अथाह्नये स्विष्टकृते ऽनुब्रूहीत्यग्निं स्विष्टकृतं यजेति वषट्कृते जुहोति स यदुभे आहुती अन्तरेणैतत्कर्म क्रियत एष वाव प्रजापतिर्यज्ञो य एष तायत एतस्यैवैनमेतत्प्रजापतेर्यज्ञस्य मध्यत आदधाति मध्यतो ऽभिषिञ्चत्यथेळामुपह्वय[28] मार्जयन्ते ॥१४॥ तृतीयं ब्राह्मणम् ॥

1 प्रसूतः MSS. 2 °दिति B W O. 3 °पत्यस्येष्टे MSS. 4 श्रिये O. 5 Emended; सुवाक्षिप्रं O C, सुवक्षिप्रं B W, सुवाक्षिप्रं My T. 6 रिषिं O, रिष्टिं My (cp. VII. 3. 3. 14). 7 प्रत्यक्षतमाꣳ O C My, प्रत्यक्षतमाः B W (cp. V. 2. 1. 20). 8 वाचे MSS. 9 हायनाना° MSS. 10 Emended; ज्येष्ठस्य B W, ज्येष्ठस्यै O, ज्येष्ठस्य C T My. 11 °स्येष्टे B W. 12 °तिष्ठा B O. 13 Emended; °तिष्ठौ-(or ष्ठो) षधीनाꣳ MSS. 14 धर्मस्येष्टे MSS. 15 नानावक्षंति MSS. 16 नानाधान्यानि MSS. 17 भवत्यनिष्टः O, भवंत्यनिष्टः B W C. 18 °मसुमसुष्य B O. 19 कौरव्य MSS. 20 Thus accented also VII. 3. 2. 3. 21 Thus B W C and without accent My T, द्विनामो O. 22 सुवीर्या B W. 23 सवस्येशते MSS. 24 Thus emended; या MSS. 25 सुवत MSS. 26 °देवस्व MSS. 27 Thus (पूर्वाभि°) MSS. Read probably पूर्वाभि°, cp. Mādhyandina IX. 4. 3. 16. 28 °मुपहूय MSS.

K. VII. 2. 4 M. V. 3. 5

तं वै माध्यंदिने सवने ऽभिषिञ्चति[1] स यदेनं माध्यंदिने सवने ऽभिषिञ्चत्येष[1] 1
वाव प्रजापतिर्यज्ञो य एष तायत एतस्यैवैनमेतत्प्रजापतेर्यज्ञस्य मध्यत आदधाति मध्यतो ऽभिषिञ्चति तस्मादेनं माध्यंदिने सवने ऽभिषिञ्चति[2] ॥१॥

अगृहीते माहेन्द्रे ग्रह एष वा इन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रो ऽप्यस्यै- 2
तन्निष्केवल्यमेव स्तोत्रं निष्केवल्यꣳ शस्त्रं द्व्येन वा एष इन्द्रो यच्च क्षत्रियो यच्च यजमानः स्व एवैनं तदायतने ऽभिषिञ्चति तस्मादगृहीते माहेन्द्रे[3] ग्रहे[3] ॥२॥

अथाग्रेण[4] मैत्रावरुणस्य धिष्ण्यं तदस्मै शार्दूलचर्मोपस्तृणाति[4] सोमस्य 3
त्विषिरसीति यत्र वा अद इन्द्रꣳ सोमो ऽत्यपवत ततः शार्दूलः समभवत्तस्मादाह सोमस्य त्विषिरसीति[5] ॥३॥

4 अथास्मै पार्थानि जुहोति स यदस्मै पार्थानि जुहोति पृथी[1] ह वै वैन्यः प्रथमो मनुष्याणामभिषिषिचे[2] सो[3] ऽकामयत सर्वमन्नाद्यमवरुन्धीयेति यच्च ग्राम्यं यच्चारण्यमिति तस्मा एतान्यजुहवुः स सर्वमन्नाद्यमवारुन्द्ध[4] यच्च ग्राम्यं यच्चारण्यमपि ह्यस्यारण्याः पशवो ह्वमेयुरसावेहि[5] राजा त्वा पक्ष्यत[6] इति तथा सर्वमन्नाद्यमवरुरुध[7] एव[8] ह वाव सर्वमन्नाद्यमवरुन्द्धे यच्च ग्राम्यं यच्चारण्यं यस्यैवं विदुष एतानि जुह्वति स यदेतानि पृथ्यै वैन्यायाजुहवुस्तस्मात्पार्थानि[9] नाम ॥४॥

5.6 तानि वै द्वादश जुहोति द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश जुहोति षट् पुरस्तादभिषेकस्य जुहोति षळुपरिष्टादेष वाव प्रजापतिर्यज्ञो य एष तायत एतस्यैवैनमेतत्प्रजापतेर्यज्ञस्य मध्यत आदधाति मध्यतो ऽभिषिञ्चति तस्मात्षट् पुरस्तादभिषेकस्य जुहोति[10] षळुपरिष्टात्तद्यानि पुरस्तादभिषेकस्य षड् जुहोति बृहस्पतिस्तेषामुत्तमो ऽथ यान्युपरिष्टादभिषेकस्य षड् जुहोतीन्द्रस्तेषां प्रथमो ब्रह्म वै बृहस्पतिः क्षत्रमिन्द्रो ब्रह्मणा चैवैतत्क्षत्रेण चोभाभ्यामनन्तर्हिताभ्यां परिवृ[11]ह्वति[12] तस्य नार्तिर्न ह्वला भवति ब्रह्मणा च क्षत्रेण चोभयतः परिगृहीतस्य[13] ॥५॥

7 स जुहोत्यग्नये स्वाहेति तेजो वा अग्निस्तेजसैवैनं तदभिषिञ्चति सोमाय स्वाहेति क्षत्रं वै सोमः क्षत्रेणैवैनं तदभिषिञ्चति सवित्रे स्वाहेति सविता वै देवानां प्रसविता सवितृप्रसूत एवैनं तदभिषिञ्चति सरस्वत्यै स्वाहेति वाग्वै सरस्वती वाचैवैनं तदभिषिञ्चति पूष्णे स्वाहेति पशवो वै पूषा पशुभिरेवैनं तदभिषिञ्चति बृहस्पतये स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तदभिषिञ्चत्येतानि पुरस्तादभिषेकस्य षड् जुहोत्यथाभिषिक्ते[14] जुहोति ॥६॥

9.10 इन्द्राय स्वाहेतीन्द्रियं वै वीर्यमिन्द्र इन्द्रियेणैवैनं तद्वीर्येणाभिषिञ्चत्य[15]शाय स्वाहेति वीर्यं वा अ[15]शो वीर्येणैवैनं तदभिषिञ्चति श्लोकाय स्वाहेति वीर्यं वै श्लोको वीर्येणैवैनं तदभिषिञ्चति घोषाय स्वाहेति वीर्यं वै घोषो वीर्येणैवैनं तदभिषिञ्चति भगाय स्वाहेति वीर्यं वै भगो वीर्येणैवैनं तदभिषिञ्चत्यर्यम्णे स्वाहेत्यस्यैवैनमेतत्सर्वस्यार्यमणं करोति[16] सो[17] ऽस्य सर्वस्यार्यमा भवति तद्यान्येतान्युपरिष्टादभिषेकस्य षड् जुहोत्यादित्यनामानीत्येतान्याख्यायन्ते ऽथैतान्यभिषेचनीयानि पात्राण्युपनिहितानि[18] भवन्ति ॥७॥

11 तत्पालाशं भवति तेन ब्राह्मणो[19] ऽभिषिञ्चति ब्रह्म वै पलाशो ब्रह्म वै ब्राह्मणस्तस्मात्पालाशेन[20] ब्राह्मणो[21] ऽभिषिञ्चति ॥८॥

औदुम्बरेण स्व ऊर्ग्वै स्वं यावद्ध[13] स्वं[14] भवति न हि तावदशनायति[15] 12
तस्मादौदुम्बरेण[16] स्वः ॥९॥

नैयग्रोधपादेन[17] मित्र्यः[18] पङ्क्तिर्वै न्यग्रोधः प्रतिष्ठितो मित्रेण वै क्षत्रं प्रतिष्ठितं 13
तस्मान्नैयग्रोधपादेन[19] मित्र्यः[20] ॥१०॥

आश्वत्थेन वैश्यो मारुतो वा अश्वत्थो यदश्वत्थे तिष्ठत इन्द्रो मरुत 14
उपामन्त्रयत तेन मारुतो ऽश्वत्थो विशो वै मरुतो[21] ऽन्नमु वै विशस्तस्मादाश्वत्थेन
वैश्यः[22] ॥११॥

अथ सुषिरे इव हिरण्ये कृते भवस्ते पवित्रयोः प्रोते भवतो[23] सो न्वेव 15
पवित्रयोर्बन्धुता[24] यै वासौ दर्शपूर्णमासयोरथ[25] यत्सुषिरे इव हिरण्ये प्रोते भवत
आयुर्वा अमृतꣳ हिरण्यमायुरेवैतदमृतमेतास्वभिषेचनीयास्वप्सु दधाति तस्माद्धिरण्ये
प्रोते भवतः[26] ॥१२॥

स उत्पुनाति सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पावित्रेण सूर्यस्य रश्मिभि- 16-18
रिति सो ऽसावेवैतस्य यजुषो बन्धुरनिभृष्टमसि[27] वाचो बन्धुस्तपोजा इत्यनाधृष्टा
स्थ रक्षोभिर्नाष्ट्राभिरित्येवैतदाह यदाहानिभृष्टमसीति वाचो बन्धुरिति यावद्वै पुरुष
आपो भवन्ति तावद्वै वाचा वदति तस्मादाह वाचो बन्धुरिति तपोजा[28] इत्यग्नेर्वै
धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्निरुवै तपस्तस्मादाह तपोजा[29] इति सोमस्य
दात्रमसीति यदा वा अद्भिः सोमꣳ राजानमुपसृजन्त्यथ[30] वै[31] सो[32] ऽलमाहुतये[33]
भवदलं[34] भक्षाय तस्मादाह सोमस्य दात्रमसीति स्वाहा राजस्व[35] इति तदेना एतेन
स्वाहाकारेण पुनाति ॥१३॥

अथैतेष्वभिषेचनीयेषु पात्रेषु व्यानयति सधमादो द्युम्निनीराप एता इत्यन- 19
तिमानिन्य इत्येवैतदाह यदाह सधमाद इति द्युम्निनीरिति वीर्यवत्य इत्येवैतदाहा-
नाधृष्टा अपस्यो वसाना इत्यनाधृष्टा रक्षोभिर्नाष्ट्राभिरित्येवैतदाह पस्त्यासु चक्रे वरुणः
सधस्थमिति क्षत्रं वै वरुणो विशः पस्त्या विश्षु चक्रे वरुणः प्रतिष्ठामित्येवैतदाहापाꣳ
शिशुर्मातृतमास्वन्तरित्यपाꣳ ह्येष शिशुर्भवति[36] यो राजसूयेन यजते तस्मादाहापाꣳ
शिशुर्मातृतमास्वन्तरिति[37] ॥१४॥

अथैनमेतानि वासाꣳसि परिधापयति तत्तार्प्यमिति[38] वासो भवति 20
तस्मिन्त्सर्वाणि यज्ञरूपाणि निष्यूतानि भवन्ति तदेनं परिधापयति क्षत्रस्योल्बम-
सीति क्षत्रस्य वा एतदुल्बꣳ स यदेव क्षत्रस्योल्बं तत एवैनमेतज्जनयति ॥१५॥

21 अथ पाण्डुं क्षत्रस्य जारायवसीति क्षत्रस्य वा एतज्जरायु स यदेव क्षत्रस्य जरायु तत एवैनमेतज्जनयति ॥१६॥

23 अथ सꣳहृत्य पुरस्तादुष्णीषमवगूहति क्षत्रस्य नाभिरसीति क्षत्रस्य वा एषा नाभिः स यैव क्षत्रस्य नाभिस्तत एवैनमेतज्जनयति ॥१७॥

24.22 तद्धैके समन्तं परिवेष्टयन्ति तदु तथा न कुर्यात्पुरस्तादेवावगूहेत्पुरस्ताद्धीयं नाभिरथाधिवासं क्षत्रस्य योनिरसीति क्षत्रस्य वा एषा[53] योनिः सा[54] यैव क्षत्रस्य योनिस्तत एवैनमेतज्जनयति स यदेनमेतानि वासाꣳसि परिधापयति जनयत्येवैनं तज्जातमेनमभिषिञ्चामेति ॥१८॥

25.26 तद्धैके परिधाप्यैव पुनर्निधायाथ दीक्षितवसनं परिधापयन्ति तदु तथा न कुर्यादङ्गानि वा अस्यैतानि जन्वो[55] ऽङ्गैर्हैन[56]ꣳ सजन्वा[55] व्यर्धयति तस्मादत एवैकतमं वसीत तथा हैनमङ्गैर्जन्वा[56] न व्यर्धयति वरुण्यमु वै दीक्षितवसनं तथो वरुण्याद्दीक्षितवसनात्प्रमुच्यते स यत्रावभृथमभ्यवैति तदेतत्प्रतिवेशं पार्श्वतो ऽन्वभ्यवहरन्ति तदु सलोम क्रियते ऽथात एवैकतमं वसानः पुनरुदैति तान्यनुबन्ध्यायां वा वशायां ददात्युदवसानीयायां[57] वेष्टौ ॥१९॥

27 अथास्मै धनुरुज्ज्यं[58] करोतीन्द्रस्य वार्त्रघ्नमसीति वार्त्रघ्नं वा एतद्यद्धनुर्ज्यया वा एष इन्द्रो यच्च क्षत्रियो यच्च यजमानस्तस्मादाहेन्द्रस्य वार्त्रघ्नमसीति त्वयायं वृत्रं वध्यादिति त्वयायं द्विषन्तं भ्रातृव्यꣳ हन्त्वित्येवैतदाह यदाह त्वयायं वृत्रं वध्यादिति[59] ॥२०॥

28 अथ बाहू विमार्ष्टि[60] मित्रस्यासि वरुणस्यासीति बाह्वोर्वै धनुर्बाहुभ्यां वै मैत्रावरुणो राजन्यस्तस्मादाह मित्रस्यासि वरुणस्यासीति[61] ॥२१॥

29 अथास्मा इषूस्तिस्रः प्रयच्छति तिस्रो ह वा इषव इदं नु यया समर्पणेन पराभिनत्ति सैका सेयं पृथिवी सैषा रुजा नामाथ यया विद्धः शिश्यानो[62] जीवति वा म्रियते वा सा द्वितीया तदिदमन्तरिक्षꣳ[63] सैषा द्रुवा[64] नामाथ ययापैव राध्नोति सा तृतीया[65] सासौ[65] द्यौः सैषा क्षुपा नामैता हि वै तिस्र इषवस्तस्मादस्मा इषूस्तिस्रः प्रयच्छति स यदस्मा इषुधनुः प्रयच्छति[66] धनुर्वै राजन्यस्य वीर्यं धनुषा हि राजन्यो वीर्यं करोति[67] जात एवास्मिन्नेतद्वीर्यं दधाति सवीर्यमेनमिति वीर्यवन्तमभिषिञ्चामेति[68] ॥२२॥

अथैनमभिमृशति पातैनं प्राञ्चं पातैनं प्रत्यञ्चं पातैनं तिर्यञ्चं दिग्भ्यः पातेति 30
सर्वाभ्य एवास्मा एतद्दिग्भ्यो[1] ऽशरव्यं करोति तस्मै सर्वाभ्यो दिग्भ्यो[2] ऽशरव्यं
भवति ॥२३॥

अथैनमाविदो वाचयत्याविर्मर्या इत्यनिरुक्तमनिरुक्तो वै प्रजापतिस्तदेनं 31
प्रजापतय आवेदयति सो ऽस्मा एतꣳ सवमनुमन्यते तेनानुमतः सूयते ॥२४॥

आवित्तो अग्निर्गृहपतिरिति ब्रह्म वा अग्निस्तदेनं ब्रह्मण आवेदयति सो 32
ऽस्मा एतꣳ सवमनुमन्यते तेनानुमतः सूयते ॥२५॥

आवित्त इन्द्रो वृद्धश्रवा इति क्षत्रं वा इन्द्रस्तदेनं क्षत्रायावेदयति सो ऽस्मा 33
एतꣳ सवमनुमन्यते तेनानुमतः सूयते ॥२६॥

आवित्तः पूषा विश्ववेदा इति पशवो वै पूषा तदेनं पशुभ्य आवेदयति ते 35
ऽस्मा एतꣳ सवमनुमन्यन्ते तैरनुमतः सूयते ॥२७॥

आवित्तौ मित्रावरुणौ धृतव्रताविति प्राणोदानौ वै मित्रावरुणौ तदेनं प्राणो- 34
दानाभ्यामावेदयति तावस्मा एतꣳ सवमनुमन्येते ताभ्यामनुमतः सूयते ॥२८॥

आवित्ते द्यावापृथिवी विश्वशम्भू इति तदेनमाभ्यां द्यावापृथिवीभ्यामावेद- 36
यति ययोरिदꣳ सर्वमधि ते अस्मा एतꣳ सवमनुमन्येते ताभ्यामनुमतः सूयते ॥२९॥

आवित्तादितिरुरुशर्मेतीयं वा अदितिस्तदेनमस्यै पृथिव्या आवेदयति सास्मा 37
एतꣳ सवमनुमन्यते तयानुमतः सूयते स यदेनमेताभ्यो देवताभ्य आवेदयत्येताभि-
रनुमतः[3] सूयते तस्मादाविदो[4] नाम तस्माद्वैवैनमाविदो वाचयति ॥३०॥ चतुर्थं
ब्राह्मणम् ॥ द्वितीयो ऽध्यायः ॥

1 °र्भिषिंचति C. 2 भिषिंचत्येष B O, भिषिंचंत्येष C, भिषिंचंत्येष W; My everywhere singular. 3 °र्षिंचंति O C T. 4 माहेंद्रे ग्रहे B, महेंद्रे O. 5 अथाग्रेण O, अथाग्रेण B C, अथाग्रेण W. 6 शार्दूल° B W. 7 °सीति MSS. 8 Emended; पृथ्वी B W My, पृथिवी O C, पृथिवी T. 9 °मत्यिषिषिवे सो O, °मभिर्षिंचेत्सो B W, °मभिर्षिंचे सो T. 10 °मवारुंध्य B, °मवरुंध O. 11 हव° MSS. 12 Emended; वक्ष्यत MSS. 13 Emended; °मवरुोध O, °मवारु-

रोध B W, °भवरुरोध C. 14 वैन्यायाजुं° MSS. 15 No accent in the MSS. 16 परिवृंहति T. 17 परिगृहीतस्य O W C, परिगृहीतस्य B. 18 °त्यथाभिषिक्ते MSS. 19 करोति सो B W O, करोति सो C. 20 °पनिहितानि O, °पनिहितानि B W, °ण्युपनिहितानि C. 21 ब्राह्मणो or ब्राह्मणो in the MSS. 22 °स्मात्पालाशेन B W, °स्मात्पलाशेन O. 23 Emended; यावध्यस्वं O P, यावध्यंस्वं B, यावंध्यस्वं W, यावद्धयस्वं C, यावद्धयसं T, यावद्यस्वं My. 24 तावदशनायति MSS. 25 °ण MSS. 26 नैर्यग्रोधपादेन MSS. 27 मित्रियः B W C (sec. m.), मित्रियः T. 28 तस्मान्नैर्यग्रोधपादेन B. 29 मित्रियः or मित्रियः MSS. 30 मरुतो B W. 31 वैश्यः B W O. 32 भवतो W C, भवतो B O. 33 °बँधुता MSS. 34 दर्शपौर्ण° B W T. 35 भवतः MSS. 36 B My insert इति. 37 तपोजा C. 38 Thus MSS. Read perhaps °त्थ वै सो ऽलमाहुतये भवत्यलं. 39 Thus accented in MSS. 40 °भँवति MSS. 41 °रिति MSS. 42 तत्तार्यमिति B W My, तत्तार्पमिति O, तत्तार्प्यमिति T. 43 एष B W. 44 स B W C, स O My, सा T. 45 जन्वोंगैहैंनꣳ सजंन्वा B W, जन्वोंगैहैंनꣳ सजन्वा C, जन्वोगैहैंनꣳ सजन्वा O P. Read probably जन्वो. 46 हैनमंगैजन्वा B W C, हैनमंगैजैन्वा O. 47 ददात्युं° O C, ददात्युं° B W. 48 धनुरुज्यं B W O C T. 49 °दिति MSS. 50 निमार्ष्टि T. 51 °सीति MSS. 52 शिष्यानो MSS. 53 °रिक्षꣳ MSS. 54 दबा O, द्बा C My, ड (?) वा T. 55 तृतीया सासौ B W C, तृतीया सासौ O. 56 प्रय° MSS. 57 करोति

MSS. 58 °मेति MSS. 59 एतद्दिग्भ्यो MSS.
60 दिग्भ्यो B C, सर्वाभ्यो दिग्भ्यो W. 61 आवेदय° MSS. 62 °दाविदो MSS.

K. VII. 3. 1 M. V. 4. 1

स वै केशवस्य पुरुषस्य लोहायसमास्य आविध्यत्यवेष्टा दन्दशूका इति 1
सर्वान्वा एष दन्दशूकानतिमुच्यते सर्वान्वधान्त्सर्वान्मृत्यून्यो राजसूयेन यजते तद्य
एव दन्दशूको यो ऽन्यो मृत्युर्यो वधस्तमेवैनमेतदतिनयति तस्य नान्यान्तरेणार्तिर्न
ह्वला भवति स जरा मृत्युरेव भवति ॥१॥

स यत्केशवस्य पुरुषस्य न वा एष स्त्री न पुमान्यत्केशवो नो वा एते 2
क्रिमयो नाक्रिमयो यद्दन्दशूकाः स यल्लोहायसं लोहिता इव हि दन्दशूकाः ॥२॥

अथैनं दिशः समारोहयति प्राचीमारोह गायत्री त्वावतु रथंतरꣳ साम 3
त्रिवृत्स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम् ॥३॥

दक्षिणामारोह त्रिष्टुप्त्वावतु बृहत्साम पञ्चदश स्तोमो ग्रीष्म ऋतुः 4
क्षत्रं द्रविणम् ॥४॥

प्रतीचीमारोह जगती त्वावतु वैरूपꣳ साम सप्तदश स्तोमो वर्षा 5
ऋतुर्विड् द्रविणम् ॥५॥

उदीचीमारोहानुष्टुप्त्वावतु वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फलं 6
द्रविणम् ॥६॥

ऊर्ध्वामारोह पङ्क्तिस्त्वावतु[1] शाक्वररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ 7
स्तोमौ हेमन्तशिशिरा ऋतू वर्चो द्रविणमिति ॥७॥

स यदेनमेवं दिशः समारोहयति यदतून्यत्स्तोमान्यच्छन्दाꣳसि यत्सामा- 8
न्यृतूनां वा एतत्संवत्सरस्य रूपमृतूनेवैनमेतत्संवत्सरꣳसमारोहयति स ऋतून्त्संव-
त्सरꣳ समारुह्य सर्वमिदमुपर्युपरि भवति[2] नास्मार्त्किं चन वरं भवत्यर्वागेवास्मा-
दन्यत्सर्वं भवति ॥८॥

अथ जघनेन शार्दूलचर्म सीसं निहितं भवति तत्प्रत्यस्यति प्रत्यस्तं नमुचेः 9.10
शिर इति नमुचिर्ह वै नामासुर[3] आस[3] तꣳ हेन्द्रो निविव्याध तस्य निविद्धस्य[4]
पदा शिरो ऽभितष्ठौ स यच्छिरसोदवाधत[5] स एष उच्छङ्क इव पदस्तत्प्रचिच्छेद
तद्ध स्म देवाननु भाषमाणं चरति कैष्यथ[6] न मे मोक्ष्यध्व[6] इति ततो ह देवा एतं

वज्रं ददृशुर्यत्सीसं[4] तेन तदपजघ्नस्तस्मादेतत्सृतजवं[5] यत्सीस[6] हिरण्यरूप[7] सदनघं[8] मृदु निर्वीर्य[9] सृतजव[10] ह्येतत्तथो वा एष एतेन वज्रेण नाष्ट्रा रक्षा[11]स्यपहन्ति[12] विजिते ऽभये ऽनाष्ट्रे सूया इति[13] ॥९॥

11 अथ शार्दूलचर्मारोहति सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादिति शार्दूलत्विषिमेवास्मिन्नेतद्दधाति[14] ॥१०॥

12 अथाधस्तात्पदो रुक्ममुपोहति मृत्योः पाहीति ते ये ऽस्यां पृथिव्यां मृत्यवस्तेभ्य एवैनमेतदन्तर्दधाति ॥११॥

13 अथ शतवितृण्णं वा रुक्ममाहरन्ति नववितृण्णं वा स यद्यह[15] शतवितृण्णो भवति शतायुर्वा अयं पुरुषः शतवीर्यः शततेजास्तस्मान्नु शतवितृण्णो यद्यु नववितृणो नव वा इमे पुरुषे प्राणास्तस्मान्नववितृण्णः ॥१२॥

14 तमधिनिदधात्योजो ऽसि सहो ऽस्यमृतमसीत्योजो ह्येतत्सहो ह्येतदमृत[16] ह्येतत्स यदुभयतो[17] रुक्मौ करोत्यायुर्वा अमृत[18] हिरण्यमायुषैवैनमेतदमृतेनोभयतः परिगृह्णाति तस्य नार्तिर्न ह्रला भवत्यायुषामृतेनोभयतः परिगृहीतस्य ॥१३॥

15 अथ बाहू उद्गृह्णाति हिरण्यरूपा उषसो विरोक उभा इन्द्रा उदितः सूर्यश्च। आरोहतं वरुण मित्र गर्तमिति बाहू वै मित्रावरुणावात्मो[19] वै गर्तस्तस्मादाहारोहतं वरुण मित्र गर्तमिति ततश्चक्षाथामदितिं दितिं चेति ततः पश्यत[20] स्वं चारणं चेत्येवैतदाह यदाह ततश्चक्षाथामदितिं दितिं चेति ॥१४॥

16.17 तदाहुर्मित्रो[21] ऽसि वरुणो ऽसीत्येतावतैव[22] बाहू उद्गृह्णीयादिति बाहू हि मित्रावरुणाविति स यदेनमूर्ध्वबाहुमभिषिञ्चति रसो वा अयं वीर्यं तेज इदमपा[23] संभृतं येनैनमेतदभिषिञ्चति बाह्वोरु वै राजन्यस्य वीर्यं बाहुभ्या[24] हि राजन्यो वीर्यं करोति नेन्मे ऽय[25] रसो वीर्यं तेज इदमपा[26] संभृतं बाहू व्लिनान्नेन्मे बाह्वोर्वीर्यं प्रमुष्णादिति[27] तस्मादेनमूर्ध्वबाहुमभिषिञ्चति ॥१५॥ प्रथमं ब्राह्मणम्

1 पड्वि° C. 2 भवति MSS. but cp. VII. 3. 2. 6. 3 नामासुररक्षसमास T. 4 Thus emended; cp. II. 7. 2. 2, निविद्धः B W C, निविधधः O, निविद्ध T My. 5 °बाधत O C T. 6 क्लैष्यथ MSS. 7 मोक्ष्यध्व MSS. 8 °र्थंत्सीसं B. 9 °तछृतजवं B W C My, °तछृतअवं O, °तच्छृतिअवं T. 10 सदनघं

MSS. 11 Thus C, श्रुत° B W O, श्रुत° My. 12 °स्यवहंति B W O C My, °स्यवंति T. 13 इति MSS. 14 Thus (°ष्विषि°) MSS. 15 यद्युह B. 16 °भयतो B W O C (orig.). 17 °ष्मा B W. 18 तदाह मित्रो B W. 19 °लेतावैते B W. 20 प्रमुष्णादिति O C, प्रमुळादिति B W, but B with ष्णा on the margin.

K. VII. 3. 2 M. V. 4. 2

स वै पुरस्तादध्वर्युर्वा पुरोहितो वाभिषिञ्चति पश्चादितरे[1] ॥१॥ 1

सो ऽभिषिञ्चति सोमस्य त्वा द्युम्नेनाभिषिञ्चामीति वीर्येणेत्येवैतदाह यदाह 2
सोमस्य त्वा द्युम्नेनाभिषिञ्चामीत्यग्नेर्भ्राजसेति वीर्येणेत्येवैतदाह सूर्यस्य वर्चसेति वीर्येणेत्येवैतदाहेन्द्रस्येन्द्रियेणेति वीर्येणेत्येवैतदाह मरुतामोजसेति वीर्येणेत्येवैतदाह क्षत्राणां क्षत्रपतिरेधीति राज्ञामधिराज एधीत्येवैतदाह यदाह क्षत्राणां क्षत्रपतिरेधीत्यति दिद्यून्पाहीतीषवो वै दिद्युत इषुवधमेवैनमेतदतिनयति[2] तस्मादाहाति दिद्यून्पाहीति ॥२॥

इमं देवा असपत्नꣳ सुवध्वमितीमं देवा अभ्रातृव्यꣳ सुवध्वमित्येवैतदाह 3
महते क्षत्राय महते ज्यैष्ठ्यायेति नात्र तिरोहितमिवास्ति महते जानराज्यायेति महते जनानाꣳ राज्यायेत्येवैतदाहेममसुमसुष्य पुत्रमसुष्याः पुत्रमिति यतश्चैव संभवति यतश्च जायते तत एवैनमेतत्सुवत्यस्यै विश इति यस्या विशो भवत्येष वः कुरवो राजेति यदि कौरव्य[3] एष वः पञ्चाला राजेति यदि पाञ्चालः[4] सोमो ऽस्माकं ब्राह्मणानाꣳ राजेति तदस्मा इदꣳ सर्वमाद्यं करोति ब्राह्मणमेवोपोद्धरति तस्माद्ब्राह्मणो नाद्यः[5] सोमराजा हि सः ॥३॥

अथेममभिषेकं कृष्णविषाणयानुविनयति रसो वा अयं[1] वीर्यं तेज इदमपाꣳ 4
संभृतं येनैनमेतदभिषिञ्चति स मे सर्वमात्मानमनुव्ययत्येन[2] कृत्स्नः सर्वतनूः सꣳस्पृशा इति तस्मादनुविनयति[3] ॥४॥

सो ऽनुविनयति प्र पर्वतस्य वृषभस्य पृष्ठादिति यथा वै पर्वत इदꣳ सर्व- 5
मतिष्ठावा यथर्षभः पशूनामतिष्ठावैवं वा एष सर्वमतिष्ठावा भवति[1] यो राजसूयेन यजते तस्मादाह प्र पर्वतस्य वृषभस्य पृष्ठादिति नावश्चरन्ति स्वसिच इयानाः। ता

आववृत्रन्नधरागुदक्ता अहिं बुध्न्यमनु रीयमाणा इत्ययं वा अहिर्बुध्न्यस्तमेता[1] अनु[2] स्यन्दन्ते[3] तस्मादाहाहिं बुध्न्यमनु रीयमाणा इति[4] ॥५॥

6 अथान्तरेव[5] शार्दूलचर्मणि विष्णुक्रमान्क्रमते विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसीतीमे वै लोका विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तमिमानेवैनमेतल्लोकान्त्समारोहयति स इमांल्लोकान्त्समारुह्य सर्वमिदमुपर्युपरि भवति नास्मात्किं चन वरं भवत्यर्वागेवास्मादन्यत्सर्वं भवति ॥६॥

7 अथ ब्राह्मणस्य पात्रे स[6]स्रवान्त्समवनयति राजानमेवैतदनु ब्राह्मणं यशस्करोति तस्माद्राजानमनु ब्राह्मण एव यशो ऽथो ब्रह्मण एवैतदिमाः[7] प्रजा बलिꣳ हारयति तस्माद्ब्रह्मणः प्रजा रद्धा इत्याहुः ॥७॥

8 तदु स प्रतिहिताय पुत्राय प्रयच्छत्ययं मे पुत्र इदं कर्मेदं वीर्यमनुसंतनोत्विति तथा हास्यैष पुत्र एतत्कर्मैतद्वीर्यमनुसंतनोति तथैष एतस्मान्न पापीयान्भवति ॥८॥

9 तस्मिन्नन्वारब्धे गार्हपत्ये जुहोति प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्त्वित्ययममुष्य पितेत्याहुर्यः[8] पुत्रस्तं पितरं करोति[9] यः पिता तं पुत्रं तदेनयोर्वीर्यं व्यतिषजति तथैष एतस्मान्न पापीयान्भवत्ययममुष्य[10] पितेत्याह तदेनयोर्वीर्यं व्यतिषज्याथ[11] यथायथं करोति य एव पिता तं पितरं यः पुत्रस्तं पुत्रं[12] वयꣳ स्याम पतयो रयीणाꣳ स्वाहेत्याशिषमेवैतदाशास्ते ॥९॥

10 अथ यो ऽयमतिरिक्तः स[13]स्रवश्चष्ये[14] भवति तमाग्नीध्रे जुहोत्यतिरिक्तो वा एष स[15]स्रवो ऽतिरिक्त उ वा आग्नीध्रो गार्हपत्ये हि हवीꣳषि श्रपयन्त्याहवनीये जुह्वत्यतिरिक्त एवैतदतिरिक्तं दधात्यतस्मा उ वा एतदेवाय जुहोत्येष एतस्य देवस्य दिक्तस्मादाग्नीध्रे जुहोति स जुहोति रुद्र यत्ते क्रविꣳ परं नाम तस्मै हुतमस्यमेष्टमसि[16] स्वाहेति ॥१०॥ द्वितीयं ब्राह्मणम् ॥

1 °दितरे MSS. 2 इषुवधमे° B W. 3 कौरव्य B W, कौरव्य O C. 4 पंचालः B. 5 Thus also VII. 2. 3. 12. 6 अयं MSS. 7 Thus C My, °नमनुनव्ययत्येनं B W, °नमनुवयंत्येनं O P, °नमनुव्ययत्येन T (anuvyáyati, Subjunctive). 8 °नयति

MSS. 9 भवति MSS. 10 °स्तमेता अनुस्यंदते B, °स्तमेता अनुस्यंदते C W My, °स्तमेत्राज्जनस्यंदते O, °स्तमेता अनु स्यन्दते T. 11 इति MSS. 12 °रेव B W O, °रेणव C. 13 °दिमाः B O. 14 Thus MSS. Read perhaps पितेत्याह यः. 15 करोति B W. 16 Instead of अयममुष्य we expect असावस्य. 17 व्यतिषजत्यथ O P. 18 पुत्रं MSS. 19 °श्वप्ये O P, °श्वयो B W. 20 हुतमस्येमेष्ट° O.

K. VII. 3. 3 M. V. 4. 3

स वै स्वस्य गाः शतं वा परःशता वोत्तरेणाग्नीध्रꣳ सꣳरुणद्धि ताः 1.2
सꣳरुध्याथास्मै रथमुपावहरति स यदस्मै रथमुपावहरति वरुणाद्वाभिषिषिचानाद्भर्गो ऽपचक्रामेन्द्रियं वै वीर्यं भर्ग इन्द्रियꣳ हैवास्माद्वीर्यमपचक्राम शश्वद्ध यदेवैतत्तेजो वीर्यꣳ रस एषो ऽपाꣳ संभृतस्तद्धैवास्य शश्वद्भर्गं निर्जघान ॥१॥

तमु वै वरुणो ऽन्वैच्छत्तं पशुष्वन्वविन्दत्तस्मात्पशवो यशो यदेषु वरुण इन्द्रियं वीर्यमन्वविन्दत्तदनुविद्य तदात्मन्यकुरुत तदात्मन्यधत्ताथ यदेष एतत्कर्म करोति नाहवैतस्मादभिषिषिचानात्तथेन्द्रियं वीर्यमपक्रामतीति[1] वरुणो[2] ऽकरोदिति[3] त्वेवैष[4] एतत्करोति वरुणसवो[5] ह्येष यद्राजसूयमथो यदस्मादभिषिषिचानादिन्द्रियं वीर्यं पशूनभ्यपक्रामति[6] तदेवैतदात्मनि कुरुते तदात्मनि धत्ते ॥२॥

अथ यदस्मै रथमुपावहरति यद्वै क्षत्रियादपक्रामति रथेन वै स तदनुयुङ्क्ते[7] 3
रथेन तत्स्पृणोति यदस्य स्पर्तव्यं[8] तस्मादस्मै रथमुपावहरति ॥३॥

स उपावहरतीन्द्रस्य वज्रो ऽसीति वज्रो वा एष यद्रथो द्वयेन वा एष 4.5
इन्द्रो यच्च क्षत्रियो यच्च यजमानस्तस्मादाहेन्द्रस्य वज्रो ऽसीति[9] ॥४॥

अथैनं धूर्गृहीतमन्तर्वेद्यभ्यवर्तयति तमग्रेण पत्नीशालं[10] जघनेन सदस्तदेनं युनक्ति मित्रावरुणयोस्त्वा प्रशास्त्योः प्रशिषा युनग्मीति[11] बाहू वै मित्रावरुणौ बाहुभ्यां वै मैत्रावरुणो राजन्यस्तस्मादाह मित्रावरुणयोस्त्वा प्रशास्त्योः प्रशिषा युनग्मीति[12] ॥५॥

स दक्षिणायुग्यमेवाग्रे युनक्त्यथ सव्यायुग्यꣳ सव्यायुग्यं वा अग्रे मानुषे युनक्त्यथैवं देवत्रा[13] दक्षिणाप्रष्टिमेवाग्रे[14] युनक्त्यथ सव्याप्रष्टिꣳ सव्याप्रष्टिं वा अग्रे मानुषे युनक्त्यथैवं देवत्रा ॥६॥

6.7 तमेवं चतुर्भिर्युक्त्वा येनैतद्दक्षिणा[11] यन्ति तेन वर्तते तमग्रेणाग्नीध्रं जघनेन चात्वालं तदेनमुद्यच्छति[12] तदेनं यजमान आतिष्ठत्यव्यथायै त्वा[13] स्वधायै त्वेत्यनार्तये त्वाबलाया इत्येवैतदाह यदाहाव्यथायै त्वेति स्वधायै त्वेति रसाय त्वेत्येवैतदाहारिष्टः फल्गुन इत्यनार्त इति तदाह यदाहारिष्ट इति फल्गुन इति द्वयेन वा एष इन्द्रो यच्च क्षत्रियो यच्च यजमान एतद्वा इन्द्रस्य गुह्यं नाम यदर्जुन इति तत्को ऽर्हति तस्य गुह्यं नाम ग्रहीतुमिति परोक्षमिवाहारिष्टः फल्गुन इति[14] ॥७॥

8 अथ दक्षिणायुग्यमुपस्पृशति मरुतां प्रसवेन जयेति विशो वै मरुतो देवविशं विशा वै क्षत्रियस्तदाप्नोति यदीप्सति विशा तज्जयति यज्जिगीषति विशः[15] प्रसवेन जयेत्येवैतदाह यदाह मरुतां प्रसवेन जयेति[16] ॥८॥

9 अथ गवां मध्य[17] उद्यच्छत्यापाम मनसेति स[18] यावदाशो[19] ह मनसा तदाप्नोति[20] यदीप्सति तावदाशस्तदाप्नोति[21] यदस्मादिन्द्रियं वीर्यमपक्रान्तं भवति तस्मादाहापाम मनसेति ॥९॥

10 समिन्द्रियेणेति गामुपस्पृशति स यदस्मादभिषिषिचानादिन्द्रियं वीर्यं पशूनभ्यपक्रामति तदेवैतदात्मनि कुरुते तदात्मनि धत्ते तस्मादाह समिन्द्रियेणेति[22] ॥१०॥

11.12 अथाह जिनाम्यहमिमाः स्वा इमाः कुर्व[23] इति[24] स यदेव[25] स्वं जिनाति यद्वै पुरुषादपक्रामति स्व[25] हैवास्य तत्प्रथमामभ्यपक्रामति[26] स यदस्मादभिषिषिचानादिन्द्रियं वीर्य[25] स्वमभ्यपक्रामति तदेवैतदात्मनि कुरुते तदात्मनि धत्ते स्वादु चैवैतदिन्द्रियं वीर्यं वृङ्क्ते तस्मा उ तावतीर्वा भूयसीर्वा पुनः प्रतिददाति क्रूरमिव वा इदं करोति यज्जिनाति न वा एष क्रूरकृत्यायै राजसूयेन यजते[27] यदेव भद्रं कुर्याद्भद्रं वदेत्तस्मा एवालं तस्मादस्मै तावतीर्वा भूयसीर्वा पुनः प्रतिददाति ॥११॥

13.14 अथ दक्षिणानन्वायामयति[28] सो ऽग्रेण यूपं पर्यास्यद्य[29] येनैतद्दक्षिणा[30] यन्ति तेन वर्तते तमग्रेण पत्नीशालं जघनेन सदस्तदेनमुद्यच्छति मा त इन्द्र ते वयं तुराषाळयुक्तासो अब्रह्माता विदसाम। तिष्ठा रथमधि यद्वज्रहस्ता[31] रश्मीन्देव युवसे स्वश्वानिति रश्मयो वा एते यदभीशवस्तान्ह्येतदुद्यच्छति[32] तस्मादाह रश्मीन्देव युवसे स्वश्वानित्यथ युक्त एव रथे रथविमोचनीयानि जुहोति स यद्रथविमोचनीयानि जुहोति तृतो ऽयं प्रीतो रथो विमुच्याता[33] इति ॥१२॥

15 स जुहोत्यग्नेय गृहपतये स्वाहेति स यदेवास्याग्नेयं तदेवास्यैतेन प्रीणाति

वहाꣳसि[30] वा अस्यान्नेयानि तान्येवैतत्प्रीणाति श्रीरु वै गार्हपत्यं यावतो यावत ईष्टे श्रियमेवास्यैतद्गार्हपत्यꣳ राज्यꣳ[31] रथो ऽभि[32] विमुच्यते ॥१३॥

सोमाय वनस्पतये स्वाहेति द्वयानि वै वानस्पत्यानि चक्राण्यनस्यानि च 16
रथ्यानि च तेभ्यो न्वेवैतदुभयेभ्यो ऽरिष्टं करोत्यथो यदेवास्य वानस्पत्यं तदेवास्यै-
तेन[33] प्रीणाति दारूणि वा अस्य वानस्पत्यानि तान्येवैतत्प्रीणाति क्षत्रमु वै सोमः
क्षत्रमेवास्यैतद्राज्यꣳ रथो ऽभि विमुच्यते ॥१४॥

इन्द्रस्येन्द्रियाय स्वाहेति स यदेवास्यैन्द्रं तदेवास्यैतेन प्रीणाति सव्यस्थो[34] 18
वा अस्यैन्द्रस्तमेवैतत्प्रीणातीन्द्रियमु वै वीर्यमिन्द्र इन्द्रियमेवास्यैतद्वीर्यꣳ राज्यꣳ[35]
रथो ऽभि विमुच्यते ॥१५॥

मरुतामोजसे स्वाहेति स यदेवास्य मारुतं तदेवास्यैतेन प्रीणाति सर्वो 17.19
वा एष मारुतश्चत्वारो ऽश्वा द्वौ सव्यस्थसारथी[36] रथः[37] सप्त सप्त वै मरुतां गणास्त-
त्सर्वमेवैनमेतत्प्रीणाति[38] विशो वै मरुतो ऽन्नमु वै विशो विशमेवास्यैतदन्नाद्यꣳ
राज्यꣳ रथो ऽभि विमुच्यते स यद्रथविमोचनीयानि जुहोति तृप्तो ऽयं प्रीतो रथो
विमुच्याता इत्यथास्मा उपर्येव रथे[39] तिष्ठते[40] वाराह्या[41] उपानह्या उपमुञ्चति ॥१६॥

अग्नौ ह वै देवा घृतकुम्भं प्रवेशयां चक्रुस्ततो वराहः संबभूव तस्मान्मेदुरो
वराहस्तस्मादाहुर्वराहे वै गावः संजानत इति स यद्धोत[42] वराहे गावः संजानते[43]
स्वे हैव तत्पयसि स्वे[44] रसे[45] सजानते तत्पशूनामेवैनमेतद्रसे प्रतिष्ठापयति पशूनामे-
वास्मिन्नसमेतद्दधाति तस्मादस्मै वाराह्या उपानह्या उपमुञ्चति ॥१७॥

अथ पृथिवीं प्रत्यवेक्षमाणो जपति[46] पृथिवि मातर्मा मा हिꣳसीर्मो अहं 20
त्वामिति वरुणो ह्याभिषिषिचानो[47] ऽस्याः पृथिव्या बिभयां चकार[48] प्रेव वा अहमस्या[49]
अच्योषीति[50] यो ऽभ्यषिचे यद्वै मेयं नावधून्वीतेतीयमु ह वै पृथिव्येतस्माद्बिभयां[51]
चकार महद्वा अयं प्रापदिति[52] यो ऽभ्यषिचि यद्वै मायं नावहणीयादिति तयैवैतत्सं-
ज्ञामकुरुत न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥१८॥

तथो वा एष एतदस्याः पृथिव्या बिभेति[53] प्रेव वा अहमस्या[54] अच्योषीति[55] 21
यो ऽभ्यषिचे यद्वै मेयं नावधून्वीतेतीयमु ह वै पृथिव्येतस्माद्बिभेति[56] महद्वा अयं
प्रापदिति[57] यो ऽभ्यषिचि यद्वै मायं नावहणीयादिति तयैवैतत्संज्ञां कुरुते न हि माता
पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥१९॥

अथावतिष्ठति हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोण- 22

सत्। नृषद्वरसदृतसद्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदित्येतयाति-च्छन्दसा सर्वं वा अत्यतिच्छन्दास्तथैवैनं पाप्मा नान्ववैति ॥२०॥

23 अथ सहैव[1] संग्रहीत्रा रथमाददते तꣳ रथवाहणे निदधाति[2] ततः[3] सो[4] ऽवाङ्पप्रवते[5] स यदत्र संग्रहीता नावतिष्ठति नेत्तꣳ संग्रहीता लोकमन्ववति-ष्ठाद्य[6]ꣳसुषुवाण इति तस्मादत्र संग्रहीता नावतिष्ठति ॥२१॥

24 अथ पूर्वाग्नेर्दक्षिणां प्रस्यन्दीमनु[7] तच्छतमानौ प्रवृत्ता[8] उद्वद्धौ[9] भवत उदुम्बरशाखोपगूळहा[10] ॥२२॥

25 तावभिमृशतीयदस्यायुरस्यायुर्मे देहीत्यन्यतरं[11] युङ्क्ष्वि वर्चो ऽसि वर्चो मे देहीत्यन्यतरमायुर्वा[12] अमृतꣳ हिरण्यमायुरेवैतदमृतमात्मनि धत्ते ॥२३॥

26 अथोदुम्बरशाखामूर्गस्यूर्ज मे[13] धेहीत्यूर्ग्वा उदुम्बर ऊर्जमेवैतदात्मनि धत्ते ॥२४॥

27 अथास्मा एतां मैत्रावरुणीं पयस्यामाहरन्ति तस्यामस्य बाहू उपावहरतीन्द्रस्य वां बाहू वीर्यकृता उपावहरामीत्यूर्ध्वबाहुं वा एनमदो ऽभिषिञ्चत्येष उ वै पशूना-ꣳ रसो यत्पयस्या तत्पशूनामेवैनमेतद्रसे बाहू प्रतिष्ठापयति पशूनामेवास्य रसं बाह्यो-र्दधाति स यदाहेन्द्रस्य वां बाहू इति द्वयेन वा एष इन्द्रो यच्च क्षत्रियो यच्च यजमान-स्तस्मादाहेन्द्रस्य वां बाहू इति वीर्यकृता[14] उपावहरामीति वीर्यकृतौ[15] ह्येतौ बाहू यौ सुषुवाणस्य स यदेषा मैत्रावरुणी पयस्या भवति बाहू हि मित्रावरुणौ बाहुभ्या-ꣳ हि मैत्रावरुणो राजन्यस्तस्य शतमानौ प्रवृत्तौ दक्षिणाथोत्तरस्य कर्मणः पूर्वाग्निवा-हानां[16] द्वावनड्वाहौ दक्षिणा ॥२५॥ तृतीयं ब्राह्मणम् ॥

1 °पक्रामतीति B W C, °वक्रामतीति O P. 2 वरुणोकरोदिति त्वेवैष B, वरुणोकरोति त्वेवैष O. 3 वरुण-सवो C O W, वरुणसवो B. 4 Thus B (pr. m.) W (orig.) T, °भ्युपक्रामति the other MSS. 5 Thus accented in the MSS. Read तदनु° ? 6 स्मर्तव्यं B, यदस्य स्प° C. 7 सीति MSS. 8 पत्नीशालं MSS. 9 युनज्मीति O C My. 10 देवत्रा दक्षिण° MSS. (cp. VI. 1. 4. 9). 11 येनैतदक्षिणा B O, येनैनन्दक्षिणा T, येनैवदक्षिणा My. 12 °नमुद्यछति B W.

13 त्वेति B. 14 इति MSS. 15 विशः MSS. 16 जयेति B O. 17 मध्य C. 18 The accent emended hesitatingly, स यावदाशो and °तावदाश° the MSS. 19 तदाप्नोति MSS. 20 °णेति B W C. 21 कुर्वति O P (orig.), कुर्वत इति T. 22 तत्प्रथमामिमामभ्यप° MSS. except My (तत्प्रथमामभ्य°) and T (तत्प्रथमामिमाभ्यप°). 23 यजते C. 24 दक्षिणानन्वा° O. 25 Without accent in the MSS. 26 येनैतदक्षिणा MSS. except O. 27 A difference from Saṃhitā-text not noted by Weber (यद्, cp. T. Br. II. 7. 16. 2). 28 °तद्यछति O. 29 विमुच्यता B W O T. 30 Emended; वाहाꣳसि MSS. 31 राज्यꣳ O W C, राजꣳ B. 32 भि omitted in B W. 33 °स्मैतेन B. 34 सव्यस्था T. 35 Omitted in B, राज्यꣳरथो W. 36 Thus accented W, °सारथीरथः C B, °सरथीरथः O P. 37 गणास्त° B W C, गणस्त° O. 38 रथे तिष्ठते B W C, रथे तिष्ठते O P. 39 Without accent in the MSS. 40 यद्धोत MSS. 41 संजानते MSS. 42 स्वेरसे MSS. 43 जपति MSS. 44 हाभिषि° MSS. 45 चकार MSS. 46 अहमस्याच्योषीति MSS., cp. VI. 2. 2. 15. 47 पृथिव्ये° MSS. 48 प्रापदिति B W C, प्रापदिति O. 49 बिभेति MSS. 50 सहैव MSS. 51 निदधाति B W O. 52 ततः सोवाङ्प° C O. 53 प्रस्यं(or प्रस्पं ?)दी° B O, प्रस्यंदी° C, प्रस्थंदी° W, प्रस्यंदी° P (orig.) प्रस्पंदी° P (sec. m.), पस्यन्दी° T My. 54 प्रवृत्ता, O P C My, प्रवत्ता B W T. 55 उद्वद्धौ MSS. 56 उदुंबरशाखो° O. 57 देही° against the Saṃhitā ? 58 Thus, in

accordance with the Saṃhitā T only, मयि O W C, मयि B My. 59 °कृता B W (sec. m.). 60 कृतौ (omitting वीर्यं) B W (orig.). 61 See also VII. 3. 4. 24, VII. 4. 3. 4.

M. V. 4. 4 K. VII. 3. 4

1 स वै यदैतया मैत्रावरुण्या पयस्यया प्रचरति तदिष्टा देवता भवत्यनिष्टः[1] स्विष्टकृदथास्या एतामासन्दीं निदधत्यग्रेण मैत्रावरुणस्य धिष्ण्यमुपरिषद्यं वा एष[2] जयत्यन्तरिक्षसद्यं यो राजसूयेन यजते स यदेव[3] जयत्युपरिषद्यमन्तरिक्षसद्यं[4] तदेवैनमेतत्प्रापयति तदेनमुपर्यासीनमधस्ताद्विश इमाः प्रजा उपासते सा वितृण्णेति वा भवति परितृण्णेति[5] वा खादिरी[6] तां निदधति[7] सा हि भारती प्रज्ञाता यद्यु तां न विन्देयुरपि[8] यामेव कां च निदध्युः ॥१॥

2 स निदधाति स्योनासि सुषदासीति साध्व्यसीत्येवैतदाह[9] यदाह स्योनासि सुषदासीति ॥२॥

3 अथैनामधिवासेनास्तृणाति क्षत्रस्य योनिरसीति क्षत्रस्य वा एषा योनिर्यदधिवासस्तस्मादाह[10] क्षत्रस्य योनिरसीति[11] ॥३॥

4 अथैनं बाहुगृहीतमधिनयति स्योनामासीद सुषदामासीदेति साध्वीमासीदेत्येवैतदाह क्षत्रस्य योनिमासीदेति क्षत्रस्य वा एषा योनिः सा[12] यैव क्षत्रस्य योनिस्तस्या[13] एवैनमेतद्दधाति[14] ॥४॥

5 अथैनमुपवेशयति निषसाद धृतव्रत इति धृतव्रतेनेव वा एतेन भवितव्यं यो राजसूयेन यजते न ह्येष सर्ववदनाय न सर्वकर्मणे यदेव भद्रं कुर्याद्भद्रं वदेत्तस्मा एवालमथो यो ऽनुब्रूते[15] धृतव्रतेनैवापि तेन भवितव्यं न ह्येष सर्ववदनाय न सर्वकर्मणे यदेव भद्रं कुर्याद्भद्रं वदेत्तस्मा एवालं तस्मादाह धृतव्रत इति वरुणः पस्त्यास्वेति क्षत्रं वै वरुणो विशः पस्त्या विक्ष्वेवैनमेतत्प्रतिष्ठापयति[16] साम्राज्याय सुक्रतुरिति साम्राज्याय ह्येष सुक्रतुः सूयते[17] ॥५॥

6 अथास्मा अक्षान्पञ्चादधत्यभिभूरस्ययानामित्यभिभूर्वा[18] एषो ऽन्यानन्यात्कलिरस्यैवैनमेतत्सर्वस्याभिभुवं[19] करोति[20] सो ऽस्य सर्वस्याभिभूर्भवति तस्मादाहाभिभूरस्ययानामित्येतास्ते पञ्च दिशः कल्पन्तामिति तस्मादिमाः सर्वा दिशः कल्पयति ॥६॥

अथैनं पृष्ठतो दण्डैर्घ्नन्ति तदेनं दण्डवधमतिनयति[१८] तस्माद्राजादण्ड्यो[१९] 7.8
ऽत्येति[२०] हि[२१] स[२२] दण्डवधमथ वरं वृणीते ऽमुं कामं कामये[२३] स मे ऽस्तु स मे समृध्यतामिति स ह्यस्मै कामः समृध्यते ऽथ ब्रह्माणमामन्त्रयते ब्रह्मप्रसूतो वाचं वदानीति ॥७॥

स आमन्त्रयते ब्रह्मन्निति त्वं ब्रह्मासीति ब्रह्मा प्रत्याह सवितासि[२४] 9
सत्यप्रसव इति वीर्यमेवास्मिन्नेतद्दधाति सवितारमेवैनमेतत्सत्य प्रसवं करोति ॥८॥

ब्रह्मन्नित्येवामन्त्रयते त्वं ब्रह्मासीत्येव ब्रह्मा प्रत्याह वरुणो ऽसि सत्यौ- 10
जा इति वीर्यमेवास्मिन्नेतद्दधाति वरुणमेवैनमेतत्सत्यौजसं करोति ॥९॥

ब्रह्मन्नित्येवामन्त्रयते त्वं ब्रह्मासीत्येव ब्रह्मा प्रत्याहेन्द्रो ऽसि विशौजा इति 11
वीर्यमेवास्मिन्नेतद्दधातीन्द्रमेवैनमेतद्विशौजसं करोति ॥१०॥

ब्रह्मन्नित्येवामन्त्रयते त्वं ब्रह्मासीत्येव ब्रह्मा प्रत्याह रुद्रो ऽसि सुशेव 12
इति वीर्यमेवास्मिन्नेतद्दधाति रुद्रमेवैनमेतत्सुशेवं[२३] करोति रुद्रो वा अस्य सर्वस्येष्टे[२४] एष उ वा अस्य सर्वस्येष्टे ऽस्यैवैनमेतत्सर्वस्येशानं[२५] शमयति तस्मादेषो ऽस्य सर्वस्येशानो मृळयति ॥११॥

अथ ब्रह्मन्नित्येवामन्त्रयते त्वं ब्रह्मासीत्येव ब्रह्मा प्रत्याहानिरुक्तं परिमितं 13
वा अस्मिन्निदं पुरा वीर्यं दधाति यन्निरुक्तं परिमित[२६] हि तद्यन्निरुक्तं[२७] सर्वं वा अनिरुक्तमपरिमितमु वै सर्वं तदपरिमितमेवास्मिन्नेतत्सर्वं वीर्यं दधाति स वै पञ्च कृत्व आमन्त्रयते संवत्सरसंमितो[२८] यज्ञः[२९] पञ्चर्तवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्व आमन्त्रयते ॥१२॥

अथ सुमङ्गलनामानमामन्त्रयते[३६] प्रियंकर श्रेयस्कर भूयस्करेति ब्रह्मप्रसूतः[३७] 14
कल्याणीं मानुषीं वाचं वदानीति[३८] ॥१३॥

अथास्मै स्फयं प्रयच्छत्यध्वर्युर्वा पुरोहितो वेन्द्रस्य वज्रो ऽसि तेन मे 15
रध्येति वज्रो वा एष[३९] यत्स्फयस्तदेतेन वज्रेण ब्राह्मणो राजन्यमबलीया[४०]समात्मनः कुरुते यो ह वै राजन्यो[३०] ऽबलीयान्ब्राह्मणाद्भवति[३०] बलीयान्ह द्विषतो भवत्यथ यो ह राजन्यो[३०] बलीयान्ब्राह्मणाद्भवति[३०] बलीयान्हास्माद्द्विषन्भवति तस्माद्राजन्येनाबलीयसैव ब्राह्मणाद्भवितव्यम् ॥१४॥

तमु स प्रयच्छति भ्रात्र इन्द्रस्य वज्रो ऽसि तेन मे रध्येति तेनो राजा 16

राजभ्रातरमबलीयाꣳसमात्मनः कुरुते ॥१५॥

17 तमु स प्रयच्छति सूताय वा स्थपतये वेन्द्रस्य वज्रो ऽसि तेन मे रध्येति तेनो राजभ्राता सूतं वा स्थपतिं वाबलीयाꣳसमात्मनः कुरुते ॥१६॥

18 तमु स प्रयच्छति ग्रामण्य इन्द्रस्य वज्रो ऽसि तेन मे रध्येति तेनो सूतो वा स्थपतिर्वा ग्रामण्यमबलीयाꣳसमात्मनः कुरुते ॥१७॥

19.20 तमु स प्रयच्छति सजातायेन्द्रस्य वज्रो ऽसि तेन मे रध्येति तेनो ग्रामणीः सजातमबलीयाꣳसमात्मनः कुरुते सो ऽन्तः ॥१८॥

स यदेवं प्रयच्छति यथापूर्वमेवैतदिमाः[31] प्रजाः कल्पयत्यपापवस्यसं तस्माद्इमाः प्रजा यथापूर्वं कल्पन्ता अपापवस्यसं तमयꣳ सजातः[32] प्रतिप्रस्थात्रे हृत्वा प्रयच्छति तेनो प्रतिप्रस्थाता शुक्रस्य पुरोरुचाधिदेवनं करोत्यत्ता वै शुक्रो ऽत्तारमेवैनमेतत्करोति[33] ॥१९॥

21 अथ मन्थिनः पुरोरुचा विमितं विमिन्वन्त्याद्यो वै मन्थ्यत्तारमेवैनमेतत्कृत्वा[34] तस्मा एतदन्नं जनयति स वै समृद्धो ऽत्ता यस्यान्नमस्त्यथ हिरण्यमुपास्याधिदेवने जुहोति न वा अनग्नावाहुतिर्हूयते ऽग्नेरु वा एतद्रेतो यद्धिरण्यं तथास्यैषाग्निमत्याहुतिर्हुता भवति ॥२०॥

22 स जुहोत्यग्निः पृथुर्धर्मणस्पतिरित्येष वा अग्निः पृथुर्धर्मणस्पतिर्यदधिदेवनं तस्माद्यमन्यत्र[35] धर्मं न विजानन्ति[36] सभामितेत्येवाहुरेष[37] हि पृथुर्धर्मणस्पतिर्जुषाणो अग्निः पृथुर्धर्मणस्पतिराज्यस्य हविषो वेतु स्वाहेति ॥२१॥

23 स यदेवं जुहोति रुद्रो ह वा एतामभिमन्यते यामेताꣳ सभायां दीव्यन्ते ऽग्निरु वै रुद्र एष उ वा अग्निर्यदधिदेवनं तस्यैते ऽङ्गारा यदक्षा[38] एष हैतामभिमन्यते तमेवैतत्प्रीणाति सो ऽस्मै प्रीत एतामनुमन्यते तस्य ह वा एतामनुमताꣳ सभायां घ्नन्ति[39] यो वा राजसूयेन यजते यो वैतदेवं वेद[40] ॥२२॥

अथाक्षान्निवपति स्वाहाकृताः सूर्यस्य रश्मिभिर्यतध्वꣳ सजातानां मध्यमेष्ठ्यायेति स्वानाꣳ श्रैष्ठ्यायेत्येवैतदाह यदाह सजातानां मध्यमेष्ठ्यायेति[41] ॥२३॥

24.25 अथाहाग्नये स्विष्टकृते ऽनुब्रूहीत्यग्निꣳ स्विष्टकृतं यजेति वषट्कृते जुहोति स यदुभे आहुती अन्तरेणैतत्कर्म क्रियत एष वाव प्रजापतिर्यज्ञो य एष तायत एतस्यैवैनमेतत्प्रजापतेर्यज्ञस्य मध्यत[42] आदधाति[43] मध्यतो ऽभिषिञ्चत्यथेळामुपह्वय[44] मार्जयन्ते तस्य पूर्वाग्निवाहानां द्रावनड्वाहौ दक्षिणा ॥२४॥ चतुर्थं ब्राह्मणम् ॥ तृतीयो ऽध्यायः ॥

1 भवत्यनिष्टः B W O. 2 एव B. 3 यदेव जयत्यु° MSS. 4 परि° MSS. 5 खादिरी MSS., but cp. II. 3. 2. 18. 6 °दधाति MSS. except T. 7 विंदेयुरपि MSS. 8 साध्यसी B W O C T. 9 °वासस्त° MSS. 10 °सीति MSS. 11 स MSS. except T. 12 Thus MSS. Read योनिस्तस्यामेवैन°. 13 नुब्रूते MSS. 14 विक्ष्वेवै° C, विक्ष्वैवै° O. 15 सूयते O. 16 अक्षान्पंचादधत्य° B W, अक्षान्पंचादधत्य° C, अक्षान्पंचादधत्य° O. Read perhaps अक्षान्पञ्चावपत्य°. °भूरस्ययाना° B W C, °भूरस्ययाना° O. 17 °भिभवं B W, °भिभ्वं C, °भिक्ष्व O P, °भिभ्यं My. Read perhaps °भिभ्वं ? 18 करोति MSS. 19 Read °नयन्ति ? 20 Emended; °दंड्योल्येते हि स C O W, °दंड्योल्येते हि स B My. 21 कामये O. 22 Cp. K. Z. XXXI. 25. 23 रुद्रमेवै° MSS. 24 °ष्टे MSS. 25 °तो यज्ञः O C, °तो यज्ञः B W. 26 सुमंगलनामानमा° MSS. 27 ब्रह्मप्रसुतः B, ब्रह्मप्रसूतः O W C. 28 °नीति MSS. 29 एष MSS. 30 राजन्यो बली° MSS. 31 यथापूर्वमे° MSS. 32 सजातः MSS. 33 °रमेवैनंतत्क° B W O C, °रमेवैतत्क° T, °रमेनंतत्क° My. 34 मंथ्य° MSS. 35 °धमन्यत्र MSS. Read perhaps तस्माद्यद्यन्यत्र. 36 विजानंति MSS. 37 सभामिल्येवाहुरेष C, सभामिल्येतेवाहुरेष B, (sec. m.). The words seem to be : सभाम् । इत । इति । एव । आहुः । एष. 38 यदक्षा MSS. 39 ह्नंति O C. 40 वेद MSS. 41 °येति MSS. 42 मध्यत आद° B W. 43 °थेळा(ला)मुपहूय MSS.

K. VII. 4. 1 M. V. 4. 5

वरुणाद्भाभिषिषिचानाद्भर्गो ऽपचक्राम वीर्यं वै भर्ग एष एव यज्ञो विष्णुः 1

शश्वद्ध यदेवैतत्तेजो वीर्यꣳ रस एषो ऽपाꣳ संभृतस्तद्धैवास्य शश्वद्भुर्गं[1] निर्जघान ॥१॥

2 तमु वै वरुणो ऽन्वैच्छत्तमेताभिर्देवताभिरनुसमसर्पत्सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्यै बृहस्पतिना ब्रह्मणा वरुणेनौजसाग्निना तेजसा सोमेन राज्ञा विष्णुना देवतया दशम्यैनमन्वविन्दत्तमनुविद्य[2] तमात्मन्यकुरुत तमात्मन्यधत्त तथो वा एनमेष एतद्विष्णुनैव[3] देवतया दशम्यानुविन्दति तमनुविद्य तमात्मनि कुरुते तमात्मनि धत्ते ॥२॥

3-5 स वा एष दशमे ऽहनि प्रसुतो भवति[4] दशम्या ह्येनं देवतयात्वविन्दत्तस्माद्दशपेयो दश दशैकैक चमसमनुप्रसृप्ता भवन्ति तस्मान्वेव[5] दशपेयो दश सोमपान्पितामहाननुसंख्याय प्रसर्पति स[6] ह्यस्य[7] सोमपीथमश्नते यो दश सोमपान्पितामहाननुसंचष्टे[8] ॥३॥

तदु तद्ब्राह्मणस्त्रीनेव चतुरः पञ्च षड्यान्वेवैता[9] एव देवता अनुसंख्याय प्रसर्पेदेताभिर्वा एनं देवताभिर्वरुणो ऽनुसमसर्पदेताभिरेनमाप्नोदेताभिरेवास्यैष[10] एतत्सोमपीथमश्नुते तस्मादेता एव देवता अनुसंख्याय प्रसर्पेत् ॥४॥

6 स यत्रादो ऽभिषेचनीयस्योदवसानीययेष्ट्या यजते तदेतꣳ सावित्रं द्वादशकपालं वाष्ट्राकपालं वा पुरोळाशं निर्वपति सविता वै देवानां प्रसविता सवितृप्रसूतो वा एनं तद्वरुणो ऽनुसमसर्पत्तथो वा एनमेष एतत्सवितृप्रसूत एवानुसꣳसर्पति तदेकमेव पुण्डरीकं प्रयच्छति सा दक्षिणा ॥५॥

7 अथ श्वो भूते सारस्वतं चरुं निर्वपति वाग्वै सरस्वती वाचो[10] वा एनं तद्वरुणो ऽनुसमसर्पत्तथो वा एनमेष एतद्वाचैवानुसꣳसर्पति तदेकमेव पुण्डरीकं प्रयच्छति ॥६॥

8 अथ श्वो भूते त्वाष्ट्रं दशकपालं पुरोळाशं निर्वपति त्वष्ट्रा[11] वा एनं तद्रूपैर्वरुणो ऽनुसमसर्पत्तथो वा एनमेष एतत्त्वष्ट्रैव[11] रूपैरनुसꣳसर्पति तदेकमेव पुण्डरीकं प्रयच्छति ॥७॥

9 अथ श्वो भूते पौष्णं चरुं निर्वपति पशवो वै पूषा पशुभिर्वा एनं तद्वरुणो ऽनुसमसर्पत्तथो वा एनमेष एतत्पशुभिरेवानुसꣳसर्पति तदेकमेव पुण्डरीकं प्रयच्छति ॥८॥

अथ श्वो भूते ऐन्द्रमेकादशकपालं पुरोळाशं निर्वपतीन्द्रियं[13] वै वीर्यमिन्द्र 10
इन्द्रियेण वा एनं तद्वीर्येण वरुणो ऽनुसमसर्पत्तथो वा एनमेष एतदिन्द्रियेणैव वीर्येणानुस॰सर्पति तदेकमेव पुण्डरीकं प्रयच्छति ॥९॥

अथ श्वो भूते बार्हस्पत्यं चरुं निर्वपति ब्रह्म वै बृहस्पतिर्ब्रह्मणा वा एनं 11
तद्वरुणो ऽनुसमसर्पत्तथो वा एनमेष एतद्ब्रह्मणैवानुस॰सर्पति तदेकमेव पुण्डरीकं प्रयच्छति ॥१०॥

अथ श्वो भूते वारुणं यवमयं चरुं निर्वपति स येन हौजसेदमिमाः प्रजा 12
वरुणो गृह्णाति[14] तेनैवैनं[15] तदोजसा वरुणो ऽनुसमसर्पत्तथो वा एनमेष एतत्तेनै-
वौजसानुस॰सर्पति तदेकमेव पुण्डरीकं प्रयच्छति ॥११॥

तासु सप्तसिष्विष्टासु सप्त पुण्डरीकाणि प्रयच्छत्युप पञ्च प्रयच्छति तामस्मै 13.14
द्वादशपुण्डरीका॰ स्रजं कृत्वापिनह्यति सा दीक्षा तद्यानि बिसानि तान्यस्याः पृथिव्या
रूपं वधका अन्तरिक्षस्य पुण्डरीकाणि नक्षत्राणां तद्दिवो रूपं यन्नक्षत्राणामेभिरेवैनं
तल्लोकैर्दीक्षयति सर्वैः[16] वा इमे लोकाः सर्वेणैवैनं तद्दीक्षयत्यथ यद्द्वादश पुण्डरीका
भवन्ति द्वादश वै मासाः संवत्सरस्य सर्वमु वै संवत्सरः सर्वेणैवैनं तद्दीक्षयति ॥१२॥

अथ यत्रादो[17] ऽभिषेचनीये[18] क्रीणन्ति तत्क्रीत्वैवैनं द्वेधोपनह्यति[19] द्वेधो- 15
पनह्य परिवहन्ति पर्युह्यान्यतरमहात्रासादयत्यन्यतरं पुरोहितस्य वा गृहेषु ब्रह्मणो
वा हृत्वा निदधति स यं[20] तं[20] पुरोहितस्य वा गृहेषु ब्रह्मणो वा हृत्वा[21] निदधति[21]
तमत्राहृत्यासन्यामासाद्य[22] प्रपाद्यातिथ्येन चरन्त्यातिथ्येन[23] चरित्वोपसद्भिः ॥१३॥

तद्धैके हविर्॰ष्येवैतानि[24] निर्वपन्त्याग्नेयमष्टाकपालं पुरोळाश॰ सौम्यं चरुं 16.17
वैष्णवं त्रिकपालं वा चरुं वा तदु तथा न कुर्याद्भवलति वै स यो यज्ञपथादेत्येत्यु वा
एष यज्ञपथाद्य एवं करोति तस्मादाज्यहविष[25] एव स्युः ॥१४॥

स वा अग्निं यजति तेजो वा अग्निस्तेजसा वा एनं तद्वरुणो ऽनुसमसर्पत्तथो 18
वा एनमेष एतत्तेजसैवानुस॰सर्पति ॥१५॥

अथ सोमं यजति क्षत्रं वै सोमः क्षत्रेण वा एनं तद्वरुणो ऽनुसमसर्पत्तथो
वा एनमेष एतत्क्षत्रेणैवानुस॰सर्पति ॥१६॥

अथ विष्णुं यजति विष्णुना वा एनं तद्देवतया दशम्या वरुणो ऽन्वविन्दत्त-
मनुविद्य तमात्मन्यकुरुत तमात्मन्यधत्त तथो वा एनमेष एतद्विष्णुनैव देवतया
दशम्यानुविन्दति तमनुविद्य तमात्मनि कुरुते तमात्मनि धत्ते ॥१७॥

19 स वा एष सप्तदशो भवति सप्तदशो हि प्रजापतिः प्रजापतिर्ह्येष तस्मादेष सप्तदशो भवति ॥१८॥

20 तद्द्वादश[16] प्रथमगर्भाः पष्ठौह्यस्ता ब्रह्मणो[17] दक्षिणा द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिस्तस्माद्द्वादश प्रथमगर्भाः पष्ठौह्यो दक्षिणा ॥१९॥

21 ता गर्भैः सह चतुर्विꣳशतिर्भवन्ति चतुर्विꣳशतिर्वा अर्धमासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिस्तस्माद्गर्भैः सह चतुर्विꣳशतिर्भवन्ति ॥२०॥

22.23 हिरण्मयीꣳ स्रजमुद्गात्रे रुक्मꣳ होत्रे हिरण्मयान्प्रकाशानध्वर्युभ्यामश्वं प्रस्तोत्रे वशां मैत्रावरुणायर्षभं ब्राह्मणाच्छꣳसिने वाससी नेष्टृपोतृभ्यामन्यतोयुक्तं यवाचितमच्छावाकायानड्वाहमग्नीधे ता वा एता द्वादश वा त्रयोदश वा दक्षिणा ददाति द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरो यज्ञः प्रजापतिस्तदेतं प्रत्यक्षं यज्ञं प्रजापतिमाप्त्वा तं परिगृह्य तमात्मनि कुरुते तमात्मनि धत्ते ॥२१॥ प्रथमं ब्राह्मणम् ॥

1 °ग्नर्गं MSS. 2 °मनुविद्य MSS. 3 एतद्विष्णु-नैव O W (sec. m.) C, एतद्विनैव B W (orig.). 4 भवति MSS. 5 तस्मान्वेव B W O C My, तस्माद्वेव T. 6 सहास्य MSS. 7 °संचष्टे MSS. 8 Thus hesitatingly emended (षट् । यान् । वा । इव । एताः; on यान् cp. Delbrück, A. I. S. section 285); षड्या वेवैता B W, षड्यावैहती O, षड्यावैवैहती P, षड्या-वैता C, षड्वावेवैता My, षड्व्यावेवैता T. 9 Emend-ed; °ताभिरेनमाप्नोताभिरेवा° B W, °ताभिरेनमाप्नोत्ताभिरेवा° C My, °ताभिरेनमाप्नोताभिरेवा° O P, °ताभिरेनमात्ताभिरेवा° T. 10 वाचा O C. 11 त्वष्टा MSS. 12 °त्व-ष्टैव MSS. 13 निर्वपती° MSS. 14 Thus MSS. 15 तेवैनं B W. 16 सर्वा B, सर्वे T. 17 यत्रादो MSS. 18 Thus emended; °नीयं the MSS. 19 द्वेधोपनह्यति MSS. 20 यंतं MSS. 21 हृत्वानिद° MSS. 22 तमत्वाह B, तमत्याह° T. 23 Thus

accented in B W, चरंत्याति° O C. 24 °ष्वे° MSS.
25 तस्मादाज्यहविष MSS. 26 तद्वादश MSS. except
C. 27 ब्रह्मणो MSS.

K. VII. 4. 2 M. V. 5. 1

आग्नेयो ऽष्टाकपालो भवति तं पुरस्तादासादयत्यैन्द्र एकादशकपालो भवति 1
तं दक्षिणत आसादयति सौम्यो वा चरुर्वैश्वदेवश्चरुर्भवति तं पश्चादासादयति
मैत्रावरुणी पयस्या भवति तामुत्तरत आसादयति बार्हस्पत्यश्चरुर्भवति तं मध्य
आसादयति तेषां वा एतेषां पञ्चानाꣳ हविषां पञ्च बिलानि स यदेतेषां पञ्चानाꣳ
हविषां पञ्च बिलानि तस्माच्चरुः पञ्चबिल इत्याख्यायते ॥१॥

स यदेतेन यजते यदेवैनमदो दिशः समारोहयति यद्दतून्यत्स्तोमान्य- 2
च्छन्दाꣳसि यत्सामानि तत एवैनमेतेन निष्क्रीणाति यद्धैतेन न यजेत दृप्येद्वाह
म्रियेत वा प्र वा पतेत्तस्मादेतेन यजते ॥२॥

सो ऽनेनाग्नेयेनाष्टाकपालेन पुरोळाशेन प्रचरति यदेवैनं प्राचीं दिशꣳ 3
समारोहयति यद्दतून्यत्स्तोमान्यच्छन्दाꣳसि यत्सामानि तत एवैनमेतेन निष्क्रीणाति
स हुत्वैवाहुतिꣳ सꣳस्रवं बार्हस्पत्ये ऽवनयति ॥३॥

अथानेनैन्द्रेणैकादशकपालेन पुरोळाशेन प्रचरति सौम्येन वा चरुणा स 4
यतरदेनैतयोश्चरन्ति यदेवैनं दक्षिणां दिशꣳ समारोहयति यद्दतून्यत्स्तोमान्यच्छन्दाꣳ-
सि यत्सामानि तत एवैनमेतेन निष्क्रीणाति स हुत्वैवाहुतिꣳ सꣳस्रवं बार्हस्पत्ये
ऽवनयति ॥४॥

अथानेन वैश्वदेवेन चरुणा प्रचरति यदेवैनं प्रतीचीं दिशꣳ समारोहयति 5
यद्दतून्यत्स्तोमान्यच्छन्दाꣳसि यत्सामानि तत एवैनमेतेन निष्क्रीणाति स हुत्वैवा-
हुतिꣳ सꣳस्रवं बार्हस्पत्ये ऽवनयति ॥५॥

अथानया मैत्रावरुण्या पयस्यया प्रचरति यदेवैनमुदीचीं दिशꣳ समारो- 6
हयति यद्दतून्यत्स्तोमान्यच्छन्दाꣳसि यत्सामानि तत एवैनमेतेन निष्क्रीणाति स
हुत्वैवाहुतिꣳ सꣳस्रवं बार्हस्पत्ये ऽवनयति ॥६॥

अथानेन बार्हस्पत्येन चरुणा प्रचरति यदेवैनमूर्ध्वां दिशꣳ समारोहयति 7
यद्दतून्यत्स्तोमान्यच्छन्दाꣳसि यत्सामानि तत एवैनमेतेन निष्क्रीणाति
स यद्धुत्वा हुत्वा सꣳस्रवं बार्हस्पत्ये ऽवनयति सर्वाभ्य एवास्मा एतद्दिग्भ्यो
ऽन्नाद्यं बलिꣳ हारयति तꣳ सर्वाभ्यो दिग्भ्यो ऽन्नाद्यं बलिरुपसमैति ॥७॥

8 तस्यास्याग्नेयस्याष्टाकपालस्य हिरण्यं दक्षिणाग्नेयो ह्येष यज्ञोऽग्नेर्हि रेतो हिरण्यं तस्मादस्य हिरण्यं दक्षिणा तदग्नीधे ददात्यग्निर्ह्येष निदानेन यदग्नीत्तस्मात्तदग्नीधे ददाति ॥८॥

9 अथास्यैन्द्रस्यैकादशकपालस्यर्षभो दक्षिणा तद्धि पशुष्वैन्द्रꣳ रूपं यद्दृषभस्य यद्यु सौम्यश्चरुः स्याद्बभ्रुर्गौर्दक्षिणा स्यात्तद्धि पशुषु सौम्यꣳ रूपं यद्बभ्रोर्गौः स यतर एतयोर्भवति तं ब्रह्मणे ददाति ब्रह्मा हि दक्षिणतो यज्ञस्याभिगोप्ता ॥९॥

10 अथास्य वैश्वदेवस्य चरोः पृषन्गौर्दक्षिणा भूमा वा एतद्रूपाणां यत्पृषतो गोर्भूमो वै विश्वे देवास्तस्मादस्य पृषन्गौर्दक्षिणा तꣳ होत्रे ददाति भूमो हि होता ॥१०॥

11 अथास्या मैत्रावरुण्याः पयस्याया वशा दक्षिणा सा हि मैत्रावरुणी यद्वशा यदि वशां न विन्देदपि याप्रवीता सा स्यादप्रवीतो हि वशा भवति तामध्वर्यवे ददाति प्राणोदानौ वै मित्रावरुणौ प्राणोदाना उ वा अध्वर्यू तस्मात्तामध्वर्यवे ददाति ॥११॥

12 अथास्य बार्हस्पत्यस्य चरोः शितिपृष्ठो गौर्दक्षिणैषा ह्यूर्ध्वा दिग्बृहस्पतेस्तदेष उपरिष्टादर्यम्णः पन्थास्तस्मादस्य शितिपृष्ठो गौर्दक्षिणा तं ब्रह्मणे ददाति बृहस्पतिर्वै देवानां ब्रह्मैवमु वा एष एतस्य ब्रह्मा तस्मात्तं ब्रह्मणे ददाति ॥१२॥

तेन ह्याप्येतेन विष्ठाव्राजे ऽन्नाद्यकामो यजेत सर्वाभ्य एवास्मा एतद्दिग्भ्यो ऽन्नाद्यं बलिꣳ हारयति तꣳ सर्वाभ्यो दिग्भ्यो ऽन्नाद्यं बलिरुपसमैति स सर्वासां दिशामन्नादो भवति ॥१३॥ द्वितीयं ब्राह्मणम् ॥

M. V. 5. 2 K. VII. 4. 3

1 स वै प्रयुजाꣳ हविर्भिर्यजते स यत्प्रयुजाꣳ हविर्भिर्यजत ऋतून्हैवैतत्सुषुवाणः प्रयुङ्क्ते त एनमृतवो युक्ता वहन्ति ॥१॥

2 तानि वै द्वादश भवन्ति द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश भवन्ति तैर्मासि मासि यजते मासि मास्येवैतदृतून्युङ्क्ते त एनमृतवो युक्ता वहन्ति ॥२॥

तदु नाद्रियेत शम्यापराव्याधꣳ शम्यापराव्याधमेव षड्भिर्हविर्भिः प्राग्यजमान एति तदृतून्प्राचो युङ्क्ते त एनमृतवो युक्ताः प्राञ्चं वहन्ति शम्यापराव्याधꣳ शम्यापराव्याधमेव षड्भिर्हविर्भिः पुनर्यजमान एति तदृतून्प्रतीचो युङ्क्ते त एनमृतवो युक्ताः पुनरावहन्ति ॥३॥

3.4 तदु नाद्रियेत समानबर्हीꣳष्येव पूर्वेद्युः षड्ढवीꣳषि निर्वपेत्तदृतून्प्राचो युङ्क्ते

त एनमृतवो युक्ताः प्राञ्चं वहन्ति तेषां पूर्वाग्निवाहानां द्वावनड्वाहौ दक्षिणा वहन्ति ह्येनमृतवो युक्ता वहत्यनड्वान्युक्तः समानबर्हीरुष्येव श्वो भूते षड्ढवीरुषि निर्वपेत्तदृतून्प्रतीचो युङ्क्ते त एनमृतवो युक्ताः पुनरावहन्ति तेषां पूर्वाग्निवाहानां द्वावनड्वाहौ दक्षिणा वहन्ति ह्येनमृतवो युक्ता वहत्यनड्वान्युक्तः ॥४॥

ते य ऊर्ध्वाः शैशिरादा प्रावृषो ये ते षण्मासास्तेषाꣳ रूपं पूर्वाणि षड्ढवीरुषि यथा ग्रैष्मायेति प्राङ् याया अथ य ऊर्ध्वाः प्रावृष आ शैशिराद्ये ते षण्मासास्तेषाꣳ रूपमुत्तराणि षड्ढवीरुषि यथा वार्षिकायेति प्रत्यङ् यायास्तद्ध स्मैतत्पुरैव कुरुपञ्चाला आहुर्ऋतवो वा अस्मान्युक्ता वहन्तीत्यृतून्वा वयं युक्तानुचराम इत्येते ह स्म तदाहू राजसूययाजिनो हि तेषाꣳ राजान आसुः ॥५॥ तृतीयं ब्राह्मणम् ॥ 3-5

K. VII. 4. 4 M. V. 5. 2

इयेनीं विचित्रगर्भामदितय आलभत इयं वा अदितिरस्या एवैनमेतया गर्भं करोत्यस्या एवैतया गर्भो भवति तस्यावृद्येयं वशाया अष्टापद्यास्तस्य तादृश्येव गौर्दक्षिणा ॥१॥ 8

पृषतीं विचित्रगर्भां मरुद्भ्य आलभते विशो वै मरुतो देवविशं विश एवैनमेतया गर्भं करोति विश एवैतया गर्भो भवति तस्यावृद्येयं वशाया अष्टापद्यास्तस्य तादृश्येव गौर्दक्षिणा ॥२॥ 9

तदाहुर्यामिमामदितय इत्यालभत इत्यादित्येभ्य एतामालभेतेति सर्वे वा आदित्या इति सर्वस्यैवैनमेतया गर्भं करोतीति सर्वस्यैवैतया गर्भो भवतीति तस्य सैवावृत्सा दक्षिणाथ यामिमां मरुद्भ्य इत्यालभत इति विश्वेभ्य एतां देवेभ्य आलभेतेति सर्वे वै विश्वे देवा इति सर्वस्यैवैनमेतया गर्भं करोतीति सर्वस्यैवैतया गर्भो भवतीति तस्य सैवावृत्सा दक्षिणा ॥३॥ चतुर्थं ब्राह्मणम् ॥ चतुर्थोऽध्यायः ॥ 10

K. VII. 5. 1 M. V. 5. 4

स वै इयेतमाश्विनमालभते इयेताविव ह्यश्विनावविं मरुद्भाꣳ सारस्वतीमृषभमिन्द्राय सुत्राम्णे तद्धि पशुष्वैन्द्रꣳ रूपं यदृषभस्य तान्येवꣳसमृद्धानेतान्पशून्विन्देदेत एव स्युर्येवꣳसमृद्धान्न विन्देदप्यजा एव स्युस्त उ वाव सुपरिचरतरा यदजा रोहित उ तर्ह्याश्विनः स्यात् ॥१॥ 1

स यदेतैर्यजते यत्र वै विश्वरूपं त्वाष्ट्रमिन्द्रो जघान तद्ध त्वष्टा क्रुद्धः कुविन्मे पुत्रमवधीदित्यपेन्द्रꣳ सोममाजह्रे स हेत्थमेव प्रसुत आस यथैवायं प्रसुत 7

एवꣳ हैव प्रसुत आसापेन्द्रः ॥२॥

8 स हेन्द्र ईक्षां चक्र इदं वाव मा यज्ञादन्तर्यन्तीति स यथा वलीयानबलीयस एवꣳ सहसैवाभिद्रुत्यानुपहूत एव द्रोणकलशाच्छुक्रं भक्षयां चकार स हैनं जिह्विꣳ स विष्वङ् ह्यस्य प्राणेभ्यो दुद्राव मुखाद्धैव न दुद्रावाथान्येभ्यः सर्वेभ्यः प्राणेभ्यस्तस्मात्प्रायश्चित्तिरभवन्न ह प्रायश्चित्तिरभविष्यद्यन्मुखात्प्रत्यङ्ङद्रोष्यत् ॥३॥

9, 10 चत्वारो वै वर्णा ब्राह्मणो राजन्यो वैश्यः शूद्रो न ह्यात एकतमश्चन भवति यः सोमं वमति यद्ध्यात एकतमश्चित्स्यात्स्याद्ध प्रायश्चित्तिः स यदस्य नस्तो ऽद्रवत्ततः सिꣳ हः समभवद्यत्कर्णाभ्यां ततो वृको यदस्माद्वाचः प्राणात्ततः शार्दूलज्येष्ठाः श्वापदाः संबभूवुरथ यदेनन प्रजननेनैत्सा परिस्रुदभवदथ त्रिर्निरष्ठीवत्ततः कर्कन्धु कुवलं बदरमिति संबभूवैतत्ततः समभवद्यदस्य विष्वङ् प्राणेभ्यो ऽद्रवत् ॥४॥

11 स वा इन्द्रः सर्वेणैव व्याध्यत सोमेन हि व्याध्यत सर्वꣳ हि सोमः सोमेन सर्वेण व्यृद्धः प्रमयुरिव चचार मङ्कुरिव तमु वा अश्विनावभिषज्यतां तमनेन सर्वेण व्यृद्धं पुनः समार्धयताꣳ स ताद्दङ्वेद्वाभवच्छ्रेयान्वा ॥५॥

12, 13 ते होचुः सुत्रातं बतैनमत्रासतामिति यमनेन सर्वेण व्यृद्धं पुनः समार्धयिष्टामिति तस्मात्सौत्रामणी नाम तस्मादु सोमातिपवितमेतया याजयेयुः सर्वेण वा एष व्यृध्यते यꣳ सोमो ऽतिपवते सोमेन हि व्यृध्यते सर्वꣳ हि सोमस्तमनेन सर्वेण व्यृद्धं पुनः समर्धयति स ताद्दङ्वेद्वा भवति श्रेयान्वा ॥६॥

14 अथ यदेष एतया यजते नाहैवैतꣳ सोमो ऽतिपवते न केन चन व्यृध्यते सर्वाꣳस्त्वा एष यज्ञक्रतूनवरुन्द्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसुष्ट उ वा एष यज्ञो देवकृतो यत्सौत्रामण्यनया मे ऽपीष्टमसदनयापि सूया इति तस्मात्सौत्रामण्या यजते ॥७॥

15 स यदेष आश्विनः पशुर्भवत्यश्विनौ वा एनं तदभिषज्यतां तथो वा एनमेष एतदश्विभ्यामेव भिषज्यति ॥८॥

16 अथ सारस्वतो वाग्वै सरस्वती वाचो वा एनं तदश्विनावभिषज्यतां तथो वा एनमेष एतद्वाचैव भिषज्यति ॥९॥

17 अथैन्द्र इन्द्रो यज्ञस्य देवता सा यैव यज्ञस्य देवता तयैवैनं तदश्विनावभिषज्यतां तथो वा एनमेष एतत्तयैव भिषज्यति ॥१०॥

तेषु पशुषु श्रप्यमाणेषु सिꣳहलोमानि वृकलोमानि शार्दूललोमानीत्यावपति 18
यावतां चान्येषाꣳ श्वापदानां लोमान्यभ्याप्नोत्येतद्वै ततः समभवद्यदस्य विष्वङ्
प्राणेभ्यो ऽद्रवत्तेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥११॥

तदु तथा न कुर्यादुल्कया ह स न खिन्या पशूनुषुवति य एतानि पशुषु 19
श्रप्यमाणेष्वावपति तस्मात्परिस्रुत्येवावपेत्तथा होल्कया नखिन्या पशून्नानुषुवति तथो
एनं तेन समर्धयति यत्ततः समभवत्तस्मात्परिस्रुत्येवावपेत् ॥१२॥

अथैतां परिस्रुतꣳ संदधति ताꣳ सꣳहितामभिमृशत्यश्विभ्यां पच्यस्व 20.21
सरस्वत्यै पच्यस्वेन्द्राय सुत्रामणे पच्यस्वेति स यथैवादो देवतायै हविर्गृह्णन्नादिशत्येव-
मेवैतद्देवताया आदिशति सा यदागच्छत्यथ प्रचरति तद्द्रावय्नी भवतो नेद्यज्ञाहुतीश्च
सुराहुतीश्च सह जुहवामेत्युत्तरस्यां वेदा उत्तरवेदिमुपकिरत्युद्धत एवेतरमुपस-
माहितो भवति ॥१३॥

अथैतां परिस्रुतमाहरन्ति तां कुशपवित्रेण पवयति पवित्रं वै मेधः कुशाः 22
पवित्रपूतया मेध्यया प्रचराणीति ॥१४॥

स पवयति वायोः पूतः पवित्रेण प्रत्यङ् सोमो अतिस्रुतः। इन्द्रस्य युज्यः
सखेति तदावपति कर्कन्धुसक्तून्कुवलसक्तून्बदरसक्तूनित्येतद्वै ततः समभवद्यत्नि-
र्निरष्ठीवत्तेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१५॥

अथैतान्ग्रहान्गृह्णाति स त्रीन्वा गृह्णात्येकं वा स यद्यह त्रीन्गृह्णात्येतयैव 23
समान्या पुरोरुचा गृह्णाति यद्येकं गृह्णाति विग्राहं गृह्णात्येकं त्वेव गृह्णायादेका
हि पुरोरुगेकानुवाक्यैका याज्या तस्मादेकमेव गृह्णीयात् ॥१६॥

स गृह्णाति कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय। इहेहैषां 24
कृणुहि भोजनानि ये बर्हिषो नमउक्तिं न जग्मुः ॥ उपयामगृहीतो ऽस्यश्विभ्यां
त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्ण इत्यथाहाश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्ण
ऽनुब्रूहीति ॥१७॥

सो ऽब्राह युवꣳ सुराममश्विना नमुचा आसुरे सचा। विपिपाना शुभस्पती 25
इन्द्रं कर्मस्वावतमित्याश्राव्याहाश्विनौ सरस्वतीमिन्द्रꣳ सुत्रामाणं यजेति ॥१८॥

स यजति पुत्रमिव पितरा अश्विनोभेन्द्रावधुः काव्यैर्दꣳसनाभिः। यत्सु- 26
रामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णगिति वषट्कृते जुहोत्यनुवषट्कृते
जुहोति ॥१९॥

27 अथ शतवितृण्णं वा कुम्भमाहरन्ति नववितृण्णं वा स यद्यह शतवितृण्णो भवति शतायुर्वा अयं पुरुषः शतवीर्यः शततेजास्तस्मान्नु शतवितृण्णो यद्यु नववितृण्णो नव वा इमे पुरुषे प्राणास्तस्मान्नववितृण्णः ॥२०॥

28 तꣳ शिक्योदुतं दक्षिणमग्निमुपर्युपरि धारयन्ति तादिमां परिशिष्टां परिस्रुतमासिञ्चति ॥२१॥

तं विश्रोतन्तमुपतिष्ठते पितृणाꣳ सोमवतां तिसृभिर्ऋग्भिः पितृणां बर्हिषदां तिसृभिर्ऋग्भिः पितृणामग्निष्वात्तानां तिसृभिर्ऋग्भिर्यत्र वा अद इन्द्रꣳ सोमो ऽत्यपवत तद्यदस्य व्यृद्धस्य पितृनगच्छत्तृया वै पितरस्तदेवास्यैतेन समीरयति तदाप्याययति तेनैनꣳ समर्धयति तस्मादेवमुपतिष्ठते ॥२२॥

29.30 अथैतꣳ सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोळाशं निर्वपति सविता वै देवानां प्रसविता सवितृप्रसूतौ वा एनं तदश्विनावभिषज्यतां तथो वा एनमेष एतत्सवितृप्रसूत एव भिषज्यति ॥२३॥

31 वारुणं द्वादशकपालं वरुणो वा अर्पयिता वरुणो वै तदर्पयति यदिदं किं चर्च्छति तमेवैतत्प्रीणाति स एनं प्रीतस्तेन समर्धयति येनार्पयति ॥२४॥

32 ऐन्द्रमेकादशकपालमिन्द्रो यज्ञस्य देवता सा यैव यज्ञस्य देवता तयैवैनं तदश्विनावभिषज्यतां तथो वा एनमेष एतत्तयैव भिषज्यति ॥२५॥

33 स यदि सोमातिपवितमेतया याजयेयुरिष्ट्वा अनुयाजाः स्युरव्यूल्हे स्रुचावथैतैर्हविर्भिः प्रचरेयुः पश्चाद्वै सोमो ऽतिपवते जघनार्धो वा एष यज्ञस्य मेध उ वा एतद्यदेतानि हवीꣳषि तदेनमेतेन मेधसा पश्चादपिदधात्यश्विनेनो तर्हि द्विकपालेन पुरस्तात्प्रचरेयुः ॥२६॥

34.35 तदु तथा न कुर्याद्भ्वलति वै स यो यज्ञपथादेत्येत्यु वा एष यज्ञपथाद्य एवं करोति तस्माद्यत्रैवेतरेषां पशूनां वपाभिः प्रचरेयुस्तदेवैतैर्हविर्भिः प्रचरेयुस्तस्य नपुꣳसको गौर्दक्षिणा न वा एष स्त्री न पुमान्यन्नपुꣳसको नो वा एष सोमो न सुरा यत्परिस्रुद्यदाहास्या ग्रहान्गृह्णन्ति स यदग्नौ जुह्वति तेन न सुरा यदु न भक्षयन्ति तेन न सोमो ऽश्वा वा रथवाही सा वै न स्त्री न पुमान्यदश्वा रथवाही यदह रथं वहति तेन न स्त्री यदु स्त्री तेन नाश्वः ॥२७॥ प्रथमं ब्राह्मणम् ॥

M. V. 5. 3 K. VII. 5. 2

1 स वा एतेनाभिषेचनीयेनेष्ट्वा संवत्सरं केशाञ्च वपते स यत्केशाञ्च वपते

रसो वा अयं वीर्यं तेज इदमपाꣳ संभृतं येनैनमेतदभिषिञ्चति तस्याभिषिक्तस्यैको ऽभिषेकः केशान्प्रथमान्गच्छति स यद्ध केशान्वपेत जिह्वाꣳ हैताꣳ श्रियं विनाशयेद्यु-दुह्यात्तस्मात्केशान्न वपते ॥१॥

स वै संवत्सरं न वपते संवत्सरसंमितो हि व्रतचर्या तस्मात्संवत्सरं 2
न वपते ऽथ खलु संवत्सर एतेन व्रतविसर्जनीयेन यजते केशवपनीयेन स एषोपयोग इति स्तोमः ॥२॥

तस्यैकविꣳशं प्रातःसवनꣳ सप्तदशं माध्यंदिनꣳ सवनं पञ्चदशं तृतीय- 3
सवनꣳ सहोक्थैः सह षोळशिना सह रात्र्या त्रिवृद्रथंतरः संधिरेवमेष क्लृप्तो भवति स यदेवमेष क्लृप्तो भवत्येतं वा एष गच्छति य एष तपति यो राजसूयेन यजते तदेतां गतिं गत्वा यो ऽस्यैष जितः स्वर्गो लोक इमां प्रतिष्ठां प्रत्यवैति यावदस्येह मानुषमायुस्तस्यैतत् ॥३॥

यदेकविꣳशं प्रातः सवनं भवत्येकविꣳशो वा एव य एष तपति द्वादश 4
वै मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳशः स एतेनैकविꣳशेन प्रातः सवनेनैतस्मादेकविꣳशादपयुङ्क्ते ॥४॥

स सप्तदशं प्रत्यवैति सप्तदशात्पञ्चदशं पञ्चदशात्त्रिवृतमियं वै त्रिवृदियं प्रतिष्ठा तदस्यामेव प्रतिष्ठायामन्ततः प्रतितिष्ठति ॥५॥

रथंतरं पृष्ठं भवतीयं वै रथंतरमियं प्रतिष्ठा तदस्यामेव प्रतिष्ठायामन्ततः 5
प्रतितिष्ठति ॥६॥

स एतेनेष्ट्वा निवर्तयत एव केशान्न वपते यद्ध वपेतैताꣳ ह श्रियं जिह्वां 6
विनाशयेद्युदुह्यात्तदात्मन्येवैतच्छ्रियं नियुङ्क्ते आत्मन्येवैतच्छ्रियं धत्ते तस्मान्निवर्तयत एव केशान्न वपते ॥७॥

अथोपानद्भ्यामवचरत्युपानद्भ्यां वैवासन्दीमासन्द्या वोपानहा उपान- 7
द्भ्यां वा यानं यानाद्वोपानहौ सर्वꣳ ह्येष उपर्युपरि भवति यो राजसूयेन यजते ॥८॥
द्वितीयं ब्राह्मणम् ॥

K. VII. 5. 3 M. V. 5. 5

वृत्रे ह वा इदꣳ सर्वमास यद्दचो यद्यजूꣳषि यत्सामानि तद्ध सर्वं वृत्र 1
एवास तमु हेन्द्रो जिघाꣳसां चकार ॥१॥

स होवाचेन्द्रो विष्णुं प्रहरिष्यामि वा अहमसौ वृत्राय वज्रमिति तस्य मे 2

त्वमनुष्ठ्यावेति तथेति होवाच प्रहर तस्य ते ऽहमनुष्ठ्यावेति तस्मा अस्मै वृत्रायेन्द्रो वज्रमुद्ययाम स हायं वृत्रो ऽस्माद्वज्रादुद्यताद्बिभयां चकार ॥२॥

3 स होवाच मा नु मे प्रहार्षीरित्यस्त्यु न्वा इदं मयि वीर्यं तन्नु ते प्रयच्छानीति तथेति तस्मै यजूꣳषि प्रायच्छत्तस्मै द्वितीयमुद्ययाम ॥३॥

4 स होवाच मा न्वेव मे प्रहार्षीरित्यस्त्यु न्वा इदं मयि वीर्यं तन्नु ते प्रयच्छानीति तथेति तस्मा ऋचः प्रायच्छत्तस्मै तृतीयमुद्ययाम ॥४॥

5.6 स होवाच मा न्वेव मे प्रहार्षीरित्यस्त्यु न्वा इदं मयि वीर्यं तन्नु ते प्रयच्छानीति तथेति तस्मै सामानि प्रायच्छदथ यो ऽस्य योनिराशय आस तमनुपरामृश्य लुलोप सैषेष्टिरभवदेषा त्रैधातवी स यदेतस्यां योनावेतस्मिन्नाशय एषा त्रयी विद्या त्रिधातुरिवाशयद्धातुश्च इव तस्मात्त्रैधातवी नाम तस्मादप्येतर्ह्येतया त्रय्या विद्ययैवमेव यज्ञं तन्वते यजुर्भिरेवाग्रे ऽथर्ग्भिरथ सामभिरेवꣳ ह्येनामिन्द्राय प्रायच्छत् ॥५॥

7.8 स वा एष ऐन्द्रावैष्णवो द्वादशकपालः पुरोळाशो भवतीन्द्रो हि वज्रमुदयच्छद्विष्णुरन्वतिष्ठताथ यद्द्वादशकपालो भवति द्वादश वै मासाः संवत्सरस्य संवत्सरसंमिता वा एषेष्टिस्तस्माद्द्वादशकपालो भवति ॥६॥

9 तमुभयेषां व्रीहियवानां गृह्णाति स व्रीहिमयमेवाग्रे पिण्डमधिश्रयति तद्यजुषाꣳ रूपं क्रियते ऽथ यवमयं तदृचाꣳ रूपं क्रियते ऽथ व्रीहिमयं तत्साम्नाꣳ रूपं क्रियत एवमेष योनिराशय एतस्यास्त्रय्या विद्याया रूपं क्रियते तद्यदेतद्धविरस्त्रधात्विव भवति धातुश्च इव तस्मात्त्रैधातवी नाम ॥७॥

10 सैषा राजसूययाजिन उदवसानीयेष्टिः स्यात्सर्वान्वा एष यज्ञक्रतूनवरुन्द्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते तस्य यज्ञो यातयामेव भवति सोऽस्मात्पराङिव भवत्येतावानु वै यज्ञो यावत्येषा त्रयी विद्यैतया हि त्रय्या विद्यया यज्ञं तन्वते तत्पुनर्यज्ञमारभते तथास्यायातयामा यज्ञो भवति तथास्मान्न पराङ् भवति ॥८॥

12 अथो यः सहस्रं दद्यात्तस्यैषोदवसानीया स्याद्रिरिचान इव वा एष एतद्भवति यः सहस्रं ददिवानेतद्वै तद्ब्रह्मः प्रजातꣳ सहस्रं यदिन्द्राविष्णू त्रेधा व्यैरयेतां यदेषा त्रयी विद्या स एतेन सहस्रेण पुनराप्यायते तथास्यायातयामा यज्ञो भवति तथास्मान्न पराङ् भवति ॥९॥

13 अथो ये दीर्घसत्त्रमासीरन्त्संवत्सरं वा भूयो वा तेषामेषोदवसानीया स्या-

त्सर्वं वै तेषामाप्तं भवति ये दीर्घसत्त्रमासते संवत्सरं वा भूयो वा सर्वमु वा एषेष्टिस्तस्मात्तेषामेषोदवसानीया स्यात् ॥१०॥

अथो एनयाभिचरेदेतया ह वै भद्रसेनमाजातशत्रवमारुणिरभिचचार क्षिप्रं किलैनयास्तृणुतेति होवाच याज्ञवल्क्यो ऽपि वा एनयेन्द्रो वृत्रस्यास्थानमच्छिनदपि ह वा अस्यास्थानं छिनत्ति य एनयैवंविद्वानभिचरति ॥११॥

अथो एनया भिषज्येद्यं न्वेकेन वा यजुषैकया वर्चैकेन वा साम्ना भिषज्येत्तं न्वगदं कुर्यादथ किं यं त्रय्या विद्यया यथा त्रय्या विद्यया भिषज्येदेवं तत्स यदि ह्यपि गतासुरिव भवत्या ह्यैवैनया हरति तत् ॥१२॥ 15

त्रयः शतमानाः प्रवृत्तास्ते ब्रह्मणो दक्षिणा न वै ब्रह्मा स्तुते नाश्रावयति न शꣳसत्यथ यशो न वै हिरण्यमश्नन्ति नैनेन किं चन कुर्वन्त्यथ यशस्तिस्रो धेनवो होतुर्भूमा हि तिस्रो धेनवो भूमो हि होता त्रीणि वासाꣳस्यध्वर्योस्तनुत इव ह्यध्वर्युर्यज्ञं तन्वत इव वासाꣳसि त्रयश्चानड्वाहो वहति ह्यध्वर्युर्युक्तो वहत्यनड्वान्युक्तो गां वाजं वाग्नीधे ददाति ता वा एता द्वादश वा त्रयोदश वा दक्षिणा ददाति द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरो यज्ञः प्रजापतिस्तदेतं प्रत्यक्षं यज्ञं प्रजापतिमाप्त्वा तं परिगृह्य तमात्मनि कुरुते तमात्मनि धत्ते ॥१३॥ तृतीयं ब्राह्मणम् ॥ पञ्चमो ऽध्यायः ॥ राजसूयकाण्डं समाप्तम् ॥ 16-19

DISTINCTIVE READINGS OF THE KĀṆVA TEXT OF BOOKS 8-16 (= BOOKS 6-14 M.)

General differences.

1. Where the Kāṇva Saṃhitā differs from the Mādhyandina Saṃhitā, a corresponding difference is to be noted in the Brāhmaṇa also.

2. Before sibilant plus consonant in external combination, the K. recension has everywhere anunāsika, while tha M. recension has anusvāra, thus : तस्मिꣳस्ते K., तस्मिꣳस्ते M.

3. The Kāṇva has, instead of ड, invariably either ळ or ऌ. So also mostly in the Āraṇyaka, although Roer prints ड.

4. The Kāṇva generally retains visarga before initial st, sp, sk, etc.

5. Kāṇva reads mostly तृच, not (as does M.) त्रिच.

6. Kāṇva writes ३, not (as does M.) २.

7. Kāṇva regularly writes the yajus देवस्य त्वा···हस्ताभ्यामाददे as follows : देवस्य त्वा···हस्ताभ्यां । आददे.

The Kāṇva readings which differ from those of the corresponding Mādhyandina passage.

Since only the Mādhyandina text is actually published the numbers at the left of the following pages refer of course to the Mādhyandina text. Then comes the distinctive reading of the Kāṇva text. I have not thought it worth while to give the M. reading (since this can at once be found in Weber's edition) nor the K. reference (since this can be found in the Tabular Concordance).

Simple misprints of accents in Weber's edition have generally been left unnoticed.

Distinctive readings of Kāṇva recension in M. Book 6.

VI. 1. 1^{1} तपसा ऋषꣳस्तस्माद्दषयः

1^{4} सप्तानां not सप्तानां; यत्सर्वस्मिन्नात्मन्नश्नयन्त तस्मादु शरीरम्

1^{18}···स श्रान्तस्तेपानो मृदमसृजत सो ऽवेदन्यद्वा एतद्रूपं भूयो वै भवति श्राम्याण्येवेति स श्रान्तस्तेपानः शुष्कापमसृजत सो ऽवेदन्यद्वा एतद्रूपं भूयो वै भवति श्राम्याण्येवेति स श्रान्तस्तेपान ऊषसिकतमसृजत सो ऽवेदन्यद्वा एतद्रूपं भूयो वै भवति श्राम्याण्येवेति स श्रान्तस्तेपानः शर्करमश्मानमयो हिरण्यमोषधिवनस्पत्यसृजत

2^{18}···संवत्सरः सो ऽथ या अस्य ताः पञ्च···

2^{31}···यत उपस्पृश्य यजुर्वदतीति हैक आहुः···

2. 2^{40}···यज्ञो भिषज्यितो (var. भिषज्जितो) भवतीति···

VI. 3. 1^{14}...स्वर्गेयाय (as the Saṃhitā)

3^{8} ... निचिकीषत (instead of निचिकीष, an error in Weber's edition ?)

3^{11} ... भूमेर् instead of भूम्यै

3^{18} ... अब्रुवन्किमिममभ्युत्क्रमयिष्याम इति ...

4. 4^{4} ... शिवो (instead of शिखा, an error in Weber's edition ?)

4^{8} ... अपां वा एष गर्भः (instead of अपाꣳ ह्येष गर्भः)

4^{18} ... ऽगिमादधाति सिकता

6. 1^{22} तानि हैक उखा॰

2^{1} s. f. ... वीर्यवत्तरः

3^{9} s. f. ...पूतनासु सासहिः (one of the MSS. as M.)

7. 2^{4}...कविर्विश्वा रूपाणि (one of the MSS. as M.)

8. 1^{14}...दैव्यो ऽतिथिः (दैवो a misprint of Weber's ?)

2^{9}...यूयाद् (instead of युयाद्)

Distinctive Kāṇva readings in M. Book 7.

VII. 1. 1^{9}...नो वा अग्निः (instead of न वा अ॰)

1^{15}...नो वा अस्थिषु (instead of न वा अ॰)

1^{48}...योना अभारुखे॰ (as the Saṃhitā)

2. 1^{16} s. f. ...तावत्तद्भवति (instead of तावतैव...॰मपहते)

2^{1}... परिग्राहेण

2^{8}...विकृषति न पक्षपुछेष्वात्मꣳस्तदन्नं...

2^{11}...रथवाहणमित्येतद्धि...

$2.^{19}$...इमे चत्वारः शीर्षन्निरुक्ताः

3^{8}...सजोषसा अश्विनेति (as the Saṃhitā)

4^{17}...पच्यते स यत्कृष्ट एव...

3. 1^{9}...विक्रियते ऽसाद्रेतसो...

1^{31}...इत्येतच्चित्रोतयो...(cp. Ind. Stud., Vol. X, 408^{5})

1^{42}...उत्सन्नं (instead of उत्सन्ने)

2^{17}...स्याद्यदि नाश्वो ऽप्यनड्वानेव स्यादा॰

2^{17}... ॰मारोहेद्यमु वा आत्मना...

4. 1^{42}... ॰तदुपदधातीन्द्राग्नी उ वै सर्वे...

2^{28}...विराट् च हेमौ लोकौ स्वराट् च तावेतज्ज्योतिर्धारयतो नानोपदधाति...

VII. 4. 2^{24}...विराट् च हेमौ (instead of विराड्वहेमौ);... प्रजातिमेव (two MSS. instead of प्रजापतिमेव)

2^{29}...वासन्तिका ऋतू इति (as the Saṃhitā)

5. 1^{8}...अपां गम्भन्त्सीदेति (a misprint in Weber's edition)

1^{21}...महान्भूत्वा (instead of महा भूत्वा)

1^{27}...°र्थस्त्र्यनैषा (a misprint in Weber's edition)

2^{32}...°त्सहस्राक्ष (as the Saṃhitā)

2^{36}...देवतमग्रमाप्नुवन्ति

Distinctive Kāṇva readings in M. Book 8.

VIII. 1. 2^{10}...°श्रासृजन्तैतावानु वै सर्वो...

4^{1}...यत्प्राणान्बिभ्रति...

2. 1^{5}...°तास्त्वा देवता...

1^{16}...ग्रैष्मा ऋतू इति (as the Saṃhitā)

3. 1^{8} इन्द्राग्नी

2^{5}...वार्षिका ऋतू इति, and 6: ...शारदा ऋतू इति (as the Saṃhitā; but in K. 7 as the Mādhyandina text)

4. 1^{10}...स पञ्चदशाहान्या° (omitting च)

1^{17}...त्रयोदश मासाः ...

2^{2} sqq. ... मृत्योः before स्पृ°

2^{3} s. f. पाप्मनो (a misprint in Weber's edition)

$2^{6, 8, 9}$...वातः स्पृ°, गर्भाः स्पृ°, °दोजः स्पृ°

2^{9}...अदितेर्भागो (as the Saṃhitā)

2^{14}...हैमन्तिका ऋतू इति (id.)

3^{12} शूद्रार्या असृज्ये° (id.)

5. 1^{4}...तद्यदेताभिरेतं लोक°

1^{12}...चितिरग्निरु ब्रह्म (omitting वै)

7. 2^{16}...बृहस्पतिरस्निग्योजा असीष° (as the Saṃhitā) ; ... अनुष्टुब्वाग्विन्द्र

Distinctive Kāṇva readings in M. Book 9.

XI. 1. 1^{24}...मा भेर्मो रोङ्मो (as the Saṃhitā)

2. 1^{1}...उपवसथ्ये ऽइन्द्रा° (thus accented; instead of उपवसथीये)

3^{9}...समिद्धे अग्ना अधि (as the Saṃhitā)

3^{10}...श्रीरणाः (id.)

IX. 2. 3[20] अथोपातियन्तीन्द्रं...

3[28]...चतुरियक्ष्यमाणा... (thus M., as the Saṃhitā, the other MSS. read as Mādhyandina)

3. 4...वाजप्रसव्य (thus accented throughout!, instead of °प्रसवीय)

4. 4[3]...युनग्मि (one MS., as the Saṃhitā); तेन गमेम (omitting वयं, as the

4[4]...पक्षा अजरौ (as the Saṃhitā) [Saṃhitā)

4[4]...°स्यपहꣳस्यन्न इति यथैव यजुस्तथा बन्धुस्ताभ्यां पतेम...

4[18]...एते यजुषी (instead of°ꣳन य°)

5. 1[18,28]...ऊचुर् (instead of अब्रुवन्)

1[47]...कृणवाथाविर° (one MS., as the Saṃhitā)

1[50]...नो (instead of णो, as is also the reading of the Mādhyandina Saṃhitā; a misprint of Weber's ?)

1[57]...तस्मिन्दक्षिणां ददाति...(instead of दधाति, a misprint of Weber's ?)

1[62]...यो न्वा इमं (instead of यो न्वेव)

1[64]...दयंपाति°...;...चिकीषामहा इति

2[14]...वि वा मृत्यै° (one MS., the other MSS. त्रि°)

Distinctive Kāṇva readings in M. Book 10.

X. 1. 1[6] ते यदा स्तुवते यदानुश_सति omitted.

4[10]...°रथवाहणि° both times.

3. 3[8]...भूयेळयति, with ळ most of the MSS., with ल one MS.

4. 3[15-17] एकचत्वारिꣳशद°, एकसप्तति°, सप्तचत्वारिꣳशद° (cp. K. Z. XXXI, p. 26)

4[2]...सहस्रसंवत्सरस्य (cp. ib. p. 28)

5. 5[2]...यद्यु हैनं (instead of यद्यहैनं)

*Distinctive Kāṇva readings in M. Book 11.**

XI. 4. 1[6]...इमश्रूण्यौपपक्षाणि

2[1]...°त्प्रतिप्रति (instead of °प्रति°)

No other variants of any significance.

Distinctive Kāṇva readings in M. Book 12.

XII. 1. 3[28]...°र्यथामपात्रमुदक आसिक्ते विमृत्येदेवꣳ हैव ते विमृत्येयुरꣳ

3. 3[10,14]...सहस्रसंवत्सरस्या (cp. K. Z. XXXI, page 28)

*See also Kāṇva recension, Kāṇḍa 3.

XII. 4. 2⁹...तत्र ब्रूयात्परासिचत (better reading ; aorist !)

5. 1¹³...प्रजिजनयिषेत्ता° (cp. K. Z. l. c. p. 26)

7. 2¹...वावाञ्छं वा (the better reading)

3⁹ वायोः पूतः पवित्रेण प्राङ् सोमो अतिद्रुत इति सोमवामिनः पुनाति (as the Saṃhitā)

3¹⁰ वायोः पूतः पवित्रेण प्रत्यङ् सोमो अतिद्रुत इति सोमातिपूतस्य (as the Saṃhitā)

3²²...वि मा पाप्मन (instead of पाप्मना) वृङ्क्तेति (id.)

8. 1⁴...सरस्वतीमश्विना इन्द्रम° (as the Saṃhitā)

2⁸...प्रतिदर्शम° (but some MSS. प्रती°)

3⁸...क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसीति (as the Saṃhitā)

Distinctive Kāṇva readings in M. Book 13.

XIII. 1. 2²...सꣳस्क्रियते (instead of सꣳस्त्रियते)

2⁹...यो ऽश्वमेधेन यजते...

3⁵, 6⁸...°त्पशोः स्क°

3⁸...जुहुयात्पशु°

2. 2⁵ अश्विना अधो° (as the Saṃhitā)

2¹²...सꣳस्करोति...

8² घ्नन्त्यु वा...

8⁵...नैभ्यः प्राणा अपक्रामन्त्या° (cp. Ind. Stud. vol. X, p. 409⁴);...प्रोर्ण्वाथा... (as the Saṃhitā)

3. 1⁴...प्रत्यदध्युर्यच्चतुष्टो°

4⁵...आयास्या (instead of आयस्यो)

6⁴...होतव्यांऽ...

4. 1¹⁵...पथन्वत्यन्या (cp. K. Z. vol. XXXI, page 26)

2²...यज्ञवसमृद्धो...

2¹³...प्रमीये (instead of प्रमिये)...; त्रिष्टुभौ भवत इन्द्रियं वै...

2¹⁶...तद्यन्न (instead of तद्यंन)...; पराङेवेदꣳ (instead of परागे°)

5. 2²...°पनिपातयन्त्य° ; ... संप्रोर्ण्वन्ति; प्रोर्ण्वाथा°

6. 1¹¹...°मे च लोकाः सं° (a misprint of Weber's)

7. 1¹ s.f. ...सर्वेषां भूतानाꣳ श्रैष्ठ्यꣳ...

8. 1¹ अथास्मै कल्याणं कुर्वन्ति omitted.

1⁵...°स्त्रक्तीनि ताः श्मशानानि...

XIII. 8. 1[10] s. f. ...करवाणीति

1[15] s. f. ...तद्वद्धं (instead of तद्बबद्धृ), but 8. 3[10] तद्बद्ध beside तद्वद्धं

1[19]...°सृष्टाभिः स्प°

2[6]...जघनार्धेन दक्षिणाग्नेः°...

3[2]...अथैनं निर्वपति...

4[8]...प्रतरता सखायः (with the Saṃhitā)

4[9]...चारु गव्यं (rightly !)

4[10]...पुराण्यासन्दी...

Distinctive Kāṇva readings in M. Book 14.

XIV. 1. 1[11]...वीरो ऽपादिति...

1[14]s. f. ...यदिदं किं चादन्ति (probably better)

1[20] s. f. ...भवतीति

1[38]...नेदेतमभिष्टीवानीति

2[2]...कृष्णाजिने संभरति (rightly, cp. VI. 4. 1[6]; Eggeling's translation of this passage S. B. E. XLIV, should be corrected accordingly and his note 2 on page 448 cancelled)

2[5]...समभवद्यज्ञो वै विकङ्कतो यज्ञेनैवै°

2[10]...वन्त्रिय (accent uncertain; instead of वन्त्र्य, with the Saṃhitā)

2[11]...इयत्यग्र आसीरिती° (perhaps a Saṃhitā difference)

2[12]...पूयन्निवाशयत and (the second time)°वाशयत

2[12]...स्रौषीदिति (instead of स्तौषीदिति; the K. reading undoubtedly the better one); अथ यदेनमिन्द्र ओजसा...

2[14]...पाङ्क्ताः पशवः (instead of पाङ्क्तः पशुः)

2[17]...शीर्ष्ण इत्यसावेव बन्धुरथ प्रयौति मखाय त्वा मखस्य त्वा शीर्ष्ण इत्यसावेव बन्धुरथ मृत्पिण्डमपादाय...

2[21]...एतदकुर्वन्यथा...(instead of °कुर्वत यथा)

3[12]...after आसादयति follows: उत्तरो वै प्रजा तस्मादुत्तरत आसादयति ॥

3[19]...°रेवात्मन्धत्ते तथो ह स सर्वमायुरेति

3[27]...तदिदं क्षत्रं विशा परि°...

3[33, 34]...विद्याद्यथा त्वेव रुचितः स्यात्तथा धवितव्यमथैत°

4[16] s. f. ...योषा पत्नी मिथुनेनैवैनमेतत्प्रजननेन समर्धयति कृत्स्नं करोति

2. 1 Kaṇḍikā 3 is preceded by 4.

XIV. 2. 1^{7}...गौरथोच्चैराह्वयति (the better reading !);...असावेहि, thrice.

1^{8}...इन्द्रस्य प्रिया पत्न्यसावेतस्या उष्णीषो...; तदाह तमेवास्या एतत्करोति

1^{9} अथ वत्समुपाजैति पूषासीत्ययं वै पूषा यो ऽयं पवत एष वा इदꣳ सर्वं पुष्यति यदिदं किं च वर्षत्येष वा एतासां प्रष्यायिता तस्मादाह पूषासीति ॥

$1^{11,\ 19}$ अश्विनावेवैतदाह omitted.

1^{18}...गोः क्षीरमा° (thus accented !)

2^{1}...नाष्ट्रा रक्षाꣳसि (instead of र° ना°); एवैष (instead of एवैनमेष)

2. $2^{2,\ 3}$ s. f. ...स्वाहेति

2^{3} s. f. ...एवमस्यैष उद्धार ऋते देवेभ्यः

2^{13} (init.)...महावीरे प्रत्यानयति (cp. Kaṇḍikā 40)

2^{16}...सर्वान् (instead of विश्वान्, with the Saṃhitā)

2^{19} अथ ब्रह्मामन्त्रयते...

2^{23}...नमस्करोति (instead of निह्नुते)

2^{27}...व्रश्च्य पिन्वस्वेत्यवतदाह...

2^{28}...यजमानस्योर्ध्वो वा एष एतत्पिन्वित्वाथ यां दिशं...

2^{46}...सर्वस्येव (instead of सर्वस्मा इव)

2^{47}...सर्वमेष सर्ववेदसे प्रवृञ्ज्यात्सर्वं वै सर्ववेदसꣳ सर्वमेष वाजपेये राजसूये प्रवृञ्ज्यात्सर्वꣳ हि तत्सत्ते प्रवृञ्ज्यात्सर्वं वै सत्त्ꣳ सर्वमेष विश्वजिति सर्वपृष्ठे प्रवृञ्ज्यात्सर्वं वै विश्वजित्सर्वपृष्ठः सर्वमेष एतान्यस्य प्रवर्जनान्यतो नान्यत्र ॥

3. 1^{12}...तन्नाष्ट्रा एवैतद्रꣳ

1^{21} s. f. त्रीणि...°न्नेतदधाति omitted.

1^{27} अथ चात्वाले ऽप उपस्पृशति सुमित्रिया न आप ओषधयः सन्त्विति यावद्वा एतेन प्रचरन्त्यापश्च (thus accented !) ह वा अस्मात्तावदोषधयश्चापक्रम्येव तिष्ठन्ति (thus accented) तदु तामिर्मित्रधेयं कुरुते दुर्मित्रास्तस्मै etc.

1^{28} s. f. ...तेजो मयि धेहीत्यग्निमेवैतया समिन्धे स एनꣳ समिद्धस्तेजसा समिन्धे

2^{16} s. f. त्रयोदशैता आहुतीर्जुहोति...;...संवत्सरो वै प्रजापतिः

$2^{2,\ 18-20}$...यत्किं चिद्विवृहं (instead of यत्किं च विं°)

——:o:——

The distinctive readings of the Āraṇyaka are not given here, as both recensions are accessible (the Mādhyandina in Weber's edition, the Kāṇva in the Bibliotheca Indica). A few remarks may here suffice. The Kāṇva text in Röer's

edition has throughout the *ḍ* in such words as *ṣoḍaśa* etc., whilst the MSS. present as often as not the *ḷ*. A curious point may be noticed in XIV. 9. 1. 12–16 (M.), where in the Kāṇva recension the ablative *āhutyai* occurs as against *āhuteḥ* of the Mādhyandinas. There, then, the roles of the two Śākhās (see Introduction, chapter III, section 23a) seem to be reversed. Also see footnote 1 in section 3, chapter IV of the Introduction.

——:)o(:——